# गृह्यसूत्राणि①

# गृह्यसूत्राणि①


1. गृह्यसूत्राणि
2. ०१ सामान्यपरिभाषाः
    1. ०१ ०१ अथ कर्माण्य्
    2. ०१ ०२ उदगयन-पूर्वपक्षाहः-पुण्याहेषु
    3. ०१ ०३ यज्ञोपवीतिना कार्याणि
    4. ०१ ०४ प्रदक्षिणम् प्रदक्षिणम्
    5. ०१ ०५ पुरस्तादुदग्वोपक्रमः अनियमे
    6. ०१ ०६ तथाऽपवर्गः तेषामपवर्गोऽपि
    7. ०१ ०७ अपरपक्षे पित्र्याणि
    8. ०१ ०८ प्राचीनावीतिना
    9. ०१ ०९ प्रसव्यम्
    10. ०१ १० दक्षिणतोऽपवर्गः
    11. ०१ ११ निमित्तावेक्षाणि नैमित्तिकानि
3. ०२ अग्निमुखनिरूपणम्
    1. ०१ १२ अग्निमिध्वा
    2. ०१ १३ प्रागुदगग्रैर्वा उक्ताः
    3. ०१ १४ दक्षिणाग्रैः पित्र्येषु
    4. ०१ १५ दक्षिणाप्रागग्रैर्वा तत्र
    5. ०१ १६ उत्तरेणाग्निन्
    6. ०१ १७ सकृदेव मनुष्यसंयुक्तानि
    7. ०१ १८ एकैकशः पितृसंयुक्तानि
    8. ०१ १९ पवित्रयोस्सँस्कार आयामतः
    9. ०१ २० अपरेणाग्निम् पवित्रान्तर्हिते
    10. ०१ २१ ब्राह्मणन् दक्षिणतो
    11. ०१ २२ आज्यं विलाप्यापरेणाग्निम्
    12. ०२ ०१ येन जुहोति
    13. ०२ ०२ शम्याः परिध्यर्थे
    14. ०२ ०३ अग्निम्
    15. ०२ ०४ पैतृकेषु समन्तमेव
    16. ०२ ०५ इध्ममाधायाघारावाघारयति
    17. ०२ ०६ अथाज्यभागौ जुहोत्यग्नये
    18. ०२ ०७ यथोपदेशम् प्रधानाहुतीर्हुत्वा
    19. ०२ ०८ पूर्ववत् परिषेचनमन्वमँस्थाः
    20. ०२ ०९ लौकिकानाम् पाकयज्ञशब्दः
    21. ०२ १० तत्र ब्राह्मणावेक्षो
    22. ०२ ११ द्विर्जुहोति द्विर्निमार्ष्टि
4. ०३ वैवाहिकविषयाः
    1. ०२ १२ सर्व-ऋतवो विवाहस्य
    2. ०२ १३ सर्वाणि पुण्योक्तानि
    3. ०२ १४ तथा मङ्गलानि
    4. ०२ १५ आवृतश्चास्त्रीभ्यः प्रतीयेरन्
    5. ०२ १६ इन्वकाभिः प्रसृज्यन्ते
    6. ०३ ०१ मघाभिर्गावो गृह्यन्ते
    7. ०३ ०२ फल्गुनीभ्यां व्यूह्यते
    8. ०३ ०३ याङ् कामयेत
    9. ०३ ०४ इन्वकाशब्दो मृगशिरसि
    10. ०३ ०५ निष्ट्याशब्दस्स्वातौ छन्दसि
    11. ०३ ०६ विवाहे गौः
    12. ०३ ०७ गृहेषु गौः
    13. ०३ ०८ तया वरमतिथिवदर्हयेत्
    14. ०३ ०९ योऽस्यापचितस्तमितरया
    15. ०३ १० एतावद्गोरालम्भस्थानमतिथिः

16. ०३ ११ सुप्तां रुन्दन्तीम्
17. ०३ १२ दत्ताङ् गुप्ताम्
18. ०३ १३ नक्षत्रनामा नदीनामा
19. ०३ १४ सर्वाश्च रेफलकारोपान्ता
20. ०३ १५ शक्तिविषये द्रव्याणि
21. ०३ १६ नाना बीजानि
22. ०३ १७ पूर्वेषामुपस्पर्शने
23. ०३ १८ उत्तमम् परिचक्षते
24. ०३ १९ बन्धुशीललक्षणसम्पन्नामरोगामुपयच्छेत
25. ०३ २० बन्धुशीललक्षणसम्पन्नश्रुतवानरोग
26. ०३ २१ यस्याम्
5. ०४ विवाहप्रकरणम्
    1. ०४ ०१ सुहृदस्समवेतान् मन्त्रवतो
    2. ०४ ०२ तानादितो द्वाभ्यामभिमन्त्रयेत
    3. ०४ ०३ स्वयन् दृष्ट्वा
    4. ०४ ०४ चतुर्थ्या समीक्षेत
    5. ०४ ०५ अङ्गुष्ठेनोपमध्यमया चाङ्गुल्या
    6. ०४ ०६ प्राप्ते निमित्त
    7. ०४ ०७ युग्मान् समवेतान्
    8. ०४ ०८ उत्तरेण यजुषा
        1. स्नानम्
        2. अहतस्य वाससः परिधानम्
        3. योक्त्रबन्धनम्
    9. ०४ ०९ अथैनामुत्तरया दक्षिणे
    10. ०४ १० अग्नेर्
    11. ०४ ११ अथास्यै दक्षिणेन
    12. ०४ १२ यदि कामयेत
    13. ०४ १३ यदि कामयेत
    14. ०४ १४ गृभ्णामि त
    15. ०४ १५ अथैनामुत्तेरणाग्निन् दक्षिणेन
    16. ०४ १६ सखेति सप्तमे
    17. ०५ ०१ प्राग्घोमात् प्रदक्षिणमग्निम्
        1. षोडश प्रधानाहुतिमन्त्राः
            1. मन्त्रः
            2. १४ त्वन्नो अग्ने
    18. ०५ ०२ अथैनामुत्तरेणाग्निन् दक्षिणेन
    19. ०५ ०३ अथास्या अञ्जलावुपस्तीर्य
    20. ०५ ०४ तस्यास्सोदर्यो
    21. ०५ ०५ जुहोतीयन् नारीति
    22. ०५ ०६ उत्तराभिस्तिसृभिः
    23. ०५ ०७ होमश्चोत्तरया यथा
    24. ०५ ०८ पुनः परिक्रमणम्
    25. ०५ ०९ आस्थापनम् पुनरपि
    26. ०५ १० होमश्चोत्तरया **उत्तरया**
    27. ०५ ११ पुनः परिक्रमणम्
    28. ०५ १२ जयादि प्रतिपद्यते
    29. ०५ १३ परिषेचनान्तङ्
    30. ०५ १४ समोप्यैतमग्निमनुहरन्ति एतम्
    31. ०५ १५ नित्यः
    32. ०५ १६ धार्यः एष
    33. ०५ १७ अनुगतो मन्थ्यः
    34. ०५ १८ श्रोत्रियागाराद्वाहार्यः
    35. ०५ १९ उपवासश्चान्यतरस्य भार्यायाः
    36. ०५ २० अनुगतेऽपि वोत्तरया
    37. ०५ २१ उत्तरा रथस्योत्तम्भनी

38. ०५ २२ वाहावुत्तराभ्यां युनक्ति
39. ०५ २३ आरोहतीमुत्तराभिरभिमन्त्रयते अथ
40. ०५ २४ सूत्रे
41. ०५ २५ ते उत्तराभिरभियाति
42. ०५ २६ तीर्थस्थाणुचतुष्पथव्यतिक्रमे
    1. तीर्थादिव्यतिक्रमे जपः
43. ०६ ०१ नावमुत्तरयाऽनुमन्त्रयते अथ
44. ०६ ०२ न च
45. ०६ ०३ तीर्त्वोत्तराञ् जपेत्
46. ०६ ०४ श्मशानादिव्यतिक्रमे भाण्डे
47. ०६ ०५ क्षीरिणामन्येषां वा
    1. नद्याद्यतिक्रमे जपः
48. ०६ ०६ गृहानुत्तरया सङ्काशयति
49. ०६ ०७ वाहावुत्तराभ्यां विमुञ्चति
50. ०६ ०८ लोहितञ् चर्मानडुहम्
51. ०६ ०९ न च
52. ०६ १० उत्तरपूर्वे
    1. मन्त्रः
    2. उपवेषनम्
53. ०६ ११ अथास्याः पुँस्वोर्जीवपुत्रायाः
    1. मन्त्रः
54. ०६ १२ उदितेषु नक्षत्रेषु
55. ०७ ०१ अथैनाम् आग्नेयेन
56. ०७ ०२ पत्न्यवहन्ति
57. ०७ ०३ श्रपयित्वाभिघार्य
58. ०७ ०४ सकृदुपस्तरणाभिघारणे
59. ०७ ०५ अग्निर्देवता स्वाहाकारप्रदानः
60. ०७ ०६ अपि वा
61. ०७ ०७ अग्निस्स्विष्टकृद् द्वितीयः
62. ०७ ०८ सकृदुपस्तरणावदाने
63. ०७ ०९ मध्यात् पूर्वस्यावदानम्
64. ०७ १० मध्ये होमः
65. ०७ ११ उत्तरार्धादुत्तरस्य
66. ०७ १२ उत्तरार्धपूर्वार्धे होमः
67. ०७ १३ लेपयोः प्रस्तरवत्
68. ०७ १४ सिद्धमुत्तरम् परिषेचनम्
69. ०७ १५ तेन सर्पिष्मता
70. ०७ १६ योऽस्यापचितस्तस्मा ऋषभम्
71. ०७ १७ एवमत ऊर्ध्वम्
72. ०७ १८ पूर्णपात्रस्तु दक्षिणेत्येके
73. ०७ १९ सायम् प्रातरत
74. ०७ २० स्थालीपाकवद्दैवतम् देवतैव
75. ०७ २१ सौरी पूर्वाहुतिः
76. ०७ २२ उभयतः परिषेचनम्
77. ०७ २३ पार्वणेनातो ऽन्यानि
78. ०७ २४ यथोपदेशन् देवताः
79. ०७ २५ अग्निं स्विष्टकृतम्
80. ०७ २६ अविकृतमातिथ्यम्
81. ०७ २७ वैश्वदेवे विश्वे
    1. वैश्वदेवम्
    2. देवयज्ञः
    3. पितृयज्ञः
    4. भूत-यज्ञः
    5. मनुष्य-यज्ञः
    6. ब्रह्मयज्ञः

                7. रौद्रम्
        82. ०७ २८ पौर्णमास्याम् पौर्णमासी
        83. ०८ ०१ उपाकरणे समापने
        84. ०८ ०२ सदसस्पतिर्द्वितीयः
                1. उपाकर्मोत्सर्जनयोर् द्वैविध्यम्
                2. काण्डानि
                3. उपाकरणसमापने
                4. अध्यायोपाकरणसमापने
                5. आर्षेय-पाठ-पक्षः
                6. सारस्वत-पाठ-पक्षः
                7. आर्षेय-पाठिष्व् आचारभेदाः
                8. शुक्रियाणाम्
                9. अध्यायानाम्
                10. काण्डानाम्
                11. वेदव्रतानि
                12. प्रयोगः
                13. अध्यायोपाकरणस्य
                14. उत्सर्गः
                15. सौम्ये विशेषः
                16. प्राजापत्य-व्रतम्
                17. आरम्भः
                18. समाप्तिः
                19. आग्नेयम्
                20. वैश्वदेवम्
                21. सौम्यम् - शुक्रियम्
                22. उपाकर्म
                23. समाप्तिः
                24. सूत्रपरीक्षा
                25. सूत्राव्यर्थता
                26. सदसस्पतेर् द्वितीयता
                27. होम-स्थान-निर्देशः
                28. आक्षेपान्तरम्
        85. ०८ ०३ स्त्रियाऽनुपेतेन
        86. ०८ ०४ यथोपदेशङ् काम्यानि
        87. ०८ ०५ सर्वत्र स्वयम्
        88. ०८ ०६ आपन्माश्रीः श्रीर्मागादिति
        89. ०८ ०७ एतदहर्विजानीयाद्यदहर्भार्यामावहते
        90. ०८ ०८ त्रिरात्रमुभयोरधश्शय्या
        91. ०८ ०९ तयोश्शय्यामन्तरेण दण्डो
        92. ०८ १० तञ् चतुर्थ्याऽपररात्र
                1. शेष-होम-मन्त्राः
                        1. वध्वाश् शिरस्य् आज्यशेषानयनम्
                        2. परस्परवीक्षणम्
                        3. अथ जपः
        93. ०८ ११ अन्यो वैनामभिमन्त्रयेत
        94. ०८ १२ यदा मलवद्वासाः
6. ०५ ऋतुसमवेशनम्
        1. ०८ १३ रजसः प्रादुर्भावात्
        2. ०९ ०१ चतुर्थीप्रभृत्याषोडशीमुत्तरामुत्तरां
7. ०६ कर्मान्तराणि
        1. ०९ ०२ अर्थप्राध्वस्य परिक्षवे
        2. ०९ ०३ एवमुत्तरैर्यथालिङ्गञ्
        3. ०९ ०४ उभयोर्हृदयसंसर्गेऽप्सुस्त्रिरात्रावरम्
        4. ०९ ०५ श्वस्तिष्येणेति
        5. ०९ ०६ श्वोभूते

    6. ०९ ०७ वश्यो भवति
    7. ०९ ०८ सपत्नीबाधनञ्च
    8. ०९ ०९ एतेनैव कामेनोत्तरेणानुवाकेन
    9. ०९ १० यक्ष्मगृहीतामन्यां वा
    10. ०९ ११ वधूवास उत्तराभिरेतद्विदे
8. ०७ उपनयनप्रकरणम्
    1. १० ०१ उपनयनं व्याख्यास्यामः
    2. १० ०२ गर्भाष्टमेषु ब्राह्मणमुपनयीत
    3. १० ०३ गर्भैकादशेषु राजन्यम्
    4. १० ०४ वसन्तो ग्रीष्मश्
    5. १० ०५ ब्राह्मणान् भोजयित्वाशिषो
    6. १० ०६ त्रींस्त्रीन्
    7. १० ०७ वपन्तमुत्तरयानुमन्त्रयते
    8. १० ०८ आनडुहे शकृत्पिण्डे
    9. १० ०९ स्नातम् अग्नेर्
    10. १० १० वासः
        1. वासः-परिधापनम्
    11. १० ११ मौञ्जीम् मेखलाम्
        1. मौञ्जी
        2. अजिनमन्त्रः
        3. ११ मित्रस्य चक्षुर्धरुणम्
    12. १० १२ उत्तरेणाग्निन् दर्भान्
        1. हस्तग्रहणम्
        2. परिदानम्
        3. उपनयनम्
    13. ११ ०१ ब्रह्मचर्यमागामिति कुमार
    14. ११ ०२ प्रष्टम् परस्य
    15. ११ ०३ शेषम् परो
    16. ११ ०४ प्रत्यगाशिषञ् चैनम्
    17. ११ ०५ उक्तमाज्यभागान्तम्
    18. ११ ०६ अत्रैनमुत्तरा आहुतीर्हावयित्वा
        1. १६ त्वमग्ने अयाऽस्यया
    19. ११ ०७ परिषेचनान्तङ्
    20. ११ ०८ पुरस्तात्प्रत्यङ्ङासीनः कुमारो
    21. ११ ०९ तस्मा अन्वाह
    22. ११ १० पच्छोऽर्धर्चशस्ततस्सर्वाम्
    23. ११ ११ व्याहृतीर्विहृताः
        1. पादशः
        2. अर्धशः पूर्णश्च
        3. पुनः पूर्णोच्यते कैश्चित्
    24. ११ १२ कुमार उत्तरेण
    25. ११ १३ कर्णावुत्तरेण
    26. ११ १४ दण्डमुत्तरेणाऽऽदत्ते
    27. ११ १५ पालाशो दण्डो
    28. ११ १६ वार्क्षो दण्ड
    29. ११ १७ स्मृतञ् च
        1. वरदानम्
            1. उत्थापनमन्त्रः
        2. आदित्योपस्थानम्
    30. ११ १८ यङ् कामयेत
    31. ११ १९ त्र्यहमेतमग्निन् धारयन्ति
    32. ११ २० क्षारलवणवर्जनञ् च
    33. ११ २१ 'परित्वे' ति
        1. समिदाधानम्
    34. ११ २२ एवमन्यस्मिन्नपि

    35. ११ २३ उत्तरया सँशास्ति
    36. ११ २४ वासश्चतुर्थीमुत्तरयादत्तेऽन्यत्परिधाप्य
9. ०८ उपाकर्मोत्सर्जनप्रकरणम्
    1. ११उ ०१
    2. ११उ ०२
    3. ११उ ०३
    4. ११उ ०४
    5. ११उ ०५
    6. ११उ ०६
    7. ११उ ०७
    8. ११उ ०८
    9. ११उ ०९
        1. मन्त्राः
    10. ११उ १०
    11. ११उ ११
    12. ११उ १२
    13. ११उ १३
    14. ११उ १४
    15. ११उ १५
    16. ११उ १६
    17. ११उ १७
    18. ११उ १८
    19. ११उ १९
    20. ११उ २०
    21. ११उ २१
    22. ११उ २२
    23. ११उ २३
    24. ११उ २४
    25. ११उ २५
    26. ११उ २६
10. ०९ समावर्तनम्
    1. १२ ०१ वेदमधीत्य स्नास्यन्
    2. १२ ०२ नैनमेतदहरादित्योऽभितपेत्
    3. १२ ०३ मध्यन्दिनेऽग्नेरुपसमाधानाद्याज्यभागान्ते
    4. १२ ०४ जघनार्धे व्रजस्योपविश्य
    5. १२ ०५ तां स
    6. १२ ०६ एवं
    7. १२ ०७ स्नानीयोच्छादितस्स्नातः
    8. १२ ०८ उत्तरेन यजुषाऽहतमन्तरम्
    9. १२ ०९ तस्य दशायाम्
    10. १२ १० परिषेचनान्तङ् कृत्वताभिरेव
    11. १२ ११ एवमुत्तरैर्यथालिङ्गं
    12. १२ १२ वाचं यच्छत्यानक्षत्रेभ्यः
    13. १२ १३ उदितेषु नक्षत्रेषु
    14. १२ १४ रातिना सम्भाष्य
11. १० मधुपर्कः
    1. १३ ०१ अथैतदपरन् तूष्णीमेव
    2. १३ ०२ यत्रास्मा अपचितिम्
    3. १३ ०३ एवमुत्तराभ्यां यथालिङ्गम्
    4. १३ ०४ आपः पाद्या
    5. १३ ०५ उत्तरयाऽभिमन्त्र्य दक्षिणम्
    6. १३ ०६ प्रक्षालयितारमुपस्पृश्योत्तरेण
    7. १३ ०७ कूर्चाभ्याम् परिगृह्य
    8. १३ ०८ उत्तरयाऽभिमन्त्र्याञ्जलावेकदेश
    9. १३ ०९ शेषम्

10. १३ १० दधि मध्विति
11. १३ ११ त्रिवृतमेके घृतम्
12. १३ १२ पाङ्क्तमेके धानास्सक्तूंश्च
13. १३ १३ उत्तराभ्यामभिमन्त्र्य
14. १३ १४ प्रतिगृह्यैव राजा
15. १३ १५ गौरिति गाम्
16. १३ १६ उत्तरयाभिमन्त्र्य तस्यै
17. १३ १७ यद्युत्सृजेदुपांशूत्तराञ्
18. १३ १८ अन्नम्
19. १३ १९ आचार्यायर्त्विजे श्वशुराय
20. १३ २० सकृत्प्रवक्त्रे चित्राय

12. ११ सीमन्तोन्नयनम्
    1. १४ ०१ सीमन्तोन्नयनम् प्रथमे
    2. १४ ०२ ब्राह्मणान् भोजयित्वाऽऽशिषो
    3. १४ ०३ परिषेचनान्तङ् कृत्वा
    4. १४ ०४ 'गायतम्' इति
    5. १४ ०५ उत्तरयोः पूर्वा
    6. १४ ०६ नदीनिर्देशश्च यस्याम्
    7. १४ ०७ यवान् विरूढानाबध्य
    8. १४ ०८ उदितेषु नक्षत्रेषु
13. १२ पुंसुवनम्
    1. १४ ०९ पुँसवनं व्यक्ते
    2. १४ १० न्यग्रोधस्य या
    3. १४ ११ अनवस्नातया कुमार्या
    4. १४ १२ पुमाँसञ् जनयति
    5. १४ १३ क्षिप्रँ सुवनम्
    6. १४ १४ अनाप्रीतेन
        1. मन्त्रः
    7. १४ १५ यदि जरायु
14. १३ जातकर्म
    1. १५ ०१ जातं वात्सप्रेणाभिमृश्योत्तरेण
        1. उपस्थ आधानम्
        2. अभिमन्त्रणम्
        3. मूर्धन्यवघ्राणम्
        4. दक्षिणकर्णे-जपः
    2. १५ ०२ नक्षत्रनाम च
    3. १५ ०३ तद्रहस्यम् भवति
    4. १५ ०४ मधु घृतमिति
        1. स्नापनम्
        2. प्रतिज्ञा
        3. शान्तिवचनम्
        4. अवर्तिनिवारणम्
        5. सूर्यग्रहणमोक्षनिदर्शनम्
        6. दधि-घृत-प्राशनम्
    5. १५ ०५ उत्तरया मातुरुपस्थ
        1. दक्षिणे स्तने प्रतिधाप्य
        2. पृथिव्या अभिमर्शः
        3. संविष्टस्याभिमर्शनम्
    6. १५ ०६ उत्तरेण यजुषा
        1. सूतकहोमः
    7. १५ ०७ एवमहरहरानिर्दशतायाः
15. १४ नामकरणम्
    1. १५ ०८ दशम्यामुत्थितायां स्नातायाम्
    2. १५ ०९ द्व्यक्षरञ् चतुरक्षरम्
    3. १५ १० अपि वा

        4. १५ ११ अयुजाक्षरङ् कुमार्याः
        5. १५ १२ प्रवासादेत्य
            1. कर्णे जपः
        6. १५ १३ कुमारीमुत्तरेण
16. १५ अन्नप्राशनम्
        1. १६ ०१ जन्मनोऽधि षष्ठे
        2. १६ ०२ तैत्तिरेण माँसेनेत्येके
17. १६ चौलम्
        1. १६ ०३ जन्मनोऽधि तृतीये
        2. १६ ०४ ब्राह्मणानाम् भोजनम्
        3. १६ ०५ सीमन्तवद् अग्नेर्
        4. १६ ०६ अपरेणाग्निम् प्राञ्चमुपवेश्य
        5. १६ ०७ यथा वैषाम्
        6. १६ ०८ अपाँ
        7. १६ ०९ क्षुरँ प्रक्षाल्य
        8. १६ १० तेन त्र्यहम्
        9. १६ ११ वरन् ददाति
        10. १६ १२ एवङ् गोदानम्
        11. १६ १३ अग्निगोदानो वा
        12. १६ १४ संवत्सरङ् गोदानव्रत(२)मेक
        13. १६ १५ एतावन्नाना सर्वान्
        14. १६ १६ उदकोपस्पर्शनमिति छन्दोगाः
18. १७ गृह्यनिर्मणम्
        1. १७ ०१ दक्षिणाप्रत्यक्प्रवणमगारावकाशमुद्धत्य
        2. १७ ०२ एवन् त्रिः
        3. १७ ०३ क्लृप्तमुत्तरयाभिमृश्य
            1. ०२ स्योना पृथिवि
            2. मन्त्रः - द्वारस्थूणामन्त्रणम्
        4. १७ ०४ एवमितराम् एताभ्यामेव
        5. १७ ०५ यथाखातमितरा अन्ववधाय
        6. १७ ०६ सम्मितमुत्तरैर्यथालिङ्गम्
19. १८ गृहप्रवेशविधिः
        1. १७ ०७ पालाशं शमीमयम्
            1. अगारप्रतिपादनम्
            2. प्रतिष्ठापनम्
            3. इध्मादीपनम्
            4. अग्नि-स्थापनम्
            5. अग्निविवेकः
            6. औपासनादि-प्रवेशः
            7. प्रतिष्ठापनम्
            8. अग्निविवेकः
        2. १७ ०८ तस्माद्दक्षिणमुदधानायतनम् भवति
        3. १७ ०९ तस्मिन्विषूचीनाग्रान् दर्भान्
        4. १७ १० तस्मिन्नुत्तरेण यजुषा
        5. १७ ११ दीर्घमुत्तरयाऽनुमन्त्रयते अथ
        6. १७ १२ अग्नेरुपसमाधानाद्याज्यभागान्ते
            1. २१ अमीवहा वास्तोष्पते
        7. १७ १३ परिषेचनान्तङ् कृत्वोत्तरेण
            1. अग्न्यन्तरानयनम्
            2. ब्राह्मणभोजनम्
20. १९ बालग्रहगृहीतस्य कुमारस्य तन्निवर्तकं कर्म
        1. १८ ०१ श्वग्रहगृहीतङ् कुमारम्
        2. १८ ०२ अगदो भवति
        3. १८ ०३ शङ्खिनङ् कुमारम्
        4. १८ ०४ अगदो भवति

21. २० सर्पबलिः
    1. १८ ०५ श्रावण्याम्
    2. १८ ०६ पार्वणवदाज्यभागान्ते
    3. १८ ०७ उत्तराभिस्तिसृभिरारग्वधमय्यस्समिधः
    4. १८ ०८ आज्याहुतीरुत्तराः
    5. १८ ०९ जयादि प्रतिपद्यते
    6. १८ १० परिषेचनान्तङ् कृत्वा
        1. बलिनिर्वापः
            1. बलिहरण-सङ्कल्पः
    7. १८ ११ तूष्णीं सम्पुष्का
    8. १८ १२ उत्तरैरुपस्थायापः
        1. प्रत्येत्य गृहपरिषेचनमन्त्रौ
        2. उपस्थानमन्त्राः
        3. मन्त्रः
    9. १९ ०१ धानाः कुमारान्
    10. १९ ०२ एवम् अत
    11. १९ ०३ मार्गशीर्ष्याम्
    12. १९ ०४ अहार्षमिति बलिमन्त्रस्य
    13. १९ ०५ अत्रैनमुत्सृजति
22. २१ आग्रयणस्थालीपाकः
    1. १९ ०६ अनाहिताग्नेराग्रयणम्
    2. १९ ०७ नवानाँ स्थालीपाकँ
23. २२ हेमन्तप्रत्यवरोहणम्
    1. १९ ०८ हेमन्तप्रत्यवरोहणम्
    2. १९ ०९ उत्तरेण यजुषा
        1. संवेशनमन्त्राः
    3. १९ १० दक्षिणतः पितोत्तरा
    4. १९ ११ सँहायोत्तराभ्याम्
        1. ०८ स्योना पृथिवि
    5. १९ १२ एवं संवेशनादि
24. २३ ईशानबलिः
    1. १९ १३ ईशानाय स्थालीपाकम्
    2. १९ १४ अपरेणाग्निन् द्वे
    3. २० ०१ उत्तरया
    4. २० ०२ लौकिक्या वाचोत्तरस्याम्
    5. २० ०३ मध्ये जयन्तम्
    6. २० ०४ यथोढमुदकानि प्रदाय
        1. हवनम्
    7. २० ०५ उत्तरेण
    8. २० ०६ पूर्ववदुत्तरैः
    9. २० ०७ ओदनपिण्डं संवृत्य
    10. २० ०८ अत्र रुद्रान्
    11. २० ०९ प्रथमोत्तमौ वा
    12. २० १० अभित एतमग्निम्
    13. २० ११ ता
    14. २० १२ गवाम् मर्गेऽनग्नौ
    15. २० १३ ईशानवदावाहनम्
    16. २० १४ चतुर्षु सप्तसु
    17. २० १५ क्षिप्रं यजेत
    18. २० १६ उत्तराभ्यामुपतिष्ठते
    19. २० १७ स्थालीपाकम् ब्राह्मणान्
    20. २० १८ क्षैत्रपत्यम् प्राश्नन्ति
    21. २० १९ यथा वैषाम्
25. २४ मासिश्राद्धप्रकरणम्
    1. २१ ०१ मासिश्राद्धस्यापरपक्षे

    2. २१ ०२ शुचीन् मन्त्रवतो
    3. २१ ०३ अन्नस्योत्तराभिर्जुहोति
        1. पितामहाय
        2. प्रपितामहाय
        3. अन्येभ्यः
    4. २१ ०४ आज्याहुतीरुत्तराः
    5. २१ ०५ एतद्वा विपरीतम्
    6. २१ ०६ सर्वमुत्तरैरभिमृशेत्
    7. २१ ०७ क्लृप्तान्वा प्रतिपूरुषम्
    8. २१ ०८ उत्तरेण यजुषोपस्पर्शयित्वा
    9. २१ ०९ भुक्तवतोऽनुव्रज्य
        1. उत्तरैर्दक्षिणापवर्गान् पिण्डान्दत्वा
        2. उत्तरैरुपस्थानम्
        3. उभयान् पिण्डान् परिषिञ्चति
        4. शेष-प्राशनम्
            1. पूर्वेद्युः
            2. निवेदनम्
            3. उपवीत-नियमः
            4. होमात् पूर्वम्
            5. आसनादि
            6. अर्घ्यादि
            7. अनुज्ञा
            8. होमः
            9. भोजनम्
            10. अभिमर्शादि
            11. स्पर्शनम्
            12. श्रावणादि
            13. परिकिरणम्
            14. तृप्तिवचनादि
            15. आशीर्वचनम्
            16. प्रेषणम्
            17. अनुव्रजनम्
            18. प्राधान्यम्
            19. आमश्राद्धम्
            20. प्रयोगः
            21. हिरण्यदानम्
            22. उपसंहारः
26. २५ अष्टकाश्राद्धम्
    1. २१ १० या माध्याः
    2. २१ ११ तस्यास्सायमौपकार्यम्
    3. २१ १२ अपूपञ् चतुश्शरावम्
    4. २१ १३ अष्टाकपाल इत्येके
    5. २२ ०१ पार्वणवदाज्यभागान्तेऽञ्जलिनोत्तरयाऽपूपाज्जुहोति
    6. २२ ०२ सिद्धश्शेषस्तमष्टधा कृत्वा
    7. २२ ०३ श्वोभूते दर्भेण
    8. २२ ०४ तूष्णीम् पञ्चाज्याहुतीर्हुत्वा
        1. श्वोभूते वपाहोममन्त्रः
    9. २२ ०५ माँसौदनमुत्तराभिः
    10. २२ ०६ पिष्टान्नमुत्तरया पिष्टेन
    11. २२ ०७ आज्याहुतीरुत्तराः
    12. २२ ०८ स्विष्टकृत्प्रभृति
    13. २२ ०९ अन्वष्टकायामेवैके
    14. २२ १० अथैतदपरन् दध्न
    15. २२ ११ अत एव
    16. २२ १२ तस्या मासिश्राद्धेन

27. २६ प्रकीर्णकर्माणि
    1. २२ १३ सनिमित्वोत्तरान् जपित्वाऽर्थम्
    2. २२ १४ रथं लब्ध्वा
    3. २२ १५ उत्तरेण यजुषाऽधिरुह्योत्तरया
    4. २२ १६ अश्वमुत्तरैरारोहेत्
    5. २२ १७ हस्तिनमुत्तरया
    6. २२ १८ ताभ्याँ रेषणे
        1. ०८ स्योना पृथिवि
    7. २२ १९ संवादमेष्यन् सव्येन
    8. २३ ०१ दक्षिणेन फलीकरणमुष्टिमुत्तरया
    9. २३ ०२ क्रुद्धमुत्तराभ्यामभिमन्त्रयेत
    10. २३ ०३ असम्भवेप्सुः परेषाँ
    11. २३ ०४ सिद्ध्यर्थे बभ्रुमूत्रेण
    12. २३ ०५ सिद्ध्यर्थे यदस्य
    13. २३ ०६ यङ् कामयेत
    14. २३ ०७ येन पथा
    15. २३ ०८ यद्येनं
    16. २३ ०९ आगारस्थूणाविरोहणे मधुन
    17. २३ १० परिषेचनान्तङ् कृत्वाऽभिमृतेभ्य
28. Appendix - +Dyugangā द्युगङ्गा
    1. Goals ध्येयानि
        1. संस्कृतानुवादः
        2. Contribution दानम्

# गृह्यसूत्राणि①

मूलम् अत्र ।

# ०१ सामान्यपरिभाषा:①

# ०१ ०१ अथ कर्माण्य्②

अथ कर्माण्य् आचाराद् यानि गृह्यन्ते।

▼

### ⑤

>

▼ Oldenberg

1. 1 Now (follow) the ceremonies (the knowledge of) which is derived from practice (and not from the Śruti).

▼ हरदत्तः

नमो रुद्राय यद्गृह्यमापस्तम्बेन निर्मितम् । क्रियते हरदत्तेन तस्य वृत्तिरनाकुला ॥ द्विप्रकाराणि कर्माणि–श्रुतिलक्षणानि आचारलक्षणानि च । तत्र श्रुतिलक्षणानि व्याख्यातानि । **अथे**दानीं **यानि** कर्माणि विवाहप्रभृतीनि **आचारात्** प्रयोगात् **गृह्यन्ते** ज्ञायन्ते, न प्रत्यक्षश्रुतेः, तानि व्याख्यास्यामः । किं प्रयोजनं सूत्रस्य? स्मार्तानां कर्मणां अधिकारः । तेन उदगयनादिनियमः -"सर्वत्र स्वयं प्रज्वलितेऽग्नाव्"(आप.गृ.८-५.) इत्येवमादीनि च गार्ह्येष्वेव कर्मसु भवन्ति, न श्रौतेषु । अत्राथशब्देन श्रौतोपदेशानन्तरं स्मार्तोपदेशं करिष्यामीति वदन् तदपेक्षामस्य दर्शयति । तत्र याः परिभाषाः "स त्रयाणां वर्णानां"(आप.परि १-२.) "मन्त्रान्तैः कर्मादीन् सन्निपातयेत्"(आप.परि.२-१.)"रौद्र, राक्षस"(आप.परि. २-९.) "तदिदं सर्वप्रायश्चित्त"मित्येवमाद्यास्ता इहापि भवन्ति (इदंकार्याणि) ॥

▼ सुदर्शनः

यो वर्णैरिज्यते नित्यैः कर्मभिश्चोदितैर्निजैः । तेभ्योऽ(१) पवर्गदो यश्च तं नमाम्यद्वयं हरिम्(२) ॥१॥ आपस्तम्बमुनिं वन्दे मन्दधीहितकाम्यया । योऽनुष्ठेयपदार्थानां क्रमकल्पमकल्पयत् ॥२॥ यत्कृतं वेदवद्भाष्यमाद्रियन्ते विपश्चितः । स कपर्दी चिरं जीयाद्वेदवेदार्थतत्त्ववित् ॥३॥ सुदर्शनार्यः(३)कुरुते गृह्यतात्पर्यनिर्णयम्(४) । केवलं वैदिकश्रद्धाप्रेरितो मन्दधीरपि ॥४॥

अथशब्द आनन्तर्यार्थः । तदर्थं पूर्ववृत्तमुच्यते । इह हि यज्ञा एकविंशतिभेदाः । तत्र च सप्त पाकयज्ञसंस्थाः- औपासनहोमो, वैश्वदेवं, पार्वण, मष्टका, मासिश्राद्धं, सर्पबलिं, रीशानबलिरिति । सप्त च हविर्यज्ञसंस्थाः–अग्निहोत्रं, दर्शपूर्णमासा, वाग्रयणं, चातुर्मास्यानि, निरूढपशुबन्धस्, सौत्रामणिः, पिण्डपितृयज्ञादयो दर्वीहोमा इति । (५)सप्तैव च सोमसंस्थाः–अग्निष्टोमो,ऽत्यग्निष्टोम, उक्थ्य, ष्षोडशी, वाजपेयो,ऽतिरात्रोऽप्तोर्याम इति । एते च नित्याः नियतप्रदोषादिकालीनजीवननिमित्तका इत्यर्थः । कुत एते नित्याः? "जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवा जायते ब्रह्मचर्येणर्षिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः", (तै.सं.६-३-१०.) इत्यत्र "यज्ञेन" इत्यकवचनं "यज्ञं व्याख्यास्यामः"(आप.परि.१-१.) इतिवत् जात्यभिप्रायं मन्यमानस्य भगवतो वसिष्ठस्य "नैयमिकं ह्येतदृणत्रयं संस्तुतम्" (व.सं.११-४७.) इति वचनेन एषामवश्यानुष्ठेयत्वावगमात् । तथा "सायं प्रातरत ऊर्ध्वम्"(आप.गृ. ७-१९.) "यावज्जीवमग्निहोत्रं जुहोति," "वसन्ते ज्योतिष्टोमेन यजेत"(आप.श्रौ.१०-२-५.) इत्येवमादिभिः,"अहरहः प्रवृज्यते"( तै.ब्रा. २-१-३.), अर्धमासेऽर्धमासे प्रवृज्यते"(तै.बार.३-२-८.), "पुनर्भक्ष्योऽस्य सोमपीथो भवति" (तै.ब्रा. ३-२-३). इत्येवमादिभिः, (१) कर्मण्यारम्भन्यायेन च प्रयोगाभ्यासावगमात् । तथैव सोमस्येषट्यादेश्चाकरणे ऐन्द्राग्नपशुविभ्रष्टेष्ट्यादि प्रायश्चित्तविधानेन प्रत्यवायोत्पत्त्यवगमात् । तथैव"स एतांश्चतुर्होतॄनात्मस्परणानपश्यत्" (तै.ब्रा.२-३-७.) इति अग्निहोत्रादिसोमान्तानामात्मनिष्क्रयणार्थत्वावगमात् । न तु सौर्यादिवत्(२) केवलं काम्याः उक्तहेतूनां सर्वेषामनुपपत्तेः । यत एवैते नित्याः अत एव "अनाहिताग्निता स्तेयम्" (मनु.११-६५. ) इत्यनाहिताग्निताया उपपातकगणे पाठः । अत एव नित्याधिकारविधिप्रयुक्तमाधानम् । काम्यसिद्धिस्तु नित्यानुष्टानेनैव गुणफलाधिकारविधया प्रासङ्गिकी भवतु ।

मीमांसकमत्या तु यद्यपि काम्याधिकारविधिप्रयुक्तमाधानं, काम्यानुष्ठानेन च नित्यसिद्धिः(३) प्रसङ्गात् ; तथापि कल्पसूत्रकाराणां प्रक्रियया साधिकारत्वेन (४)प्रयुक्तिशक्तियोग्यतया अन्यतोऽप्रयुक्तौ नित्याधिकारविधिप्रयुक्तिरप्युपपन्ना । यथा (५)विवरणमते स्वविधिप्रयुक्तमध्ययनमिति । तस्मात् मन्दमध्यमोत्कृष्टबुद्धिभिस्(६)सर्वैरपि त्रैवर्णिकैरेतेऽवश्यं कर्तव्याः । ते च नानासाधनका नानाशाखान्तरस्थाङ्गका मीमांसान्यायसहस्रनिर्धार्यवचनव्यक्तिका मन्दबुद्धिभिरिदानीन्तनैर्(७) दुर्ज्ञानाः अज्ञाने चानुष्ठातुमशक्ताः कथञ्चन प्रत्यवेयुरिति कृपाविष्टचेतस्कतया सूत्रकारेण "यज्ञं व्याख्यास्यामः" (आप.परि.१-१. ) इति परिभाषायामेकविंशतियज्ञान् सामान्यतः (८)संक्षेपतश्च व्याखायाय तावन्मात्रेणानुष्ठानानुपयोगात् "अथातो दर्शपूर्णमासौ" (आप.श्रौ.१-१) इत्यारभ्य श्रौता हविर्यज्ञास्सोमसंस्थाः (९) क्षामवत्यादयो नैमित्तिकाः प्रसङ्गात् काम्याश्च (१०)विशेषतो व्याख्याताः ॥ अथ अनन्तरम् । **आचारात्**– आङित्युपसर्गस्य अविच्छेदो व्याप्तिरभिप्रेतोऽर्थः । चारः चरणं कर्मसु प्रवर्तनम्, "पिण्डपितृयज्ञेन चरन्ति" (आप.श्रौ.१-७-२. ) इत्यादौ दर्शनात् । तेन यत्सर्वेषु देशेषु सर्वेषु कोलेषु च सर्वैस्त्रैविद्यवृद्धैश्शिष्टैर्लौकिकप्रयोजनाभावेऽप्यविच्छिन्नमवि(१)गानेनाद्रियमाणं, अतएव मूलान्तरासम्भावात् स्वमूलभूतवेदानुमाने लिङ्गभूतं कर्मसु

प्रवर्तनं स आचारः । तस्मादाचारात् अनुमितैर्वेदैः यानि औपासनहोमादीनि पाकयज्ञशब्दवाच्यानि पाणिग्रहणादीनि च यज्ञेष्वधिकारिष्यमाणदेहसंस्कारार्थानि **कर्माणि गृह्यन्ते** ज्ञायन्ते कर्तव्यत्वेन तानि व्याख्यास्याम इति शेषः । यत एव आचारानुमेयवेदावगम्यानि गार्ह्याणि कर्माणि अत एव तेभ्यः प्रथममनुष्ठेयेभ्योऽपि पूर्व श्रौतानां व्याख्यानं कृतम् ; प्रत्यश्रुतिविहितेषु जिज्ञासायाः प्रथमभावित्वात्, अनुमितवेदार्थजिज्ञासाया(२)श्चरमभावित्वात्, जिज्ञासाशान्त्यर्थत्वाच्च व्याख्यानस्येति । अत्र च आचारादित्याचारेणोपलक्ष्य गार्ह्याणि कर्माणि वदन्नेवं ज्ञापयति– इह साक्षादनिबद्धानामपि येषां "जमदग्नीनां तु पञ्चावत्तम्" (आप.श्रौ.२-१८-२. ) इत्यादीनां पदार्थानामाचारः कृत्स्नदेशादिव्याप्तस्स्यात् तेऽपि वेदमूला एवेति । कृत्स्नदेशादिव्याप्तिश्चाधिकपौनरुक्त्यादिभिश्श्रौते दर्शनेन गृह्यान्तरैर्धर्मशास्त्रैः न्यायबलेन सम्प्रदायविद्व्याख्यातृवचनैर्वा निश्चेतव्या । इदं चाधिकारसूत्रम् । यान्यङ्गान्युत्तरत्र "पुरस्तादुदग्वोपक्रमः" (आप.गृ १-५.) इत्यादीनि वक्ष्यन्ते तेषां गार्ह्यकर्मार्थतां, श्रौतानां सार्वत्रिकाणामपि स्वतोऽनिदमर्थतां च ज्ञापयितुम् । एतच्च(३) समानोपदेशातिदेशयोरभावात् ॥ केचित् — कर्माणीत्येतद्गृह्ये वक्ष्यमाणान्यस्मच्चरणार्थान्येव, न तु धर्मशब्दाधिकृतधर्मशास्त्रोक्तवत्सर्वार्थानि । तथा श्रौतानन्तरं गार्ह्याधिकारः श्रौतोक्तसार्वत्रिकधर्मामामिह प्राप्त्यर्थ इति ॥

▼

⑤

>

अथ कर्माण्य् आचाराद् यानि गृह्यन्ते।

# ०१ ०२ उदगयन-पूर्वपक्षाहः-पुण्याहेषु②

उदगयन-पूर्वपक्षाहः-पुण्याहेषु कार्याणि।

▼

⑤

>

▼ Oldenberg

2. They should be performed during the northern course of the sun, on days of the first fortnight (of the month), on auspicious days,

▼ हरदत्तः

उदगयनादिविधानं दक्षिणायनादिप्रतिषेधार्थम् । समुच्चयश् चोदगयनादीनां न विकल्पः । **पुण्याहाः** देवनक्षत्राणि ज्योतिश्शास्त्रे प्रसिद्धानि यमनक्षत्राणि च तद्-विहितानि ।

▼ सुदर्शनः

उदगयनादयः प्रसिद्धाः । पुण्याहास् त्व् अह्नो नवधा विभक्तस्यायुजो भागाः–प्रातस्सङ्गव(१) मध्याह्नापराह्णसायंशब्दवाच्याः पुण्यनक्षत्रापरपर्यायाः पञ्च । "समानस्याह्नः पञ्च पुण्यानि नक्षत्राणि" (तै. ब्रा.१-५-३) 'मित्रस्य सङ्गवः । तत्पुण्यं तेजस्स्व्यहः' (तै. ब्रा.१-५-३.) इत्यादिश्रुतेः । युग्मास्त्वश्लीलाः, "चत्वार्यश्लीलानि" (तै. ब्रा.१-५-३.) इति श्रुतेः ।

केचित् कृत्तिकादिविशाखान्तानि देवनक्षत्राणि पुण्याहाः, 'यान्येव देवनश्रत्राणि । तेषु कुर्वीत यत्कारी स्यात् । पुण्याह एव कुरुते' (तै. ब्रा.१-५-२.) इति श्रुतेः ।

उदगयनेत्यादिरयं समासो द्वन्द्वः । तेषु कार्याणि । गार्ह्याणीति शेषः ।

एषां समुच्चयः न विकल्पः ।

एतच् च सामान्यविधानं तत्र तत्र विशेष-विधानेनापोद्यते नियम्यते च ।

एवम् उदग्-अयनादीनां विधाने सत्य् अपि क्वचिदनियमः प्रतिभासते । "सर्व ऋतवो विवाहस्य" (आप. गृ. २-१२.) इति वचनाद् यदा दक्षिणायनेऽपि विवाहस् स्यात् तदा समावर्तनं तत्-काल-समीपकाल एव । इतरथा उदगयन-समावृत्तस्य शरदि विवाहे सति बहु-काल-व्यवधाने,"अनाश्रमी न तिष्ठेत दिनम् एकमपि द्विजः" । (दक्षसं.अ. १. ) इति निषेधातिक्रम-प्रसङ्गात् ।

किञ्च आश्वलायनगृह्ये "उदगयन आपूर्यमाण-पक्षे कल्याणे नक्षत्रे चौल-कर्मोपनयन-गोदान-विवाहाः" (आश्व. गृ. १-५.) इत्यत्र चौलविकारत्वादेव गोदानस्य उदगयनप्राप्तौ पुनस्तत्र तद्विधिः तद्विकारान्तरे समावर्तने उदगयन-नियम-निवृत्त्यर्थ इति गम्यते ।

तथा बौधायनीये समावर्तनस्य चौल-विकारत्वाद् एव आपूर्यमाण-पक्षप्राप्तौ पुनस् तत्र तद्विधिर्(२) उदगयनानियमार्थ इति गम्यते । तथा गृहनिर्माणप्रवेशयोः ज्योतिश्-शास्त्रे दक्षिणायनस्यापि विधानात् अविगीतशिष्टाचाराच् च उदगयनानियमः ।

तथा अपरपक्षेऽप्यापञ्चम्याः ज्योतिश्-शास्त्राद् एव शिष्टाः कर्माणि आचरन्ति। तथैव ज्योतिश्-शास्त्राद् अन्न-प्राशन(३)-गृहनिर्माण-प्रवेशान् रात्राव् अप्याचरन्ति । तथैव यदा पुण्याहाः ज्यौतिषोक्त-दोषोपहताः तदा अश्लीलेष्व् अपि तदुक्त-गुण-युक्तेषु(४) अविगानेन कर्माण्य् आचरन्ति ।

ज्योतिश्शास्त्रम् अपि (१) वेदाङ्गत्वाद् अगृह्यमाण-कारणत्वात्, शिष्ट-परिगृहीतत्वाच् च कल्पसूत्रादिवद् आदरणीयम् एव । निर्णये तु शिष्टाः प्रमाणं सर्वत्र ॥
▼

⑤

>

उदगयन-पूर्वपक्षाहः-पुण्याहेषु कार्याणि।

# ०१ ०३ यज्ञोपवीतिना कार्याणि②

*(देवकर्मसु)* यज्ञोपवीतिना ।

▼

⑤

>
▼ Oldenberg

3. With the sacrificial cord suspended over (the sacrificer's) left shoulder.

▼ हरदत्तः

कार्याणि इत्यनुवर्तते ॥

▼ सुदर्शनः

कार्याणीति सम्बन्धः । ननु यज्ञोपवीतं पाकयज्ञेषु "प्रागपवर्गाणि" (आप. प.२-५. ) इत्यादिना सिद्धम् । विवाहादिहोमेषु जपादिषु च "होमे जप्यकर्मणि" (आप. ध. १-१-१५.) इत्यादिना । अतोऽत्रैतद्विधिर्व्यर्थः । सत्यम्; यत्राप्राप्ति(२)र्हेमन्तप्रत्यवरोहणादिषु तत्रायं विधिस्सार्थ एव ॥

▼

⑤

>

यज्ञोपवीतिना।

# ०१ ०४ प्रदक्षिणम् प्रदक्षिणम्②

प्रदक्षिणम्।

▼

⑤

>
▼ Oldenberg

4. (The rites should be performed) from left to right.

▼ हरदत्तः

प्रदक्षिणं च तानि कर्तव्यानि दक्षिणं पाणिं प्रतिगतं प्रदक्षिणम् । उदाहरणं परिस्तरणादि । ननु–तदिदमुभयमविधेयं, पूर्वमेव श्रौतेषु विहितत्वात् "दैवानी"ति (आप. प. २-१५) तत्रोच्यते, इह मानुषेषु जातकर्मादिष्वप्येतयोः प्रवृत्तिरिष्यते(३)तदर्थमयमारम्भः ।

▼ सुदर्शनः

कार्याणीत्येव सम्बन्धः । इदं तु प्रादक्षिण्यं पाकयज्ञेषु तत्कोटिषु च विवाहादिषु परिभाषासिद्धमपि(४) तद्व्यतिरिक्तगार्ह्यार्थं विधीयते । "तथापवर्गः" (आप.गृ.१–६.) इति चेत्थमेव ॥

▼

⑤

>

प्रदक्षिणम्।

# ०१ ०५ पुरस्तादुदग्वोपक्रमः अनियमे②

*(देवकर्मसु)* पुरस्तादुदग्वोपक्रमः

▼

⑤

>
▼ Oldenberg

5. The beginning should be made on the east side or on the north side,

▼ हरदत्तः

अनियमे नियमार्थमिदं वचनम् । दक्षिणतः पश्चाद्वोपक्रामो माभूदिति । परिस्तरणाद्येवोदाहरणम् ॥

▼ सुदर्शनः

कार्य इति शेषः । अयं तु सर्वेष्वपि यज्ञायज्ञरूपगार्ह्येष्वप्राप्तत्वाद्विधीयते ॥

▼

⑤

>

पुरस्तादुदग्वोपक्रमः।

# ०१ ०६ तथाऽपवर्गः तेषामपवर्गोऽपि②

तथाऽपवर्गः।

▼

⑤

>

▼ Oldenberg

6. And also the end.

▼ हरदत्तः

तेषामपवर्गोऽपि तथा प्रत्येतव्यः । पुरस्तादुदग्वेत्यर्थः । अपवर्गः परिसमाप्तिः । न चात्र उपक्रमापवर्गयोः समानमिदं नियमनं क्रियते — पुरस्तादुपक्रान्ते तत्रैव समाप्यं उदगारभ्यं च तत्रैवेति । किं तर्हि यथासंभवं प्रवृत्तिः, तद्यथा परिस्तरणस्य पुरस्तादुपक्रान्तस्य तत्रैवापवर्गासम्भवादुदगपवर्गः । तत्रापवर्गविधेरानर्थक्यं, श्रौतेष्वेव परिभाषितत्वात् "प्रागपवर्गाण्युदगपवर्गाणि वे"ति (आप.प. २-१५.) । उच्यते । यद्यपवर्गविधिः पुनरिह नारभ्यते, अपरेणाग्निं द्वे कुटी कृत्वेऽ(आप.गृ.१२-१४)त्यत्र दक्षिणापवर्गता प्राप्नोति, अत्रोपक्रमस्योदग्गतत्वनियमात् । अतो विप्रतिषेधे अपवर्गबलीयस्त्वं यथा स्यादित्ययमारम्भः । अन्यथा प्रदक्षिणपरिभाषया सामान्यपरिभाषा बाध्यते किञ्चिद्दैवानि कर्माणीति तत्र विशेषितम् । अत्र मानुषेषु कर्मादिष्वपि प्राप्त्यर्थोऽपवर्गनियमः ॥

▼ सुदर्शनः

पुरस्तादुदग्वा क्रियापरिसमाप्तिः कार्येत्यर्थः । ननु– "पुरस्तादुदग्वोपक्रमः" इति विधेरेव समन्तपरिषेकादावर्थसिद्धत्वान्नारब्धव्यं तथापवर्गः, इति । न; अनारभ्यमाणेऽस्मिन् सूत्रे प्राचीलेखोत्पवनादेरुदीचीलेखा(१) कुटीकरणादेश्चापवर्गः प्रत्यक् दक्षिणा च स्यात् । अतस्तद्बाधनायेदमारब्धव्यमेव । केचित्—प्राचीनानां लेखानामुदगुपक्रमः, उदीचीनां च प्रागपवर्गः, अग्निपरिस्तरणवदुभयविध्यसम्भवात्(२) इति ॥

▼

⑤

>

तथाऽपवर्गः।

# ०१ ०७ अपरपक्षे पित्र्याणि②

अपरपक्षे पित्र्याणि।

▼

⑤

>

▼ Oldenberg

7. 2 Ceremonies belonging to the Fathers (are performed) in the second fortnight (of the month),

▼ हरदत्तः

*(सम्पादकटिप्पनी - इदम् सूत्रम् दशमे व्याख्यातम्।)*
▼ सुदर्शनः

*(सम्पादकटिप्पनी - इदम् सूत्रम् दशमे व्याख्यातम्।)*
▼

⑤

>

अपरपक्षे पित्र्याणि।

# ०१ ०८ प्राचीनावीतिना②

*(पित्र्येषु)* प्राचीनावीतिना ८

▼

⑤

>
▼ Oldenberg

8. With the sacrificial cord suspended over the right shoulder,

▼ हरदत्तः

*(सम्पादकटिप्पनी - इदम् सूत्रम् दशमे व्याख्यातम्।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी - इदम् सूत्रम् दशमे व्याख्यातम्।)*

▼

⑤

>

प्राचीनावीतिना।

# ०१ ०९ प्रसव्यम्②

*(पित्र्येषु)* प्रसव्यम् ९

▼

⑤

>
▼ Oldenberg

9. From right to left,

▼ हरदत्तः

*(सम्पादकटिप्पनी - इदम् सूत्रम् दशमे व्याख्यातम्।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी - इदम् सूत्रम् दशमे व्याख्यातम्।)*

▼

**⑤**

>

प्रसव्यम्।

# ०१ १० दक्षिणतोऽपवर्गः②

दक्षिणतोऽपवर्गः।

▼

**⑤**

>

▼ Oldenberg

10. Ending in the south.

▼ हरदत्तः

पितृदैवत्यकर्माण्यपरपक्षे कार्याणि । "मासिश्राद्धस्यापरपक्षे"(आप.गृ. २१.१.) "या माध्याः पौर्णमास्या उपरिष्टाद्व्यष्टकेति" (आप. गृ.२१-१०.) तत्रापरपक्ष उपदिष्टः । इदं तु नियमनं यानि गयाश्राद्धादीनि देशविशेषेण पात्रविशेषेण काम्यान्युपदिष्टानि अस्माभिश्च परिगृहीतानिपार्वणे क्रान्तादीनीत्यत्र तेष्वपरपक्षप्राप्त्यर्थं च। तेन पूर्वपक्षे मृतस्यापरपक्ष एकोद्दिष्टं कर्तव्यं न त्वेकादशेऽहनि । अनुष्ठानञ्चै(त्वे)कादशेऽहनि । मासिश्राद्धस्यापरपक्षविधेः प्रयोजनं तत्रैव वक्ष्यामः । अयं चापरपक्षविधिः कृत्स्नस्योदगयनादेरपवादो न पूर्वस्मादुदग्वा यथायोगम् । उदाहरणं परिस्तरणादि । तदिदं प्राचीनावीत्यादित्रयमविधेयम् । श्रौतेष्वेव परिभाषितत्वात्; उच्यते— "यज्ञोपवीतिना प्रदक्षिणं" "तथापवर्ग" इत्येताः परिभाषा अविशेषेणात्र प्रकरणे पठिताः सामान्यपरिभाषाया बाधितत्वात् पित्र्येष्वपि प्राप्नुवन्ति तद्बाधार्थमिदम् । अत्र च येषां पित्र्याणां स्वातन्त्र्येण स्वकाले प्रवृत्तिः तेषामेवायं प्राचीनावीतविधिः नत्वन्यत्राङ्गत्वेन प्रयुज्यमानानाम् । तेन दैवेषु मानुषेषु च कर्मसु "पितरः पितामहा" इत्यत्र यज्ञोपवीतमेव भवति । **अपर आह–** "तस्मादभ्याताना वैश्वदेवा"(तै.सं.३-४-५. ) इति दर्शनात् "पितरः पितामहा" इत्यस्यापि पित्र्यत्वादेव प्राचीनावीतस्याप्रसङ्गः इति । तथा "अपरपक्षे पित्र्याणी"त्यस्मिन्नधिकारे (१)अभिहितं प्राचीनावीतमविशेषेण पित्र्ये कर्मणि साङ्गे प्रवर्तते । तेन पित्र्ये आज्यभागान्ते कर्मणि जयादौ च प्राचीनावीतमेव भवति ॥

▼ सुदर्शनः

कार्याणीत्येव । अयं च विधिस्स्वतन्त्रपित्र्योद्देशेन । (२)अङ्गानां तु सहप्रयोज्यानां मुख्यकालत्वेन कालविध्यपेक्षाऽभावात् । एष च न पूर्वपक्षमात्रापवादः । किं तर्हि? सर्वापवादार्थं विध्यन्तरम् । आः!कुत एतद्ज्ञायते ? । "न च नक्तं श्राद्धं कुर्वीत" (आप.ध. २-१७-२३.) इति ज्ञापनात् । (३)यदि ह्ययं पूर्वपक्षमात्रापवादस्स्यात्, तत उदगयनादीनां त्रयाणामपवादाभावाद्रात्रावप्रसक्तेः प्रतिषेधो न स्यात्, (४) अस्ति च प्रतिषेधः, इत्यतो ज्ञायते विध्यन्तरमेवेति । प्रयोजनं त्वविशेषेण दक्षिणायनेऽप्यपरपक्षेऽह्नि काम्यश्राद्धानि कर्तव्यानीति । मासिश्राद्धं तु "मासि मासि कार्यम्" (आप. धर्म.२-२६-४.) इति (५)वीप्सया दक्षिणायनेऽपि सिद्धमेव । नन्वस्मिन् सति "मासिश्राद्धस्यापरपक्षे" (आप.गृ.२१-१.) इति विधिः किमर्थः? । नियमार्थः । तथा हि– अपरपक्ष एव मासिश्राद्धम्, न पुनर्दैवान्मानुषाद्वा(१) विघातादपरपक्षेऽतिक्रान्ते "सर्वोऽपरपक्षः पूर्णमासस्य" इत्यादिवत् पूर्वपक्षेऽपि कर्तव्यम् । किन्तु प्रारब्धस्मार्तनित्यकर्मव्यापत्तौ प्रायश्चित्तमेव । तच्च "भूर्भुवस्सुवस्स्वाहा" इत्येको होमस्सर्वप्रायश्चित्ताख्यः । "यद्यविज्ञाता सर्वव्यापद्वा भूर्भुवस्स्वरिति सर्वा अनुद्रुत्याहवनीय एव जुहुयात्" (ऐ.ब्रा. २४-३४.) इति बह्वृचश्रुतेः । अयं चात्रौपासने, नैमित्तिकैकविधिपरश्रुतिस्थाहवनीयशब्दस्य न्यायतो निमित्तवत्कर्मार्ताग्निमात्रप्रदर्शनार्थत्वात् । उपवासश्च कार्यः । वेदोदितानां नित्यानां कर्मणां समतिक्रमे । स्नातकव्रतलोपे च प्रायश्चित्तमभोजनम् ॥ (मनु. ११-२०३.) इति मनुवचनात् । (२)आतमितोः प्राणायामश्च, "नियमातिक्रमे

वान्यस्मिन्" (आप. ध.२-१२-१८. ) इति वचनात् । एतोषां समुच्चय एव न विकल्पः, "एकस्मिन् दोषे श्रूयमाणानि प्रायश्चित्तानि समभ्युच्चीयेरन्" (आप. श्रौ. ९-१-२.) इति दर्शितत्वात् । प्रसङ्गादन्येषां लोपेऽपि प्रायश्चित्तमुच्यते । एवमन्येषामपि प्रारब्धानां प्रायश्चित्तं पाकयज्ञानां व्यापत्तौ, गौणकालेऽप्यतिक्रान्ते । गौणकाले तु सर्वप्रायश्चित्तपूर्वकं तेऽनुष्ठेयाः । औपासनहोमस्य तु बहुकालातिक्रमे अष्टभ्यो होमकालेभ्यः पूर्वं प्रत्येकं सर्वप्रायश्चित्तपूर्वकं (३) अतीता होमाः कर्तव्याः । अत्रोपवासप्राणायामयोराचारो न दृश्यते । ऊर्ध्वं तु धार्यमाणेऽप्यग्नौ "अनुगतो मन्थ्यः" (आप.गृ. ५-१५.) इत्याद्यग्न्युत्पत्तिप्रायश्चित्ते भवतः, "चतूरात्रमहूयमानोऽग्निर्लौकिकस्सम्पद्यते" इति वचनात् । यदि पुनरालस्यादिनोत्सन्नाग्निरेव चिरकालं वर्तेत तदा स्मृत्यन्तरतस्तत्कालानुरूपं कृच्छ्रादिकं होमद्रव्यदानं च वेदितव्यम् । स्वकाले अनारब्धानां तु पाकयज्ञानां सर्वप्रायश्चित्तं हुत्वाऽऽरम्भः कर्तव्यः ॥ (४)केचित्—पाकयज्ञानां (५)स्वकालेष्वनारम्भे आरब्धानां चाकरणे गौणकालातिक्रमे च चतुर्गृहीतेनाज्येन सग्रहेण सप्तहोत्रा जुह्वति । यद्यपि "सप्तहोत्रा यज्ञविभ्रष्टं याजयेच्चतुर्गृहीतेनाज्येन" (आप. श्रौ.१४-१४-११.) इति श्रौतो दर्वीहोमः यज्ञविभ्रषे युक्तः, तथापि "एषा वा अनाहिताग्नेरिष्टिर्यच्चतुर्होतारः" (आप.श्रौ.१४-१३-२.) इत्युपक्रम्य "आहिताग्नेस्तान् प्रतियादुभयोरितरान्" (आप. श्रौ. १४-१५-५.) इत्युपसंहारात्, गार्ह्यो विभ्रेषे आहत्य प्रायश्चित्तविधानेनापेक्षितत्वाच्च तद्विभ्रेषेऽपि युक्त एवेति । तत्तु कपर्दिस्वामिनोक्तम् ॥ जातकर्मादीनां तु (१)स्वकालातिक्रमे सर्वप्रायश्चित्तपूर्वकं तदनुष्ठानम् । कर्माङ्गानां तु लोपे सर्वप्रायश्चित्तं प्राणायामश्च । अनुष्ठानं चारादुपकारकाणामाकर्मसमाप्तेः । द्रव्यसंस्काराणां तु द्रव्योपयोगात् पूर्वमेव सम्भवताम् । पाकयज्ञेष्वाग्निहोत्रिक(२)विधौ चोपनयने चाङ्गव्यापत्तौ "भुवस्स्वाहा" इति तत्त(३)त्कर्माङ्गाग्नौ होमः । "अनाज्ञातम्" इति तिसृभिश्च होमो जपो वा । भुवरनाज्ञातविध्यर्थयोर्विकल्पो वा, "ब्राह्मणावेक्षो विधिः" (आप.गृ.२-११.) इति "श्रुतितस्संस्कारः" (आप. धर्म.२-१-८.) इति श्रौतप्रायश्चित्तप्राप्त्यर्थत्वात् । ननु–"भुवः" इति दक्षिणाग्नौ "अनाज्ञातं" इति चाहवनीये । सत्यम्, इह तयोरग्न्योरभावात् नैमित्तिकानामप्यङ्गत्वेनेतराङ्गवत् प्रधानाग्नौ होमस्य युक्तत्वाच्च ॥

(४) केचित् सर्वेषु गार्ह्यकर्मसु तदङ्गेषु च भ्रेषे "अनुक्तमन्यतो ग्राह्यम्" इति न्यायेन गृह्यान्तरोक्तानि प्रायश्चित्तान्याहुः, तच्चिन्त्यम् ॥ अलं प्रासङ्गिकेन । प्रकृतमुच्यते । यत्तु "अपरपक्षस्यापराह्णश्श्रेयान्" (आप. धर्म.२-१६-५.) इति, तदपराह्णविधानार्थमनुवादः, यथा पात्नीवते "सर्वत्रानुवषट्कारो द्विदैवत्यर्तुग्रहादित्यसावित्रपात्नीवतवर्जम्" (आप. श्रौ. १२-१४-२.) इत्यनुवषट्काराभावे प्राप्तेऽपि "अपि वोपांश्वनुवषट्कुर्यात्" (आप. श्रौ.१३-१४-९,१०.) इति । "सर्वेष्वेवापरपक्षस्याहस्सु" (आप.धर्म. २-१६-७.) इति त्वहर्विशेषणार्थम् । अपरपक्षस्याहस्स्वेव मासिश्राद्धं, न पूर्वपक्षस्याहस्सु विकलपेनाप्यभिमतमिति । इतरथा आशौचादतिक्रान्तेऽपरपक्षे दैवात् पितॄणां श्राद्धे तु आशौचं जायते यदि । आशौचेऽथ व्यतीते वै तेभ्यश्श्राद्धं प्रदीयते ॥ इति स्मृत्यन्तरात् कदाचित् पूर्वपक्षस्याहस्स्वपि विकल्पेनेदं स्यात् । नित्यश्राद्धं तु "एवं संवत्सरम्" (आप. ध.२-१८-१२) इति अत्यन्त(४) संयोगे द्वितीयाबलात् पूर्वपक्षेऽपि ॥७॥ पित्र्याणि कार्याणीति शेषः । इदंतु वासोविन्यासभेदविधानं स्वतन्त्रास्वतन्त्रसर्वपित्र्यार्थम्, "प्राचीनावीतिना पित्र्याणि" इत्यनेन वाक्येन अविशेषावगमात्, उद्देश्ये पित्र्यमात्रे लब्धे अधिकाप्रकृत(१) स्वातन्त्र्यविवक्षायां वाक्यभेदापत्तेः, अङ्गेष्वपि प्राचीनावीते विधेये "अपरपक्षे पित्र्याणि" इतिवदनपेक्षितत्वाभावाच्च । तेन यानि स्वतन्त्राणि यथा प्रधानाहुतयः, यानि चास्वतन्त्राणि यथा द्वितीयनिमार्जनादीनि, तानि सर्वाण्येव प्राचीनावीतिना कार्याणि । इत्थमेव "यज्ञोपवीतिना" इत्यपि । तेन पित्र्याङ्गान्यपि दैवान्याघारादीनि यज्ञोपवीतिनैव । इतराङ्गानां तु पात्रप्रयोगादीनां तत्तत्प्रधानवदेव ॥ केचित्–अङ्गानां प्रधानधर्मता(२) न्याय्येति पित्र्याङ्गानि दैवान्यपि प्राचीनावीतिना, दैवाङ्गानि पित्र्याण्यपि यज्ञोपवीतिनेति, तच्चिन्त्यम् ॥ ८ ॥ तथैव शेषः ॥९॥ अत्र "प्राचीनावीती" (आप.परि. २.१६.) इत्यादिपरिभाषया एषां त्रयाणामपि सिद्धत्वात् अपाकयज्ञनित्यषोडशश्राद्धाद्यर्थो विधिः ॥१०॥

"प्राचीनावीतिना प्रसव्यं दक्षिणतोऽपवर्ग" इति पूर्वसूत्रेण सम्बन्धः ।

▼

⑤

>

दक्षिणतोऽपवर्गः।

# ०१ ११ निमित्तावेक्षाणि नैमित्तिकानि②

निमित्तावेक्षाणि नैमित्तिकानि।

▼

⑤

>

▼ Oldenberg

11. Ceremonies occasioned by special occurrences (are performed) according as their occasions demand.

▼ हरदत्तः

**निमित्तानि** - यानि **नैमित्तिकानि** कर्माणि, तानि निमित्तम् अवेक्ष्य तद् अनन्तरम् एव कर्तव्यानि, न तत्र +उदगयनाद्य्-अपेक्षा ।

"अगारस्थूणाविरोहण" (आप.गृ. २३-९.) इत्य् उदाहरणानि ।
तत्रामावास्यायां निशायाम् इति वचनात् तावान् उत्कर्षः ।

गृहप्रवेशनं नैमित्तिकमिति केचित् ।
नेत्यन्ये ॥११॥

▼ सुदर्शनः

**नैमित्तिकान्य्** आग्रयणातिथ्य-सीमन्तादीनि **निमित्तावेक्षाणि** ।
**निमित्तानि** व्रीहि-पाकादीन्य् एवानुष्ठाने ऽवेक्षन्ते नोदग्-अयनादीनीत्य् अर्थः ।
अत्रापि सम्भवतः पूर्व-पक्षादेर् नापवादः ॥११॥
▼

**⑤**

>

निमित्तावेक्षाणि नैमित्तिकानि।

---

1. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

2. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

# ०२ अग्निमुखनिरूपणम्①

## ०१ १२ अग्निमिध्वा②

परिस्तरणम् - *(क्रमो ऽन्यत्रोक्तः।)* अग्निमिध्वा प्रागग्रैर्दर्भैरग्निं परिस्तृणाति १२

▼

⑤

>

▼ Oldenberg

12. 1 Having set the fire in a blaze, he strews eastward-pointed Darbha grass around it,

▼ हरदत्तः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼ सुदर्शनः

एवं प्रयोगानुबन्धं कालादिकम् उक्त्वा, इदानीं सर्व-गार्ह्य-प्रधान-होमानां साधारण-तन्त्र-नामानं प्राच्योदीच्याङ्ग-समुदायं प्रयोज्य-भेदम् आह– "अग्निमिध्वा"इत्यादि" मन्त्र सन्नामः" (आप.गृ.२–८. ) इत्यन्तेन ।

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼

⑤

>

अग्निमिध्वा प्रागग्रैर्दर्भैरग्निं परिस्तृणाति।

## ०१ १३ प्रागुदगग्रैर्वा उक्ताः②

प्रागुदगग्रैर्वा।

▼

⑤

>

▼ Oldenberg

13. Or eastward-pointed and northward-pointed (grass);

▼ हरदत्तः

उक्ताः पाकयज्ञपरिभाषाः अथ तेषां साधारणतन्त्रं वक्ष्यते– अग्निमिध्वेति । तदग्नेरुपसमाधानमित्युच्यते । एतच्च कर्माङ्गम् । किं पुनरत्राग्निः? पत्नीसम्बन्धेष्वौपासनम् । अत्र लौकिके केचिज्जातकर्मप्रभृति परिग्रहमग्नेरिच्छन्ति । अन्ये पुनः उपनयनप्रभृति । अपरे समावर्तनादि। "यत्रान्त्यां

समिधमादध्यात् तं व्यपरिगृह्णीयाद्" इति । यत्र तु प्रसिद्धोऽग्निर्नास्ति तत्र श्रौत्रियागारादाहरणं मथनं वा । "यत्र क्वचाग्नि"मित्ययं तु देशसंस्कारः सर्वत्र भवति यदि स्यादसंस्कृतो देशः । अग्निमिध्वेति प्रकृते पुनरग्निग्रहणं येषु तन्त्रं न प्रवर्तते तत्रापि परिस्तरणं यथा स्यादिति-अग्निंपरिस्तृणाति सर्वत्रेति । उपसमाधानं तु तत्रार्थसिद्धम् । प्रागुदगग्रैर्वा । अथ वा न सर्वतः प्रागग्रैरेव परिस्तरणं किं तर्हि प्रागग्ररुदगग्रैश्च । तत्रोदगग्राः पश्चात्पुरस्ताच्च ॥९॥

▼ सुदर्शनः

अत्र च अग्निपदार्थविशेषप्रतिपत्त्यर्थं स्मार्तेष्वग्निर्निरूप्यते । तत्र याज्ञवल्क्यवचनम् । कर्म स्मार्तं विवहाग्नौ कुर्वीत प्रत्यहं गृही । (या.स्मृ.१-९७.) इति । अस्यार्थः– गृही गृहस्थः सपत्नीकः स्मार्तं कर्म विवाहाग्नौ औपासनाग्नौ कुर्वीत । यस्य कर्मणः प्रयोगे संकल्पावघातान्वारम्भद्रव्यत्यागानुमत्यादिपदार्थद्वारा पत्न्यास्सहत्वं तत् कर्म स्वौपासने कुर्वीत इत्येतत् । अथ वा यस्य अग्निसाध्यस्य कर्मणः फलं साक्षात् कर्मान्तरप्रणाल्या वा जायापतिगाम्यन्यतरगामि वा भवति तत्कर्म गृही स्वौपासने कुर्यात्, "कुर्वीत" इत्यात्मनेपदश्रवणादिति । एवं च स्मार्तानि पाकयज्ञसीमन्तादीनि औपासनाग्नौ कर्तव्यानि । गृहप्रवेशोऽपि तत्कर्मजन्यवास्तुशान्तेः जायापत्यायुराद्यर्थत्वादौपासन एव । तथा पित्रादेर्मातामहादेश्च सपिण्डीकरणमप्यौपासने । सपिण्डीकरणफलस्य प्रेतत्वनिवृत्त्या पितृत्वप्राप्तिरूपस्याभ्युदयिकमासिश्राद्धादौ सम्प्रदानार्थत्वात्, तत्फलस्य च जायापतिगामित्वादिति । अत एव सपिण्डीकरणं सर्वैरपि पुत्रैर्न कर्तव्यम्, एकेनापि कृते पितृतया सम्प्रदानत्वसिद्धेः । अतो यत्र पत्न्यास्सहत्वं क्रियाफलं वा जायापतिगामि तत्कर्म (१)औपासन एव । यदि तु पुत्रोऽनग्निरनुपनीतादिः संवत्सरे पूर्णेऽवश्यं कर्तव्यत्वात् सपिण्डीकरणं करोति, तदा श्रोत्रियागारादाहृतेऽग्नौ ; बोधायनेन "अथ वा श्रोत्रियागारादेव तमौपासनम्" (बौ.गृ.६-२.) इत्यौपासनसंस्तवात्, आचाराच्च । अनुपनीतोऽपि पुत्रश्श्राद्धाधिकार्येव, अर्हत्यनुपनीतोऽपि विनाप्यग्निं विनाऽऽपदम् ॥ ( मनु. २-१७२. ) इति वचनात्, "न ब्रह्माभिव्याहारयेदन्यत्र स्वधातिनयनात्" ( गौ.ध.२-५. ) इति गौतमवचनस्थस्वधाशब्दस्य सकलोर्ध्वदैहिकप्रदर्शनार्थत्वाच्च । भ्राता वा भ्रातृपुत्रो वा सपिण्डश्शिष्य एव वा । सपिण्डीकरणं कृत्वा कुर्यादभ्युदयं ततः ॥ इति वचनात् यदा भ्रातृपुत्रादिः करोति तदा यथोक्तसहत्वफलभागित्वयोरभावात् श्रोत्रियागारादाहृताग्नावेव ॥ अन्ये तु–भ्रात्रादिगतपितृत्वप्राप्तिरपि पुत्रगतपूतत्वादिफलवत् पतिगामि फलमित्यौपासने; तच्चिन्त्यम् ॥ तथा जातकर्मचौलोपाकरणसमापनगोदानसमावर्तनान्यपि । तथोपनयनमपि । आचार्यकरणसिद्ध्यर्थमुपनयनमिति मतेऽपि नाचार्यस्यौपासने । तस्य नित्यधार्यत्वात् "त्र्यहमेतमग्निं धारयन्ति" (आप.गृ. ११-२०.) इति सूत्रविरोधात् । विवाहोप्यस्मिन्, निर्मन्थ्ये वा, असम्भवाद्विवाहजन्यौपासनस्य । सम्भवेऽपि प्रथमौपासनस्य, न तस्मिन् द्वितीयादिविवाहः ; "यां कामयेत राष्ट्रमस्यै प्रजा स्यादिति तस्या औपासने" इति प्रतिभार्यमौपासनभेदावगमात्, बौधायनीये अग्निद्वयसंसर्गविधानात्, आचाराच्च । कर्मार्थस्यौपासनस्य संस्कृते देशे, अनुपसमाहितस्यान्यस्य वाऽग्नेः, "यत्र क्व चाग्निम्" (आप. ध. २-१-१३.) इति धर्मशास्त्रोक्तविधिना अग्निप्रतिष्ठापनं कर्तव्यम् ॥ केचित्–इदं नाग्न्यङ्गं, कर्माङ्गमेवेति प्रतिकर्म कार्यम्, उखायां चाग्नेर्धारणमिति ॥

अथ सूत्रं व्याख्यायते । **अग्निमिद्ध्वा** इन्धीतेत्यर्थः । यद्यप्यर्थप्राप्तमग्नेरिन्धनं तथाप्येतद्वचनात् इद्धमपि पुनरिन्धीत । अत्र विध्यर्थे लिङ्गादौ ग्राह्ये क्त्वाग्रहणमिन्धनस्य परिस्तरणपूर्वकालतानियमार्थम् । तेन इन्धनानन्तरं परिस्तरणमेव कार्यं, न तु तयोर्मध्येऽवश्यकार्यमपि मूत्रनिरसनादि कर्मार्थसम्भारोपकल्पनं च ॥ नन्वेकस्मिन् सूत्रे इन्धनपरिस्तरणयोर्विधाने वाक्यभेदस्स्यात् ; सत्यम्, न तु सूत्रे वाक्यभेदो दोषः ; सूचनात् सूत्रमिति निर्वचनात् । इत्थमेव व्याख्यानं प्रयोजनं च सर्वत्र क्त्वाग्रहणेषु । **प्रागग्रैर्दर्भैरग्निं परिस्तृणाति** । सर्वासु दिक्षु प्रागग्रैः कुशैरग्निं परिस्तृणाति ॥१२॥ अथ वा प्रागग्रैरुदगग्रैश्च दर्भैरग्निं परिस्तृणाति । दक्षिणत उत्तरश्च प्रागग्रैः, पश्चात् पुरस्ताच्चोदगग्रैः, "उदगग्राः पश्चात्पुरस्ताच्च" (आप.श्रौ.२-१४-१५.) इति श्रौते दर्शनात् । एतान् कुशान् दक्षिणानुत्तरान् करोति , उत्तरांश्चाधरान्; बौधायनभरद्वाजगृह्याभ्यामुक्तत्वात् । दक्षिणतः पक्ष उपरिष्टाद्भवत्यधस्यादुत्तरः" इति । अत्र "अग्निमिद्ध्वा" इति प्रकृतेऽप्यग्नौ, "अग्निम्" इति पुनर्वचनं नियमार्थम्–अग्निमेव परिस्तृणाति नान्यदङ्गमपीति । तेन उत्तरेण पूर्वेण वा निहितमुदकं बहिरेव भवति ॥

केचित्–अतन्त्रकेष्वपि कर्मस्वग्निः परिस्तीर्य एवेति नियमार्थमिति ॥१३॥

▼

**⑤**

>

प्रागुदगग्रैर्वा।

# ०१ १४ दक्षिणाग्रैः पित्र्येषु②

दक्षिणाग्रैः पित्र्येषु।

▼

**⑤**

>

▼ Oldenberg

14. Southward-pointed at sacrifices to the Fathers,

▼ हरदत्तः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*
▼

⑤

>

दक्षिणाग्रैः पित्र्येषु।

# ०१ १५ दक्षिणाप्रागग्रैर्वा तत्र②

दक्षिणाप्रागग्रैर्वा।

▼

⑤

>
▼ Oldenberg

15. Or southward-pointed and eastward-pointed.

▼ हरदत्तः

तत्र दक्षिणाग्राः पश्चात् पुरस्ताच्च ॥१५॥

▼ सुदर्शनः

पित्र्येषु मासिश्राद्धादिषु कर्मसु सर्वासु दिक्षु दक्षिणाग्रैः परिस्तृणाति ॥ १४ ॥ यद्वा दक्षिणाग्रैः प्रागग्रैश्च दर्भैः । पश्चात्पुरस्ताच्च दक्षिणाग्रैः, उत्तरतो दक्षिणतश्च प्रागग्रैः । उत्तरानुत्तरान् दक्षिणांश्चाधरान् कुर्यात् । तथा प्रागुपक्रम्य प्रसव्यं परिस्तृणाति ॥१५॥

▼

⑤

>

दक्षिणाप्रागग्रैर्वा।

# ०१ १६ उत्तरेणाग्निन्②

उत्तरेणाग्निं दर्भान् संस्तीर्य तेष्व् एनम् उत्तरया *("आगन्त्रा समगन्मही"त्येतया)* ऽवस्थाप्य

*(उत्तरेणाग्निं दर्भेषु अवस्थापनमन्त्रः)*

आ॒ग॒न्त्रा *(छात्रेण)* **समं॑गन्महि॒**
प्र सु॒ं मृत्युं **युं॑योतन***(←यौतिः पृथग्भावे)* ।
अरिं॑ष्टा॒स् **सञ्चं॑रेमहि** स्व॒स्ति,
*(ब्रह्मचर्यं)* **चं॑रताद्** इ॒ह स्व॒स्त्य् आ गृ॒हेभ्यः॑ *(→आगृहस्थाश्रमम्)* ।*(५)*

▼

⑤

>
▼ Oldenberg

16. To the north of the fire he strews Darbha grass and (on that) he places the vessels (required for sacrifice) upside-down, two by two, if referring to ceremonies directed to the gods,

▼ हरदत्तः

परिस्तरणानन्तरं अग्नेरुत्तरतः पात्रप्रयोगार्थं दर्भान् प्रागग्रान् संस्तृणाति । प्रथितं स्तरणम् । **प्रयुनक्ति** सादयति । **न्यञ्चि** न्यग्भूतानि । सर्वाणि च द्रव्याणि प्रयोजनवन्ति पात्रग्रहणेन गृह्यन्ते । तेनोपनयनादौ मेखलादीनामपि सादनं भवति । तत्र यानि देवसंयुक्तानि तानि द्वन्द्वं प्रयुनक्ति । द्वे द्वे इत्यर्थः । पार्वणादीनि देवकर्माणि । अग्निग्रहणमनर्थकमविकृतत्वात् अग्निमिध्वेति । ज्ञापकार्थं चैतत् ज्ञापयति अग्निपरिस्तरणे विहितोऽयं पात्रप्रयोगे नानुवर्तते इति । कदा पुनरसौ ? दर्भाग्रविशेषस्तन्त्राभावे प्रवृत्तिश्च । तेन पित्र्येष्वपि प्रागग्राणामेव संस्तरणं अग्नेश्चोत्तरतः तन्त्राभावे च पात्रप्रयोगाभावात् । अधिकारात्त्वग्निप्रतिपत्तावेव । तदप्युभयं प्रतिपत्तव्यं स्यात् अधिकारादेव ॥१६॥

▼ सुदर्शनः

अग्नेरुत्तरतोऽदूरेण दर्भान् संस्तृणाति । एते च प्रागग्राः, बौधायनगृह्यात् । प्रथितं च स्तरणं, समुपसर्गात् । उदक् च स्तरणापवर्गः । पित्र्येष्वप्यग्नेरुत्तरत एव प्रागग्रैः, "उत्तरत उपचारो विहारः, (आप.प.२-१०.) इति सिद्धेऽपीहाप्युत्तरेणेति वचनात्, प्रकृतेऽप्यग्नौ "अग्निम्" इत्यधिकशब्दस्य अधिकार्थपरत्वस्य युक्तत्वात्, परिस्तरणवद्विशेषस्यानुक्तेश्च । अपवर्गस्तु दक्षिणत एव । **देवसंयुक्तानि** देवकर्मसंयुक्तानि । **पात्राणि** दर्व्यादीनि । **द्वन्द्वं,** द्वे द्वे । **न्यञ्चि** अधोबिलानि । **प्रयुनक्ति** सादयति । ननु–उत्तरत्र "मनुष्यसंयुक्तानि" "पितृसंयुक्तानि" इति विशेषणेनैव सिद्धत्वात् "देवसंयुक्तानि" इति व्यर्थम् । न; दैवानि हि कर्माणि द्विविधानि-पुरुषार्थरूपाणि मनुष्यसंस्कारकाणि च । तत्रोभयत्रापि देवपात्राणां दध्यादीनां द्वन्द्वतासिद्ध्यर्थत्वात् ॥१६॥

▼

⑤

>

उत्तरेणाग्निं दर्भान्त्संस्तीर्य द्वन्द्वं न्यञ्चि पात्राणि प्रयुनक्ति देवसंयुक्तानि।

# ०१ १७ सकृदेव मनुष्यसंयुक्तानि②

सकृदेव मनुष्यसंयुक्तानि।

▼

⑤

>
▼ Oldenberg

17. All at once, if to men,

▼ हरदत्त-प्रस्तावः

तत्र मनुष्यसंस्कारकर्मार्थेषु केषुचित् पात्रेष्वपवादमाह–

▼ हरदत्तः

यानि मनुष्यसंयुक्तानि पात्राणि तानि सकृदेव प्रयुनक्ति, न द्वन्द्वम् । मनुष्यकर्माणि विवाहादीनि । एवकारः क्रियाभ्यावृत्तिप्रतिषेधार्थः । पात्रबाहुल्यात् द्वाभ्यां बाहुभ्यां सादनाशक्तावप्युपायेन सकृदेव सादनमिति । केचित् मेखलादीनामेव मनुष्यसंयुक्तानां सकृत् प्रयोगमिच्छन्ति, न होमार्थानाम् । वयं तु मनुष्यसंयुक्तानि मनुष्यकर्मसंयुक्तानीत्यवोचाम ॥१७॥

▼ सुदर्शनः

**मनुष्यसंयुक्तानि** मनुष्यद्वारा संयुक्तानि अश्मवासोमेखलादीनि सकृदेव क्रियाभ्यावृत्तिपरिहारेण प्रयुनक्ति, पात्रबहुत्वेऽप्युपायेन । केचित्– मनुष्यसंस्कारकर्मसु दर्व्यादीन्यपि सकृदेवेति ॥१७॥

▼

⑤

>

सकृदेव मनुष्यसंयुक्तानि।

# ०१ १८ एकैकशः पितृसंयुक्तानि②

एकैकशः पितृसंयुक्तानि।

▼

⑤

>

▼ Oldenberg

18. One by one, if to the Fathers.

▼ हरदत्तः

यानिपितृकर्मसंयुक्तानि तान्येकैकशः प्रयुनक्ति एकमेकमित्यर्थः ॥१८॥

▼ सुदर्शनः

पितृकर्मार्थानि दर्व्यादीनि स्वधापात्रादीनि च एकमेकं प्रयुनक्ति ॥१८॥

▼

⑤

>

एकैकशः पितृसंयुक्तानि।

# ०१ १९ पवित्रयोस्सँस्कार आयामतः②

(पवित्रसृष्टिः -)

पवित्रयोस् संस्कारः, आयामतः *(=दीर्घतः [प्रादेशमात्रं])* परीमाणम्,
... इति दर्शपूर्णमासवत्तूष्णीम्।

▼ विश्वास-टिप्पनी

> तयोर् आयामतो यत्परिमाणं दीर्घप्रमाणं प्रादेशमात्रौ।[आप.श्रौ.१११९.] समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कुरुते, तृणं काष्ठं वान्तर्धाय छिनत्ति, न नखेन।

ततोऽप उपस्पृशेत् - "रौद्रराक्षस" इति परिशिष्टवचनात्। ततस्तयोर्मूलाद् आरभ्याऽग्राद् अद्भिर्मार्जनम् ।

आज्यसंस्काराय प्रोक्षणीसंस्काराय प्रणीताप्रणयनाय च प्रयुज्यते।

▼

⑤

>
▼ Oldenberg

19. 2 The preparation of the (blades used as) 'purifiers,' the measure of their length, the preparation of the Prokṣaṇī water, and the sprinkling of the vessels are the same here as at the sacrifices of the new and full moon, (but are performed) in silence.

▼ हरदत्तः

पवित्रयोस्संस्कारः तृणं काष्ठं वेत्येवमादिः । तयोरायामतो यत् परिमाणं दीर्घप्रमाणं प्रादेशमात्रा (आप.श्रौ.१-११-९.) वित्येतत् । प्रोक्षणीसंस्कारः "पवित्रान्तर्हितायामाग्निहोत्रहवण्याम्" (आप.श्रौ.१-११-९.) इत्यादि । तत्राग्निहोत्रहवण्या इहाभावात् पात्रान्तरं प्रापयते । उत्तानानि पात्राणि इत्यादि पात्रप्रोक्षणम् । तदेतत् पदार्थचतुष्टयं दर्शयति । दर्शपूर्ममासयोरिवात्रापि कर्तव्यम् । तूष्णीमिति मन्त्रप्रतिषेधः । यथा प्रोक्षणे पात्राणामुक्ता क्रिया विस्रंसनञ्चेध्मस्य तदन्तर्भावादेव सिद्धम् । इदं तु वचनं नियमार्थम्–पवित्रयोरेवायामतः परिमाणं यथा स्यात् इध्मस्य दर्भाग्रयोश्चाज्ये प्रत्यस्यमानयोर् मा भूदिति । कथं पुनस्तत्र प्रसङ्गः ? एतदेव ज्ञापयति–भवत्यत्रापि दर्शपूर्णमासवत्तूष्णीं संस्कार इति । आयामग्रहणमायामपरिमाणस्य च पवित्रयोर्नियमोऽयं वा स्मार्तेन संख्यापरीमाणं दार्शपूर्णमासिकमेवेध्मस्य भवति । तेनात्राविद्यमानेष्वनूयाजेषु न एकविंशतिदारुरिध्मो भवति । उपहोमास्त्वनूयाजार्थे भवन्ति ॥१९॥

▼ सुदर्शनः

पवित्रयोस्संस्कारो दर्शपूर्ममासाभ्यां तुल्यं मन्त्रवर्ज कार्यः । समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे कुरुते, तृणं काष्ठं वान्तर्धाय छिनत्ति, न नखेन । ततो.प उपस्पृशेत् । "रौद्रराक्षस" (आप.प. २-९.) इति वचनात् । ततस्तयोर्मूलादारभ्याऽऽग्रादद्भिर्मार्जनम् । तयोश्चायामतः परीमाणं दर्शपूर्णमासवदेव । यद्यपि "पवित्रयोस्संस्कारो दर्शपूर्णमासवत्" इति वचनादेव तद्वदायामतः परिमाणं प्राप्तम्, तथापि यदायामतः परीमाणं प्रादेशमात्राविति तदेव तद्वत्, न त्विह पृथुत्वेनापि साम्यमित्येवमर्थं "आयामतः परिमाणम्" इति पुनर्वचनम् ॥ केचित्–पवित्रयोरेवायामतः परीमाणं दर्शपूर्णमासवत्, न त्विध्मस्य दर्भाग्रयोश्चाज्ये प्रत्यस्यमानयोरिति नियमार्थं पुनर्वचनम् । एवं ब्रुवतैव सूत्रकारेण दर्शपूर्णमासवत्तूष्णीमिध्मस्य दर्भाग्रयोश्च संस्कार प्रसिद्धवदभ्यनुज्ञातः । तथैव चाचारः । तेन खादिरः पालाशो वा शुल्वसन्नद्ध इध्मो विस्रस्य त्रिः प्रोक्षितव्यः । पार्वणे च पूर्वद्युस्सन्नद्धव्यः । दर्भाग्रे च "तृणं काष्ठं वा" (आप.श्रौ.१-११-७.) इत्यादिविधिना संस्कृत्याज्ये प्रत्यसितव्ये । अत्र च यद्यप्ययमर्थः "आयामतः" इति वा "परिमाणं" इति वान्यतरेण सिद्धः ; तथापि नियमान्तरार्थमेवमुक्तम् । आयामत एव यत्परिमाणं तदेव पवित्रयोः दर्शपूर्णमासवत्, न संख्यातः परिमाणम् । तेनेध्मस्य संख्यापरिमाणं दार्शपूर्णमासिकमेव "एकविंशतिदारुमिध्मम्" (आप.१-५-६.) इति; आयामस्यैव पवित्रयोर्नियमितत्वात् । यद्यप्यनूयाजाभावादेकविंशत्या न कार्यम्; तथाप्येतद्बलात्तत्स्थाने जयादयः कल्प्याः इत्ययुक्तं भूयिष्ठं च पूर्वव्याख्यानेनान्यथासिद्धेऽपि सूत्रे कल्पयन्ति ॥ प्रोक्षणीसंस्कारोऽपि दर्शपूर्णमासवत्तूष्णीम् । उदगग्राभ्यां पवित्राभ्यां अन्तर्हितायां वेकङ्कत्यां स्रुच्यप आनीय ताभ्यां त्रिरुत्पूय प्रोक्षेत् । पात्रपेरोक्षणमपि तद्वत्तूष्णीम् । उत्तानानि पात्राणि कृत्वेध्मं च विस्रस्य ताभिस्सपवित्रेण पाणिना त्रिः प्रोक्षेत् ॥१९॥

▼

⑤

>

पवित्रयोस्सँस्कार आयामतः परीमाणं प्रोक्षणीसँस्कारः पात्रप्रोक्ष इति दर्शपूर्णमासवत्तूष्णीम्।

# ०१ २० अपरेणाग्निम् पवित्रान्तर्हिते②

अपरेणाग्निं पवित्रान्तर्हिते पात्रेऽप आनीयोदगग्राभ्यां पवित्राभ्यां त्रिर् उत्पूय,
समं प्राणैर् हृत्वोत्तरेणाग्निं दर्भेषु सादयित्वा, दर्भैः प्रच्छाद्य २०

▼

⑤

>

▼ Oldenberg

20. 3 To the west of the fire he pours water into a vessel over which he has laid (two grass blades called) purifiers, purifies (the water) three times with two northward-pointed purifiers, holds it on a level with his nose and mouth, places it to the north of the fire on Darbha grass, and covers it with Darbha grass.

▼ हरदत्तः

पात्रप्रोक्षणानन्तरमपरेणाग्निं प्रणीतायां पवित्रं निधाय तस्मिन्नुदगग्रे पवित्रे अन्तर्धायाप आनीय्य पवित्राभ्यां उदगग्राभ्यां त्रिरुत्पुनाति प्रागपवर्गम् । अग्निग्रहणं पात्राधिकारात् । अङ्गुष्ठोपकनीष्ठोभ्यामुत्तानाभ्यां पाणिभ्यामिति कल्पान्तरे दृष्टो विशेषः । उत्पूय ता अपस्समं प्राणैर्हरति । मुखेन तुल्यमित्यर्थः । हृत्वोत्तरेणाग्निं दर्भेषु संस्तीर्णेषु सादयति । अग्निग्रहणं पात्रैर्व्यवधानं मा भूदिति । सादयित्वा दर्भैः प्रच्छादयति । सर्वञ्चैतत् पवित्रहस्तः करोति ॥२०॥

▼ सुदर्शनः

अग्नेरदूरेण पश्चात् पवित्रान्तर्हिते कस्मिंश्चित् पात्रेऽप आनीयोदगग्राभ्यां पवित्राभ्यां त्रिरुत्पुनाति । अत्र प्रकृतयोरपि पवित्रयोः पुनर्ग्रहणात् पाण्योः प्रागग्रत्वमाचारसिद्धं "आङ्गुष्ठोपकनिष्ठिकाभ्यामुत्तानाभ्यां पाणिभ्याम्" (आश्व.गृ.१-३-३.) इत्याश्वलायनोक्तं च ज्ञापितम् । ततस्ता अपस्समं प्राणैर्हृत्वा प्राणस्थानाभ्यां मुखनासिकाभ्यां सममुदूधृत्य उत्तरेणाग्निं पुनस्तीर्णेषु दर्भेषु सादयति, "दर्भेषु" इति वचनात् । अन्ये पूर्वस्तीर्णेषु । ततो दर्भैः प्रच्छादयेत् । अत्र "अपरेणाग्निम्" इत्यग्निग्रहणं पात्राणामपरेण मा भूदिति । "उत्तरेणाग्निम्" इति तु पात्रव्यवधाननिवृत्त्यर्तम् ॥२०॥

▼

⑤

>

अपरेणाग्निं पवित्रान्तर्हिते पात्रेऽप आनीयोदगग्राभ्यां पवित्राभ्यां त्रिरुत्पूय समं प्राणैर्हृत्वोत्तरेणाग्निं दर्भेषु सादयित्वा दर्भैः प्रच्छाद्य।

# ०१ २१ ब्राह्मणन् दक्षिणतो②

ब्रह्म-वरणम् - ब्राह्मणं दक्षिणतो दर्भेषु निषाद्य २१

▼

⑤

>

▼ Oldenberg

21. 4 On the south side he causes a Brāhmaṇa to sit down on Darbha grass.

▼ हरदत्तः

प्रकृतत्वादग्नेः दक्षिणतः । तत्रापरेणाग्निं दक्षिणातिक्रम्य तूष्णीं तृणं निरस्योपवेशनमिच्छन्ति । अग्रेणाग्निं परीत्यान्ये । "हौत्रब्रह्मत्वे स्वं कुर्वन् ब्रह्मासनमुपविश्य चि(छ)त्रमुत्तरासङ्गं कमण्डलुं वा तत्र कृत्वाथान्यत् कुर्याद्(खा० सू०१-१-२६.) इति कल्पान्तरम् । कृताकृतमाज्यहोमेषु परिस्तरणम् । तथाज्यभागौ वा ब्रह्मा चेदा(त्या)श्वलायनः ॥२१॥

▼ सुदर्शनः

अग्निमिध्वेति प्रकृतत्वातग्नेर्दक्षिणतो दर्भेषु कंचिद्ब्राह्मणमुपवेशयेत् । न तु दर्शपूर्णमासवद्ब्रह्माणं, समानविधानवचनानाम् चोदनालिङ्गानि विनात्र तदीयस्य ब्रह्मणः प्राप्त्यभावात्, "ब्राह्मणं दक्षिणतो दर्भेषु निषाद्य" इति कृत्स्नविधानाच्च । तेनात्र ब्रह्मधर्माः वरणतृणनिरसनादयो न कर्तव्याः । पितृभूतर्त्विक्पक्षेऽपि यः पितुर्ब्रह्मा स एवात्र निषाद्यत इति नियमो नास्ति ॥

अन्ये तु– श्रौते ब्रह्मा दक्षिणेनाग्निं दर्भेषु निविष्टो दृष्टः । तथैव बह्वृचानां छन्दोगानां च गृह्ये ब्रह्मेत्येव चोदितः । अतोऽत्रापि "ब्राह्मणं दक्षिणत" इति लक्षणया ब्रह्मैव चोद्यते । तेन सम्भवन्तो ब्रह्मधर्मा इहापीति । तन्न, स्वगृह्यस्थस्य ब्राह्मणशब्दस्य श्रुत्यर्थत्यागेन परगृह्याल्लक्षणाश्रयणस्यायुक्तत्वात् । न च दक्षिणतो निषादितस्य ब्राह्मणमात्रस्य ब्रह्मत्वं सूत्रकारस्येष्टम् । यदि हि तथा स्यात्, "यं ब्राह्मणं विद्यां विद्वाँसं यशो नर्च्छेत्" (आप.श्रौ.१४-१३-७.) इत्यत्राल्पैरेवाक्षरैः "ब्रह्मणे वरं ददाति" इति ब्रूयात्, न पुनस्त्रिगुणैः "यो दक्षिणत आस्ते तस्मै वरं ददाति" (आप.श्रौ.१४-१३-९.) इति । सम्भवतां धर्माणां प्राप्तौ मन्त्राणामपि प्राप्तिर्दुर्वारा ।

"ब्राह्मणं दक्षिणतो निषाद्य" इत्यत्रानुक्तानां मन्त्रादीनां परिसंख्येयं चेति वदतां चोक्तरीत्या स्वार्थपरत्वे सम्भवति दोषत्रत्रययुक्तपरिसंख्याश्रयणं निर्हेतुकम् ॥२१॥
▼

⑤

>

ब्राह्मणं दक्षिणतो दर्भेषु निषाद्य।

# ०१ २२ आज्यं विलाप्यापरेणाग्निम्②

आज्य-संस्कारः - आज्यं विलाप्य, अपरेणाग्निं पवित्रान्तर्हितायाम् आज्यस्थाल्याम् आज्यं निरुप्य, उदीचोऽङ्गारान्निरूह्य, तेष्वधिश्रित्य, ज्वलताऽवद्युत्य, द्वे दर्भाग्रे प्रत्यस्य *(अनेन वज्रनिभाभ्यां रक्षोनाशः)*, त्रिः पर्यग्नि कृत्वा *(अनेन देवेभ्यः प्रतिजानति द्रव्यम्)*, उदगुद्वास्याङ्गारान् प्रत्यूह्य, उदगग्राभ्यां पवित्राभ्यां पुनराहारं त्रिरुत्पूय *(अनेन शोधनम्)*, पवित्रे अनुप्रहृत्य २२

▼

⑤

>
▼ Oldenberg

22. He melts the Ājya, pours it, to the west of the fire, into the Ājya-pot, over which he has laid two purifiers, draws coals (out of the sacrificial fire) towards the mirth, puts (the Ājya) on them, throws light on it by means of a burning (grass-blade), throws two Darbha points into it, moves a firebrand round it three times, takes it from the fire towards the north, sweeps the coals back (into the fire), purifies (the Ājya) three times with two northward-pointed purifiers, moving them backward and forward, and throws the purifiers into the fire.

▼ हरदत्तः

अथाज्यसंस्कार तत्र विलापनमाज्यस्य यस्मिन्कस्मिंश्चिदग्नौ भवति उत्तरत्राज्यग्रहणात् । **निर्वापः** आनयनम् । पुनराज्यग्रहणमनाघारेऽपि कर्मणि संस्कारः आज्यस्य यथा स्यात् । आज्यं सर्वत्र निरुप्य जुहोतीति । **निरूहणं** पृथक्करणम् । उदग्वचनं पुत्र्येष्वपि यथा स्यात् । एतोनोद्वासनं व्याख्यातम् । **अवद्योतनं** ज्वलता तृणेनावदीपनम् । तत्र द्वे दर्भाग्रे पवित्रवत्संस्कृत्याज्ये प्रत्यस्यति प्रक्षिपति । द्वे ग्रहणमेकं वेत्यस्याग्निहोत्रदृष्टस्य विकल्पस्य प्रतिषेधार्थम् । तेनाग्निहोत्रिकेऽपि तन्त्रे द्वे एव दर्भाग्रे भवतः । ततस्तदाज्यं त्रिः प्रदक्षिणं पर्यग्नि करोति आज्यस्य सर्वतोऽग्निं त्रिरावर्तयति तृणेनोल्मुकेन वा । तत्र पित्र्येष्वपि प्रदक्षिणं पर्यग्निकरणमिच्छन्ति । **उद्वासनं** निर्हरणम् । **प्रत्यूहनम्** अग्निमा संसर्जनम् । **पुनराहारं** पुनराहृत्याहृत्य । त्रीण्येतानि उत्पवनानि प्रत्यगपवर्गाणि । अनुप्रहरणमग्नौ; प्रकरणात् "विस्रस्याद्भिस्संस्पृश्ये"ति कल्पान्तरात् ॥

इति श्रीहरदत्तविरचितायां गृह्यसूत्रवृत्तावनाकुलायां प्रथमः खण्डः ॥

▼ सुदर्शनः

यद्यपि "सर्पिराज्यं प्रतीयात्" (आप.प.१-२५.) इति परिभाषासिद्धं विलापनं, तथापि विलीनमप्याज्यं होमार्थेऽग्नौ कर्मार्थं पुनर्विलापयेत् । ततोऽग्नेः पश्चात् स्थापितायां पवित्रान्तर्हितायामाज्यस्थाल्यां तदाज्यमानयेत् । "आज्यं विलाप्य" इति प्रकृतेऽपि पुनराज्यग्रहणमाज्यस्यैव निर्वापादयः न पुनः "दध्न एवाञ्जलिना जुहोति"(आप.गृ.२२-१०.) इत्यत्र(२) पशुप्रभवस्य होमद्रव्यत्वेऽपि यदीयतदीयन्यायाद्दध्नो भवेयुरित्येवमर्थम् ॥ केचित्– अतन्त्रकेऽपि कर्मण्याज्यं निर्वापादिभिस्संस्कार्यमित्येवमर्थमिति ॥ अद्भिमित्यग्नेरेव पश्चात् न ब्राह्मणस्येति । केचित्तु– अन्यस्मिन्नग्नौ विलापनं, होमार्थाग्नेरेव पश्चान्निर्वाप इत्येवमर्थमिति ॥ अथाङारानुदीचो **निरूह्य** निर्वर्त्य, तेष्वङ्गारेषु आज्यमधिश्रित्य, ज्वलता तृणेनावद्युत्य अधोगामिन्या दीप्त्या द्योतयित्वा, द्वे दर्भाग्रे अनियतायामे तृणाद्यन्तर्धाय छित्वाऽद्भिस्संस्पृश्य ते युगपदाज्ये प्रक्षिपेत् "द्वे" इत्यधिकशब्दात्, आचाराच्च । अथोल्मुकमादायाज्ये प्रदक्षिणं त्रिः पर्यग्नि कृत्वा समन्ततोऽग्निमावर्त्य तदुदगवतारयेत् । अत्र निरूहणोद्वासनयोरुदगपवर्गस्य "तथापवर्गः" (आप.गृ.१-६.) इति सिद्धस्य पुनर्विधानमेतयोर्नित्यमुदगेवापवर्गः, न तु दैवे विकल्पेनापि प्रागपवर्गः, नापि पित्र्ये दक्षिणतोऽपवर्ग इति नियमार्थम् । तथैव पित्र्येष्वेतयोर्मध्यस्थं पर्याग्निकरणमपि सन्दंशन्यायाद्दैववत्प्रदक्षिणमेव । इत्थमेव शिष्टाचारः । ततोऽङ्गारान् पूर्व निरूढान् **प्रत्यूह्य** पुनरायतनस्थाग्निना संयोज्य । अत्राज्यसंस्कारकाणां अङ्गाराणां प्रत्यूहनविधानात् "अपवृत्ते कर्मणि" (आप.परि.४-२३.) इति न लौकिकत्वम् । अवद्योतनपर्यग्निकरणाग्नयोस्तु यदा आयतनस्थादुपादानं तदा तयोरग्नयोरपवृत्तकर्मत्वेन लौकिकत्वात् त्यागः । यदा तु निरूढात् तदा तदा तस्मिन्नेव क्षेपः । अथ पूर्ववदुदगग्राभ्यां पवित्राभ्यां **पुनराहारं त्रिरुत्पूय** पुनराहृत्याहृत्य त्रिरुत्पूय । अत्र पुरस्तादारभ्य पश्चान्नीत्वा पुरस्तात् परिसमाप्तिः । केचित्– आङो बलाद्विपरीतमाहुः ॥ ततस्ते **पवित्रे अनुप्रहृत्य** आचारानुकूलं प्रहृत्य, यदि ग्रन्थिस्स्यात् तदा विस्रस्याद्भिससंस्पृश्य प्रागग्रे अग्नौ प्रहरेदित्यर्थः ॥२२॥

इति श्रीसुदर्शनाचार्यकृते गृह्यतात्पर्यदर्शने प्रथमः खण्डः इत्यापस्तम्बीये गृह्यप्रश्ने प्रथमः खण्डः ॥

▼

⑤

>

आज्यं विलाप्यापरेणाग्निं पवित्रान्तर्हितायामाज्यस्थाल्यामाज्यं निरुप्योदीचोऽङ्गारान्निरूह्य तेष्वधिश्रित्य ज्वलताऽवद्युत्य द्वे दर्भाग्रे प्रत्यस्य त्रिः पर्यग्नि कृत्वोदगुद्वास्याङ्गारान् प्रत्यूह्योदगग्राभ्यां पवित्राभ्यां पुनराहारं त्रिरुत्पूय पवित्रे अनुप्रहृत्य॥२२॥

# ०२ ०१ येन जुहोति②

दर्वी-संस्कारः - येन जुहोति, तदग्नौ प्रतितप्य, दर्भैः संमृज्य, पुनः प्रतितप्य, प्रोक्ष्य, निधाय, दर्भान् अद्भिस्संस्पृश्याग्नौ प्रहरति १

▼

⑤

>

▼ Oldenberg

1. He warms at the fire the implement with which he sacrifices, wipes it off with Darbha blades, warms it again, sprinkles it (with water), puts it down, touches the Darbha blades with water, and throws them into the fire.

▼ हरदत्तः

संमार्जनं स्रुग्वत् । **प्रतितपनं** न्यग्भूतस्य तपनम् । अग्निग्रहणमनर्थकम् , अन्यत्र प्रतितपनस्यासम्भवात् । तत्क्रियते दर्शपूर्णमासयोस्सम्मार्जने ये धर्मास्तेषामिह प्राप्त्यर्थमाहवनीये गार्हपत्ये वा चोदितं यत्प्रतितपनं तदस्मिन्नग्नौ भवतीति । अग्निमात्रं भिद्यते । अन्यत् समानं "स्रुवमग्रैर्

(आप.श्रौ.२४४) इत्यादि । अग्नौ प्रहरतीति पुनरग्निग्रहणं सुक्संमार्जनधर्मा इह प्रवर्तन्त इति । पाकयज्ञेषु च दर्व्या होमः, कल्पान्तरे दृष्टत्वाद्दर्शनाच्च । यदयं समावर्तने दर्व्यामादायाज्येनाभ्यानयन्नित्यन्यपरे वाक्ये दर्वी प्राप्तां दर्शयति । यच्चायं सकृदुपहत्येति उपघातं स्थालीपाकाद्दर्शयति तदपि नादर्व्यामुपपद्यते । तत्राज्यहोमेष्वेका दर्वी । स्थालीपाकेषु द्वे होमार्थं चावदानार्थं च । उभयोरपि सम्मार्जनम् । अवदानस्य होमार्थत्वात् यथाग्निहोत्रे स्रुवस्य । तत्र दर्वीमग्नौ प्रतितप्येति वक्तव्यम् । येन जुहोतीति किमुच्यते ? "मध्यमेनान्तमेन वा पलाशपर्णेन" इत्यत्रापि यथा स्यात्, अग्निहोत्रे आग्निहोत्रिके च तन्त्रे यथा स्यादिति । यद्येवमञ्जलेरपि प्रसङ्गः । विवाहसर्पयज्ञादिषु ज्ञापकात् सिद्धम् । यदयमौपकार्ये पार्वणवदिति यत्नं करोति तत् ज्ञापयति– अञ्जलिहोमा अधर्मग्राहकाः यावदुक्तधर्माण इति । तेन सादनादि त्रयमञ्जलेर्न भवति ॥१॥
▼ सुदर्शनः

येन पात्रेण दर्व्या स्रुवेणाञ्जलिना वा जुहोति तदग्नौ प्रतितप्येत्यादि व्यक्तार्थम् । दर्व्याश्च होमपात्रत्वं "दर्व्यामाधायाज्येनाभ्यानायन्" (आप.गृ.१२-९.) इत्यन्यपरे वाक्ये सिद्धवद्दर्शनात्, आचाराच्च । बोधायनेन तु "निर्ऋतिगृहीता दर्वी" इति दर्वीनिन्दा स्रुवविधानार्था, न तु दर्व्या निषेधार्था । अतो दर्वीस्रुवयोर्विकल्पः । तत्र केवलाज्यहोमेषु एकैव दर्वी स्रुवो वा, उपस्तरणाद्यभावात् । चर्वादिहोमेषु तु द्वे दर्व्यौ स्रुवौ वा उपस्तरणाद्यर्थं होमार्थं च । उपस्तरणाद्यर्थस्यापि संस्कारः, उपस्तरणादि प्रदानान्तस्य होमपदार्थत्वात्, श्रौते स्रुवस्यापि संस्कारदर्शनात्, आचाराच्च । दर्व्यादीनां त्रयाणां तन्त्रवद्धोमेष्वेव संस्कारः, अतन्त्रकेषु तन्त्रान्तर्गतधर्मानुपपत्ते । तेन "अनुगतेऽपि वोत्तरया जुहुयात्" (आप.गृ.५-१८.) "सर्षपान् फलीकरणमिश्रान्" (आप.गृ.१५-६.) इत्यादिषु न दर्व्यादीनां संस्कार । अत्राग्नौ प्रतितप्याग्नौ प्रहरतीत्यर्थसिद्धाग्निग्रहणमेवंनामायं कृत्स्नविधिरिति ज्ञापयितुम् । तेन "स्रुवमग्रे" (तै.ब्रा.३-३-१.) इत्याद्यैष्टिकस्रुक्संमार्जनधर्माणामिहानुपपत्तिप्रसङ्ग एव । केचित्–अग्नौ प्रतितप्याग्नौ प्रहरतीति प्रयोजनान्तरशून्यादग्निग्रहणादैष्टिकस्रुक्सम्मार्गधर्मा इहापि भवन्तीति । प्रतितपनं त्वस्मिन्नेवाग्नौ । इह च सम्मार्गदर्भाणामग्नावेव प्रहरणम्, न पुनर्वैकल्पिकम् । तथा "येन जुहोती"त्यत्र सामान्यवचनम् "मध्यमेनान्तमेन वा पलाशपर्णेन" (आप.गृ.२२-४.) इत्याद्यतन्त्रकेऽपि कर्मणि आग्निहोत्रिके च विधौ होमार्थपात्रस्यापि संस्कारो यथा स्यादित्येवमर्थम् । अञ्जलेस्त्वपूपहोमे अवदानप्राप्त्यर्थेन "पार्वणवत्" (आप.गृ.२२-१.) इति य यत्नेनाञ्जलिहोमा अपूर्वा यावदुक्तधर्माण इति ज्ञापनान्न संस्कार इति ॥१॥
▼

⑤

>

येन जुहोति तदग्नौ प्रतितप्य दर्भैः सम्मृज्य पुनः प्रतितप्य प्रोक्ष्य निधाय दर्भानद्भिस्संस्पृश्याग्नौ प्रहरति।

# ०२ ०२ शम्याः परिध्यर्थे②

शम्याः*(=युगकीलाः)* परिध्यर्थे विवाह+उपनयन-समावर्तन-सीमन्त-चौल-गोदान-प्रायश्चित्तेषु २ *(अथ परिधीन् परिदधाति। तत आघारसमिधौ।)*

▼

⑤

>
▼ Oldenberg

2. 5 As paridhis (or pieces of wood laid round the fire) yoke-pins are used at the marriage, the Upanayana, the Samāvartana, the parting of the (wife's) hair, the tonsure of the child's hair, the cutting of the beard, and at expiatory ceremonies.

▼ हरदत्तः

अथ परिधीन् परिदधाति । दर्शपूर्णमासवत्सर्वं तूष्णीं तत आधारसमिधौ । कुत एतत्? प्रसिद्धवदभ्यानुज्ञानाच्छम्याः परिध्यर्थ इति **परिध्यर्थे** परिधिकार्य इत्यर्थ । **शम्याः** लोकप्रसिद्धाः युगप्रान्तयोःछिद्रेषु कीलरूपाः काष्ठविशेषाः । तासां सहेध्मेन सन्नहनम् । **प्रायश्चित्तं** अद्भुतोत्पातप्रायश्चित्तम् । विवाहे च हृदयसंसर्गार्थे सर्वत्र शम्याः । विवाहादिभ्योऽन्यत्र सर्वत्र पार्वणादिषु परिधय एव । चौलग्रहणमनर्थकं सीमन्तातिदेशात् सिद्धम् । ज्ञापकार्थन्तु, एतत् ज्ञापयति– विवाहादिष्विह संकीर्तितेष्वेव शम्याः, न तैरतिदिष्टेषु इति । तेन सीमन्तादतिदिष्टे पुंसवने परिधय एव । पार्वणादिषु च पक्वहोमेषु तथा "एवमत ऊर्ध्वम्" इति वैवाहिकेन स्थालीपाकादिति दर्शनात् प्रसङ्गः ॥ २ ॥

▼ सुदर्शनः

विवाहादिषु कर्मसु **परिध्यर्थे** परिधीनां कार्ये परिधीनां स्थान इति यावत्, **शम्याः** युगकीलका भवन्ति । ताश्च पलाशादीनामन्यतमेन क्लृप्ताः परिधिस्थौल्यायामाः, तत्स्थानापन्नत्वात् । युक्तं चैतत्, यस्मादेवविधविषये वार्तिककारपादैरुक्तम्— "सम्भवन्ती खलेवाली खादिरी किन्नु बाध्यते ।

इति ॥ अत्र विवाहशब्देन स्थालीपाकवर्जितः साङ्गो विवाहो गृह्यते । तद्वर्जनकारणं पार्वणेनेत्यत्र वक्ष्यामः । सीमन्ते शम्याविधानादेव तद्विकारे चौले चौलविकारे च गोदाने शम्याप्राप्तावपि तयोर्ग्रहणं सीमन्तविकारेऽपि पुंसवने तासां निवृत्त्यर्थम् । प्रायश्चित्तं च "अगारस्थूणाविरोहणे" (आप.गृ.२३-९.) इत्यादिना विहितम् । अत्र च "पलाशकार्ष्मर्य" (आप.श्रौ.१-५-८.) इत्यादिसूत्रोक्तगुणयुक्तांस्त्रीन् परिधीन् संस्पृष्टान् । "परिधीन् परिदधाति" (तै.ब्रा.३-३-७.) इत्यादि विधानात् तूष्णीं परिदध्यादिति सूत्रकारस्याभिप्राय, "शम्याः परिध्यर्थे" इति सिद्धवत् परिधीनङ्गीकृत्य तत्स्थाने शम्याविधानात्, आचाराच्च ॥२॥
▼

⑤

>

शम्याः परिध्यर्थे विवाहोपनयनसमावर्तनसीमन्तचौलगोदानप्रायश्चित्तेषु।

# ०२ ०३ अग्निम्②

परिषेचनम् - अग्निं परिषिञ्चत्य् - अदितेऽनुमन्यस्वेति दक्षिणतः प्राचीनम्, अनुमते ऽमुमन्यस्वेति पश्चादुदीचीनं, सरस्वतेऽनुमन्यस्वेत्युत्तरतः प्राचीनं, देव सवितः प्रसुवेति समन्तम् ३

अदि॒तेऽनु॑ मन्यस्व। *(इति दक्षिणतः, प्राचीनम्)*

अनु॑म॒ते*(=ऊनचन्द्रे पूर्णमासि)* ऽनु॑ मन्यस्व। *(इति पश्चिमाद् उदीचीनम्)*

सर॑स्-वते*(छान्दसो गुणः)* ऽनु॑ मन्यस्व। *(इति उत्तरतः प्राचीनम्)*

देव॑ सवित॒ः प्रसु॑व। *(इति प्रागारम्भं प्रदक्षिणं)*

▼

⑤

>
▼ Oldenberg

3. He sprinkles water round the fire, on the south side from west to east with (the words), 'Aditi, give thy consent!' on the west side from south to north with 'Anumati, give thy consent!' on the north side from west to east with 'Sarasvatī [sic], give thy consent!' all around with 'God Sāvitrī, give thy impulse!'

▼ हरदत्तः

परिषेचनमुदकेन पर्युक्षणम् । अग्निग्रहणं परिध्यधिकाराद् बहिः परिधिर्माभूदिति । प्राचीनमुदीचीनमित्युच्यते प्रागुदग्वा(ग्चा) यतं परिषेचनकर्म यथा स्यादिति । तथापवर्गस्तु परिभाषासिद्ध एव । "देव सवितः प्रसुवे"ति एतावान् मन्त्रः कल्पान्तरेषु भूयस्सु तथा दर्शनात् । बोधायनीये च विस्पष्टमेतत् "अन्वमंस्थाः प्रासावीरिति मन्त्रान्तान् सन्नमयति" (बौ.गृ.१-४-७.) इति । छन्दोगानामेव त्वयं मन्त्रादिः । **समन्तं** सम इत्यर्थः । तत्र पुरस्तादुपक्रम्य प्रदक्षिणं सर्वत्र प्रतिमन्त्रमुदकदानम् ॥३॥

▼ सुदर्शनः

अग्निमेवोदकेन परिषिञ्चति न परिध्याद्यङ्गमपि । तद्विधिमाह– **अदितेऽनुमन्यस्वेत्यादिना । प्राचीनं** प्रागायतम् । **उदीचानम्** उदगायतम् । **समन्तं** सर्वतः । अत्र "देव सवितः प्रसुव" इत्येतावानेव मन्त्रः, नर्च आदिप्रदेशः । तथा नोत्तरे परिषेचने "प्रासावी"रिति प्रसुवपदस्योहः । वैश्वदेवकाण्डे एकाग्निविधावेवमोवाम्नातानां "अदितेऽनुमन्यस्व" इत्यादीनामष्टानां यजुषां पूर्वोत्तरपरिषेचनस्थेष्वष्टसु व्यापारेषु श्रुतिस्थानाभ्यां विनियोगात्, वाजपेयप्रकरणस्थाया ऋचः स्वतोऽत्रापि विनियोगायोग्यत्वात्, आदिप्रदेशे समुदायलक्षणापत्तेः, यजुःप्राये मन्त्राष्टके ऋचोऽप्रतीतत्वात्, ऊहपक्षे आर्षपाठबाधप्रसङ्गात्, "तस्मादृचं नोहेत्" इति बह्वृचश्रुतिविप्रतिषिद्धस्य ग्रहणप्रसङ्गात्, अस्मदीयानामाचाराच्च । विस्पष्टं चैतत् बोधायनानां, "अन्वमंस्थाः प्रासावीरिति मन्त्रान्तान् सन्नमयति" (बौ.गृ.१-४-३७.) इति । एवं चोत्तरपरिषेचने" अन्वमंस्थाः प्रासावीः" इति

पूर्वमन्त्रेभ्यो विशेषमात्रस्य पाठः, न पुनरूहः । यथाग्नौ "एतेनैव त्रैष्टुभेन छन्दसाऽहरिष्टकामुपदधे" इति । सन्नामशब्दश्चात्र गौणः । अत एवैते मन्त्राः वैश्वदेवकाण्डमुपाकृत्य प्रागुत्सर्जनादध्येतव्याः, ब्रह्मयज्ञपारायणयोश्च ॥३॥

▼

⑤

>

अग्निं परिषिञ्चत्यदितेऽनुमन्यस्वेति दक्षिणतः प्राचीनमनुमतेऽमुमन्यस्वेति पश्चादुदीचीनं सरस्वतेऽनुमन्यस्वेत्युत्तरतः प्राचीनं देव सवितः प्रसुवेति समन्तम्।

# ०२ ०४ पैतृकेषु समन्तमेव②

पैतृकेषु समन्तमेव तूष्णीम्।

▼

⑤

>

▼ Oldenberg

4. At ceremonies belonging to the Fathers (water is sprinkled) only all round (the fire), silently.

▼ हरदत्तः

अक्रियमाण एवकारे समन्तपरिषेचने मन्त्रप्रतिषेधार्थमेतत् स्यात् । एवकारात्तु दक्षिणतः प्राचीनमित्यादे त्रयस्य निवृत्तिः ॥४॥

▼ सुदर्शनः

पैतृकेषु कर्मसु समन्तमेव परिषिञ्चति, न दक्षिणतः प्राचीनम्' इत्यादि । तच्च तूष्णीम् ॥४॥

▼

⑤

>

पैतृकेषु समन्तमेव तूष्णीम्।

# ०२ ०५ इध्ममाधायाघारावाघारयति②

इध्मः, आघारः - इध्ममाधाय *(एकविंशतिदारुमिध्मम् [आप.१५.६])*, आघाराव् *(आघारनामकौ होमौ द्वौ)* आघारयति *(= दीर्घधारया जुहोति)* दर्शपूर्णमासवत्तृष्णीम् ५ *(उत्तरं परिधिसन्धिमन्ववहृत्य... दक्षिणाप्राञ्चं ऋजुं सन्ततं ज्योतिष्मत्याघारमाघारयन् सर्वाणीध्मकाष्ठानि संस्पर्शयक्ति [आप.श्रौ.२१२७]। दक्षिणं परिधिसन्धिमन्ववहृत्य प्राञ्चमुदञ्चम्ऽ[आप.श्रौ.२१४१] ऋजू प्राञ्चौ होतव्यौ तिर्यञ्चौ वा व्यतिषक्तावव्यातिषक्तौ वाऽ[आप.श्रौ.२१२८]। गार्ह्यपरिभाषामनुसृत्य प्रागपवर्गाभ्यामुदगपवर्गाभ्यां वा दीर्घधाराभ्यां जुहोति, न तु कोणदिगपवर्गाभ्याम् इति तु केचित्।) (यत्तूष्णीम् तत्प्राजापत्यम् । (तै.ब्रा.२१४)* दर्शपूर्णमासवत्प्रथमस्य प्रजापतिः, द्वितीयस्येन्द्र इति केचित्। )

▼

⑤

>

▼ Oldenberg

5. 6 Having put a piece of wood on the fire, he offers the two Āghāra oblations as at the sacrifices of the new and full moon, silently.

▼ हरदत्तः

इध्म इति समुदायस्योपदेशात् पञ्चदशदारुमिध्मं सकृदेवादधाति । "अभिघार्ये"ति कल्पान्तरं दर्शपूर्णमासवदित्त्युत्तरं परिधिसन्धिमन्ववहृत्य दक्षिणं परिधिसन्धिमन्ववहृत्येत्येवमादिना विधाने तूष्णीमिति मन्त्रोच्चारणप्रतिषेधः । तेन "प्रजापतिं मनसा ध्याय"न्नित्येतदपि न भवति । मनसा मन्त्रोच्चारणं तत्र विधीयत इति कृत्वा काम्यानामाघारकल्पानामिहाप्रवृत्तिः प्रकृतिविषयत्वात्तेषाम् । केचित् स्रुवेण पूर्वमाघारमिच्छन्ति । अन्ये पुनः उभावपि दर्व्यैव वेदोपभृतोरभावात् उपयमनमपि न भवति । आसीन एव चेतरमप्याघारं जुहोति । न चाभिप्राणिति । अत्र प्रमाणमुपरिष्टाद्वक्ष्यामः ॥ ४॥

▼ सुदर्शनः

इध्ममग्नावादधाति । स च खादिरः पालाशो वा पञ्चदशसङ्ख्याकोऽर्थलक्षणस्थौल्यायामः, इध्मनामधेयात्, श्रौते दर्शनाच्च । युगपच्चाधानम्, "इध्मम्" इत्येकवचनेन समुदायस्य विवक्षितत्वात् । तच्च तूष्णीम्, मन्त्रस्याविधानात् ॥ अन्ये "तूष्णीम्" इत्यारभ्येदमेकं सूत्रं कत्वा हिरण्यकेशिनां योमन्त्रः "अयं त इध्मः इति, सः "अनुक्तमन्यतो ग्राह्यम्" इति न्यायेन नोपसंहर्तव्य इति व्याचक्षते । तेषां पैतृकेषु समन्तपरिषेचनं समन्त्रकं स्यात् । केचित् – गृह्यान्तरात्, इध्मोऽभिधार्यधेयः इति ॥ **आघारौ** आघारनामकौ होमौ द्वौ । **आघारयति** दीर्घधारया जुहोति, दर्शपूर्णमासवत् । "उत्तरं परिधिसन्धिमन्ववहृत्य.....दक्षिणाप्राञ्चं ऋजुं सन्ततं ज्योतिष्मत्याघारमाघारयन् सर्वाणीध्मकाष्ठानि संस्पर्शयति (आप.श्रौ.२-१२-७.) "दक्षिणं परिधिसन्धिमन्ववहृत्य" (आप.श्रौ.२-१३-११.) "प्राञ्चमुदञ्चम्" (आप.श्रौ.२-१४-१.) इत्यादि "ऋजू प्राञ्चौ होतव्यौ तिर्यञ्चौ वा व्यतिषक्तावव्यतिषक्तौ वा" (आप.श्रौ.२-१२-८.) इति वैकल्पिकास्त्रय आघारपक्षा एव दर्शपूर्णमासाभ्यां तुल्यं कर्तव्याः ; न पुनर्द्वितीयाघारस्य "पूर्वार्धे मध्ये पश्चार्धे वा जुहुयात्" (आप.श्रौ.२-१४-८.) इत्यनाघारपक्षोऽपि । इमौ च द्वावप्यासीनोदर्व्या तूष्णीमाघारयति, दुर्वीहोमानामपूर्वत्वेनैष्टिकाघारधर्माणां मन्त्राणां चाप्राप्तेः । तूष्णीमिति "तूष्णीं पञ्चाज्याहुतीर्हुत्वा" (आप.गृ.२२-४.) इतिवत् स्वाहाकारस्यापि निवृत्त्यर्थम् । अत उभयोरप्याघारयोः प्रजापतिर्देवता "यत्तूष्णीम् । तत्प्राजापत्यम् ।" (तै.ब्रा.२१४) इति श्रुते । कथं पुनरिमावजुहोतिचोदनौ दर्वीहोमौ ? उच्यते– यद्यपि जुहोतीत्येवं न चोदनास्ति, तथाप्याघारयतीति दीर्घाघारगुणकजुहोतिचोदनार्थत्वात्, याज्ञिकप्रसिद्धेश्च दर्वीहोमावेव । किञ्च "अथाज्यभागौ जुहोति"(आप.गृ.२-६.) इत्याज्यभागौ स्पष्टमेव दर्वीहोमौ; तत्साहचर्यादाघारावपि तथा । यथा अंशोरनारभ्याधीतस्य विनियोगसन्निधेरभावेऽप्यदाभ्यसाहचर्यात् सोमनियोगसम्बन्धः । एवं वा व्याख्यानम्– आघारावाघारयति । "पुरस्तादुदग्वोपक्रमः" (आप.ग.१-५.) इत्येतस्मात् परत्वेन प्रबलां "तथापवर्गः" (आप.गृ.१-६.) इति गार्ह्यपरिभाषामनुसृत्य प्रागपवर्गाभ्यामुदगपवर्गाभ्यां वा दीर्घधाराभ्यां जुहोति, न तु कोणदिगपवर्गाभ्याम् । नाप्यैष्टिकाघारधर्मा मन्त्राश्च, अपूर्वत्वादेव । देवते तु दर्शपूर्णमासवत् प्रथमस्य प्रजापतिः, द्वितीयस्येन्द्र इत्यर्थः । तूष्णीमिति पूर्ववदेव । अन्ये तु आघाराविति नामधेयं "मासमाग्निहोत्रं जुहोति" इतिवतैष्टिकाघारधर्मातिदेशकम् । अत्र स्रुवेण ध्रुवाया आज्यमादाय आसीनोऽन्यमाघारमाघारयन् (आप.श्रौ.२-१२-७.) "जुह्वेहीति जुहूमादत्ते" (आप.श्रौ.२-१३-२.) इत्यादिषु सर्वेषु आघारधर्मेषु तन्मन्त्रेषु च प्राप्तेषु "आघारावाघारयति" इति परिसङ्ख्यार्थम् । आघारयतीति दीर्घधाराधर्मकावेव होमौ कुर्यात्, नान्यधर्मकाविति । "तूष्णीम्" इति तु धर्मावान्तरभेदानां मन्त्राणां निवृत्त्यर्थम् । दर्शपूर्णमासवदिति त्वनर्थकमेवेत्याहुः । तन्न- दर्वीहोमयोरपूर्वयोः विशेषतश्चाङ्गभूतयोः धर्मातिदेशानपेक्षत्वात्, स्वतश्च नाम्नो धर्मलक्षणाया अयुक्तत्वात्, आघारयतीत्यत्र च सति गत्यन्तरे परिसङ्ख्याया अन्याय्यत्वात्, आघारव्यातिरिक्तधर्मपरिसङ्ख्याने चातिदेशवैफल्यात्, परिसङ्ख्यायाश्च मन्त्रपरिसङ्ख्यानेऽपि सामर्थ्यात् तूष्णींपदस्य वैयर्थ्यापत्तेः "दर्शपूर्णमासवद्" इति पदं व्यर्थमिति स्वेनैवोक्तत्वात्, "आघारावाघारयति" इति च पदयोरतिदेशपरिसङ्ख्यार्थत्वे होमविधायकशब्दाभावात्, तद्भावाय च परिसङ्ख्यात्यागे सर्वेषामाघारधर्माणां शिष्टाचारविरुद्धानुष्ठानापातात्, आज्यभागादीनामपीत्थमतिदेशे अभ्युपेये तत्राप्यैष्टिकाज्यभागादिधर्माणां सर्वेषामनुष्ठानप्रसङ्गाच्च । तस्मात् पूर्वे एव व्याख्याने सुष्ठु ।

यतोऽपूर्वाविवाघारौ, यतश्च "समिदभावश्च, अग्निहोत्रवर्जम् (आप.प.३-८,९.) इति परिभाषा, अत एव आघारसमिधो र्निवृत्तिः । अन्ये कुर्वन्ति । तस्मिन् पक्षे परिधिनिधानानन्तरम्; श्रौते तथा दृष्टत्वात् । अनूयाजसमित् अनुयाजाभावादेव निवृत्ता । तेनेध्मसन्नहनं परिधिभिस्सहाष्टादशधा, विंशतिधा वा, न पुनरेकविंशतिधा ॥५॥

▼

⑤

>

इध्ममाधायाघारावाघारयति दर्शपूर्णमासवत्तूष्णीम्।

# ०२ ०६ अथाज्यभागौ जुहोत्यग्नये②

आज्यभागौ - अथाज्यभागौ जुहोत् अग्नये स्वाहेत्युत्तरार्धपूर्वार्धे, सोमाय स्वाहेति दक्षिणार्धपूर्वार्धे, समं पूर्वेण *(=आघारहोमसममात्रा ऽऽज्य)* ६

▼

⑤

>

▼ Oldenberg

6. 7 Then he offers the two Ājyabhāga oblations, over the easterly part of the northerly part (of the fire) with (the words), 'To Agni Svāhā!' over the easterly part of the southerly part (another oblation) exactly like the preceding one, with (the words), 'To Soma Svāhā!'

▼ हरदत्तः

अग्नेरुत्तरभाग उत्तरार्धः, पूर्वभागः पूर्वाधः तयोरन्तरालं **उत्तरार्धपूर्वार्धः** । सममिति देशतः । समं तौ होतव्यौ न विषमावित्यर्थः । उपदेशादाघारानन्तर्ये सिद्धे अथेति वचनं सम्बोधनार्थम् । किं सिद्धं भवति ? आघारयोराज्यभागयोश्च साधर्म्यं सिद्धं भवति । तेन ज्योतिष्मत्यग्नौ होमः । आघारयोः प्रसिद्धो धर्मः । तस्याज्यभागयोरपि प्रवृत्तिः । तथा आज्यभागयोः प्रसिद्धो धर्मः आसीनहोमोऽप्युच्छवासाभावश्च । तस्याघारयोरपि प्रवृत्तिः । तेन यदुक्तमुत्तरस्मिन्नप्याघारे स्थानाभिप्राणने न भवत इति तदुपपन्नं भवति । **आज्यभागाव्**इतिहोमयोस्संज्ञा । प्रयोजनमग्नेरुपसमाधानाद्याज्यभागान्त इत्येवमादयः ॥६॥

▼ सुदर्शनः

अथ आघारानन्तरं अर्थकृत्यमप्यकृत्वाऽऽज्यभागनामकावपूर्वौ होमौ जुहोति । तत्र प्रथममग्नये स्वाहेति मन्त्रेणाग्नेर् **उत्तरार्धपूर्वार्धे,** प्रागुदीच्यामित्यर्थः । द्वितीयं सोमाय स्वाहेति **दक्षिणार्धपूर्वार्धे**, दक्षिणपूर्वस्यामित्यर्थः । **समं पूर्वेण** आघारसम्भेदमवधिं कृत्वाऽक्ष्णया रज्वा यावत्यन्तरे पूर्वो हुतः तावत्यन्तर एवोत्तरं जुहोति, न पुनस्सन्निकृष्टं विप्रकृष्टं वा ॥६॥

▼

⑤

>

अथाज्यभागौ जुहोत्यग्नये स्वाहेत्युत्तरार्धपूर्वार्धे सोमाय स्वाहेति दक्षिणार्धपूर्वार्धे समं पूर्वेण।

# ०२ ०७ यथोपदेशम् प्रधानाहुतीर्हुत्वा②

यथोपदेशं प्रधानाहुतीर् हुत्वा,

*(उपहोमाः -)*
जयाभ्यातानान्,
राष्ट्रभृतः,
प्राजापत्यां,
व्याहृतीर् विहृताः,
सौविष्टकृतीम् इत्य् उपजुहोति -

▼ विश्वास-प्रस्तुतिः

यद् अ॒स्य॒ कर्म॒णो ऽत्यरी॑रिचं॒
यद् वा॒ न्यू॑नम् इ॒हाक॑रम् ।
अ॒ग्निष् टत् स्वि॑ष्ट॒कृद् वि॒द्वान्थ्
सर्वँ॑ स्वि॑ष्टँ॒ सुहु॑तं करोतु॒
स्वाहा॑ ।

+इति ७

▼ विश्वास-टिप्पनी

एतदेवानुयाज्यम् इति केचित्। कपर्दिकारिकायान्तु स्थालीपाकादिषु नैकेषु कर्मसु न विद्यतेऽयम्भागः। तथैवाधुनिकाचारे केषाञ्चित्।
▼

⑤

>
▼ Oldenberg

7. 8 Having offered the chief oblations (belonging to each sacrifice) according to prescription, he adds the following oblations, viz. the Jaya, Abhyātāna, Rāṣṭrabhṛt oblations, the oblation to Prajāpati, the Vyāhṛtis one by one, the oblation to (Agni) Sviṣṭakṛt with (the following formula), 'What I have done too much in this ceremony, or what I have done here too little, all that may Agni Sviṣṭakṛt, he who knows, make well sacrificed and well offered. Svāhā!'

▼ हरदत्तः

**यथोपदेशमिति** । यस्मिन् यस्मिन् कर्मणि याः प्रधानाहुतय इत्युपदिश्यन्ते, यथा "अन्वारब्धायामुत्तरा आहुतीर्" (आप.गृ.१-२)इति तास्ता इत्यर्थः । **जयाः** "चित्तञ्च चित्तिश्च" (तै.सं.३-४-४.) इत्येवमादयः । **अभ्यातानाः** "अग्निर्भूतानां (तै.सं.३-४-५.) इत्यादयः । **राष्ट्रभृतः** "ऋताषाड़ृतधाम" (तै.सं.३-४-७) इत्यादयः । प्रजापते न त्वदेतानी'त्येषा **प्राजापत्या** । **व्याहृतयः** प्रसिद्धाः । विहृतवचनं समस्तनिवृत्त्यर्थम् । एतेषामनुपदेशः सिद्धत्त्वात् । सौविष्टकृती अप्रसिद्धत्त्वात् पठिता । नन्वेषापि सूत्रे पठिता "यदस्य कर्मणोऽत्यरीरिचं यद्वान्यूनमिहाकरम् । अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्वं स्विष्टँ सुहुतं करोतु स्वाहे"ति सर्वप्रायश्चित्तेषु, (आप.श्रौ.३-१२-९.) एवं तर्हि एतत् ज्ञापयति पाकयज्ञविधिरयं अन्येषामपि केषाञ्चित् साधारण इति । दृश्यते च कालगिरेयाणामनेन प्रवृत्तिः विवाहादिषु "कर्मसु" ये होमाश्चोदिताः तेष्वेतस्य प्राप्त्यर्थं तेषां कालोपदेशार्थमिदम् । जयादीनां पुरस्तादाज्यभागयोश्चोपरिष्ठात् प्रधानाहुतय इति नार्थः । एतदर्थेनानेन तत्रैवोभयोरप्युपदिष्टत्वात् । "अग्नेरुपसमाधानाद्याज्यभागान्त उत्तराहुतीर्हुत्वा" इति "स्थालीपाकाज्जुहोति" इत्यतिदेशात् तत्र प्राप्तिः । पार्वणे तु यथा, तथा आग्नेयस्थालीपाकविधौ वक्ष्यामः ।

अथ येष्व् "आज्यभागान्त" इति वा "जयादि प्रतिपद्यत" इति वा वचनं नास्ति यथा पण्यफलीकरणहोमे तत्र प्राप्त्यर्थमिदमुच्यते । विवाहादिषु तत्र विधानमनर्थकं, आज्यभागान्ते जयादि प्रतिपद्यत इति वचनात् पण्यहोमादयोऽपूर्वा यावदुक्तधर्माणः । इदं तर्हि प्रयोजनं कव्यान्तरोक्तानि नित्यानि नैमित्तिकानि काम्यानि वा यद्यस्मदादिभिरनुष्ठीयन्ते तदा तेष्वपि एतस्य तन्त्रस्य प्रवृत्तिर्यथा स्यादिति । नन्वेतदपि पार्वणातिदेशदर्शनात् सिद्धमाचाराद्यानिगृह्यन्ते इति; सत्यं पक्वहोमेषु सिद्धं, न त्वाज्यहोमेषु "कूश्माण्डैर्घृतम्" इत्यादिषु, तस्यापक्वविषयत्वात् । विवाहादिषु तन्त्रविधाननियमार्थं यस्मिन् गृहमेधचोदितास्तेषु अत्राग्नेरुपसमाधानाद्याज्यभागान्त इति जयादिप्रतिपद्यत इति वा वचनं तत्रैव तन्त्रप्रवृत्तिः इति । तेन पण्यहोमादयो यावदुक्तधर्माण इति सिद्धम् । प्रधानाहुतिग्रहणं जयादेराज्यभागान्तस्य च तत्र प्रसिद्ध्यर्थम् । **उपजुहोति** इति उपशब्द आनन्तर्यार्थः । तेन प्रधानाहुत्यनन्तरमुपहोमाः । तेनेशानयज्ञे परिषेचनान्ते बलिहरणं भवति । श्राद्धे वानुपदेशनं स्थालीपाके च बर्हिरनुप्रहरणं सौविष्टकृतीमित्युच्यते स्विष्टकृद्देवतेति ज्ञापनार्थम् । तेनाज्यहोमस्विष्टकृत् पक्वहोमेषु भवति ॥७॥

▼ सुदर्शनः

यथोपदेशं येन हविरादिना विवाहादिषु प्रधानाहुतय उपदिष्टास्तेन तेन विधानेन ता हुत्वा । **जयाः** चित्तं च स्वाहा(तै.सं. ३-४-४.) इति त्रयोदश । अग्निर्भूतानामधिपतिस्समावत्वस्मिन्निति ( तै.सं .३-४-५.) सानुषङ्गा **अभ्याताना** अष्टादश। ऋताविति (तै.सं. ३-४-७.) **राष्ट्रभृतो** द्वाविंशतिः । तत्र ऋताषाडित्यनुद्रुत्य "तस्मै स्वाहे"त्यन्तेन प्रथमाहुतिं जुहोति । "ताभ्यस्स्वाहा" इत्येतावतैवोत्तराम् । एवमुत्तरे पञ्च पर्यायाः । तत्र "नाम स इदं ब्रह्मा" इत्यनुषङ्गः । "ताभ्यः स्वाहा" इति च । "भुवनस्य पते... स्वस्तिंस्वाहा" इति त्रयोदशी । "परमेष्ठी"त्यादयः पूर्ववच्चत्वारः पर्यायाः । "स नो भुवनस्य पते..... यच्छ स्वाहा" इति द्वाविंशी । "प्रजापते न त्वदेतानि" इति ऋक्प्राजापत्या । प्राजापत्ययर्चा वल्मीकवपायामवनयेत्'(तै.ब्रा. ३-७-२.) इति श्रुतेः । सूत्रकारेण "प्रजापते न त्वदेतानी'ति प्राजापत्ययर्चा वल्मीकवपायामवनीय" (आप. श्रौ.९-२-४.) इति व्याख्यातत्वात् । **व्याहृतीः विहृताः** ; "भूः स्वाहा, भुवः स्वाहा सुवः स्वाहा" इति । **सौविष्टकृती** "यदस्य" कर्मणः इति ऋक् । आत्र चास्याः स्विष्टकृद्देवताकत्वं लिङ्गादेव सुगमम् । देवताज्ञानस्य कर्माङ्गत्वमपि "यो ह वा अविदितार्षेयच्छन्दोदेवताब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुमृच्छति" इत्यादिश्रुतेः, अविदित्वा ऋषिं छन्दो दैवतं योगमेव च । योऽध्यापयेज्जपेद्वापि पापीयान् जायते तु सः ॥ इति स्मृतेश्च सिद्धम् । अतो यत्रार्षेयादिज्ञानानां नैवंविधः पुनर्विधिः तत्र तानि पाक्षिकाणीति गम्यते । एवमेता जयादिका अष्टपञ्चाशदाहुतीः प्रधानहोमानन्तरमुपजुहोति । यत्रापि सर्पबल्यादौ पार्वणातिदिष्टः स्विष्टकृत् तत्रापि प्रधानाहुत्यनन्तरमेवैताः । ततः स्विष्टकृत् ; क्त्वाप्रत्ययात्, उपोपसर्गाच्च ॥ केचित्– स्विष्टकृतोऽनन्तरं जयादयः "अग्निः स्विष्टकृद्वितीय" (आप.गृ. ७-७.) इति स्विष्टकृत प्रधानतुल्यधर्मत्वज्ञापनादिति । ननु–यद्यत्रैव सर्वप्रधानहोमानन्तर साधारण्येन जयादय उपदिष्टाः किमर्थं तत्र तत्र "जयादि प्रतिपद्यते" इति वचनम् ? उच्यते– यत्रैतद्वचनं नास्ति पार्वणादौ न तत्र जयादय इत्येवमर्थम् । एवं तर्ह्यत्र साधारणविधानमेवानर्थकम् । न ; केवलं जयादिविध्यर्थत्वात् । अन्यथा विवाहादाव् एतेष्वन्वारम्भोऽपि स्यात् । किञ्च अस्मिन्नसति तत्र तत्र "जयाभ्यातानान्" इत्यादिमन्त्रसन्नाम इत्यन्तो गुरुर्ग्रन्थः पुनः पुनः पठितव्यस्स्यात् । तस्मादन्वारम्भादिनिवृत्त्यर्थं ग्रन्थलाघवार्थं चेदं साधारणविधानम् । केचित्– यत्राज्यभागान्तं पुरस्तात्तन्त्रं तत्र सर्वत्र जयाद्युत्तरतन्त्रम् । एतयोर्मध्ये "यथोपदेशं प्रधानाहुतीः" इत्यविशेषेण प्रधानहोमानां विधानात् । आग्नेयेऽपि च स्थालीपाके जयादिर्विद्यत एव, "सिद्धमुत्तरम्" (आप.गृ.७-१४.) इति पदद्वयसूत्रेण जयाद्युत्तरतन्त्रोपदेशात् मासिश्राद्धे च "पार्वणेन" (आप. गृ. २२-१.) इत्यतिदेशात् । आज्यहोमेषु जयाद्यनन्तरं श्रौतवत् तूष्णीं परिधीनग्नौ प्रहृत्य

तान् दर्वीसंस्रावेणाभिजुहोति ; परिधितत्संस्काराणां श्रौतवदभ्यनुज्ञानस्योक्तत्वात्, कृतकार्याणां प्रतिपत्त्यपेक्षत्वात् आचाराच्च । शम्याश्चेत्, अस्मिन् काले अपोह्याः ; "अथ शम्या अपोह्य" (बौ.गृ. १-४-३७.) इति बोधायनवचनात्, आचाराच्च ॥७॥

▼

⑤

>

यथोपदेशं प्रधानाहुतीर्हुत्वा जयाभ्यातानान्राष्ट्रभृतः प्राजापत्यां व्याहृतीर्विहृताः सौविष्टकृतीमित्युपजुहोति– यदस्य कर्मणोऽत्यरीरिचं यद्वा न्यूनमिहाकरम् । अग्निष्टत्स्विष्टकृद्विद्वान्त्सर्वँ स्विष्टं सुहुतं करोतु स्वाहेति।

# ०२ ०८ पूर्ववत् परिषेचनमन्वमँस्थाः②

अग्नेरुत्तरं परिषेचनम् - पूर्ववत्परिषेचनमन्वमंस्थाः प्रासावीरिति मन्त्रसन्नामः ॥ *(अत्र श्रौतवत्प्रणीता विमुञ्चति तूष्णीम् - कृतकार्याणामासां प्रतिपत्त्यपेक्षत्वात्। ब्राह्मणश्च यथाशक्ति दानमानादिना सत्कृतो गच्छेत् ॥)*

▼

⑤

>

▼ Oldenberg

8. 9 The sprinkling (of water) round (the fire is repeated) as above; the Mantras are altered so as to say, 'Thou hast given thy consent,' 'Thou hast given thy impulse.'

▼ हरदत्तः

**पूर्ववदिति** । पैतृकेषु समन्तमेव तूष्णीम् । अन्यत्र मन्त्रवन्ति चत्वारि परिषेचनानि ॥७॥ सन्नमनं **सन्नामः**, ऊह इत्यर्थः । "अनुमन्यस्व" इत्यस्य "अन्वमंस्था" इति सन्नामः । "प्रसुवे"त्यस्य" प्रासावी"रिति । प्राक् परिषेचनात् तूर्ष्णीं परिधीनां प्रहरणम् । पुरस्तादुपहोमानामेकविंशत्या समिधोऽभ्याधानम् । बर्हिरनुप्रहरणमाज्यहोमेषु नास्ति, लेपयोरित्यस्या पक्वहोमविषयत्वात् । परिषेचनान्ते प्रणीताविमोकः । ब्रह्मा च कर्मान्ते यथेतं प्रतिनिष्क्रामति । मन्त्रसन्नाम इति मन्त्रग्रहणं मन्त्राणामयमूहविधिर्यथा स्यात्, अन्यथाग्नेरपि सन्नामस्सम्भाव्येत । सन्नामशब्दस्यान्यत्रापि दर्शनात्, यथा–सन्नमयत्यनुमार्ष्टि वेति ॥९॥

▼ सुदर्शनः

अग्नि**परिषेचनं पूर्ववत्** । अयं तु विशेषः, अदितेऽनुमन्यस्वेत्यादिषु त्रिषु अनुमन्यस्वेत्यस्य स्थाने "अन्वमंस्थाः" इति , देवसवितरित्यत्र "प्रसुव" इत्यस्य स्थाने "प्रासावीः" इति । अत्र श्रौतवत् प्रणीता विमुञ्चति तूष्णीम्; कृतकार्याणामासां प्रतिपत्त्यपेक्षत्वात्, प्रणीताभ्यो दिशोऽभ्युपनीय" (बौ.गृ.१-४-३८.) इति बोधायनवचनात्, आचाराच्च । ब्राह्मणश्च यथाशक्ति दानमानादिना सत्कृतो गच्छेत् ॥ अत्रेयं स्थितिः अग्निमिध्वेत्यादि मन्त्रसन्नाम इत्यन्तः प्राच्योदीच्याङ्गसमुदायः सर्वगार्ह्यप्रधानहोमानां साधारणः, "यथोपदेशं प्रधानाहुतीर्हुत्वा" इति प्राच्योदीच्यपदार्थापेक्षया होमानां विशेषणं प्राधान्याभिधानात् । एवञ्चाहोमेषु नामकरणादिषु तन्त्रस्याप्रसङ्ग एव । नन्वेवं "अग्नेरुपसमाधानाद्याज्यभागान्ते" इति किमर्थस्तत्र तत्र पुनरुपदेशः? उत्यते यत्र पुनः "अपिवोत्तरया जुहुयात्" (आप.गृ.५-२८.) "काममन्युभ्यां वा जुहुयात्" (आप.ध.१-२६-१३.) इत्यादिषु नोपदेशः नैव तत्रेदं तन्त्रमिति नियमार्थः । कुत एतत्? केवलाज्यहविष्वेव प्रयोजनान्तरमन्तरेणास्य तन्त्रस्योपदेशात् । उपाकरणसमापनादीनां तु तत्र तन्त्रोपदेशाभावेऽपि "कूश्माण्डैर्जुहुयाद् घृतम्" इत्यादेरिव तन्त्रार्थित्वावगमात् अनेन साधारणविधानेनैव तन्त्रम् । तन्त्रार्थित्वावगमस्तु गृह्यान्तरेषु तन्त्रवतामेवोपदेशात् । आपस्तम्बदर्शनानुगतोपदेशात्, अविगीतशिष्टाचाराच्च । यद्येवमाज्यौषधहविष्केऽपि विवाहे किमर्थस्तन्त्रोपदेशः? । उच्यते– लाजहोमानां कृत्स्नविधानेन तन्त्रानपेक्षत्वात् । उपनयनादिवदाज्यहोमार्थ एव तन्त्रोपदेशः । तथा "तस्मिन्नुपविशत उत्तरो वरः" (आप.गृ.४-९.) इत्यस्यानन्तरमेवाग्नेरुपसमाधानादि, न तु "यथास्थानमुपविश्य" (आप.गृ.५-२.) इत्यस्यानन्तरमिति क्रमार्थश्च । तथा केवलौषधहविषि स्थालीपाकेऽपि क्रमार्थ एव । यद्यपि श्रौते दर्शनात् पात्रप्रोक्षणानन्तरमवघातादि युक्तम्, तथाप्येतद्वचनबलात् तन्त्रात् पुरस्तादेवेति । ऐशानेऽपि स्थालीपाके स्थण्डिलकल्पनान्ते त्त्रम्, न तु पार्वणवद्गृह एव प्रतिष्ठिताभिघारणानन्तरमिति क्रमार्थ एव । केचित्– कल्पान्तरविहितेषु अपार्वणातिदेशेषु आज्यहोमेषु तन्त्रार्थिषु "कूश्माण्डैर्जुहुयाद् घृतम्" इत्यादिष्वस्य तन्त्रस्य प्राप्त्यर्थं यथोपदेशमिति सामान्यविधानम् । अत्रत्येषु तु विवाहादिषु येष्वेव पुनर्विधानं तत्रैव, नान्यत्र पण्यहोमादिष्विति नियमार्थं तत्र तत्र तन्त्रविधानम् । पित्र्येषु तु "एकैकशः पितृसंयुक्तानि" (आप.गृ.१-१८.) इत्यादिविशेषविधानात् तन्त्रसिद्धिरिति ॥८॥

▼

⑤

>

पूर्ववत् परिषेचनमन्वमँस्थाः प्रासावीरिति मन्त्रसन्नामः ।

# ०२ ०९ लौकिकानाम् पाकयज्ञशब्दः②

लौकिकानां पाकयज्ञशब्दः ॥
+++(लोकशब्देन शिष्टा उच्यन्ते ।
केचित् - पाकयज्ञ इति विवाहादीनां संज्ञा विधीयते । पाकशब्दोऽल्पवचनः, यथाक्षिप्रं यजेत पाको देव (आप.गृ.२०१५) इति । पाकगुणको यज्ञः पाकयज्ञ इति निर्वचने आज्यहोमेषु संज्ञा न स्यात् । )+++ *(अपरे - सप्तानां औपासनहोमादीनां<पाकयज्ञशब्दः> संज्ञात्वेन प्रसिद्धः, नतु श्रौतानां विवाहादीनां च, तत्र लोकानामप्रयोगात् । )*

▼

⑤

>
▼ Oldenberg

9. The designation 'Pākayajña' is used of ceremonies connected with worldly life.

▼ हरदत्त-प्रस्तावः

एवं सर्वगार्ह्यहोमानां साधारणं स्मार्तं विधिमुक्त्वा, इदानीं पाकयज्ञेषु वैकल्पिकं श्रौतं विधिमाह–

▼ हरदत्तः

लोके भवा **लौकिकाः** लोकस्मृतिलक्षणा इत्यर्थः । लोकशब्देन शिष्टा उच्यन्ते । पाकयज्ञ इति विवाहादीनां संज्ञा विधीयते । पाकशब्दोऽल्पवचनः, यथा–"क्षिप्रं यजेत पाको देव" (आप.गृ.२०-१५.) इति । पाकगुणको यज्ञः पाकयज्ञ इति निर्वचने आज्यहोमेषु संज्ञा न स्यात् । तत्संज्ञाप्रयोजनं "यज्ञं वायख्यास्यामः"(आप.प.१-१.) इत्यत्र एतेषामन्तर्भावः । "निरृतिं पाकयज्ञेन यजेते"त्यत्र च धर्मप्राप्तिः ॥१०॥

▼ सुदर्शनः

लोकयन्ति वेदैर्वेदार्थानिति लोकाः त्रैविद्यवृद्धाः शिष्टाः द्विजन्मानः । तैर्लोकैराचर्यन्ते यानि कर्मणि तानि **लौकिकानि**, तेषां मध्ये सप्तानां औपासनहोमादीनां **पाकयज्ञशब्दः** संज्ञात्वेन प्रसिद्धः, न तु श्रौतानां विवाहादीनां च, तत्र लोकानामप्रयोगात् । यदि लोकप्रयोगादेवैषां पाकयज्ञनामता प्रसिद्धैव, तर्हि "पाकयज्ञेषु ब्राह्मणावेक्षो विधिः" इत्येतावतालम्, किमर्थं "लौकिकानां पाकयज्ञशब्दः, इति ? उच्यते– पाकेन पक्वेन चरुणा साध्यो यज्ञः पाकयज्ञः इत्येवं व्युत्पन्नसंज्ञानुवादात् नान्तरीयकावगतश् चरुरेवाग्निहोत्रकविधौ हविः, न पुनर्विध्यन्तरवदाज्यादिकमपीति नियमज्ञापनार्थम् । बौधायनेन तु अत्राज्यं हविरुपदिष्टम् । न त्वाग्निहोत्रिकं हविरिह भवति, अग्निहोत्रधर्मप्रापकप्रमाणाभावात् । "द्विर्जुहोति" (आप.गृ.२-११.) इत्येवमादयः पुनः पञ्च पदार्थाः वचनबलाद् भवन्ति । देवतास्तु तत्तन्मन्त्रप्रतिपाद्या एव ॥१०॥

▼

⑤

>

लौकिकानां पाकयज्ञशब्दः।

# ०२ १० तत्र ब्राह्मणावेक्षो②

तत्र ब्राह्मणावेक्षो विधिः।

*(वैकल्पिकः।)* १० *(अत्र न दर्शपूर्णमासप्रकृतिः। अग्निहोत्रप्रकृतिः।)*

▼

⑤

>

▼ Oldenberg

10. 10 There the ritual based on the Brāhmaṇa (holds good),

▼ हरदत्तः

*(सम्पादकटिप्पनी - सूत्रमिदम् अग्रिमे व्याख्यातम् ।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी - सूत्रमिदम् अग्रिमे व्याख्यातम् ।)*

▼

⑤

>

तत्र ब्राह्मणावेक्षो विधिः।

# ०२ ११ द्विर्जुहोति द्विर्निमार्ष्टि②

द्विर्जुहोति *(=अग्निहोत्राहुत्योरुभयोर्धर्मः पाकयज्ञेषु प्रधानाहुतिं स्विष्टकृतं चाधिकृत्य विहितः)* द्विर्निमार्ष्टि *(=अग्निहोत्रवल्लेपनिमार्जनम्)* द्विः प्राश्नात्य् *(=अङ्गुलिप्राशनम्, ततः प्रक्षालनम् )* उत्सृत्याचामति *(= यत्तत्रतृतीयं प्राशनं बर्हिषोपयम्योदङ्ङावृत्योत्सृप्याचामतीति तच्चोदितम्)* निर्लेढीति *(=द्विःस्रुचं निर्लेह्य)* ११

▼

⑤

>

▼ Oldenberg

11. 11 (To which the words allude), 'He sacrifices twice; he wipes off (his hand) twice; he partakes twice (of the sacrificial food); having gone away he sips (out of the Sruc) and licks off (the Sruc).'

▼ हरदत्तः

तत्र तेषु पाकयज्ञेष्वपरो विधिर्ब्रह्मणावेक्ष इत्याचक्षते । ब्राह्मणमात्मनि प्रमाणत्वेनावेक्षत इति **ब्राह्मणावेक्षः** ब्राह्मणदृष्ट इत्यर्थः । विधिः प्रयोगः, यः प्रागुक्त आघारवान् दर्शपूर्णमासप्रकृतिः । अयं त्वग्निहोत्र प्रकृतिः ब्राह्मणावेक्षः । उभयोर्विकल्पस्तत्रेत्युच्यते–येषु पाकयज्ञेषु आघारवतस्तन्त्रस्य प्रवृत्तिः तत्रैवास्य विकल्पेन प्राप्तिरिति दर्शनार्थम् । तेन पण्यहोमादिषु अस्य विधेरप्रवृत्तिः । तत्र "**द्विर्जुहोति**" इत्यनेन अग्निहोत्राहुत्योरुभयोर्धर्मः पाकयज्ञेषु प्रधानाहुतिं स्विष्टकृतं चाधिकृत्य विहितो वेदितव्यः । "**द्विर्निमार्ष्टी"ति** चाग्निहोत्रवल्लेपनिमार्जनम् । " **द्विः प्राश्नाती**"त्यङ्गुलिप्राशनम् । " **उत्सृप्याचामती"ति** च यत्तत्र तृतीयं प्राशनं बर्हिषोपयम्योदङ्ङावृत्योत्सृप्याचामतीति तच्चोदितम् । **निर्लेढीति** यत्तत्र "द्विःस्रुचं निर्लेह्य, इति च तच्चोदितम् । यावता च विधानेन होमादिसंसिद्धिस्तावदमन्त्रवदग्निहोत्रादेव प्रत्येतव्यम् । तद्यथा–स्रुवेणोन्नयनं, पालाशीसमिदाहुतिधारणार्था, चतुर्गृहीतं पञ्चगृहीतं इति ।

तत्र प्रयोगः–

- अग्निमिध्वा, परिसमूह्य, परिस्तीर्य, पर्युक्ष्य,
- आज्यहोमेष्वाज्यं संस्कृत्य, पक्वहोमेषु स्थालीपाकं,
- स्रुक्स्रुवं संमृज्य,
- यावत्प्रधानाहुति चतुर्गृहीतानि पञ्चगृहीतानि वा समवद्यति । यत्रोभयं हविस् तत्र तस्योभयस्य, यथा मासिश्राद्धे ।
- ततः पश्चाद् अग्नेर् बर्हिष्य् उपसाद्य, पालाशीं समिधमाधाय,
- सर्वान् एव मन्त्रान् समनुद्रुत्य, सकृदेव प्रधानाहुतीर्हुत्वा,
- प्रातरग्निहोत्रवल् लेपम् अपमृज्य, बर्हिषि निमार्ष्टि यद्य् अहनि कर्म । अथ रात्रौ सायमग्निहोत्रवत् ।
- ततस्सौविष्टकृतीं द्वितीयाम् आहुतिं उत्तराहुतिवज्जुहोति - "अग्नये स्विष्टकृते स्वाहे"ति स्थालीपाकेषु । "यदस्य कर्मणि ..." इत्याज्यहोमेषु । ईशानयज्ञे तु कर्म तत्र चोदितेन मन्त्रेण ।
- ततः पूर्ववल् लेपम् अवमृज्य प्राचीनावीती दक्षिणतो भूमौ निर्मार्ष्टि । अप उपस्पृश्य।
- तत उपवीती स्रुचं सादयित्वा
- अङ्गुलिप्राशनादि-निर्लेपनान्तम् अग्निहोत्रवत् ।
- ततो दर्भैः स्रुक्-प्रक्षालनं,
- ततः परिसमूहन-पर्युक्षणे ।

एतदाग्निहोत्रिकं नाम तन्त्रं सर्वपाकयज्ञेषु आघारवता तन्त्रेण सह विकल्प्यते ॥११॥
▼ सुदर्शनः

तत्र तेषु पाकयज्ञेषु मध्ये पार्वणादिषु पञ्चसु ब्राह्मणावेक्षो विधिर् भवति । यो विधिः प्रत्यक्षमेव ब्राह्मणमवेक्षते, नाग्निम् इद्ध्वेत्यादिवल् लोकाचारानुमेयम्, सोऽप्येषु विकल्पेन भवतीत्यर्थः । नानयोर् विध्योर् मिथः संसर्गः । नापि स्मार्तस्यानेन बाधः । प्रत्यक्षब्राह्मणस्यापि स्मृत्यनुवादे कल्पसूत्राधिकरणन्यायेन स्मृतितुल्यप्रमाणत्वात् । अत एव "सर्वं पाप्मानं तरति, तरति ब्रह्महत्यां योऽश्वमेधेन यजते" (तै.सं.५-३-१२.) इति श्रुत्या "यजेत वाश्वमेधेन" ( मनु.११-७५.) इति मनुस्मृत्यनुवादेन च अश्वमेधद्वादशवार्षिकयोर्विकल्पः ।

बौधायनीये च व्यक्तोऽयमर्थः । तत्रोदाहरन्ति–

> आधारं प्रकृतिं प्राह
> दर्वीहोमस्य बादरिः ।
> अग्निहोत्रं तथाऽऽत्रेयः
> काशकृत्स्नस्त्वपूर्वताम् ॥

इति (बौ.गृ.१-४-४४.) "तां न मिथः संसादयेदनादेशात्" (बौ.गृ.१-५-१.) इति ।

होममन्त्रादयस्तु विध्यन्तरीया अर्थादाचाराच्चेहापि भवन्ति ।

यद्यस्यापि स्मृतितुल्यमेव प्रामाण्यं, किमर्थं "ब्राह्मणावेक्षः" इति ? उक्तोत्तरमेवैतत् । आग्निहोत्रिकविधौ भ्रेषे "यदि यजुष्ट" (ऐ. ब्रा.२५-३४) इति श्रौतं प्रायश्चित्तम् । न तु स्मार्तनाशे "यद्यविज्ञाता सर्वव्यापद्धा" (ऐ.ब्रा.२५-३४.) इति ॥१०॥

सर्वे प्रधानहोमाः प्रधानहोमत्वसामान्यादेको होम इत्यभिप्रेत्य स्विष्टकृदपेक्षया श्रुतिः द्विर्जुहोतीत्याह, न पुनर्द्विरेव जुहोतीति । "सप्तदश प्राजापत्यान्" (तै.ब्रा.१-३-४.) इतिवदिह सम्प्रतिपन्नदेवतैकत्वाभावात् । केचित्– यावन्तः प्रधानहोमास्तावन्ति चतुर्गृहीतानि स्रुचि सहावदाय होममन्त्रान् सर्वाननुद्रुत्य सकृदेव जुह्वति । द्विर्निमार्ष्टीत्यादि व्यक्तार्थम् ॥

प्रयोगस् तु -

न परिस्तरणदर्वीसंस्कारोपस्तरणादीनि, अत्रानुपदेशात्। चरुपाकस्त्वर्थाद्विद्यत एव।

- तेन चरुणा प्रधानाहुतिस्विष्टकृत्प्राशनभक्षणेभ्यः पर्याप्तेन दर्वीं पूरयित्वा,
- अपरेणाग्निं दर्भेषु सादयित्वा,
- आदाय तत्तन्मन्त्रैः सर्वाः प्रधानाहुतीः क्रमेण हुत्वा,

- दर्व्यास्ततो लेपमादाय दर्भैर्निमृज्य शेषात् स्विष्टकृते हुत्वा,
- प्राचीनावीती पुनर्लेपमादाय दक्षिणतो भूम्यां निमृज्याय,
- उपस्पृश्य,
- यज्ञोपवीती दर्व्या लेपमङ्गुल्याऽऽदाय, प्राश्य, शुद्ध्यर्थमाचम्य,
- पुनरप्येवं कृत्वा
- उदङ्ङवृत्य
- उत्सृप्य दर्व्या हविश्शेषं सर्वं भक्षयित्वा
- तां निर्लेह्य
- आचम्य
- तां दर्भैरद्भिः प्रक्षालयेदिति।

ननु – वैश्वदेवौपासनहोमयोः कस्मान् नायं विधिः ? उच्यते । तत्र "उभयतः परिषेचनम्" (आप.गृ.७-२२.) इति एककार्ययोः द्वयोरपि विध्योः परिसङ्ख्यानात् अत एव बर्हिर्लेपप्रतिपत्त्योरभावाच्च ॥ केचित्तु– पाकयज्ञ इत्यत्र पाकशब्दस्याल्पवाचकत्वात् विवाहादयोऽपि सोमाद्यपेक्षया पाकयज्ञा इति तेष्वप्ययं विधिरिति । तन्न ; तेषां मनुष्यसंस्कारार्थत्वेन अप्राधान्यात् प्रधानवाचियज्ञशब्दवाच्यत्वानुपपत्तेः ॥११॥
▼

⑤

>

द्विर्जुहोति द्विर्निमार्ष्टि द्विः प्राश्नात्युत्सृत्याचामति निर्लेढीति।

---

1. 12 seq. Description of the regular form of a Pākayajña.↩

2. Comp. Śrauta-sūtra I, 11, 6 seqq.↩

3. This is the Praṇītā water.↩

4. The Brahman.↩

5. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

6. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

7. 12 seq. Description of the regular form of a Pākayajña.↩

8. Comp. Śrauta-sūtra I, 11, 6 seqq.↩

9. This is the Praṇītā water.↩

10. The Brahman.↩

11. Comp. Taitt. Brāhmaṇa II, 1, 4, 5; Śatapatha Brāhmaṇa II, 3, 1, 18. 21. - At the Agnihotra the sacrificer, having wiped off the Sruc with his hand, wipes off the hand on the Barhis or on the earth (Āpast.-Śraut. VI, 10, 11; 11, 4; Kātyāyana IV, 14, 20). As to the following acts alluded to in this Sūtra, comp. Āpastamba VI, 11, 4. 5; 12, 2.↩

# ०३ वैवाहिकविषयाः①

## ०२ १२ सर्व-ऋतवो विवाहस्य②

सर्वऋतवो *(=मासाः)* विवाहस्य शैशिरौ मासौ *(= माघफाल्गुनौ)* परिहाप्योत्तमं च नैदाघम् *(= आषाढः)* १२

▼

⑤

>

▼ Oldenberg

12. All seasons are fit for marriage with the exception of the two months of the śiśira season, and of the last summer month.

▼ हरदत्त-प्रस्तावः

एकाग्निविधिकाण्डे विवाह-मन्त्राणां पूर्वमाम्नानात् विवाहम् एव पूर्वं व्याख्यास्यन् तस्योदगयनादि-नियमापवादेन कालमाह—

▼ हरदत्तः

अथ विवाह-विधिः प्राग् उपनयनात् ।

शिशिरं परिहाप्येति वक्तव्ये शैशिरौ मासाव् इत्य् उच्यते - "उत्तमञ्च नैदाघम्" इत्यत्र मास-प्रतिपत्त्य्-अर्थम् । अन्यथा दिवसोऽपि प्रतीयेत ।

सर्वर्तुविधानं उदगयनापवादः । पूर्व-पक्षादयस् तु परिभाषाप्राप्ताः विवाहेऽवस्थिता एव यथोपनयने वसन्तादि-विधान इति केचित् ।

अन्ये तु पूर्वपक्षादेर् अप्य् अपवादं मन्यन्ते ।*(5)* तेषाम् अपरपक्षे रात्रौ च न निषिध्यते विवाहः ॥१२॥

▼ सुदर्शनः

**सर्वे षड् ऋतवः** प्रत्येकं मास-द्वय-रूपाः विवाहस्य कालाः । द्वादशापि मासाः सापर-पक्षादिकाः कात्स्न्र्येन काला इत्य् अर्थः ।

ऋतव इत्यनेन लक्षणया मासा एव विधित्सिताः। नर्तव इति कुतोऽवगम्यते ? उच्यते– शैशिरौ मासाविति मासपर्युदासात् । अन्यथा विधि-पर्युदासयोर् एक-विषयत्वात् लघुत्वाच् च शिशिरं परिहाप्येति ब्रूयात् ।

प्रयोजनं तु विवाहस्य पूर्व-पक्षादि-नियमाभावः । यत्र पुनर् उपनयनादाव् एवं-विध-हेत्व्-अभावाद् ऋतोर् एव विधित्सा, तत्र द्व्य्-अवदान-द्वारा पुरोडाशस्य याग-साधनत्व-वत् सामान्य-विध्य्-अवरुद्ध-पूर्व-पक्षादि-द्वारेणापि ऋतोः कर्म-साधनत्वासिद्धेः पूर्व-पक्षादिर् नियत एव ।

शिशिरस्यर्तोः यौ द्वौ मासौ माघ-फाल्गुनौ, निदाघस्य ग्रीष्मस्य यश् चोत्तमो ऽन्त्य आषाढः, तानेतांस् त्रीन् मासान् **परिहाप्य** वर्जयित्वा । अत्रोत्तमम् इति तमप्-प्रत्ययात् यस् सौरतोऽन्त्यो नैदाघः, यश् चाधिकमासतो द्वितीय आषाढः ताव् अपि पर्युदस्तौ ॥१२॥

▼

⑤

>

सर्व-ऋतवो विवाहस्य शैशिरौ मासौ परिहाप्योत्तमं च नैदाघम्।

## ०२ १३ सर्वाणि पुण्योक्तानि②

*(अनेन पूर्वपक्षादिनियमाभावः।)* सर्वाणि पुण्योक्तानि नक्षत्राणि *(सर्वापवादत्वात्पुण्याहविधानार्थमिदम् । तथा च रात्र्यपरपक्षयोः विवाहपिरतिषेधः ।)*१३

▼

⑤

>
▼ Oldenberg

13. All Nakṣatras which are stated to be pure, (are fit for marriage);

▼ हरदत्तः

सर्वर्तुविधानस्य सर्वापवादत्वात् पुण्याहविधानार्थमिदम् । तथा च रात्र्यपरपक्षयोः विवाहप्रतिषेधः । एवमप्युक्तग्रहणमनर्थकं तत् क्रियते मुहूर्तपरिग्रहार्थं–यानि पुण्यानि नक्षत्राणि यानि पुण्योक्तानि मुहूर्तानि तानि सर्वाणि विवाहस्य यथा स्युरिति । तत्र नक्षत्राणि ज्योतिश्शास्त्रादवगन्तव्यानि । प्रातस्सङ्गवो मध्यन्दिनोऽपराह्णस्सायमित्येते मुहूर्ताः ॥१३॥

▼ सुदर्शनः

यानि ज्यौतिषे पुण्योक्तानि शुभफलप्रदत्वेनोक्तानि नक्षत्राणि । नक्षत्रग्रहणस्य प्रदर्शनार्थत्वात् तिथ्यादीन्यपि । तत्र पुण्योक्तानि सर्वाण्यत्रोपसंहर्तव्यानि ॥१३॥

▼

⑤

>

सर्वाणि पुण्योक्तानि नक्षत्राणि।

# ०२ १४ तथा मङ्गलानि②

तथा मङ्गलानि १४

▼

⑤

>
▼ Oldenberg

14. And all auspicious performances.

▼ हरदत्तः

"ब्राह्मणान् भोजयित्वाशिषो वाचयित्वे"त्येवमादीनि स्वशास्त्रप्रसिद्धानि । मङ्गलानि स्नातोऽहतवासा गन्धानुलिप्तः, स्रग्वी भुक्तवानित्येवमादीनि नापितकर्माङ्कुरार्पणादीनि लोकप्रसिद्धानि । तान्येतानि सर्वाणि प्रत्येतव्यानि ॥१४॥

▼ सुदर्शनः

शङ्खदुन्दुभिवीणातूणववादित्रसम्प्रवादनानि कुलस्त्रीगीतानि केशश्मश्र्वादिप्रकल्पनाहतधौताच्छिद्रविचित्रवासोधारणगन्धानुलेपनसुगन्धस्रग् धारणापदातिगमनच्छत्रध्वजादीनि शिष्टाचारप्रसिद्धानि मङ्गलानि विवाहे उपसंहर्तव्यानि ॥१४॥

▼

⑤

>

तथा मङ्गलानि।

# ०२ १५ आवृतश्चास्त्रीभ्यः प्रतीयेरन्②

*("ब्राह्मणान् भोजयित्वाशिषोवाचयित्वे"त्येवमादीनि स्वशास्त्रप्रसिद्धानि । मङ्गलानि स्नातोऽहतवासा गन्धानुलिप्त, स्रग्वी भुक्तवानित्येवमादीनि नापितकर्माङ्कुरार्पणादीनि लोकप्रसिद्धानि ।)* आवृतश्च *(=प्रसिद्धाः)* +आस्त्रीभ्यः प्रतीयेरन् १५

▼

⑤

>

▼ Oldenberg

15. And one should learn from women what ceremonies (are required by custom).

▼ हरदत्तः

मन्त्ररहिताः क्रियाः **आवृत** इत्युच्यन्ते । यस्मिन् जनपदे ग्रामे कुले वा या आवृतः प्रसिद्धाः तास्तथैव व्यवस्थिताः यथा प्रतीयेरन्न सर्वत्रैवमर्थम् ॥१५॥

▼ सुदर्शनः

**आवृतः** क्रियाः वैवाहिक्यः अविशेषात् समन्त्रका अमन्त्रकाश्च । तास्सर्वा आस्त्रीभ्यः सर्ववर्णेभ्यस्सकाशादवगम्य प्रतीयेरन् कुर्वीरन् विवोढारः । तत्र समन्त्रका ग्रहपूजाङ्कुरारोपणप्रतिसरबन्धाद्या आचारसिद्धाः । अमन्त्रकाः नाकबलियक्षबलीन्द्राणीपूजादयः । ताश्च यथाजनपदं यथावर्णं यथाकुलं यथास्त्रीपुंसं व्यवस्थिता एव । न तु सर्वास्सर्वत्र समुच्चिताः ॥१५॥

▼

⑤

>

आवृतश्चास्त्रीभ्यः प्रतीयेरन्।

# ०२ १६ इन्वकाभिः प्रसृज्यन्ते②

इन्वकाभिः *(=मृगशिरसि)* प्रसृज्यन्ते *(कन्यार्थं प्रेष्यन्ते)* ते वराः प्रतिनन्दिताः १६

▼

⑤

>

▼ Oldenberg

16. 1 Under the Invakās (Nakṣatra), (the wooers who go to the girl's father) are sent out: such wooers are welcome.

▼ हरदत्तः

नक्षत्रप्रशंसार्था गाथा विवाहप्रकरणे वरप्रसङ्गार्थमुदाहृता । यदि वराः कन्याया वरयितारः कन्या वरणार्थं इन्वकाभिः प्रसृज्यन्ते ॥ १६ ॥

ते वरास्तैर्दुहितृमद्भिः । **प्रतिनन्दिताः** सिद्धार्था भवन्ति । तस्माद्वरप्रसङ्गे प्रशस्तमिन्वका नाम नक्षत्रम् । "इन्वकाशब्दो मृगशिरसी"ति स्वयमेव व्याख्यास्यति । तस्मात् ज्ञायते– स्मृत्यन्तरप्रसिद्धा लौकिक्येवेयं गाथा, न सूत्रकारस्य कृतिरिति ॥१७॥

---

▼ सुदर्शनः

**इन्काभिः** मृगशिरसि "नक्षत्रे च लुपि" (पा.२-३-४५. ) इति सप्तम्यर्थे तृतीया । ये **वराः** वरयितारो मृगशिरसि प्रसृज्यन्ते कन्यावरणार्थं प्रेष्यन्ते, ते दुहितृमद्भिः **प्रतिवन्दिताः** प्रकर्षेण पूजिताः, सिद्धार्था भवन्तीत्यर्थः ॥१६॥ इति श्रीसुदर्शनाचार्यकृते गृह्यतात्पर्यदर्शने द्वितीयः खण्डः ॥
▼

⑤

>

इन्वकाभिः प्रसृज्यन्ते ते वराः प्रतिनन्दिताः।

# ०३ ०१ मघाभिर्गावो गृह्यन्ते②

मघाभिर्गावो गृह्यन्ते *(दानार्थम्)*१

▼

⑤

>
▼ Oldenberg

1. 2 Under the Maghās (Nakṣatra) cows are provided;

▼ हरदत्तः

यदि मघाभिः गावः क्रयादिना गृह्यन्ते ताश्च गावः प्रतिनन्दिता भवन्ति । तस्मात् गोपरिग्रहे मघाः प्रशस्ताः ॥१॥

▼ सुदर्शनः

"आर्षे दुहितृमते मिथनौ गावौ देयौ" (आप.ध. २-११-१८.) इति वचनादार्षे विवाहे वरैर्दीयमाना गावो दुहितृमद्भिर्मघासु गृह्यन्ते । एतदुक्तं भवति– आर्ष विवाहं मघास्वेव कुर्यात्, न ब्राह्मादिवत् नक्षत्रान्तरेऽपीति ॥१॥

▼

⑤

>

मघाभिर्गावो गृह्यन्ते।

# ०३ ०२ फल्गुनीभ्यां व्यूह्यते②

फल्गुनीभ्यां व्यूह्यते *(= सेनाया इति केचित्, विवाहविशेषेषु कन्याया इत्यपरे)* २

▼

⑤

>
▼ Oldenberg

2. Under the Phalgunī (Nakṣatra) marriage is celebrated.

▼ हरदत्तः

यदि फल्गुनीभ्यां व्यूह्यते सेना युद्धकाले सा च प्रतिनन्दिता भवति । तस्मात् सेनाव्यूहे प्रशस्ते फल्गुन्यौ । अविशेषात् पूर्वे उत्तरे च । सर्वत्र "नक्षत्रे च लुपी"(पा.सू.२-३-४५.)त्यधिकरणे तृतीया ॥२॥

▼ सुदर्शनः

अत्र च वधूः फल्गुन्योरेव **व्यूह्यते** नीयते स्वगृहात्, न तु "तां ततः" (आप.गृ.५-११.) इति वचनात् ब्राह्मादिवत्तदानीमेव ॥ केचित्– "इन्वकाभिर्" इत्यादि "फल्गुनीभ्यां व्यूह्यते" इत्यन्तमुत्तरत्रेन्वकाशब्दस्य व्याख्यानात् शाखान्तरीया गाथेति कल्पयन्तः, मघासु गवां क्रयादिना स्वीकारः, सेनायाश्च युद्धे व्यूहः, अविशेषात् पूर्वयोरुत्तरयोर्वा फल्गुन्योरिति प्रकृतानुपयोगितया व्याचक्षते ॥२॥

▼

⑤

>

फल्गुनीभ्यां व्यूह्यते।

# ०३ ०३ याङ् कामयेत②

यां कामयेत दुहितरं प्रिया स्यादिति, तां निष्ट्यायां दद्यात् प्रियैव भवति, नैव तु पुनरागच्छतीति ब्राह्मणवेक्षो विधिः ३

▼

⑤

>
▼ Oldenberg

3. 3 A daughter whom he wishes to be dear (to her husband), a father should give in marriage under the Niṣṭyā (Nakṣatra); thus she becomes dear (to her husband); she does not return (to her father's) house: this is an observance based on a Brāhmaṇa.

▼ हरदत्तः

**यां** दुहितरं पिता प्रियां **कामयेत** भर्तुरियं **प्रियास्यादिति तां निष्ठायां** नक्षत्रे दद्यात् । एवं दत्ता सा भवत्येव तस्य **प्रिया** । अयं चापरोऽस्य नक्षत्रस्य गुणः सा पितृगृहात् पुनरर्थिनी नागच्छति । पतिगृह एव तस्यास्सर्वे कामास्सम्पद्यन्ते । अन्ये तु निन्दामिमां मन्यन्ते । ब्रह्मणावेक्षो विधिरिति वचनात् अन्येऽपि स्मृत्यपेक्षा नक्षत्रविधयो भवन्ति । अन्यथा पुंसवने तिष्यवत् विवाहे इदमेव नक्षत्रं स्यात् ॥३॥

▼ सुदर्शनः

इयं भर्तुः **प्रिय स्यादिति यां दुहितरं** पिता कामयेत तां **निष्ट्यायां** स्वातौ वराय दद्यात् । सा तस्य **प्रियैव भवति । नेव तु** नैव च रोगदारिद्र्यादिना पीड्यमाना अर्थिनी पुनः पितृगृहमागच्छति ; स्वगृह एव तस्यास्सर्वे अर्थास्सम्पद्यन्त इति ब्राह्मणावेक्षो विधिः । अत्रापि पूर्ववत् स्मार्तपुण्योक्तनक्षत्रैर्विकल्पः ॥३॥

▼

⑤

>

यां कामयेत दुहितरं प्रिया स्यादिति तां निष्ट्यायां दद्यात् प्रियैव भवति नेव तु पुनरागच्छतीति ब्राह्मणावेक्षो विधिः।

# ०३ ०४ इन्वकाशब्दो मृगशिरसि②

इन्वकाशब्दो मृगशिरसि ४

▼

⑤

>
▼ Oldenberg

4. 4 The word Invakās means Mṛgaśiras; the word Niṣṭyā means Svāti.

▼ हरदत्तः

*(सम्पादकटिप्पनी- इदं सूत्रम् अग्रिमे व्याख्यातम्।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी- इदं सूत्रम् अग्रिमे व्याख्यातम्।)*

▼

⑤

>

इन्वकाशब्दो मृगशिरसि।

# ०३ ०५ निष्ट्याशब्दस्स्वातौ छन्दसि②

निष्ट्याशब्दस्स्वातौ।

▼

⑤

>
▼ Oldenberg

4. the word Niṣṭyā means Svāti.

▼ हरदत्तः

छन्दसि प्रयुक्तत्वादेतयोरर्थकथनम् ॥४॥
▼ सुदर्शनः

एते सूत्रे व्यक्तार्थे ॥४-५॥
▼

⑤

>

निष्ट्याशब्दस्स्वातौ।

# ०३ ०६ विवाहे गौः②

विवाहे *(=विवाहस्थाने)* गौः ६

▼

⑤

>
▼ Oldenberg

5. 5 At the wedding one cow;

▼ हरदत्तः

विवाहस्थाने गौरालब्धव्या दुहितृमता ॥५॥

▼ सुदर्शनः

विवाहस्थाने गौस्सन्निधाप्या ॥६॥

▼

⑤

>

विवाहे गौः।

# ०३ ०७ गृहेषु गौः②

गृहेषु *(=शालायां)* गौः ७

▼

⑤

>
▼ Oldenberg

6. In the house one cow:

▼ हरदत्तः

गृहेषु च गौरालब्धव्या तेनैव दुहितृमता । तयोर्विनियोगः ॥६॥

▼ सुदर्शनः

तथा गृहेषु शालायां अन्या गौस्सन्निधाप्या ॥७॥

▼

⑤

>

गृहेषु गौः।

# ०३ ०८ तया वरमतिथिवदर्हयेत्②

तया वरमतिथिवदर्हयेत् ८

▼

⑤

>

▼ Oldenberg

7. With the (first cow) he should prepare an Argha reception for the bridegroom as for a guest,

▼ हरदत्त-प्रस्तावः

किमर्थमित्यत आह–

▼ हरदत्तः

या विवाहे गौः तया वरमतिथिवत् पूजयेत् । अतिथिवदिति वचनात् मधुपर्केण च । "गोमधुपर्कार्हो वेदाध्याय" (आप.ध. २-८-५.) इति वचनात् ॥ ७॥

▼ सुदर्शनः

**तया** विवाहस्थाने सन्निधापितया गवा, न त्वनन्तरोक्तया, **वरमतिथिवत् ** अतिथिं यथा तथा **अर्हयेत्** पूजयेत् । **तया** हविरुत्पत्तिद्वारेणोत्सर्गद्वारेण वा अङ्गभूतया युक्तेन मधुपर्केण वरमेवदाध्यायिनमपि पूजयेदित्यर्थः ॥८॥

▼

⑤

>

तया वरमतिथिवदर्हयेत्।

# ०३ ०९ योऽस्यापचितस्तमितरया②

योऽस्यापचितस्तमितरया ९

▼

⑤

>
▼ Oldenberg

8. With the other (the bridegroom [?] should do so) for a person whom he reveres.

▼ हरदत्तः

**योऽस्य** वरस्या**पचितः** पूज्यः तेन सहागत आचार्यस्तम् **इतरया** गृहेषु या गौरालभ्यते तया । किमिवेत्यपोक्षायां **अतिथिवदर्हयेद्** इत्येव । विवाहे वराय तत्सहायेभ्यश्चान्यस्मिन्नग्नौ पृथगन्नसंस्कारो भवति । वपाहोमश्च तत्रैव । अपचिताय तत्सहायेभ्यश्च गृहेषु पृथगन्नसंस्कारः । गोश्च वपाश्रपणं होमश्चौपासन एवेत्यनुष्ठानप्रकारः ॥८॥

▼ सुदर्शनः

**योऽस्य** वरस्य पित्राचार्यत्वादिना सम्बन्धी, लोके **चापचितो** विद्याभिजनादिसम्पत्त्या । यद्वा वरस्यापचितः पूज्यः । **तमितरया** गृहेषु सन्निधापितया अतिथिवदर्हयेदिति सम्बन्धः । एतन्मधुपर्कद्वयमपि विवाहाङ्गं, प्रकरणात् । दातृपुरुषार्थत्वे तु "आचार्यायर्त्विजे श्वशुराय राज्ञे वरायापचिताय च" इति ब्रूयात् । प्रत्युत "अतिथिः पितरो विवाहश्च" (आप.गृ.३-१०.) इति विवाहसम्बन्धमेवाह । ननु–वरं चापचितं चातिथिवदर्हयेदिति वक्तव्ये "विवाहे गौः" इत्यादि किमर्थम्? उच्यते– उभयोः पूजयोर्भिन्नदेशत्वेन भिन्नतन्त्रत्वज्ञापनार्थम् ; इतरथा सम्भवतां तन्त्रता स्यात् । "सर्वेभ्यो वैकामविभवत्वात्" इति कल्पान्तरे सर्वेभ्यः ऋत्विग्भ्यो विकल्पेन गवैकत्वदर्शनादिहापि वरापचितयोर्विकल्पेन प्रसक्तं गवैकत्वं माभूदिति प्रतिषेधार्थं च ॥९॥

▼

⑤

>

योऽस्यापचितस्तमितरया।

# ०३ १० एतावद्गोरालम्भस्थानमतिथिः②

एतावद्गोरालम्भनम् - अतिथिः पितरो विवाहश्च १०

▼

⑤

>
▼ Oldenberg

9. These are the occasions for killing a cow: (the arrival of) a guest, (the Aṣṭakā sacrifice offered to) the Fathers, and marriage.

▼ हरदत्तः

एतेष्वेव त्रिषु स्थानेषु गोरालम्भः नान्यत्र पाकयज्ञेषु । अतिथिशब्देनातिथ्यकर्म व्यपदिश्यते "यत्रास्मा अपचितिं कुर्वन्ति" (आप.गृ.१२.३.) इत्येवमादि । पितृशब्देनाष्टका कर्म "श्वोभूते दर्भेण गाम्"(आप.गृ.२२-३) इत्यादि । विवाहशब्देनानन्तरोक्तस्य ग्रहणम् । कल्पान्तरेष्वीशानयज्ञादावपि गोरालम्भ आम्नातः, तत्प्रतिषेधार्थो नियमः । एवं ब्रुवता कल्पान्तरे दृष्टा अन्ये विशेषा अभ्यनुज्ञाता भवन्ति ॥९॥

▼ सुदर्शनः

**अतिथिः** वेदाध्याय्यागतः **पितरः** अष्टकाकर्म, **विवाहश्चेति,** यदेतत्त्रयं एतावत् गवालम्भाङ्गकर्मनिमित्तम् । एतदुक्तं भवति– यथाऽतिथिः पितरश्च गवालम्भाङ्गकर्मनिमित्तभूताः एवं विवाहोऽप्यस्मादेव वचनाद्विशेषणान्तरनिरपेक्षा इति । यद्येतत्सूत्रमेवं न व्याख्यायेत तदा "गौरिति गां प्राह" (आप.गृ.१३-१५.) "श्वोभूते दर्भेण गामुपाकरोति" (आप.गृ.२२-३.) "विवाहे गौः" (आप.गृ.३-६.) इत्येतैरेव सिद्धत्वात् व्यर्थमेव स्यात् ; तेन अवेदाध्यायिभ्यामपि वरापचिताभ्यां धर्मोक्तगोरहितो मधुपर्को देयः । वेदाध्यायिभ्यां तु तत्सहित इति ॥ केचित्– एतत्त्रयमेवास्माकं गोरालम्भस्थानम्, न पुनरन्येषामिव विकल्पेनापीशानबलिश्शूलगवापरनामा । एवं वदन्नस्माकमपि कल्पान्तरोक्तानपि विशेषान् विकल्पेनानुजानातीति ॥१०॥

▼

⑤

>

एतावद्गोरालम्भस्थानमतिथिः पितरो विवाहश्च।

# ०३ ११ सुप्तां रुन्दन्तीम्②

*(वरे प्राप्ते)* सुप्तां रुन्दन्तीं निष्क्रान्तां वरणे परिवर्जयेत् ११

▼

⑤

>

▼ Oldenberg

10. 6 Let (the wooer) avoid in his wooing a girl that sleeps, or cries, or has left home.

▼ हरदत्त-प्रस्तावः

अथ विवाहे वर्जनीयाः कन्या आह–

▼ हरदत्तः

वरेषु वरणार्थं प्राप्तेषु या कन्या स्वपिति रोदिति निष्क्रामति वा गृहात्, तस्या वरणं न कर्त्तव्यम् । अशुभलिङ्गान्येतानीति । परिशब्दोऽत्यन्तप्रतिषेधार्थः मनश्चक्षुषोर्निबन्धे सत्यपीति ॥११॥

▼ सुदर्शनः

या वरेषु वरणार्थं प्राप्तेषु स्वपिति, या रोदिति, या वा गृहान्निष्क्रामति, ता एता **वरणे परिवर्जयेत्** अत्यन्तं वर्जयेत्, ऋद्धौ ज्योतिषादिभिर्ज्ञातायामपि ; यतस्स्वापादीनामत्रानृद्धिलिङ्गत्वं प्रबलत्वं च विवक्षितम् ॥११॥

▼

⑤

>

सुप्तां रुन्दन्तीं निष्क्रान्तां वरणे परिवर्जयेत्।

# ०३ १२ दत्ताङ् गुप्ताम्②

दत्तां गुप्तां *(=अदर्शिता)* द्योताम् *(=पिङ्गाक्षी, बभ्रुकेशी वा, विषमदृष्टिर्वा)* ऋषभां *(=ऋषभस्येव शरीरं गतिः शीलं वा यस्यास्सा)* शरभां *(= शीर्णदीप्तिः, सर्वनीललोम्नी वा, अरूपा वा, केचित्दर्शनीया)* विनतां *(=कुब्जां)* विकटां *(विस्तीर्ण-जङ्घां)* मुण्डां मण्डूषिकां *(=वामनाङ्गा, दग्धाङ्गा वा ।)* साङ्कारिकां रातां *(=रतिशीलां)* पालीं *(=वत्सादीनां पालयित्रीं)* मित्रां *(=बहुमित्रां)* स्वनुजां *(=केचित्वरजन्मसंवत्सर एव पश्चाज्जातेति।)* वर्षकारीं *(=स्वेदशीलामिति केचित्। वराद्वर्षेणाधिका ।)* च वर्जयेत् १२

▼

⑤

>

▼ Oldenberg

11. 7 And let him avoid one who has been given (to another), and who is guarded (by her relations), and one who looks wicked (?), or who is a most excellent one (?), or (who is like the fabulous deer) śarabha (?), a hunch-back, a girl of monstrous appearance, a bald-headed girl, a girl whose skin is like a frog's (?), a girl who has gone over to another family (?), a girl given to sensual pleasures (?), or a herdess, or one who has too many friends, or who has a fine younger sister, or one whose age is too near to that of the bridegroom (?).

▼ हरदत्तः

**दता**वाचान्यस्मै दत्ता । **गुप्ता** प्रयत्नेन रक्ष्यमाणा । **दुश्शीला** वा सा भवति अशुभलक्षणा वा । **द्योता** विषमदृष्टिः । **ऋषभा** ऋषभशीला । **शरभा** अतिदर्शनीया । जारास्तां कामयेरन् सा च तान् । **विनता** विनतगात्रा, कुब्जा वा । **विकटा** विस्तीर्णजङ्घा । **मण्डा** अपनीतकेशा । **मण्डूषिका** मण्डूकत्वकश्लक्ष्णेत्यर्थः । वामनेत्यन्ये । **सांकारिका** कुलान्तरे जाता कुलान्तरस्यापत्यत्वं गता वा, यस्यां वा गर्भस्थायां माता अस्थिसञ्चितवती । **राता** रतिशीला । **पाली** वत्सादीनां पालयित्री । **मित्रा** वमित्रवती बहुमित्रेत्यर्थः । स्वयं वा मित्रभूता । **स्वनुजा** यस्या स्वनुजा शोभना स्वयंदर्शनीया सा स्वनुजा वरजननादूर्ध्वमल्पीयसि काले जाता तस्मिन्नेव संवत्सरे जातेत्यन्ये । **वर्षकारी** वर्षेणाधिका वर्षकारी स्वेदनशीला इत्यन्ये । वर्जयेदित्युच्यते वरणे परिवर्जयेदित्यस्यानुवर्तनं माभूदिति । तेन येषु वरणं नास्ति ब्राह्मादिषु विवाहेषु तेष्वप्यासां प्रतिषेधः । किञ्च तदनुवृक्तावत्यन्तप्रतिषेधप्रसङ्गः ॥१२॥

▼ सुदर्शनः

दत्ताद्याःपञ्चदश कन्या वर्जयेत् । **दत्ता**अन्यस्मै वाचा प्रतिश्रुता, उदकपूर्व वा प्रतिपादिता । **गुप्ता**अदर्शनार्थ कञ्चुकादिभिरावृता, प्रयत्नसंरक्ष्यमाणा वा दौश्शील्यादिशङ्कया । **द्योता** पिङ्गाक्षी, बभ्रुकेशी वा, विषमदृष्टिर्वा । **ऋषभा** प्रधाना, ऋषभस्येव शरीरं गतिः शीलं वा यस्यास्सा, ककुद्वास्ति यस्यास्सा । **शरभा** शीर्णदीप्तिः, सर्वनीललोम्नी वा, अरूपा वा, निष्प्रभा वा । केचित् दर्शनीया, यतस्सा जारकाम्या । **विनता** कुब्जा । **विकटा** विकटजङ्घा, विस्तीर्णजङ्घा वा । **मुण्डा** अपनीतकेशा, अजातकेशा वा । **मण्डूषिका** अल्पकाया, अरुणदती वा मण्डूकत्वग्वा । अपरेवामनाङ्गा, दग्धाङ्गा वा । **साङ्कारिका** गर्भस्थायां यस्यां सत्यां माता भर्तुरस्थिसञ्चयनकारिका, कुलान्तरस्य दुहितृत्वं गता वा । **राता** रमणाशीला कन्दुकादिक्रीडाप्रियेत्यर्थः, ऋतुस्नाता वा । केचित्– रतिशीला विषयोपभोगशीलेत्यर्थः । **पाली** वत्सक्षेत्रादिपालिका । **मित्रा** बहुमित्रा, सखी वा । **स्वनुजा** शोभनानुजा यस्यास्सा, न तु शोभनोऽनुजो यस्याः शोभनायामनुजायां कदाचित् प्रमादस्स्यादिति । केचित् वरजन्मसंवत्सर एव पश्चाज्जातेति । **वर्षकारी** वराद्वर्षेणाधिका । यात्यन्तं स्रवति सा वा । **परिवर्जयेदि**त्यनुशङ्के सत्यपि वर्जयेदिति पुनर्वचनं ब्राह्मादिषु सर्वेषु विवाहेष्वासां प्रतिषेधार्थम्; सति गत्यन्तरे ऋद्धावपि परीक्षितायां दत्तेततरासामनिषेधार्थं वा ॥१२॥

▼

⑤

>

दत्तां गुप्तां द्योतामृषभां शरभां विनतां विकटां मुण्डां मण्डूषिकां साङ्कारिकां रातां पालीं मित्रां स्वनुजां वर्षकारीं च वर्जयेत्।

# ०३ १३ नक्षत्रनामा नदीनामा②

नक्षत्र-नामा नदी-नामा वृक्ष-नामा च गर्हिताः १३

▼

⑤

>
▼ Oldenberg

12. 8 Girls who have the name of a Nakṣatra, or of a river, or of a tree, are objectionable.

▼ हरदत्तः

*(सम्पादकटिप्पनी- इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी- इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*
▼

⑤

>

नक्षत्रनामा नदीनामा वृक्षनामाच गर्हिताः।

# ०३ १४ सर्वाश्च रेफलकारोपान्ता②

रेफ-लकारोपान्ता *(=गौरी शालीत्याद्या)* वरणे परिवर्जयेत् १४

▼

⑤

>
▼ Oldenberg

13. And all girls in whose names the last letter but one is r or l, one should avoid in wooing.

▼ हरदत्तः

नक्षत्रं नाम यासां ता तथा **नक्षत्रनामाः, नदीनामाः वृक्षनामाश्च** रोहिणी गङ्गा करेजेत्यादयः । ताश्च विवाहे **गर्हिताः ।** तथा **सर्वाश्च रेफलकारोपान्त्याः** एवं भूतं नाम इत्यर्थः । करा काला सुवेलेत्यादयः । ताः **वरणे परिवर्जयेत्** वरणमप्यासां न कर्तव्यमित्यर्थः ॥१४॥

▼ सुदर्शनः

नक्षत्रस्य नामेव नाम यासां **नक्षत्रनामाः ।** एकस्य नामशब्दस्य लेपः, उष्ट्रमुखादिवत् । एवमिखादिवत् विग्रहः रोहिणी चित्रेत्येवमादयो नक्षत्रनामाः । गङ्गेत्यादयो **नदीनामाः** । शिंशुपेत्याद्या **वृक्षनामाः** । **गर्हीताः** वर्जनीयाः ॥१३॥ रेफो वा लकारो वा यासां नाम्नौपान्त उपधेत्यर्थः यथा गौरी शालीत्यादि । शेषं व्यक्तम् । अत्र चकारेण गर्हिता इत्यनुकर्षणा तासां वर्जनीयत्वे सिद्धे "सर्वा वरणे परिवर्जयेत्" इति व्यर्थम् । न; सुग्रहार्थत्वात् । अथ वा या एता रेफलकारोपान्ता गौरी शालीत्याद्या, याश्च प्रकारान्तरेणापि स्मृत्यन्तरोक्ता रेफलकारोपान्ताः, यथा सगोत्रा समानप्रवरा पुंश्चलीति तास्सर्वा वरणे परिर्जयेदिति ज्ञापनार्थम् । इदं त्विहवक्तव्यमसत्यपि गत्यन्तरे व्यक्तेऽप्यृद्धिलिङ्गे सगोत्रादीनां सर्वथा निषेध एव । गौर्यादीनां तु न तथा गुप्तादीनामिवेति ॥ केचित्– नक्षत्रनामेत्यादिकेयं शास्त्रान्तरगीता गाथा, तस्याः पादपूरणानि "सर्वा वरणे परिवर्जयेद्" इति पदानीति परिकल्पयन्तो, यस्मान्नक्षत्रादिनामा रेफलकारोपान्ताश्च गर्हिताः तस्मात्तास्सर्वो वरणे परिवर्जयेदिति व्याचक्षते ॥१४॥

▼

⑤

>

सर्वाश्च रेफलकारोपान्ता वरणे परिवर्जयेत्।

# ०३ १५ शक्तिविषये द्रव्याणि②

कन्या-परीक्षा - शक्तिविषये द्रव्याणि प्रतिच्छन्नान्युपनिधाय ब्रूयादुपस्पृशेति १५

▼

⑤

>

▼ Oldenberg

14. If possible, he should place (the following) objects hidden before the girl, and should say to her, 'Touch (one of these things).'

▼ हरदत्तः

*(सम्पादकटिप्पनी- इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी- इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼

⑤

>

शक्तिविषये द्रव्याणि प्रतिच्छन्नान्युपनिधाय ब्रूयादुपस्पृशेति।

# ०३ १६ नाना बीजानि②

नाना बीजानि संसृष्टानि, वेद्याः पांसून्, क्षेत्राल्लोष्टं, शकृच्, छमशानलोष्टमिति १६

▼

⑤

>

▼ Oldenberg

15. (The objects are), different kinds of seeds mixed together, loose earth from (the kind of sacrificial altar called) vedi, an earth-clod from a field, cow-dung, and an earth-clod from a cemetery.

▼ हरदत्तः

"लक्षणसम्पन्नामुपयच्छेत" इति वक्ष्यति । तत्र लक्षणानामज्ञातत्वात् तत्परीक्षणोपाय उपदिश्यते । न चायं नित्यो विधिः; "शक्तिविषय" इति वचनात् । **शक्तिस्**सामर्थ्यं यदि सम्भवः । यदि वधूज्ञातयोऽनुमन्येरन् तदा कर्तव्यं नान्यथेत्यर्थः । तत् कथं कर्तव्यम्? उच्यते–द्रव्याणि पञ्चवक्ष्यमाणानि मृत्पिण्डेषु प्रतिच्छन्नानि कृत्वा उपनिधाय कन्यासमीपे निधाय तां ब्रूयाद्वरः–एषां पिण्डानां एकमुपस्पृशेति । कानि पुनस्तानि

द्रव्याणि? नानाबीजानि संसृष्टानि व्रीहियवादीनि । वेद्याः पांसूनाहृतान्, सस्यसम्पन्नात् क्षेत्रादाहृतं लोष्टं, शकृत् गोमयं, श्मशानादाहृतं लोष्टमित्येतानि । बीजानां द्रव्यत्वाव्यभिचारेऽपि द्रव्याणीत्युच्यते–शास्त्रान्तरे दृष्टानामन्येषामपि द्रव्याणामिह विकल्पेन प्राप्त्यर्थं तद्यथा– अविदासिनो हृदात्सर्वसम्पन्ना देवनात् कितवी इरिणादधन्येति (आश्व. गृ. १-५-६.) ॥१६॥

▼ सुदर्शनः

शक्तिस्सामर्थ्यम् । **विषयो**ऽवकाशः । अस्यामृद्धिपरीक्षायां वरतत्पक्षिणां सामर्थ्यस्यावकाशे सम्भवति, यदि कन्या च तदीयाश्चेमां परीक्षामभ्युपगच्छेयुरित्यर्थः । यत एवात्र शक्तिविषय इत्याह, अत एवैषा ऋद्धिपरीक्षा ज्योतिषादिभिर्वैकल्पिकी, न तु नित्यवद्विवाहाङ्गम् । **द्रव्याणि** वक्ष्यमाणानि मृत्पिण्डेषु च प्रतिच्छन्नान्येकस्मिन् भाजने निधाय कन्यां समीपे च कृत्वा, तां ब्रूयादेषां पिण्डानामेकमुपस्पृशेति ॥१५॥ कानि तानीत्यत आह– **नानाबीजानि** व्रीहियवादिबीजानि । **संसृष्टानि** एकस्मिन् पिण्डे क्षिप्तानि । **वेद्याः** सौमिक्याः आहृतान् पांसून् । **क्षेत्रात्** सस्यसम्पन्नादाहृतं लोष्टम् । अविशिष्टे प्रसिद्धे ॥१६॥

▼

⑤

>

नाना बीजानि संसृष्टानि वेद्याः पाँसून् क्षेत्राल्लोष्टँ शकृच्छमशानलोष्टमिति।

# ०३ १७ पूर्वेषामुपस्पर्शने②

पूर्वेषामुपस्पर्शने यथालिङ्गमृद्धिः १७

▼

⑤

>

▼ Oldenberg

16. 9 If she touches one of the former (objects, this portends) prosperity as characterized (by the nature of what she has touched).

▼ हरदत्तः

*(सम्पादकटिप्पनी- इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी- इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼

⑤

>

पूर्वेषामुपस्पर्शने यथालिङ्गमृद्धिः।

# ०३ १८ उत्तमम् परिचक्षते②

उत्तमं परिचक्षते १८

▼

⑤

>
▼ Oldenberg

17. The last is regarded as objectionable.

▼ हरदत्तः

तत्र बीजस्पर्शने प्रजाभिस्समृद्धिः । वेदिपुरीषे यज्ञैः, क्षेत्रलोष्टे धनधान्यैः, गोमये पशुभिः, श्मशानलोष्टे मरणमिति यथालिङ्गार्थः । **उत्तमम्** अन्त्यं द्रव्यं **परिचक्षते** गर्हन्ते वर्जयन्तीत्यर्थः ॥१८॥

▼ सुदर्शनः

**पूर्वेषां** चतुर्णामुपस्पर्शने **यथालिङ्गिमृद्धिः ।** नानाबीजानामुपस्पर्शने प्रजानां समृद्धिः । वेद्याः पांसूनां यज्ञानां, क्षेत्राल्लोष्टस्य सस्यानां, शकृतश्च पशूनामिति । ऋद्धिनिश्चयाद्विवाहकर्तव्यतानिश्चय इत्यर्थः ॥१७॥ **उत्तमं** श्मशानलोष्टं **परिचक्षते** गर्हन्ते शिष्टाः, जायापत्योरन्यतरस्य वा मरणलिङ्गत्वादिति ॥१८॥

▼

⑤

>

उत्तमं परिचक्षते।

# ०३ १९ बन्धुशीललक्षणसम्पन्नामरोगामुपयच्छेत②

बन्धुशीललक्षणसम्पन्नामरोगामुपयच्छेत १९

▼

⑤

>
▼ Oldenberg

18. Let him marry a girl of good family and character, with auspicious characteristics, and of good health.

▼ हरदत्त-प्रस्तावः

उद्वाह्यामाह–

▼ हरदत्तः

उक्ता वर्जनीयाः कन्याः । अथ ग्राह्या उच्यन्ते । बन्धुशब्देन कुलमुच्यते । यदुक्तमाश्वलायनेन "कुलमग्रे परिक्षेत ये मातृतः पितृतश्चेति यथोक्तं पुरस्ताद्" (आश्व. गृ. १-५-१०.) इति । **शीलसम्पन्ना** आर्यशीला । **लक्षणसम्पन्ना** स्त्रीलक्षणैरुपेता रोगाहिता क्षयापस्मारादिरहिता ॥१९॥

▼ सुदर्शनः

अत्र **सम्पन्नाम्** इति प्रत्येकं सम्बध्यते । **बन्धुसम्पन्नां** प्रशस्ताभिजनाम् । **शीलसम्पन्नाम्** आस्तिक्यादिगुणान्विताम् । **लक्षणसम्पन्नां** गूढगुल्फत्वादिस्त्रीलक्षणयुक्ताम् । **अरोगां** क्षयापस्मारकुष्ठाद्यचिकित्स्यरोगरहिताम् । उपयच्छेत उद्वहेत् ॥१९॥
▼

⑤

>

बन्धुशीललक्षणसम्पन्नामरोगामुपयच्छेत ।

# ०३ २० बन्धुशीललक्षणसम्पन्नश्श्रुतवानरोग②

(वर-चयनम् -) बन्धुशील-लक्षण-सम्पन्नश् श्रुतवान् अरोग इति वरसम्पत् २०

▼

⑤

>
▼ Oldenberg

19. Good family, a good character, auspicious characteristics, learning, and good health: these are the accomplishments of a bridegroom.

▼ हरदत्त-प्रस्तावः

अथ वरगुणानाह–

▼ हरदत्तः

**श्रुतवान्** श्रुताध्ययनसम्पन्नः । वरसम्पत् वरगुणाः । एवंगुणाय कन्यका देयेत्यर्थः ॥१६॥

▼ सुदर्शनः

**बन्धुशीललक्षणसम्पन्न** इति पूर्ववद्व्याख्यानम् । **श्रुतवान्** श्रुताध्ययनसम्पन्नः ; अविदुषश्चोदितकर्मानधिकारात्, धर्माद्यर्थत्वाच्च विवाहस्य । **अरोग** इति पूर्ववत्; तस्याप्यसमर्थत्वेनानधिकारात् । एवंभूता वरसम्पत् । एवङ्गुणाय वराय कन्या देयेत्यर्थः ॥२०॥

▼

⑤

>

बन्धुशीललक्षणसम्पन्नश्श्रुतवानरोग इति वरसम्पत् ।

# ०३ २१ यस्याम्②

यस्यां मनश्-चक्षुषोर् निबन्धस् तस्याम् ऋद्धिर् नेतरद् आद्रियेतेत्य् एके २१

▼

⑤

>

▼ Oldenberg

20. A wife who is pleasing to his mind and his eyes, will bring happiness to him; let him pay no attention to the other things: such is the opinion of some.

▼ हरदत्त-प्रस्तावः

अथर्द्धिनिश्चये एकीयं मतमाह–

▼ हरदत्तः

**यस्यां** कन्यायां वरस्य **मनसश्चक्षुषश्च** निबन्धः तृप्तिर् उत्पद्यते **तस्याम् ऋद्धिर्** ध्रुवा, **नेतरत्** न दत्तादि-गुण-दोषाद्य्-अनुदर्शनम् आदरणीयम् इत्य् **एके** शिष्टा ब्रुवते ।

अत्र पक्षे सर्व-गुण-सम्पन्नायाम् अपि यस्यां
मनश्चक्षुषी न निबध्येते सा वर्जनीया ।

शास्त्र-निषिद्धास् तत्रापि पक्षे वर्ज्या एव, यथा ऽस-वर्णा स-गोत्रेति ॥२१॥

▼ सुदर्शनः

**यस्यां** कन्यायां वरस्य **मनश्-चक्षुषोर् निबन्धः** नितरां बन्धनं,
यस्याम् आसक्त्यतिशयेन मनश्चक्षुषी निबद्धे अव तिष्ठत इत्यर्थः ।
**तस्यां** जायायां सत्यां धर्मादीनां समृद्धिः, **नेतरत्** गुणदोषानुदर्शनम् **आद्रियेत** इत्येके ब्रूवते ।

एतदुक्तं भवति–

अत्र मनश्चक्षुषोर् निबन्ध एवादरणे कारणम्,
न तु ज्योतिषादिना ज्ञाता गुणाः । तथा तद्-अभाव एव परिवर्जने कारणम्,
न स्वापादयो दोषा इति ।

उभयोर् अपि मतयोर् दत्तादीनां निषेधम् आद्रियेतैव;
"सवर्णापूर्वशास्त्रविहितायाम्" (आप.ध. २-१३-१.) "असमानार्षगोत्रजाम्" "पञ्चमात् सप्तमादूर्ध्वम्" इत्यादिवचनजातात् ॥२१॥

इत्थं सुदर्शनार्येण गृह्यतात्पर्यदर्शनम् ॥ प्रथमे पटलेऽकारि यथाभाष्यं यथामति ॥ इति श्रीसुदर्शनाचार्यकृते गृह्यतात्पर्यदर्शने तृतीयः खण्डः ॥
समाप्तश्च प्रथमः पटलः
▼

### ⑤

>

यस्यां मनश्चक्षुषोर्निबन्धस्तस्यामृद्धिर्नेतरदाद्रियेतेत्येके ।

---

1. On the Nakṣatra Invakās, comp. Section 3, Sūtra 4. This Sūtra forms a Śloka-hemistich, on which Haradatta observes, 'This verse has not been made by the Sūtrakāra.'↩

2. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

3. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

4. 12 seq. Description of the regular form of a Pākayajña.↩

5. Comp. Śrauta-sūtra I, 11, 6 seqq.↩

6. This is the Praṇītā water.↩

7. The Brahman.↩

8. Comp. Taitt. Brāhmaṇa II, 1, 4, 5; Śatapatha Brāhmaṇa II, 3, 1, 18. 21. - At the Agnihotra the sacrificer, having wiped off the Sruc with his hand, wipes off the hand on the Barhis or on the earth (Āpast.-Śraut. VI, 10, 11; 11, 4; Kātyāyana IV, 14, 20). As to the following acts alluded to in this Sūtra, comp. Āpastamba VI, 11, 4. 5; 12, 2.↩

9. On the Nakṣatra Invakās, comp. Section 3, Sūtra 4. This Sūtra forms a Śloka-hemistich, on which Haradatta observes, 'This verse has not been made by the Sūtrakāra.'↩

# ०४ विवाहप्रकरणम्①

## ०४ ०१ सुहृदस्समवेतान् मन्त्रवतो②

सुहृदस् समवेतान् मन्त्रवतो ऽवरान् *(वरः)* प्रहिणुयात् १

▼

**⑤**

>

▼ Oldenberg

1. Let him send out as his wooers friends who have assembled, who are versed in the Mantras.

▼ हरदत्तः

अथ कन्यावरणविधिः । इन्वकाभिः प्रसृज्यन्त इत्युक्तम् । तस्मिन्नन्यस्मिन् वा पुण्यनक्षत्रे ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा, **सुहृदः** बन्धून् **समवेतान्** सङ्गतान् **मन्त्रवतः** श्रुताध्ययनसम्पन्नान् **वरान्** कन्यावरयितॄन् **प्रहिणुयात्** प्रस्थापयेत् यूयममुष्मात् कुलात् मह्यं कन्यां वृणीध्वमिति । यद्यप्येवंविधे कार्ये सुहृदामेव सम्भावना तथापि सुहृद इत्युच्यते मन्त्रवतामसम्भवे सुहृत्वमात्रपरिग्रहार्थम् । मन्त्रवत इति ब्राह्मणानामेव ग्रहणम् । तेन क्षत्रियवैश्ययोरपि ब्राह्मणा एव वराः ॥१॥

▼ सुदर्शनः

पूर्वत्र "इन्वकाभिः प्रसृज्यन्ते" (आप.गृ. २-१६.) इति विवाहोपयोगिनो वरप्रेषणस्य कालोऽभिहितः । इदानीं तस्य विधिमाह— **सुहृदः** आत्मनो मित्राणि । **समवेतान्** आत्मानं प्रत्येककार्यान् । **मन्त्रवतः** मन्त्रब्राह्मणवतः, "शुचीन् मन्त्रवतः" (आप. ध. २-१५-११.) इतिवन्मन्त्रग्रहणस्य प्रदर्शनार्थत्वात् । **वरान्** वरयितॄन् । वरः **प्रहिणुयात्** प्रेषयेत् । एते युग्मा ब्राह्मणाश्चेति केचित् ॥१॥

▼

**⑤**

>

सुहृदस्समवेतान् मन्त्रवतो वरान् प्रहिणुयात् ।

## ०४ ०२ तानादितो द्वाभ्यामभिमन्त्रयेत②

तानादितो द्वाभ्यामभिमन्त्रयेत २ *(कृतप्राणायामोऽवरान् प्रेषयिष्येऽइति सङ्कल्प्य, "प्रसुग्मन्ते"ति द्वाभ्यां वरानभिमन्त्र्य, "यूयममुष्मात्कुलात्मह्यं कन्यां वृणीध्वम्" इति प्रेषयेत् । ततस्ते दुहितृमतो गृहं गत्वा, कन्यां दत्तसगोत्रत्वादिदोषरहितां बन्ध्वादिगुणसम्पन्नां च यत्नतोऽवधार्य, दुहितृमन्तं पित्रीदिकं "गौतमगोत्राय विष्णुशर्मणे वराय भवदीयां कन्यां प्रजासहत्वकर्मभ्यो वृणीमहे"इति ब्रूयुः । ततस्स पित्रादिर् "दास्यामी"ति प्रतिब्रूयात् । ततस्ते प्रत्येत्य, "सिद्धार्ता वय"मिति वरायावेदयेयुः । एतच्च वरप्रेषणाद्यासुरार्षयोरेव, नान्येषु अर्थलोपात् ।)*

*(हे सुहृदः)*

प्र॒सु॒ग्मन्ता॑*(=प्रकर्षेण सुष्ठु गन्तारः)* धि॒यसा॒नस्य॑*(=ध्यायमानस्य)* स॒क्षणि॑*(=समाने क्षणे)*
व॒रेभि॑र्*(=श्रेष्ठैः [पथिभिः])* व॒राँ*(=वरयितव्यान् [कन्यायाः पित्रादीन्])* अ॒भि षु॒ प्रसी॑दत*(=प्रगच्छत)* ।
अ॒स्माक॒म्*(=कन्याया मम च, अस्मदो द्वयोश्च इति बहुवचनम्)* इन्द्र॑ उ॒भयं॑ जुजोषति॒
यत् *(यज्ञेषु)* सौ॒म्यस्यान्ध॑सो॒ बुबो॑धति ।

अनृक्षरा" *(=कंटकशर्करादिरहिताः)* ऋज"वस् सन्तु प"न्था
ये"भिस् स"खायो य"न्ति नो वरेय"म् *(=वरणीयं [कन्यायाः पित्रादिकं प्रति])* ।
स"म् अर्यमा" सं" भ"गो नो *(=आवाम्, अस्मदो द्वयोश्च इति बहुवचनम्)* निनीयात्
स"ञ् जास्पत्यँ" *(=जायापतिभावः)* सुय"मम् अस्तु देवाः । *(र५)*

▼

**⑤**

>

▼ Oldenberg

2. He should recite over them the first two verses (Mantrap. I, 1, 1. 2).

▼ हरदत्तः

गच्छतस्तान् वराननन्तरमाम्नातस्य मन्त्रसमाम्नायस्यादितो द्वाभ्यां ऋग्भ्यां प्रसुग्मन्तेत्येताभ्यां अभिमन्त्रयेत । अभिलक्ष्य मन्त्रोच्चारणमभिमन्त्रणम् । ततस्ते कन्याकुलं गत्वा–एवंगोत्रायामुष्मै सहत्वकर्मभ्यो युष्मदीयां कन्यां वृणीमह–इति ब्रूयुः । ततस्ते प्रतिब्रूयुः–शोभनं तथा दास्याम–इति । तत्र ब्राह्मे विवाहे दैवे चार्थलोपात् वरणलोपः कल्पान्तरदर्शनाच्च–नात्र वरान् प्रहिणुयादिति । तथा गान्धर्वराक्षसयोश्च ॥२॥

▼ सुदर्शनः

**तान्** प्रस्थितान् । मन्त्रसमाम्नायस्य **आदितः** "प्रसुग्मन्ता" इति द्वाभ्यां ऋग्भ्यां **अभिमन्त्रयेत** । अभिमन्त्रणं अभिमुख्येन मन्त्रस्योच्चारणम् । अनुमन्त्रमप्येवम् "अनुमन्त्रयितव्यद्रव्यगतचित्तेनेति तु भेदः ॥ अथ सूत्रस्यापूर्णत्वात् क्रम उच्यते– कृतप्राणायामो "वरान् प्रेषयिष्ये" इति सङ्कल्प्य, "प्रसुग्मन्ते"ति द्वाभ्यां वरानभिमन्त्र्य, "यूयममुष्मात् कुलात् मह्यं कन्यां वृणीध्वम्" इति प्रेषयेत् । ततस्ते दुहितृमतो गृहं गत्वा, कन्यां दत्तसगोत्रत्वादिदोषरहितां बन्ध्वादिगुणसम्पन्नां च यत्नतोऽवधार्य, दुहितृमन्तं पित्रादिकं "गौतमगोत्राय विष्णुशर्मणे वराय भवदीयां कन्यां प्रजासहत्वकर्मभ्यो वृणीमहे" इति ब्रूयुः । ततस्स पित्रादिर्"दास्यामी"ति प्रतिब्रूयात् । ततस्ते प्रत्येत्य, "सिद्धार्था वयम्" इति वराय वेदयेयुः । एतच्च वरप्रेषणाद्यासुरार्षयोरेव, नान्येषु अर्थलोपात् । अथ यस्मिन्नहनि विवाहः ततः पूर्वमेव पञ्चमे तृतीये वाहनि यथाशिष्टाचारमङ्कुरारोपणं कुर्यात् । तथा श्वो विवाह इत्यद्य विवाह इति च । "तथा मङ्गलानि" "आवृतश्चास्त्रीभ्यः प्रतीयेरत्" (आप. गृ. २-१४,१५.) इत्युक्तानि कर्माणि वरो वधूश्च यथाकालं यथायोग्यं कुरुतः । केचित्—पूर्वेद्युर्नान्दीश्राद्धं कल्पान्तरादिति । ततः पित्रादिर्वधूकुलं प्राप्ताय वराय कन्यामुदकपूर्वं दद्यात्–इमां वत्सगोत्रजां लक्ष्मीदायीं गौतमगोत्राय विष्णुशर्मणे तुभ्यं प्रजासहत्वकर्मभ्यः प्रतिपादयामीति । गान्धर्वराक्षसयोस्तु न प्रतिपादनम्, दातृव्यापारानपेक्षत्वात् । ततस्तां वरः प्रतिगृह्य विवाहस्थाने "यत्र क्वचाग्निम्" (आप. ध.२-१-१३.) इत्यादिविधिनाग्निं प्रतिष्ठाप्य, तत्रैव यस्यां शालायां कन्याऽऽस्ते तां गत्वा मधुपर्कं प्रतिगृह्णाति यथार्हं यथाविधि । एवमेव वरापचितोऽपि ॥२॥

▼

**⑤**

>

तानादितो द्वाभ्यामभिमन्त्रयेत ।

# ०४ ०३ स्वयन् दृष्ट्वा②

स्वयं दृष्ट्वा *(दृष्ट्वैव चक्षुषी उपसंहरति)* तृतीयां *(=अभ्रातृघ्नीमित्येताम्)* जपेत् ३

अभ्रा॑तृघ्नी॒ं वरु॒णा-
ऽपं॑तिघ्नीं बृहस्पते ।
इन्द्राऽपुं॑त्रघ्नीं ल॒क्ष्म्यं॑न्,
ताम् अ॒स्यै सं॑वितस् सुव । *(र५)*

▼

⑤

>
▼ Oldenberg

3. When he himself has seen (the bride), let him murmur the third (verse; M. I, 1, 3).

▼ हरदत्त-प्रस्तावः

अनन्तरं वरः किं कुर्यादित्यत्राह—

▼ हरदत्तः

ततो विवाहे निश्चिते पूर्वेद्युर्नान्दीश्राद्धं कृत्वा परेद्युर्ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा वरो वधूकुलं गच्छति । तस्मै कूर्चदानादि भोजनान्तं मधुपर्कं दत्वा कन्यां प्रतिपादयति–तुभ्यमिमां प्रजासहत्वकर्मभ्यः प्रतिपादयामीति । ततस्तां वरः स्वयं दृष्ट्वा तृतीयामृचं जपेत् अभ्रातृघ्नीमित्येताम् । स्वयमित्यनुच्यमाने वरं दृष्ट्वेत्यर्थः स्यात् प्रकृतत्वात् । स्वयं ग्रहणात्तु कन्यां दृष्ट्वेत्यर्थो भवति । तत्र ब्राह्मे विवाह उदकपूर्व प्रतिपादनम् । गान्धर्वराक्षसयोस्तु नैव प्रतिपादनम् ॥३॥

▼ सुदर्शनः

वरः **स्वयं** कन्यां दृष्ट्वा "अभ्रातृघ्नीम्" इति **तृतीयां** ऋचं **जपेत्** । दृष्ट्वैवचक्षुषी उपसंहरति । जपश्च सर्वत्र चातुस्स्वर्येण ; न तु करणमन्त्रादिवदेकश्रुत्या । "एकश्रुति दूरात्सम्बुद्धौ" (पा.सू.१-२-३३.) "यज्ञकर्मण्यजपन्यूखसामसु" (पा.सू.१-२-३४.) इति वचनात् । अत्र च स्वयमिति विशेषणं वरयितॄणां प्रकृतानामयं जपो मा भूदिति । केचित्— स्वयं वधूमेव दृष्ट्वा जपेत् ; न तु वरानिति । स्वयं दृष्ट्वेत्यादि च सर्वविवाहानामविकृतम् ॥३॥
▼

⑤

>

स्वयं दृष्ट्वा तृतीयां जपेत्।

# ०४ ०४ चतुर्थ्या समीक्षेत②

चतुर्थ्या *(=अघोरचक्षुरित्येषा)* समीक्षेत ४

अघो॑र-चक्षु॒र् अप॑तिघ्न्य् एधि
शि॒वा प॒तिभ्यः॑स् सु॒मनाः॑स् सु॒वर्चाः॑ ।
जी॒व॒सूर् दे॒वका॑मा स्यो॒ना *(=प्रशस्ता)*
शन्नो॑ भव द्वि॒पदे॒ शञ्चतु॑ष्पदे । *(र५)*

▼

⑤

>
▼ Oldenberg

4. With the fourth (M. I, 1, 4) let him behold her.

▼ हरदत्तः

अवयवश ईक्षणं **समीक्षणम्** । अघोरचक्षुरित्येषा चतुर्थीम् ॥४॥

▼ सुदर्शनः

"अघोरचक्षुः" इत्यनया समीक्षेत । वध्वा दृष्टौ स्वदृष्टिं निपातयति, अघोरचक्षुरपतिघ्न्येधीति मन्त्रलिङ्गात् । केचित्–समीक्षेत अवयवशो निरीक्षेतेति । अत्र वरो वधूश्च दर्भेष्वासीनौ दर्भान् धारयमाणौ कृतप्राणायामौ सङ्कल्पयेते –आवाभ्यां कर्माणि कर्तव्यानि, प्रजाश्चोत्पादयितव्याः–इति ॥४॥
▼

### ⑤

>

चतुर्थ्या समीक्षेत ।

# ०४ ०५ अङ्गुष्ठेनोपमध्यमया चाङ्गुल्या②

अङ्गुष्ठेनोपमध्यमया चाङ्गुल्या दर्भं संगृह्योत्तरेण यजुषा *(=इदमहमित्यनेन)* तस्या भ्रुवोरन्तरँ संमृज्य, प्रतीचीनं *(प्रत्यग्गतम् उपर्युपरि शिरो )* निरस्येत् ५

*(अङ्गुष्ठेनोपमध्यमया चाङ्गुल्या दर्भं संगृह्योत्तरेण यजुषा भ्रुवोरन्तरं संमृज्य प्रतीचीनं निरस्येत्।)*

इ॒दम् अ॒हयँ॒ या त्वयिं पति॒घ्न्य् अ॑ल॒क्ष्मिस्, तां निर्दिंशामि ।*(र५)*

▼

### ⑤

>
▼ Oldenberg

5. Let him seize with his thumb and fourth finger a Darbha blade, and let him wipe (therewith) the interstice between her eye-brows with the next Yajus (M. I, 1, 5), and let him throw it away towards the west.

▼ हरदत्तः

मध्यमासमीपे वर्तत इत्युपमध्यमा तयाङ्गुल्या अनामिकयेत्यर्थः । **भ्रुवोरन्तरं** मध्यम् **उत्तरेण यजुषा** इदमहमित्यनेन । संमार्जनमन्त्रोऽयं न निरसनमन्त्रः । **प्रतीचीनं** प्रत्यग्गतम् । उपर्युपरि शिरो निरस्येत् । तत उदकोपस्पर्शनं अङ्गुष्ठसाहचर्यादुपमध्यमयेति विशेषणादेव सिद्धे अङ्गुल्येति विशेष्यनिर्देशो विस्पष्टार्थम् । यजुषेति विशेषणं उत्तरेणेति दिग्वाचिताशङ्का मा भूदिति ॥५॥

▼ सुदर्शनः

**उपमध्यमा** उपकनिष्ठिका, न तु प्रदेशिनी, तस्या विस्रंसिकेति व्यपदेशात् । **उत्तरेण यजुषा** "इदमहं या त्वयि" इत्यनेन । शेषं व्यक्तम् । दर्भं निरस्याप उपस्पृशेत् ॥५॥

▼

### ⑤

>

अङ्गुष्ठेनोपमध्यमया चाङ्गुल्या दर्भ ँ संगृह्योत्तरेण यजुषा तस्या भ्रुवोरन्तरँ सम्मृज्य प्रतीचीनं निरस्येत्।

# ०४ ०६ प्राप्ते निमित्त②

प्राप्ते निमित्त *(=वध्वा स्वबन्धूनां च रोदनं)* उत्तरां जपेत् *("जीवारुदन्ती")* ६ *(निमित्तावृत्तौ मन्त्र आवर्तते ।)*

*(कन्याया एव रोदन इत्याश्वलायनः । यथाह - जीवां रुदन्तीति रुदत्याम् इति ।)*

*(हर्षस्थाने)* जी॒वाँ रु॑दन्ति॒ वि*(नि)*म॑यन्ते अद्ध्व॒रे
दी॒र्घाम् अनु॒ *(भाव)*प्रसि॑तिं*(=बन्धं)* दीधियु॒र्*(=ध्यायन्तु)* नरः॑*(बहुवचनम्)* ।
वा॒मं पि॒तृभ्यो॒ य इ॒दँ स॑मेरि॒रे*(=प्रवर्तयन्ति)*
मयः॒*(=सुखदं)* पति॑भ्यो॒, जन॑यः*(=जन्याः [वध्वाः])* परि॒ष्वजे॑ ।

▼

⑤

>
▼ Oldenberg

6. If an omen occurs (such as the bride's or her relations’ weeping), let him murmur the next (verse; M. I, 1, 6).

▼ हरदत्तः

वध्वा स्वबन्धूनां च रोदनं **निमित्तं** जीवा ँ रुदन्तीति लिङ्गात् । उत्तरामृचं "जीवा ँ रुदन्ती"त्येताम्, सर्वत्र समावेशनान्ते विवाहकर्मण्यस्मिन्निमित्तेऽयं जपो भवति । निमित्तावृत्तौ मन्त्र आवर्तते ॥६॥

▼ सुदर्शनः

जीवाँ रुदन्ती"ति मन्त्रलिङ्गानुरूपे निमित्ते प्राप्ते मात्रादिभिः कन्यकया वा अन्योन्यवियोगचिन्तया रोदने कृते इमामृचं जपेत् ॥६॥

▼

⑤

>

प्राप्ते निमित्त उत्तरां जपेत् ।

# ०४ ०७ युग्मान् समवेतान्②

युग्मान् समवेतान् मन्त्रवत उत्तरया *(=व्युक्षत्क्रूर...)* ऽद्भ्यः *(स्नानार्थजलाहरणार्थं)* प्रहिणुयात् ॥

व्यु॑क्षत्*(=अपगच्छेत्)* *(यदपां)* क्रू॒रम्,
उद॑चु॒न्त्व्*(=उद्गच्छन्तु)* आप॒,
आऽस्यै ब्रा॑ह्म॒णास् स्नप॑नँ हरन्तु ।
अ-वी॑र-घ्नी॒र्*(!)* उद् अ॑चु॒न्त्व् आपः॑ ।

▼

⑤

>
▼ Oldenberg

7. With the next (verse; M. I, 1, 7) let him send an even number of persons who have assembled there, and who are versed in the Mantras, to fetch water.

▼ हरदत्तः

वधूस्नापनार्थानामपामाहरणं **उत्तरयर्चा** "व्युक्षत्क्रूरम्" इत्येतया । मन्त्रवतः श्रुतवतः **प्रहिणुयात्** प्रस्थापयेत् । "तथा मङ्गलानी"त्येव सिद्धे युग्मवचनं पञ्चभिर्मन्त्रैः स्नापनं वक्ष्यति, तत्र प्रतिमन्त्रं स्नापनावृत्तिः । तत्र च स्नापनस्यायुग्मत्वात् तदर्थानामुदकुम्भानामप्ययुग्मत्वं स्यात् । एवमाहर्तृणां ब्राह्मणानामपि । अतो युग्मानित्युच्यते । तेन प्रतिमन्त्रं कुम्भभेदः प्रतिकुम्भं ब्राह्मणभेदश्च सिद्धो भवति । तत्र यदि चत्वारः कुम्भाः चतुर्थेन कुम्भेन चतुर्थपञ्चमाभ्यां मन्त्राभ्यामभिषेकः । यदा त्वष्टौ तदा प्रतिमन्त्रं पञ्चभिस्तूष्णीमितरैः । समवेतवचनमुदकाहरणे सह प्रवृत्त्यर्थम् । मन्त्रवत इति ब्राह्मणानां ग्रहणम्, "आस्यै ब्राह्मणा" इति मन्त्रे दर्शनात् ॥७॥

▼ सुदर्शनः

**युग्मान्** समसङ्ख्याकान् । **समवेतान्मन्त्रवत** इति पूर्ववत् । **उत्तरया** "व्युक्षत्क्रूरम्" इत्येतया प्रैषत्वादुच्चैः प्रयुक्तयाद्भ्यः ** प्रहिणुयात्** वधूस्नापनार्था अप आहर्तुं प्रेषयेत् । एते च ब्राह्मणा एव, "आस्यै ब्राह्मणा" इति मन्त्रलिङ्गात् । ते च ब्राह्मणा यास्वप्सु पुरुषाः स्नानादिषु पूर्वं न मृताः ताभ्यस्तृणावकाद्यपनीयाप आनन्यन्ति ; "अवीरघ्नीः" इति मन्त्रलिङ्गात् ॥७॥

▼

**⑤**

>

युग्मान् समवेतान् मन्त्रवत उत्तरयाऽद्भ्यः प्रहिणुयात् ।

# ०४ ०८ उत्तरेण यजुषा②

उत्तरेण यजुषा *(=अर्यम्णो अग्निं)* तस्याश्शिरसि दर्भेण्वं *(=दर्भैः परिकल्पितमिण्वं निगलाकृतिं परिमण्डलाकारम् रोमककिरीटम् इव)* निधाय,

अ॒र्य॒म्णो *(प्रसादात्)* अ॒ग्निं परि॑यन्तु क्षि॒प्रं
प्रती॑क्षन्ताँ श्व॒श्र्वो॑ दे॒वरा॑श् च ।

तस्मिन्नुत्तरया *(=खेऽनस)* दक्षिणं युगच्छिद्रं प्रतिष्ठाप्य,

*(तस्मिन्निण्वे दक्षिणं युगच्छिद्रं प्रतिष्ठापयति )*

खे*(=छिन्द्रावकाशे)* ऽनस॒ः*(=शकटस्य)* खे रथ॒ः*(थस्य)* खे युग॑स्य *(अपो निस्सार्य प्रसन्न)* शचीपते ।
अ॒पा॒लाम् इ॑न्द्र॒ त्रिः पू॒त्व्य् अकर॒त् सूर्य॑वर्चसम् ।*(र५)*

(अत्रेतिहासमाचक्षते - अपाला नाम काचित् कन्या श्वित्रिणी *(=श्वेतकुष्टवती)* । तां न कश्चिदुपयेमे । तस्याश्च मनसि कामः सदा बभूव, कथमहं इन्द्रं यजे इति । सा कदाचित् स्नानार्थं नद्याम् अवतीर्णा स्रोतसा ह्रियमाणा, तम् एव कामं मनसि दधाना, स्रोतसा ऽपनीतं सोमम् अपश्यत् । तं दन्तैः पिष्ट्वा तद्रसं इन्द्राय उपाहरत् । तम् इन्द्रः पीत्वा रथस्यानसो*(=शकटस्य)* युगस्येति त्रयाणां छिद्रेषु अपो निस्सार्य, ताभिः तां त्रिः पूर्वा सूर्यवर्चसम् अकरोत् । तदेतत् “कन्या वारवायती” (ऋग्वेदे) इत्यस्मिन् वर्गे द्रष्टव्यम् । रथ इति षष्ठ्यर्थे प्रथमा । रथादीनां खेषु छिद्रेषु, अपो निस्सार्य त्रिः पूर्वी । छान्दसो रेफोपजनः । पूत्वा शोधयित्वा हे शचीपते हे इन्द्र । त्वं अपालां नाम कन्यां सूर्यवर्चसं अकरत् अकरोः । पुरुषव्यत्ययश्छान्दसः । तथैव एनामपि कुर्वित्यर्थः ॥ )

छिद्रे सुवर्णमुत्तरया *(=शं ते हिरण्यम्)* ऽन्तर्धाय,

*(युगच्छिद्रे सुवर्णनिधानम् - )*
शन् ते॒ *(छिद्रे निधीयमानं)* हिर॑ण्यँ॒ शम् उ॑ सु॒न्त्व् आपु॒श्
शन् तें मे॒धी*(=खलेवाली, खले धान्यपेषणस्थाने वाल्यन्ते वृषा इति - अत्र युगः)* भ॑वतु॒, शयँ॒ यु॒गस्य॒ तृद्म॑*(=छिद्रम्)* ।
शन् त॒ आप॑श् श॒त-प॑वित्रा भव॒न्त्व्
अथा॒ पत्या॑ त॒न्वँ॑ सँसृ॑जस्व ।। (1)

**स्नानम्⑥**

उत्तराभिः पञ्चभिस् *(=हिरण्यवर्णा)* स्नापयित्वा,

हिर॑ण्य-वर्णा॒श् शुच॑यः पाव॒काः
प्रच॑क्रमुर् हि॒त्वा ऽव॒द्यम् आप॑ः ।
श॒तं प॒वित्रा॒ वित॑ता॒ ह्य् आ॑सु॒ *(अप्सु)*
ताभि॑ष् ट्वा दे॒वस् स॑वि॒ता पु॑नातु ।*(२५)*

हिर॑ण्य-वर्णा॒श् शुच॑यः पाव॒का
यासु॑ जा॒तः क॒श्यपो॒ यास्व् अ॒ग्निः ।
या अ॒ग्निं गर्भँ॑ दधि॒रे सु॒वर्णा॒स्
तास् त॒ आप॒श् शँ स्यो॒ना *(=सुखा)* भ॑वन्तु ।*(५)*

यासाँ॒ राजा॒ वरु॑णो॒ **याति॒** मद्ध्ये॑
सत्यानृ॒ते **अ॑व॒पश्य॒ञ्** जना॑नाम् ।
या अ॒ग्निं गर्भँ॑ **दधि॒रे** सु॒वर्णा॒स्
तास् त॒ आप॒श् शँ स्यो॒ना **भ॑वन्तु** ।*(५)*

यासां॑ दे॒वा दि॒वि कृ॒ण्वन्ति॑ भ॒क्षं या अ॒न्तरि॑क्षे बहु॒धा भ॑वन्ति।
या अ॒ग्निं गर्भँ॑ दधि॒रे सु॒वर्णा॒स्ता न॒ आप॒ः शं स्यो॒ना भ॑वन्तु ॥

शि॒वेन॑ *(यजमान!)* त्वा॒ चक्षु॑षा पश्यन्त्व् *(हे)* आपश्!
शि॒वया॑ त॒न्वा+उ॒प॒स्पृ॒श॒न्तु॒ त्वच॑न् ते ।
घृ॒त॒श्-चु॒त॒श् *(=दुहन्त्यः)* शुच॑यो॒ याः पा॑व॒कास्
तास् त॒ आप॒श् शँ स्यो॒ना भ॑वन्तु ।*(५)*

▼ विश्वास-टिप्पनी

अथर्ववेदे - "शि॒वेन॑। मा॒। चक्षु॑षा। प॒श्य॒त॒। आ॒प॒ः। शि॒वया॑। त॒न्वा। उप॑। स्पृ॒श॒त॒। त्वच॑म्। मे॒। " त्वत्कारप्रयोगम् अत्र घटयितुं तर्हि कठिनम् एव। My guess is that some ancient ritualist copied over the AtharvaNa mantra and modified it without fixing the svara appropriately, leaving later commentators to either ignore the svara-error or multi-sambodhana error.

## अहतस्य वाससः परिधानम्⑥

उत्तरया *(=परि त्वा गिर्वणो गिरः)* ऽहतेन वाससाच्छाद्य,

प॑रि त्वा गिर्-वणो *(=सम्भक्तः)*
गि॑र इमा॑ भवन्तु विश्व॑तः ।
वृद्धा॑युम् *(=वृद्धगम्)* अ॑नु वृ॑द्धयो,
*(त्वया)* जु॑ष्टा भवन्तु जु॑ष्टयः ।*(२४)*

## योक्त्रबन्धनम्⑤

उत्तरया *(=आशासाना सौमनसम्)* योक्त्रेण सन्नह्यति ८

आ॒शासा॑ना सौमन॒सं
प्र॒जां सौभा॑ग्यं तनूम्।
अ॒ग्नेर् अनु॑व्रता भू॒त्वा *(तिष्ठति/ तिष्ठामि)*,
*(तां)* सं न॑ह्ये सुकृ॒ताय॒ कम् *(=सुखम् [यथा])*।

▼

⑤

>

▼ Oldenberg

8. 1 With the next Yajus (M. I, 1, 8) he places a round piece of Darbha net-work on her head; on that, with the next (verse; M. I, 1, 9) he places a right yoke-hole; on this hole he lays with the next (verse; M. I, 1, 10), a piece of gold, and washes her with the next five verses (M. I, 2, 1-5), (so that the water runs over that gold and through the yoke-hole); with the next (verse; M. I, 2, 6) he causes her to dress in a fresh garment, and with the next (M. I, 2, 7) he girds her with a rope.

▼ हरदत्तः

ततस्तैरप्स्वाहृतासु **तस्या** वध्वाश्शिरसि **दर्भेण्वं** दर्भैः परिकल्पितं मण्डलं **उत्तरेण यजुषा** "अर्यम्णो अग्निम्" इत्यनेन **निधाय तस्मिन्नि**ण्वे उत्तरया "खेऽनस" इत्यनया दक्षिणं युगच्छिद्रं दक्षिणस्या युगधुरो बाह्यच्छिद्रं **प्रति**ष्ठाप्य तस्मिन् **छिद्रे सुवर्णमुत्तरय**र्चा "शं ते हिरण्यम्" इत्येतया **अन्तर्धाय** ताभिरद्भिस्ताम् **उत्तराभिः पञ्चभिः** "हिरण्यवर्णा" इत्येताभिः प्रतिमन्त्रं स्नापयति । कथं पुनश्छिद्रस्यान्तर्धानेन स्नापनं संभवति । तथान्तर्धानं कुरुते यथोदकमवस्रवति । ततस्तामुत्तरयर्चा "परि त्वा गिर्वणो गिर" इत्येतयाऽहतेन वाससाऽऽच्छादयति । स्वयमेव मन्त्रमुक्त्वा परिधापयति आच्छाद्याचमय्य उत्तरयर्चा आशासानेत्येतया योक्त्रेण सन्नह्यति । ऊर्ध्वज्ञुमासीनाम् (आप.श्रौ.२-५-२.) इत्यादिदार्शपौर्णमासिको विशेष इहेष्यते ॥८॥

▼ सुदर्शनः

**दर्भेण्वं**, दर्भैः परिकल्पितमिण्वं निगलाकृतिं परिमण्डलाकारमित्यर्थः । **तदुत्तरेण यजुषा** "अर्यम्णो अग्निं" इत्यनेन **वध्वाश्शिरसि निधाय तस्मिन्** इण्वं **वर** उत्तरया **खेऽनस" इत्येतया **दक्षिणं युगछिद्रं**, युगस्य दक्षिणं छिद्रं दक्षिणस्या धुरो बाह्यछिद्रं **प्रतिष्ठाप्य, छिद्रे सुवर्णमुत्तरया** "शं ते हिरण्यम्" इत्येतया **अन्तर्धाय, उत्तराभिः** "हिरण्यवर्णाश्शुचयः पावकाः प्रचक्रमुर्हित्वा" इत्यादिभिः **पञ्चभिः** ऋग्भिः स्नापयति । एतच्च पञ्चानामन्ते सकृदेव, "वचनादेकं कर्म बहुमन्त्रम्" (आप.प.१-४७.) इत्युक्तत्वात् । एवं सर्वत्र एवंविधेष्वन्नप्राशनादिषु ॥ केचित्– पञ्चभिरिति वचनात् प्रतिमन्त्रमिति । तन्न ; तिसृभ्यो ऽवशिष्टयोर्विकल्पनिवृत्त्यर्थत्वादस्य । इतरथा क्रियाभ्यावृत्तिवाचकप्रत्ययाश्रुतेः गुणार्थं प्रधानस्नानाभ्यावृत्तिकल्पनापत्तिः, प्रयुक्तिगौरवं च ॥ उत्तरया "परि त्वा गिर्वणो गिरः" इत्येतया । अहतेन अनिवसितेन वाससा परिधाप्य, द्विराचमय्य, उत्तरया "आशासाना सौमनसम्" इत्येतया योक्त्रेण सन्नह्यति । कृत्स्नविधानम् चेदम् । केचित्–ऐष्टिकसन्नहनविधिप्रदर्शनार्थमिति ॥ ८॥
▼

⑤

>

उत्तरेण यजुषा तस्याश्शिरसि दर्भेण्वं निधाय तस्मिन्नुत्तरया दक्षिणं युगच्छिद्रं प्रतिष्ठाप्य छिद्रे सुवर्णमुत्तरयान्तर्धायोत्तराभिः पञ्चभिस्स्नापयित्वोत्तरयाऽहतेन वाससाऽऽच्छाद्योत्तरया योक्त्रेण सन्नह्यति ।

# ०४ ०९ अथैनामुत्तरया दक्षिणे②

अथैनामुत्तरया *(=पूषात्वेत)*दक्षिणे हस्ते गृहीत्वाग्निमभ्यानीयापरेणाग्निमुदगग्रं कटमास्तीर्य तस्मिन्नुपविशत*(ः)*। उत्तरो वरः ॥

पूषा॑ त्वा॑+इतो॑ नयतु ह॑स्त-गृ॑ह्या
ऽश्वि॑नौ त्वा प्र॑वहताँ र॑थेन ।
*(मदीयान्)* गृहा॑न् गच्छ गृह॑पत्नी
य॑था॑ ऽसो*(=स्या)* वशि॑नी त्वं॑ विद॑थम्*(=यज्ञं)* आ॑वदासि*(=आवद)* ।। (2)

▼

⑤

>
▼ Oldenberg

9. Then he takes hold of her with the next (verse; M. I, 2, 8) by her right hand, leads her to the fire, spreads a mat, west of the fire, so that the points of the blades in it are directed towards the north, and on this mat they both sit down, the bridegroom to the north.

▼ हरदत्तः

अथ सन्नहनानन्तरं "यत्र क्वचाग्निम्" इत्यादिकल्पेनाग्निं प्रसाधयति । मथित्वा श्रोत्रियागाराद्वाहृत्य ततो वधूमग्निमभ्यानयति । उत्तरयर्चा "पूषा त्वेत" इत्येतया । आनयनमन्त्रोऽयम् । हस्तग्रहणं तु तूष्णीमेव । उदगग्रवचनं दक्षिणाग्रनिवृत्त्यर्थम् ॥९॥

▼ सुदर्शनः

**अथ**शब्द उक्तार्थः– अर्थकृत्यप्रतिषेधार्थ इति । **एनां** वधूं **दक्षिणे हस्ते गृहीत्वा, उत्तरया** "पूषा त्वेतो नयतु" इत्येतया **अग्निमभ्यानीय** अग्न्यभिमुखमानयति; नयत्विति मन्त्रलिङ्गात् । व्यवहितेऽपि नयने विनियोगात् **अपरेणाग्निम्** अग्नेरदूरेण पश्चाद् **उदगग्रं कटमास्तीर्य, तस्मिन्** कटे युगपद् **उपविशतः,** यथोत्तरो **वरो** दक्षिणा वधूः ॥९॥
▼

⑤

>

अथैनामुत्तरया दक्षिणे हस्ते गृहीत्वाऽग्निमभ्यानीयापरेणाग्निमुदगग्रं कटमास्तीर्य तस्मिन्नुपविशत उत्तरो वरः।

# ०४ १० अग्नेर्②

अग्नेरुपसमाधानाद्याज्यभागान्ते *(उत्थाय)* ऽथैनाम् *(तृतीयस्यानुवाकस्य)* आदितो द्वाभ्याम् *(=सोमः प्रथम)* अभिमन्त्रयेत ॥

सो॑मः प्रथमो॑ विविदे *(लेभे)*
गन्धर्वो॑ विविद उ॑त्तरः ।
तृती॑यो अग्नि॑ष् टे प॑तिस्
तुरी॑यस्ते मनुष्यजाः॑ ।*(र५)*

*(स्त्रीमनस् तादृशम् - आदाव् अन्नं, ततः कामकलाः, ततो हि धर्मः, ततः पतिः।)*

सो॑मो ददद् गन्धर्वा॑य
गन्धर्वो॑ ददद् अग्न॑ये
रयिं॑ च पुत्रां॑श् च अदाद्
अग्नि॑र् म॑ह्यम् अ॑थो इमा॑म्

▼

⑤

>
▼ Oldenberg

10. After the ceremonies have been performed from the putting of wood on the fire down to the Ājyabhāga oblations, he recites over her the first two (verses of the third Anuvāka).

▼ हरदत्तः

अथैवम् उपविश्याग्नेर् उपसमाधानादि कर्म प्रतिपद्यते । अग्निमिध्वा प्रागग्रैर् इत्यादि आज्यभागान्ते कर्मणि कृते अथानन्तरम् उपोत्थाय एनाम् आसीनां वधूं तृतीयस्यानुवाकस्यादितो द्वाभ्यामृग्भ्यां "सोमः प्रथम" इत्येताभ्याम् अभिमन्त्रयेत । "अग्नेर् उपसमाधानादि"-वचनं तन्त्रप्राप्त्यर्थम् । आज्यभागान्त-ग्रहणम् अभिमन्त्रणादेर् उत्तरस्य कर्मणः कालोपदेशार्थम् । अथशब्दोऽवस्थान्तरप्रदर्शनार्थः ।

आज्यभागान्तम् आसीनः कृत्वा अथोत्थायाभिमन्त्रणादि प्रतिपद्यत इति । तथा च बोधायनः–अथास्या उपोत्थाय हृदयदेशम् ( बौ.गृ. १-४-१.) इति । आश्वलायनश्च–तिष्ठन् प्राङ्मुखः प्रत्यङ्मुख्या आसीनाया (आश्व. १-७-३.) इति । एनामित्युच्यते अग्नेरभिमन्त्रणं मा शङ्कीति । उत्तराभ्यामिति वक्तव्ये आदितो द्वाभ्यां इत्युच्यते मन्त्रसमाम्नाये अनुवाकव्यवस्थाप्रदर्शनार्थम् । तेन "शेषं समावेशने जपेद्" इत्यादावनुवाकशेषस्य ग्रहणम् ॥१०॥
▼ सुदर्शनः

अयं तन्त्रोपदेशः क्रमार्थ इत्युक्तमेव । यदि तु लाजहोमास्तन्त्रशून्या आगन्तुकाः, तदा स क्रमतन्त्रविधानार्थः । अथेति पूर्ववत् । केचित्— कल्पान्तरसिद्धोपोत्थानानन्तर्यप्रदर्शनार्थमिति ॥ **एनां** वधूं वरः**आदित** अनुवाकस्य "सोमः प्रथमः" इत्यस्य "सोमः प्रथमः" इति **द्वाभ्यां** ऋग्भ्यामभिमन्त्रयेत ॥१०॥
▼

**⑤**

>

अग्नेर् उपसमाधानाद्य्-आज्यभागान्ते ऽथैनाम् आदितो द्वाभ्याम् अभिमन्त्रयेत ।

# ०४ ११ अथास्यै दक्षिणेन②

अथास्यै *(=अस्याः)* दक्षिणेन नीचा *(=न्यग्भूतेन)* हस्तेन दक्षिणमुत्तानं हस्तं गृह्णीयात्।

▼

**⑤**

>
▼ Oldenberg

11. Then he should take with his right hand, palm down, her right hand which she holds palm up.

▼ हरदत्तः

अथ तथैवावस्थितः **अस्यै** अस्याः तथैवासीनाया दक्षिणमुत्तानं हस्तं गृह्णीयात् । **दक्षिणेन नीचा** न्यक्भूतेन हस्तेन । इदं पाणीग्रहणं नाम कर्म । दक्षिणेनेति न वक्तव्यम् । एकपाणिसाध्येषु कर्मसु दक्षिणस्यैव प्रसिद्धत्वात् । अथाप्रसिद्धः, अन्यत्रानियमः प्राप्नोति । यथात्रैव पुरस्तादुपनयने च । एवं तर्हि नात्र दक्षिणहस्तो विधीयते । किं तर्हि? न्यक्ताविधानार्थमनूद्यते–योऽयं दक्षिणो हस्तः सर्वकर्मसु प्रसिद्धः तेन नीचा पाणिग्रहणमिह कर्तव्यमिति । अस्मादेव चानुवादात् सर्वत्र दक्षिणपाणिरिति सिद्धम् ॥११॥

▼ सुदर्शनः

अनेन नित्यविधिना "सोऽभीवाङ्गुष्ठम्" इत्येतावन्मात्रस्य व्यवहितस्यापि सम्बन्धः । इतरथा स इति न ब्रूयात् । **अस्मै** अस्या वध्वाः ; षष्ठ्यर्थे चतुर्थी । **उत्तानं दक्षिणं हस्तं** वरस्स्वेन **नीचा** न्यग्भृतेन दक्षिणहस्तेन । **अभीवाङ्गुष्ठं** अभिरुपर्यर्थः । इवेत्यवधारकः । उपर्यङ्गुष्ठमेव गृह्णीयात् ॥११॥

▼

**⑤**

>

अथास्यै दक्षिणेन नीचा हस्तेन दक्षिणमुत्तानँ हस्तं गृह्णीयात् ।

# ०४ १२ यदि कामयेत②

यदि कामयेत स्त्रीरेव जनयेयमित्यङ्गुलीरेव गृह्णीयात् ॥

▼

⑤

>

▼ Oldenberg

12. If he wishes that only daughters may be born to him, he should seize only the fingers (without the thumb);

▼ हरदत्त-प्रस्तावः

अथ काम्यं विधिद्वयमाह—

▼ हरदत्तः

अङ्गुलीरेव नाङ्गुष्ठं, नापि पाणितलम् । पूर्वोक्तस्यैवायं कामसंयुक्तो विशेषविधिः । तेनेहापि दक्षिणेन नीचा हस्तेनेत्येवमादयो विशेषा भवन्ति ॥१२॥

▼ सुदर्शनः

अङ्गुलीरेव नाङ्गुष्ठम् । शेषं नित्यवत् ॥१२॥

▼

⑤

>

यदि कामयेत स्त्रीरेव जनयेयमित्यङ्गुलीरेव गृह्णीयात् ।

# ०४ १३ यदि कामयेत②

यदि कामयेत पुंस एव जनयेयमित्यङ्गुष्ठमेव सोऽभीवाङ्गुष्ठमभीव लोमानि *(=यथा वरस्याङ्गुष्ठलोमानि सर्वाण्येवोपरि भवन्ति तथा)* गृह्णाति ॥

▼

⑤

>

▼ Oldenberg

13. If he wishes that only sons may be born to him, the thumb.

▼ हरदत्तः

गृह्णीयादित्यनुवर्तते ॥१३॥ ॥१४॥

▼ सुदर्शनः

**अभीव लोमानि**, यथा वरस्याङ्गुष्ठलोमानि सर्वाण्येवोपरि भवन्ति तथा गृह्णाति । शेषं नित्यवदेव । अतो वध्वङ्गुष्ठमप्युत्तानम् ॥१३॥

▼

⑤

>

यदि कामयेत पुंस एव जनयेयमित्यङ्गुष्ठमेव सोऽभीवाङ्गुष्ठमभीव लोमानि गृह्णाति ।

# ०४ १४ गृभ्णामि त②

गृभ्णामि त इत्येताभिश्चतसृभिः ॥

गृभ्णा᳚ *(ह्णा)*मि ते सुप्रजास्त्वा᳚य ह᳚स्तं
म᳚या प᳚त्या जर᳚दष्टिर् य᳚था᳚ ऽसः ।
भ᳚गो अर्यमा᳚ सविता᳚ पु᳚रन्धिर् *(=बहुप्रज्ञा बहुकर्मा वा)*
म᳚ह्यन् त्वा ऽदुर् गा᳚र्हपत्याय *(=गार्हस्थ्याय)* देवाः । *(र५)*

ते *(भगादयः)* ह॒ पूर्वे॒ जना॑सो॒
यत्र॑ *(गार्हस्थ्ये)* पूर्व॒-वहो॑ *(=पूर्वविवाहकृतः)* हि॒ताः ।
मू॒र्द्ध॒न्वान् *(=प्राधान्यवान् [अग्निः])* यत्र॑ सौभ्र॒वः *(=सुभ्रुवा अदितेः पुत्रः)*
पूर्वो॑ दे॒वेभ्य॒ आऽत॑पत् ।

सर॑स्वति॒ प्रेदम् अ॑व॒
सुभ॑गे॒ वाजि॑नी *(=अन्नक्रिया/स्तुति)*वति ।
तां त्वा॒ विश्व॑स्य
भू॒तस्य॑ प्र॒-गाया॑मस्य् *("इदन्तो मसि")* अग्र॒तः ।

य एति॑ प्र॒दिश॒स् सर्वा॒
दिशोऽनु॒ पव॑मानः ।
हिर॑ण्यहस्त ऐर॒म्मस् *(=अग्निः)*
*(इरा अन्नं तां मिमीते करोतीतीरंमः अग्निः)*
स त्वा॒ मन्म॑नसं *(!)* कृणोतु ।

▼

⑤

>
▼ Oldenberg

(14. He takes (her hand) so as just to touch her thumb and the little hairs (on her hand),)
15. With the four verses, 'I take thy hand' (Mantrap. I, 3, 3-6).

▼ हरदत्त-प्रस्तावः

पूर्वोक्तस्य नित्यस्य काम्ययोश्च मन्त्रानाह–

▼ हरदत्तः

यः माणिग्रहणे कामं नेच्छति स पाणिमभीवाङ्गुष्ठमभीव लोमानि गृह्णीयादित्येव । अभिशब्द उपरिभावे । इव शब्दः ईषदर्थे । यथा लोमानि हस्तजातानि इषदभिस्पृष्टानि भवन्ति । **अङ्गुष्ठञ्च** तथा गृह्णीयादित्यर्थः । "लोमान्ते हस्तं साङ्गुष्ठमुभयकाम" (आश्व. गृ.१-७-५) इत्याश्वलायनः ॥ १५॥

▼ सुदर्शनः

गृह्णातीति सम्बन्धः । सर्वासामन्त एव ॥१४॥
▼

⑤

>

गृभ्णामि त इत्येताभिश्चतसृभिः ।

# ०४ १५ अथैनामुत्तेरणाग्निन् दक्षिणेन②

अथैनामुत्तेरणाग्निं - दक्षिणेन पदा प्राचीमुदीचीं वा दिशमभि प्रक्रमयत्य् "एकमिष" इति ॥

एक॑म् - इ॒षे*(=अन्नाय)* विष्णु॒स्त्वाऽन्वे॑तु ।*(५)*
द्वे - ऊ॒र्जे*(=बलाय)* विष्णु॒स्त्वाऽन्वे॑तु ।
त्रीणि॑ - व्र॒ताय॒ विष्णु॒स्त्वाऽन्वे॑तु ।
च॒त्वारि॒ - मायो॑*(=सुख)*भवाय॒ विष्णु॒स्त्वाऽन्वे॑तु ।
पञ्च॑ - प॒शुभ्यो॒ विष्णु॒स्त्वाऽन्वे॑तु ।
षड् - रा॒यस्पोषा॑य॒ विष्णु॒स्त्वाऽन्वे॑तु ।
स॒प्त - *(यज्ञेषु)* स॒प्तभ्यो॒ होत्रा॑भ्यो॒ विष्णु॒स्त्वाऽन्वे॑तु ।

*(होता प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाच्छावाक आग्नीध्र इत्येतास्सप्त होत्राः)*
सखा॑यस् स॒प्तप॑दा अभूम ।
स॒ख्यन्ते॑ गमेयम् ।

▼

⑤

>
▼ Oldenberg

16. He then makes her step forward with her right foot, to the north of the fire, in an easterly or northerly direction, with (the formula), 'One step for sap' (M. I, 3, 7).

▼ हरदत्तः

अथेदानीमेनां वधूमुत्त्थाप्योत्तरेणाग्निं यो देशस्तस्मात् प्रक्रम्य प्राचीं वा दिशमभि उदीचीं वा दक्षिणेन पदा सप्त पदानि प्रक्रामयति एकमिष इत्येतैर्मन्त्रैः । प्राग्गतान्युदग्गतानि वा पदानि निधापयतीत्यर्थः । अत्र स्वयमेव पादं गृहीत्वा मन्त्रांश्चोक्त्वा निधापयति । संभाराक्रमणवत् । दक्षिणेन पदेति मन्त्राणां दक्षिणसम्बन्धार्थं पूर्वप्रवृत्त्यर्थं च, तस्मात्तूष्णीमितरस्य पश्चादनुप्रवृत्तिः । इह सोमाय जनिविदे स्वाहेत्येतैः प्रतिमन्त्रमित्यत्र एतैः प्रतिमन्त्रमिति न वक्तव्यम् । यथाचैतत्तथा तत्रैव वक्ष्यामः । तस्मात्तयोरिहापकर्षेण संबन्धः । एकमिष इत्येतैः प्रतिमन्त्रमिति । इतरथा प्रतिपदं मन्त्रसम्बन्धो न सिध्यति । पदानाञ्च सप्तसंख्यानियमो "यथोत्तराभिस्तिसृभिः प्रदक्षिणम्" इत्यत्र तिसृणामन्ते परिक्रमणारम्भः तद्वदिहापि स्यात् । "विष्णुस्त्वा न्वेत्वि"ति सर्वत्रानुषजन् जपति प्रथमोत्तमयोः पठितत्वात् ॥ १६ ॥

▼ सुदर्शनः

अथाग्नेरदूरेणोत्तरत आरभ्यैनां **दक्षिणेन पदा** पादेन **प्राचीमुदीचीं वा दिशमभि** प्रागायतान्युदगायतानि वा सप्त पदानि प्रक्रमयति; "एकमिषे" इत्यादिभिस्सप्तभिः "विष्णुस्त्वान्वेतु" इत्यनुषक्तैः प्रतिमन्त्रम् ॥१५॥

▼

⑤

>

अथैनामुत्तेरणाग्निं दक्षिणेन पदा प्राचीमुदीचीं वा दिशमभि प्रक्रमय"त्येकमिष" इति ।

# ०४ १६ सखेति सप्तमे②

सखेति सप्तमे पदे जपति ॥

सखा॑ *(हे)* स॒प्तप॑दा भव॒।
सखा॑यौ स॒प्तप॑दा बभूव*(=बभूविव)*।
स॒ख्यन्ते॑ गमेयँ।
स॒ख्यात् ते॒ मा योँ॑षँ*(=पृथक्‌कृतो मा भूवं)*।
स॒ख्यान् मे॒ मा योँ॑ष्ठा॒स्,
सम॑याव॒, सङ्क॑ल्पावहै॒, सं प्रि॑यौ रोचि॒ष्णू॒*(=दीप्यमानौ)* सु॑मन॒स्यमा॑नौ*(=सुमनायमानौ)* ।
इष॒म् ऊर्ज॑म् अ॒भि सं॒वसा॑नौ॒
सन्नौ॒ मनाँ॑सि॒ सं व्र॒ता समु॑ चि॒त्तान्याक॑रम् ।

सा *(ऋक्)* त्वम् अ॒स्य् अमू॒*(=साम)* ऽहम्, अमू॒हम् अ॑स्मि॒। *(५)*

*(सैव नाम ऋगासीदमो नाम साम इति बह्वृचब्राह्मणदर्शनात् । बह्वृचानां तु अमोहम् इति एव पाठः ।)*
सा त्वं द्यौर् अ॒हं पृ॑थि॒वी।
त्वँ रेतो॒ ऽहँ रे॑तो॒भृत्।
त्वं मनो॒ ऽहम॑स्मि॒ वाक्।
त्वँ सामा॒हम॒स्म्यृ॑क्।

त्व॒ँ सा माम् अनु॑व्रता भव।
पु॒ँसे पु॒त्राय॒ वेत्त॑वै*(=लाभाय)*,
श्रि॒यै पु॒त्राय॒ वेत्त॑वा॒,
एहि॑ सूनृते*(=प्रियवाग्वति)* ।। (3)

▼

⑤

>
▼ Oldenberg

17. At her seventh step he murmurs, 'Be a friend' (M. I, 3, 14).

▼ हरदत्तः

उक्तं सप्तपदानि प्रतिमन्त्रं प्रक्रमयतीति । तत्र सप्तमे पदे निहिते पादमुपसंगृह्यैव "सखासप्तपदे"त्यारभ्य जपति होममन्त्रेभ्यः प्राक् ये मन्त्राः तानित्यर्थः । तत्र कल्पान्तरे दृश्यते "सप्तमं पदमुपसंगृह्येति ॥१७॥ प्राग्घोमादित्युच्यते जपपरिमाणार्थम् ॥१॥

▼ सुदर्शनः

स वरस् **सप्तमे पदे** निहिते "सखा सप्तदा" इत्यादि "सूनृते" इत्यन्तं जपति, चातुस्स्वर्येणैव ॥१६॥

इति श्रीसुदर्शनाचार्यकृते गृह्यतात्पर्यदर्शने चतुर्थः खण्डः।

▼

⑤

>

सखेति सप्तमे पदे जपति।

# ०५ ०१ प्राग्घोमात् प्रदक्षिणमग्निम्②

प्राग्घोमात् प्रदक्षिणमग्निं कृत्वा, यथास्थानम् उपविश्यान्वारब्धायाम् उत्तरा *(१६)* आहुतीर् जुहोति - "सोमाय जनिविदे स्वाहे"त्येतैः प्रतिमन्त्रम् ॥

## षोडश प्रधानाहुतिमन्त्राः⑤

### मन्त्रः⑥

सोमा॑य जनि॒*(=जाया)*वि॒दे॒ स्वाहा॑ ।
ग॒न्ध॒र्वाय॑ जनि॒वि॒दे॒ स्वाहा॑ ।
अ॒ग्नये॑ जनि॒वि॒दे॒ स्वाहा॑ ।

क॒न्य॒ला*(=कन्यैव, लशब्द उपजनः)* पि॒तृभ्यो॑ य॒ती*(=गच्छन्ती)* प॑तिलो॒कम्
अव॑*(उपसर्गः) (कन्या)*दी॒क्षाम् अ॑दास्थ॒*(=अवक्षपितवती त्यक्तवती)* स्वाहा॑ ।
*(दीङ् क्षये। तकारस्य थकारः छान्दसः)*

प्रेतो मु॒ञ्चाति॒, नाऽमुत॑स्*(=पतिलोकात्)*
सुब॒द्धाम् अ॒मुत॑स् करत्*(=कुरु)* ।
यथे॒यम् इ॑न्द्र मीढ्वस्*(=वर्षक इन्द्र)*
सुपु॒त्रा सु॒भगा ऽस॑ति*(=स्यात्)* ।*(र५)*

इ॒मान् त्वम् इ॑न्द्र मीढ्वस्*(=वर्षक इन्द्र)*
सुपु॒त्राँ सु॒भगा॑ कुरु ।
दशा॑ऽस्यां पु॒त्रान् आ धे॑हि॒
पति॑म् एकाद॒शं कृ॑धि ।*(५)*

अ॒ग्निर् ऐ॑तु प्रथ॒मो दे॒वता॑नाँ॒
सो॑ऽस्यै प्र॒जां मु॑ञ्चतु मृत्युपा॒शात् ।
तद॒यँ राजा॒ वरु॒णो ऽनु॑मन्यतां॒
यथे॒यँ स्त्री पौत्र॑म् अ॒घन्*(=पापजं व्यसनम्)* न रोदा॑त् ।*(र५)*

इ॒माम् अ॒ग्निस् त्रा॑यतां॒ गार्ह॑पत्यः
प्र॒जाम् अ॑स्यै नयतु दी॒र्घम् आयुः॑ ।
अशू॑न्योपस्था॒*(!)*, जीव॑ताम् अस्तु मा॒ता
पौत्र॑मान॒न्दम् अ॒भि प्रबु॑द्ध्यताम् इ॒यम् ।*(५)*

मा ते॑ गृहे नि॒शि *(रोदन)*घोष॒ उत्था॑द्
अ॒न्यत्र॒ त्वद्*(=त्वत्तः)* रु॑द॒त्य॑स् सव॒ँ वि॑शन्तु ।
मा त्वं वि॑के॒श्य् उर॒ आवधि॑ष्ठा*(=आताडयेः)* जी॒वप॑त्नी
पतिलो॒के विरा॑ज॒ पश्य॑न्ती प्र॒जाँ सु॑मन॒स्यमा॑नाम् ।*(५)*

द्यौस्ते॑ पृ॒ष्ठँ र॑क्षतु
वा॒युर् ऊ॒रू
अ॒श्विनौ॑ च॒ स्तन॒न्
*(स्तनं)* धय॑न्तँ॒*(=चूसन्तम्)* सवि॒ताऽभि र॑क्षतु ।*(५)*
आ वास॑सः परि॒धाना॒द् *(परि॑ त्वा गिर्-वणो॒ इत्यादिना)* बृह॒स्पति॒र्,
विश्वे॑ दे॒वा अ॒भिर॑क्षन्तु प॒श्चात् ।

अ॒प्र॒ज॒स्तां पौ॑त्र मृ॒त्युं
पा॒प्मान॑म् उ॒त वा॒ ऽघम् ।
शी॒र्ष्णस् स्र॒ज॑म् इवो॒न्मुच्य॑
द्वि॒षद्भ्यः॒ प्रति॑मुञ्चामि॒ पाश॑म् । *(५)*

इमं॑ मे वरुण श्रुधी *(=श्रुणु)*
ह॑वम् *(=आह्वानम्)* अद्या॑ च मृळय *(=सुखय)*।
त्वा॑म् अवस्यु॑र् आ॑ चके *(=अवदन्)*॥

त॑त् त्वा **यामि** ब्र॑ह्मणा **व॑न्दमानस्**
त॑द् **आ॑ शास्ते** य॑जमानो हवि॑र्भिः ।
अ॑हेळमानो *(=अक्रुध्यन्)* वरुणेह॑ **बोध्य्** उ॑रुशंस
मा॑ न आ॑युः **प्र॑ मोषीः** ॥

## १४ त्वन्नो अग्ने⑥

त्व॑न् नो अग्ने व॑रुणस्य विद्वा॑न्
देव॑स्य हे॑डो॑ *(=क्रोधो )* ऽव यासिसीष्ठाः *(=यक्षीष्ठाः)* ।
य॑जिष्ठो *(हविर्)*व॑ह्नितमश् शो॑शुचानो *(=देदीप्यमानः)*
वि॑श्वा द्वे॑षाँसि प्र॑ मुमुग्ध्य् अस्म॑त् ।

*(अग्नीवरुणाभ्याम् इदं न मम)*

स॑ त्व॑न् नो अग्ने ऽवमो॑ *(=मूलभूतो)* **भव**+ऊती॑ *(त्या)*
*("अग्निरवमो देवतानां विष्णुः परमः" इति ब्राह्मणम्)*
ने॑दिष्ठो *(=अन्तिकतमो)* अस्या॑ उष॑सो व्यु॑ष्टौ *(=व्युष्टायाम्)* ।
**अ॑व यक्ष्व** नो व॑रुणँ, **र॑राणो**
**वीहि॑** *(=खाद)* मृडीकँ॑ *(=सुखयितारं [हविः])* सुह॑वो न **एधि** ।

*(अग्नीवरुणाभ्याम् इदं न मम)*

त्वम् अ॑ग्ने अ॒या *(=एतव्यः/ प्रत्येता)* **ऽस्य्**
अ॒या **सन्** मन॑सा **हि॒तः** ।
अ॒या **सन्** ह॒व्यम् **ऊ॑हिषे॒**
ऽया नो॑ **धेहि** भेष॒जम् ॥ (4)

▼

## ⑤

>
▼ Oldenberg

1. Having before the sacrifice gone round the fire, so that their right sides are turned towards it,
2. 2 They sit down in their former position, and while she takes hold of him, he offers the oblations (indicated by the) next (Mantras), with (the Mantras), 'To Soma, the acquirer of a wife, Svāhā!' (M. I, 4, I-16), one oblation with each Mantra.

▼ हरदत्तः

समाप्य जपमथाग्निं प्रदक्षिणं करोति तया सह प्रदक्षिणं परिक्रामतीत्यर्थः । सर्वत्र दक्षिणे हस्ते गृहीत्वा परिक्रमणम् । ततो यथास्थानमुपविशतः । यस्य यत् स्थानमुपदिष्टं "उत्तरो वर" इति तस्मिन्नित्यर्थः । **उपविश्य** वध्वाम् **अन्वारब्धायां**अन्वरब्धवत्यां **उत्तराष्** षोडश प्रधानाहुतीर्जुहोति । सोमाय जनिविदेस्वाहेत्येतैः प्रतिमन्त्रम् । दर्वीहोमत्वादेवोपवेशने सिद्धे उपविश्येत्युच्यते नियमार्थं–उत्तरा एव षोडशोपविश्यजुहोति, अन्याः स्थित्वैवेति । तेन लाजास्तिष्ठता होतव्याः । तथा च कल्पान्तरेषु बहुषु दृश्यते– बोधायनानां बह्वृचानां छन्दोगानां वाजसनेयिनामाथर्वणिकानाञ्च । उपहोमेषु तु यथाप्राप्तमासनमेव भवति । एतच्च वक्ष्यामः । अन्ये त्वासीनयोरेव होममिच्छन्ति । "सोमाय जनिविद" इति मन्त्रनिर्देशो होममन्त्राणामादिप्रत्ययनार्थः तेन प्रागेव तस्मात् जपमन्त्राः । तदुक्तं पुरस्तात् प्राग्घोमादिति । उत्तरा आहुतीरित्येव प्रतिमन्त्रं होमस्सिद्धः यथान्येषु होमेषु । एतैः प्रतिमन्त्रमित्येतत्तु पुरस्तादपकृष्यत इत्युक्तम् । तत्रादितश्चत्वारो मन्त्राः स्वाहाकारान्ताः पठिताः । ततो द्वादशर्चः, तास्वन्ते स्वाहाकारः जुहोतिचोदनः स्वाहाकारप्रदानः इति ॥२॥

▼ सुदर्शनः

सखेति जपित्वा, **प्राग्घोमात्** होमात्प्राक् अग्निप्रदक्षिणमेव वध्वा सह कुर्यान्नान्यदर्थकृत्यमावश्यकमपि ; "प्राग्घोमाद्" इत्यधिकग्रहणात् । ततो **यथास्थानं** "उत्तरो वरः इत्युक्तस्थानानतिक्रमेण, न त्वनियमेन, **उपविश्य** वध्वा**मन्वारब्धायामुत्तराः** उत्तरमन्त्रकरणिका **आहुतीर्**होमान् जुहोति । के पुनस्त उत्तरे मन्त्राः? कथं च जुहोति ? इत्यत आह–"सोमाय जनिविदे" इत्यादयष्षोडश मन्त्राः । तेषामदितश्चत्वारि यजूंषि, "प्रेतो मुञ्चाति" इत्यादयो द्वादशर्चः । एतैः प्रतिमन्त्रं प्रतिस्वाहाकारं जुहोति, न पुनः "यज्ञँ स्वाहा वाचि स्वाहा वातेधास्स्वाहा" (तै. सं.१-१-१३.) इतिवत्" अवदीक्षमदास्थ स्वाहा" (एका.१-४-४.) इत्येतेनैव स्वाहाकारेण होमः । पूर्वेषामहोमार्थता च । जुहोतिशब्दार्थश्च तद्धितेन चतुर्थ्या मन्त्रलिङ्गादिना वा प्रतिपन्नाश्चोदिता देवताश्चोदितेनैव चतुर्थ्यन्तशब्देनोद्दिश्य यजमानेन त्यक्तस्य हविषश्चोदिताधारे प्रक्षेपः । इह च मन्त्रलिङ्गात् सोमादयो देवताः । ताश्च न जनिवित्त्वादिविशेषणविशिष्टाः । होमविध्यनुपपत्त्या हि मन्त्रप्रतिपन्नानां देवतात्वं कल्प्यम्, सा च देवतामात्रकल्पनयो शाम्यति । न पुनर्निर्बीजां गुर्वीं विशिष्टकल्पनां प्रयुक्तिगौरवापादिकामयुक्तामपेक्षते । न च ग्राहकमन्त्राम्नानयोरनुपपत्त्या विशिष्टानां देवतात्वकल्पना । विशेषणानां "मूर्धा दिवः ककुत्" इत्यादिवत् स्तुत्या देवताधिष्ठानान्वयेऽपि तयोश्चरितार्थत्वात् । हविश्चाज्यम् "जुहोतीति चोद्यमाने सर्पिराज्यं प्रतीयात्" (आप.प.१-२५.) इति परिभाषावचनात् । विवादादेरयज्ञत्वेऽपि यज्ञेष्वधिकरिष्यमाणपुरुषदेहयोग्यतापादकत्वेन तत्र यज्ञधर्मा युक्ता एव । अन्यथा आधानपवमानेष्ट्यादिष्वयज्ञेषु "यज्ञोपवीती प्रदक्षिणम्" (आप.प.२-१५.) इत्यादयो न प्राप्नुयुः । होमाधारस्तूपसमाहितोऽग्निस्स्थित एव ॥१॥

▼

**⑤**

>

प्राग्घोमात् प्रदक्षिणमग्निं कृत्वा यथास्थानमुपविश्यान्वारब्धायामुत्तरा आहुतीर्जुहोति "सोमाय जनिविदे स्वाहे"त्येतैः प्रतिमन्त्रम् ।

# ०५ ०२ अथैनामुत्तरेणाग्निन् दक्षिणेन②

अथैनाम् उत्तरेणाग्निं दक्षिणेन पदा ऽश्मानम् आस्थापयत्य् आतिष्ठेति ॥

आतिं॑ष्ठे॒मम् अश्मा॑न॒म्
अश्मे॑व॒ त्वँ स्थि॒रा *(रो पुंसि)* भ॑व ।
अ॒भिति॑ष्ठ पृतन्य॒तस् *(=पृतनाकामान्)*
सह॑स्व पृतना॒यु॒तः *(=पृतनाकामान्)* । *(र५)*

▼

**⑤**

>

▼ Oldenberg

3. 3 He then causes her, to the north of the fire, to tread with her right foot on a stone, with (the verse), 'Tread' (M. I, 5, 1).

▼ हरदत्तः

पदप्रक्रणणं पदास्थापनम् **अश्मा** दृषत्पुत्रः । स च प्रागेव पात्रैस्सह प्रतिष्ठापितो भवति ॥२॥

▼ सुदर्शनः

व्यक्तार्थम् ॥२॥
▼

⑤

>

अथैनामुत्तरेणाग्निं दक्षिणेन पदाऽश्मानमास्थापयत्यातिष्ठेति।

# ०५ ०३ अथास्या अञ्जलावुपस्तीर्य②

अथास्या अञ्जलावुपस्तीर्य, द्विर् लाजानोप्याभिघारयति।

▼

⑤

>
▼ Oldenberg

4. Having 'spread under' Ājya into her joined hands, he pours roasted grain twice (into them), and sprinkles Ājya over it.

▼ हरदत्तः

*(सम्पादकटिप्पनी- सूत्रमिदम् अग्रिमे व्याख्यातम्।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी- सूत्रमिदम् अग्रिमे व्याख्यातम्।)*

▼

⑤

>

अथास्या अञ्जलावुपस्तीर्य द्विर्लाजानोप्याभिघारयति।

# ०५ ०४ तस्यास्सोदर्यो②

तस्यास्सोदर्यो लाजानावपतीत्येके।

▼

⑤

>
▼ Oldenberg

5. Some say that an uterine relation of hers pours the grain (into her hands).

▼ हरदत्तः

अथशब्दः स्थानसम्बन्धार्थः । अथोत्थित एवास्याश्चोत्थिताया एवेति । तेनावदानप्रभृत्युत्थानमेव भवति । तत्र दार्शपौर्णमासिकोऽवदानकल्पः प्रदर्शितः न कल्पान्तरम् । तदिहापि प्रत्यभिघारणं पञ्चावत्तञ्च पञ्चावत्तिनां भवति । लाजानां च लौकिकः संस्कारः । पात्रैश्च सह सादनप्रोक्षणे भवतः । अञ्जलेस्तु न सादनादि भवतीत्युक्तम् ॥३॥ सोदर्यो लाजानावपतीति वचनात् उपस्तरणाभिघारणे वरस्यैव भवतः । पक्षान्तरे तु तस्यैव सर्वम् ॥४॥

▼ सुदर्शनः

एते अपि सूत्रे व्यक्तार्थे । आचाराल्लाजानां त्रिरावापो जमदग्नीनाम् । लाजहोमाश्चापूर्वाः, "अस्या अञ्जलावुपस्तीर्य" इत्यादि कृत्स्नविधानात् पार्वणातिदेशाभावात् पाकयज्ञधर्माग्निमुखप्रत्यभिघारणस्विष्टकृल्लेपाञ्जनानामप्राप्तिरेव ॥ केचित्–कृत्स्नविधानादेव साधारणतन्त्रस्य प्राप्त्यभावात् लाजकिंशुकहोमेषु तन्त्रमध्यस्थं येन जुहोतीत्याद्यञ्जलिसंस्कारमपि नेच्छन्ति ॥४॥

▼

⑤

>

तस्यास्सोदर्यो लाजानावपतीत्येके।

# ०५ ०५ जुहोतीयन् नारीति②

*(वर एव तस्याः पाणिना)* जुहोति "इयं नारी"ति ॥

इ॒यन् ना॒र्य् उप॑ब्रूते॒
कु॒ल्पा॑न्य् *(=लाजान्)* आवपन्ति॒का *(=आवपन्ती)* ।
दी॒र्घा॒युर् अ॑स्तु मे॒ पति॒र्
जीवा॑तु *(=जीव्यात्)* श॒रदः॑श॒तम् । *(र५)*

▼

⑤

>

▼ Oldenberg

6. 4 He (?) sacrifices (that grain) with (the verse), 'This wife' (M. I, 5, 2).

▼ हरदत्तः

वरस्यैव जुहोतिक्रिया । पात्रस्थानीयो वध्वञ्जलिः ॥५॥

▼ सुदर्शनः

वर एव "इयं नारी" इत्यनया ऋचाऽभिन्नेन वध्वञ्जलिना देवतीर्थेन लाजान् जुहोति । न पार्श्वेन; उपदेशातिदेशयोरभावात् । केचित्–"प्रदक्षिणमग्निं कृत्वा यथास्थानमुपविश्य" इत्येष विधिरुत्तरतो वरोऽभ्यन्तरतो वधूरित्येवंरूपयथास्थाननियमार्थो न युज्यते । कुतः? यतो विवाहे वधूप्राधान्येन तस्या अभ्यन्तरीभावो न्यायसिद्धः । वधूप्राधान्यं च स्त्रीणां अपुनर्विवाहादेव वेदितव्यमिति । एतच्च "तस्मिन्नुपविशत उत्तरो वरः" (आप. गृ. ४-९.) इत्यत्र सूत्रे व्याख्यातम् । अतो यथास्थानानुवादेन परिभाषासिद्धोपवेशननियमार्थ एवायं विधिः । उत्तराष्षोडशैवाहुतीरुपविश्य जुहोति, न लाजहोमानपि । ते त्वस्मादेव नियमात् बहुतरगृह्यान्तरानुरोधाच्च अविगीतास्मदीयाचारमुल्लङ्घ्यापि तिष्ठतैव होतव्या इति । तन्न ; यत औपासनोत्पादनद्वारा देहसंस्कारोत्पादनद्वारा च जायापत्युभयसाध्ययज्ञोपकारके विवाहे तयोस्सममेव स्वामित्वलक्षणं प्राधान्यम् । अपि च चोदितसर्वकर्मसु पतिप्रयोगे यस्त्वया धर्मः कर्तव्यस्सोऽनया वध्वा सहेति पत्न्यास्सहत्ववचनात् प्रत्युत अप्राधान्यमेव स्त्रीणाम् । अपुनर्विवाहस्त्वासामप्राधान्येऽपि "तस्मान्नैका द्वौ पती विन्दते" (तै. स. ६-६-४.) इति निषेधबलादेवोपपद्यते । तस्मात् न्यायतोऽभ्यन्तरीभावस्यानियमे विपर्यये वा प्राप्ते, उपवेशनानुवादेन यथास्थानमुत्तर एव वर इत्येतन्नियमार्थ एवायं विधिः। तेन लाजहोमा

अप्यासीनेनैव होतव्याः । तस्य"आसीनो दर्वीहोमान् जुहोति" (आप.प.३-१०.) इति सर्वदर्वीहोमानामविशेषेणास्माकं चोदितत्वात्, स्वसूत्रोक्तविषये बहुतराणामपि गृह्यान्तराणामनुपसंहार्यत्वाच्च ॥५॥

▼

⑤

>

जुहोतीयं नारीति।

# ०५ ०६ उत्तराभिस्तिसृभिः②

उत्तराभिस्तसृभिः *(=तुभ्यमाग्रे पर्यवहन्नित्यादिभिः)* प्रदक्षिणमग्निं कृत्वा ऽऽश्मानमास्थापयति यथा पुरस्तात् ॥ *(यथा पुरस्तात्)*

*(सूर्या नाम सवितुर्दुहिता विवाहस्य अधिष्ठात्री देवता - सूर्यासूक्ते दृश्या।)*

तु॑भ्यम् *(अग्नये)* अ॑ग्रे *(गन्धर्वाः)* प॑र्यवहन्त्
सूर्यां॑ वहतु॑ना सह॑ ।
पु॑नः प॑तिभ्यो जायां॑ दा॑ *(ः)*
अग्ने प्रज॑या सह॑ । *(र५)*

पु॑नः प॑त्नीम् अग्नि॑र् अदाद्
आ॑युषा सह॑ व॑र्चसा ।
दीर्घायु॑र् अस्या यः॑ प॑तिस्
स॑ एतु शर॑दश् शत॑म् ॥ *(र५)*

वि॑श्वा उत॑ त्व॑या वयं॑
धा॑रा उदन्या *(=उदक-सम्बन्धिनीः)* इव ।
अ॑तिगाहेमहि द्वि॑षः । *(५)*

▼

⑤

>

▼ Oldenberg

7. 5 Having gone round the fire, with the right side turned towards it, with the next three (verses; M. I, 5, 3-5) he makes her tread on the stone as above (M. I, 5, 6).

▼ हरदत्तः

**उत्तराभिस्तिसृभिः** तुभ्यमग्रे पर्यवहन्नित्यादिभिः अग्निं प्रदक्षिणं करोति । तां हस्ते गृहीत्वा तिसृणामन्ते परिक्रमणारम्भः "वचनादेकं कर्म बहुमन्त्रम्" इति । उत्तराभिरिति बहुवचनेनैव त्रित्वपरिग्रहसिद्धे तिसृभिरिति वचनं तिसृभिरेकमेव परिक्रमणं यथा स्यात् प्रतिमन्त्रं क्रियाभ्यावृत्तिर्मा भूदिति ॥६॥

▼ सुदर्शनः

उत्तराभिः"तुभ्यमग्रे पर्यवहन्" इत्यादिभिस्तिसृभिः । यथा पुरस्ताता तथा आतिष्ठेममित्यनया ॥६॥

▼

⑤

>

उत्तराभिस्तिसृभिः प्रदक्षिणमग्निं कृत्वाऽश्मानमास्थापयति यथा पुरस्तात्।

# ०५ ०७ होमश्चोत्तरया यथा②

होमश्चोत्तरया *(=अर्यमणं नु देवम्)* ॥

अ॒र्य॒मण॒न् नु*(=क्षिप्रं)* दे॒वं क॒न्या॑*(ः)*
अ॒ग्निम् *(च)* अयक्षत *(पतिलाभाय)*।
स इ॒मां दे॒वो अ॑द्ध्व॒रः*(=अहिंसितः)* प्रेतो मु॒ञ्चाति॒ नाऽमुत॑स्*(=पतिलोकात्)*
सुब॒द्धाम् अ॒मुत॑स् करत्*(=कुरु)* ।*(५)*

▼

⑤

>
▼ Oldenberg

8. And the oblation (is performed) with the next (verse; M. I, 5, 7).

▼ हरदत्तः

यथा पुरस्तादिति वर्तते । उत्तरया "अर्यमणं नु देवम्" इत्येतया ॥७॥

▼ सुदर्शनः

लाजहोमश्चोत्तरया "अर्यमणं नु देवम्" इत्येतया ॥७॥

▼

⑤

>

होमश्चोत्तरया।

# ०५ ०८ पुनः परिक्रमणम्②

पुनः परिक्रमणम् ॥

▼

⑤

>
▼ Oldenberg

9. (Then follow) again the circumambulation (M. I, 5, 8-10),

▼ हरदत्तः

*(सम्पादकटिप्पनी- सूत्रमिदम् अग्रिमे व्याख्यातम्।)*
▼ सुदर्शनः

*(सम्पादकटिप्पनी- सूत्रमिदम् अग्रिमे व्याख्यातम्।)*
▼

⑤

>

पुनः परिक्रमणम्।

# ०५ ०९ आस्थापनम् पुनरपि②

*(अश्मन)* आस्थापनम् ॥

*(सूर्या नाम सवितुर्दुहिता विवाहस्य अधिष्ठात्री देवता - सूर्यासूक्ते दृश्या।)*

तु॑भ्यम् *(अग्नये)* अ॑ग्रे *(गन्धर्वाः)* प॑र्यवहन्त्
सूर्यां॑ वहतु॑ना सह॑ ।
पु॑नः प॑तिभ्यो जायां॑ दा॑*(ः)*
अग्ने प्रज॑या सह॑ ।*(र५)*

पु॑नः प॑त्नीम् अग्नि॑र् अदाद्
आ॑युषा सह॑ व॑र्चसा ।
दीर्घायु॑र् अस्या यः॑ प॑तिस्
स॑ एतु शर॑दश् शत॑म् ॥*(र५)*

वि॑श्वा उत॑ त्व॑या वयं॑
धा॑रा उदन्या*(=उदक-सम्बन्धिनीः)* इव ।
अ॑तिगाहेमहि द्वि॑षः ।*(५)*

▼

⑤

>
▼ Oldenberg

(again) the injunction to tread on the stone (I, 5, 11),

▼ हरदत्तः

पुनरपि परिक्रमणमग्नेः कर्तव्यं आस्थापनञ्चाश्मनः । पुनश्शब्दः क्रियाभ्यावृत्तिद्योतनार्थः । तेनोत्तराभिस्तिसृभिरित्यादिर्भवति ॥९॥

▼ सुदर्शनः

अग्निप्रदक्षिणम् ॥८॥ आत्मनः ॥९॥

▼

⑤

>

आस्थापनम्।

# ०५ १० होमश्चोत्तरया उत्तरया②

होमश्चोत्तरया *(=त्वमर्यमा भवसि)*॥

त्व॑म् अर्यमा॑ भवसि य॑त् कनी॑ *(न्या)*नान्
ना॑म स्वधा॑ *(=अन्न)*वत् स्वर्यं *(ग्र्यं)* बिभ॑र्षि ।
अञ्ज॑न्ति *(=सिञ्चन्ति)* वृक्षँ॑ सु॑धितन् *(=सुष्ठु निहितं)* न॑ गो॑भिर् *(=गोविकारैराज्यादिभिः)*
य॑द्द॑म्पती स॑ *(मान)*मनसा *(सौ)* कृणो॑षि ।

▼

⑤

>
▼ Oldenberg

and (again) the oblation with the next (verse; I, 5, 12);

▼ हरदत्तः

**उत्तरया** "त्वमर्यमा" इत्येतया ऋचा ॥१०॥

▼ सुदर्शनः

"त्वमर्यमा भवसि" इत्येतया ॥१०॥

▼

⑤

>

होमश्चोत्तरया।

# ०५ ११ पुनः परिक्रमणम्②

पुनः परिक्रमणम् ॥

▼

⑤

>
▼ Oldenberg

10. (Then) the circumambulation again (I, 5, 13-15).

▼ हरदत्तः

पुनश्शब्दः पूर्ववत् ॥११॥
▼ सुदर्शनः

"होमश्चोत्तरया" इत्यादिषु पञ्चसु सूत्रेषु "यथा पुरस्तात्" इत्यनुषङ्गः । कार्यः कार्यमिति च यथालिङ्गं वाक्यशेषः ॥११॥
▼

⑤

>

पुनः परिक्रमणम्।

# ०५ १२ जयादि प्रतिपद्यते②

जयादि प्रतिपद्यते ॥

▼

⑤

>
▼ Oldenberg

11. 6 He enters upon the performance of the Jaya and following oblations.

▼ हरदत्तः

पूर्वमग्नेरुपसमाधानादिवचनेन तन्त्रप्राप्तिर्दर्शिता । इदं तु वचनं कोलोपदेशार्थं परिक्रमणादूर्ध्वं जयादयो यथा स्युरिति । इतरथा जयादीनुपजुहोतीति वचनाल्लाजहोमानन्तरमुपहोमः स्यात् ततस्तृतीयं परिक्रमणम् ॥१२॥

▼ सुदर्शनः

एतदुक्ताभिप्रायम्– यत्र वचनं तत्रैव जयादयो, नान्यत्र; अन्वारम्भश्चैषु नास्तीति ॥१२॥

▼

⑤

>

जयादि प्रतिपद्यते।

# ०५ १३ परिषेचनान्तङ्②

*(=प्र त्वा मुञ्चामीति)* योक्त्रं विमुच्य, तां ततः प्र वा वाहयेत् *(=रथादिभिर्नयनं)*, प्र वा हारयेत् *(=मनुष्यवाह्येन शिबिकादिना नयनम्)* ॥

प्र त्वा॑ मुञ्चामि॒ वरु॑णस्य॒ पाशा॒द् *(योक्त्र-विमोकेन)*
येन॒ त्वा ऽब॑ध्नात् सवि॒ता सु॒केतः॑ *(=सुप्रज्ञानो)* ।
धा॒तुश् च॒ योनौ॑ सुकृ॒तस्य॑ लो॒के
*(सुकृतस्य लोको हि धातुर् योनिर् दम्पत्योः कृते।)*
स्यो॒नन् *(=सुखं)* तें स॒ह पत्या॑ करोमि । *(२४)*

इ॒मं विष्या॑मि॒ *(=विस्रंसयामि)* वरु॑णस्य॒ पाशं॒
यम् अब॑द्ध्नीत सवि॒ता सु॒शेवः॑ *(=सुसुखः)* ।
धा॒तुश्च॒ योनौ॑ सुकृ॒तस्य॑ लो॒के
*(सुकृतस्य लोको हि धातुर् योनिर् दम्पत्योः कृते।)*
ऽरिष्टां॑ *(=अविनाशिनीम्)* त्वा स॒ह पत्या॑ करोमि ।

▼

⑤

>
▼ Oldenberg

12. 7 Having performed (the rites) down to the sprinkling (of water) round (the fire), and having untied the rope with the next two verses (I, 5, 16. 17), he should then make her depart (from her father's house in a vehicle), or should have her taken away.

▼ हरदत्तः

परिषेचनान्तग्रहणं तन्त्रशेषोपलक्षणम् । तेन प्रणीताविमोकस्याप्यन्ते योक्त्रविमोकः । जयादि प्रतिपद्यत इत्येव सिद्धे परिषेचान्तग्रहणं तदनन्तरमेव योक्त्रविमोको यथा स्यात् प्रस्थानकाले मा भूदिति । **उत्तराभ्यां** "प्र त्वा मुञ्चामी"त्येताभ्याम्; वचनादेकं कर्म बहुमन्त्रमिति । द्विमन्त्रो विमोकः । तत इति वचनं योक्त्रविमोकस्य प्रस्थानकालनियमो मा भूत् यथोपपद्यते श्वो वा सद्यो वा तदा प्रतिष्ठेतेत्येवमर्थम् । **प्रवाहणं** रथादिभिर्नयनं, **प्रहारणं** मनुष्यवाह्येन शिबिकादिना नयनम् । उभयत्र वाशब्दः उभयोरपि पक्षयोस्तुल्यत्वज्ञापनार्थः । अन्यथा रथानयनस्येह प्रत्यक्षकल्पोपदेशादनुपदिष्टकल्पं मनुष्ययानमाग्निहोत्रिककल्पवत् सूचितं विज्ञायेत । अतः उभयत्र वाशब्दः, तेन मनुष्यनयनेऽप्यारोहतीमुत्तराभिरुत्तरया शंत उत्तराभिरित्येवमादयो मन्त्राः सिद्धा भवन्ति ॥१३॥

▼ सुदर्शनः

**परिषेचनान्तं कृत्वा,** सामर्थ्यात्तन्त्रशेषं समाप्येत्यर्थः । तेन शम्यापोहनप्रणीताविमोकब्राह्मणोद्वासनान्यपि करोति । **उत्तराभ्यां"** "प्र त्वा मुञ्चामि" इति द्वाभ्यां ऋग्भयाम् । योक्त्रं विमुञ्चति । ततः अनन्तरं **तां** वधूं हस्तिनमश्वं वा **प्रवाहयेत्** । शिबिकामान्दोलिकां रथं मनुष्यं वा **प्र वा हारयेत्** । उभयत्र "व्यवाहिताश्च" (पा.सू. १-४-२८.) इति वाशब्दव्यवधानम् । वाशब्दद्वयं तु तुल्याविमौ विधी, नान्यतरोऽनुकल्प इति ज्ञापयितुम् । अत्र "विमुच्ये"ति क्त्वाप्रत्यये सत्यपि "तत" इति यदाह तज्ज्ञापयति, नावश्यं क्त्वाप्रत्यययुक्तं वचनं पूर्वकालतां समानकर्तृकतां वा विदधाति । कदाचित्केवलक्रियाविधानमेव सिद्धवदनुवदति, यथा "वेदं कृत्वाग्नीन् परिस्तीर्य" (आप. श्रौ. ११-२-१५.) इति । अत्र हि न वेदकरणस्य परिस्तरणपूर्वकालता; वेदपरिवासनविधानाग्न्यगारसमूहनायतनोपलेपनानामपि मध्ये कर्तव्यत्वात् । तथात्रापि "परिषेचनान्तं कृत्वोत्तराभ्यां योक्त्रं विमुच्य" इति प्रणीतामोक्षणादेर्मध्ये कर्तव्यत्वात् । तथा दधिघर्मे "एतस्मिन् काले श्रातं हविरिति प्रत्युक्त्वा तमादायाहवनीयं गत्वा" (आप. श्रौ. १३-३-४.) इति । तत्रापि प्रतिप्रस्थाता दधिघर्मसंस्कर्ता, होमकर्ताऽध्वर्युः ततस्समानकर्तृत्वाभावः । तथैवान्यत्राप्यश्वमेधे "दक्षिणापप्लाव्याहं च त्वं च वृत्रहन्निति ब्रह्म यजमानस्य हस्तं गृह्णाति" (आप. श्रौ.) इति । तथैवात्र "स्मृतं च म इत्येतद्वाचयित्वा गुरवे वरं दत्वोदायुषेत्युत्थाप्य" (आप. गृ.११-१७.) इति ॥१३॥

▼

⑤

>

परिषेचनान्तं कृत्वोत्तराभ्यां योक्त्रं विमुच्य तां ततः प्र वा वाहयेत् प्र वा हारयेत्।

# ०५ १४ समोप्यैतमग्निमनुहरन्ति एतम्②

*(उखायाम् = पात्र-विशेषे)* समोप्यैतम् अग्निम् अनु-हरन्ति *(- न पुरस्तात्)* ॥

▼ विश्वास-टिप्पनी

"औपासनस्य च गृह्यान्तरेण प्रयाणे विहितं समारोपणं स्यात्" इति सुदर्शनः। बौधायनो विदधाति समित्-समारोपणम्। गृहे ऽप्रयाणे ऽपि धारणाशक्तौ दृश्यते समारोपणम् आचारे।
"अनेन श्रौतवत् समारोपस्य प्रतिषेध" इति तु हरदत्तः।
▼

⑤

>
▼ Oldenberg

13. Having put that fire (with which the marriage rites have been performed, into a vessel), they carry it behind (the newly-married couple).

▼ हरदत्तः

**एतं** वैवाहिकमग्निम् उखायां **समोप्य**
दम्पत्योर् गच्छतोर् **अनु** पृष्ठतः **हरन्ति** तदीयाः पुरषाः ।
समोप्यवचनं श्रौतेष्व् अग्निषु दृष्टस्य समारोपणस्य प्रतिषेधार्थम् । एवं प्रतिषेधं कुर्वन्न् एतद् दर्शयति–
अनुगतो मन्थ्य इत्य्-अत्र श्रौतवद् अवक्षाणेभ्यो मन्थनमिति । **अनुशब्दः** पुरस्तान् नयनअनुशब्द्-दःप्रतिषेधार्थः ॥१४॥

▼ सुदर्शनः

**एतं** विवाहाग्निं समोप्योखायाम्
**अनुहरन्ति** अव्यवायेन वध्वाः पश्चान् नयन्ति परिकर्मिणः ।
**एतम्** इति ग्रहणं विवाहाग्नेर् औपासनाख्यस्य संस्कार-शब्दाभिव्यङ्ग्यस्य प्रयाणेऽपि नित्यं प्रत्यक्ष-नयनार्थम् । अगृह्यमाणे त्व् एतम् इत्य्-अस्मिन् अ-दृष्टार्थं सर्वार्थस्य लौकिकाग्नेर् अनुहरणं स्यात् । औपासनस्य च गृह्यान्तरेण प्रयाणे विहितं समारोपणं स्यात् ॥१४॥

▼

⑤

>

समोप्यैतमग्निमनुहरन्ति।

# ०५ १५ नित्यः②

नित्यः ।

▼

⑤

>
▼ Oldenberg

14. It should be kept constantly.

▼ हरदत्तः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम्।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम्।)*

▼

⑤

>

नित्यः।

# ०५ १६ धार्यः एष②

धार्यः ॥

▼

⑤

>

▼ Oldenberg

15. If it goes out, (a new fire) should be kindled by attrition,

▼ हरदत्तः

एष वैवाहिकोऽग्निर् **नित्यः** शाश्वतिको **धार्यः** पत्नी-सम्बन्धानां कर्मणाम् अर्थाय ॥१६॥

▼ सुदर्शनः

पाणि-ग्रहणाद् आरभ्य सर्वाचार-लक्षण-कर्मार्थम् अयम् अग्निर् नित्यः, यावज्-जीवं नोत्सृज्यते; "पाणिग्रहणादिर् अग्निस् तम् औपासनम् इत्य् आचक्षते, तस्मिन् गार्ह्याणि कर्माणि" ( हि. गृ.२६-१,२.) इति हिरण्यकेशि-वचनात् ।
अतः साङ्गे विवाहे समाप्तेऽपि "अपवृत्ते कर्मणि लौकिकस् सम्पद्यते" (आप.प. ४-२३) इति न भवति ॥१५॥

नित्य इति सिद्धे **धार्य** इत्यारम्भात् प्रयाणे ऽप्य् अस्य समिध्य् आत्मन्य् अरण्योर् वा समारोपणं गृह्यान्तर-विहितं विकल्पेनापि न स्यात् ।*(5)*
यथा "जुह्वा स्रुवेण वा सर्वप्रायश्चित्तानि जुहोति" (श्रौ.२-११-१.) इत्यत्र "अध्वर्युं कर्तारम्" (आप. प.१-२६.) इति वचनात् अध्वर्युर् एव कर्ता, नतु "जुहोति-जुतीति प्रायश्चित्ते ब्रह्माणम्" (आश्व. श्रौ.१-१-१६.) इत्य् आश्वलायन-सूत्र-विहितो ब्रह्मा विकल्पेनापि ।

एवं च "समोप्यैतम् अग्निम् अनुहरन्ति" (आप. गृ. ५-१३.) इति सर्वस्य धर्मोऽयं , न वैवाहिक-प्रयाणस्यैव । यथा "समोप्यैताव् अग्नी अन्वारोप्य" इत्याग्निक-प्रयाणेऽस्य विहितो धर्मस् सर्वार्थः ।

एवं-विधेषु यद्य् अपि याज्ञिका विकल्पं नेच्छन्ति, तथापि विकल्पो ऽस्तीत्य् अत्र ज्ञापकं भवति ।*(5)*
"सवर्णापूर्व-शास्त्र-विहितायां यथर्तु गच्छतः पुत्रास्, तेषां कर्मभिस् सम्बन्धः" "दायेनाव्यतिक्रमश् चोभयोः" "पूर्ववत्याम् असंस्कृतायां वर्णान्तरे च मैथुने दोषः" (आप.ध.२-१३-१,२,३.) इत्य् असवर्ण-दार-सङ्ग्रहणं प्रतिषिध्य स्वयम् एवाह सूत्रकारः– "स त्रयाणां वर्णानाम्"(आप.प.१-२.) इति । त्रयाणाम् इत्य् एतस्य पदस्यार्थो भाष्यकारेण व्याख्यातः "तिस्रो हि तस्य भार्यास् स्मृत्य्-अन्तर-वचनाद् अप्रतिषिद्धाः, तस्य कथं सह ताभिर् अधिकारस् स्याद् इत्य् एवमर्था त्रिसङ्ख्या" इति । एतत् सूत्र-भाष्याभ्याम् असवर्ण-दार-सङ्ग्रहस् स्मृत्यन्तर-विहितो न सर्वथैव निषिद्ध इति गम्यते । तच् चान्येष्व् अप्य् एवं-विधेषु विकल्पस्य ज्ञापकम् एव ॥१६॥

▼

⑤

>

धार्यः।

# ०५ १७ अनुगतो मन्थ्यः②

अनुगतो मन्थ्यः *(प्राग्दग्धाङ्गारेभ्यः - साक्षाद्, भस्मनारणी-संस्पृश्य वा)* ॥

▼

⑤

>
▼ Oldenberg

16. Or it should be fetched from the house of a Śrotriya.

▼ हरदत्त-प्रस्तावः

अस्यौपासनस्योद्वातस्योत्पत्तिमाह–

▼ हरदत्तः

**अनुगतः** उद्-वातः मन्थ्यः मन्थनेनोत्पाद्यः ।
अस्मिन् पक्षे विवाहे ऽप्य् अस्य योनिर् एषैव ।
धारणं चारण्योर् विवाह-प्रभृति भवति ।

तत्र विवाहे अरणीभ्यां मन्थनम्, अनुगते स्वेभ्य एवावक्षाणेभ्य*(=प्राग्दग्धाङ्गारेभ्यः)* इत्युक्तम् ।*(5)* तदभावे भस्मना अरणी संस्पृश्य मन्थनम् ॥१७॥

▼ सुदर्शनः

यद्य् अयम् अग्निर् **अनुगतः** निर्वाणस् स्यात्, तदा **मन्थ्यः** तेभ्य एवावक्षणेभ्यो*(=प्राग्दग्धाङ्गारेभ्यः)* ऽधिमन्थितव्यः । यदि तानि न स्युर् असमर्थानि वा, तदास्या अरणी संस्पृश्य मन्थितव्यः ॥१७॥

▼

⑤

>

अनुगतो मन्थ्यः।

# ०५ १८ श्रोत्रियागाराद्वाहार्यः②

श्रोत्रियागाराद् वा ऽऽहार्यः *(पचनाग्निः)* ॥

▼

⑤

>
▼ Oldenberg

17. Besides, if (the fire) goes out, one of them, either the wife or the husband, should fast.

▼ हरदत्तः

श्रुत-वृत्ताऽध्ययन-सम्पन्नो ब्राह्मणः **श्रोत्रियः** तस्य गृहे यः पचनाग्निः तस्माद्वाहार्यः । अस्मिन् पक्षे विवाहेऽप्य् अस्य योनिर् एषैव ॥१८॥
▼ सुदर्शनः

अथवाऽऽधीत-वेदस्य गृहाद् **आहार्यः** ।

अयं च व्यवस्थितो विकल्पः ।*(5)* यदि मथितेऽग्नौ विवाहस् तदा मन्थ्यः । यद्याहृतेऽग्नौ तदा ऽऽहार्यः ।

नष्टेऽपहृते वाग्नाव् इयम् एवोत्पत्तिः । **अनुगत** इत्य् अस्य नष्टापहृतयोः प्रदर्शनार्थत्वात् ॥१८॥
▼

**⑤**

>

श्रोत्रियागाराद्वाहार्यः।

# ०५ १९ उपवासश्चान्यतरस्य भार्यायाः②

उपवासश् चान्यतरस्य भार्यायाः पत्युर्वा ॥

▼

**⑤**

>
▼ Oldenberg

18. Or he may sacrifice with the next (verse; M. I, 5, 18), and not fast.

▼ हरदत्त-प्रस्तावः

प्रायश्चित्तमाह–

▼ हरदत्तः

अत्र व्यवहित-कल्पनया पदानां सम्बन्धः । अग्नाव् अनुगते भार्यायाः पत्युश् च उभयोर् **उपवासो** भवति तयोर् **अन्यतरस्य** वेति । च-शब्द उभयोरुपवाससमुच्चयार्थः । भार्यायाः पत्युश्चेति । वाशब्दोऽन्यतरस्य विकल्पार्थः । तयोरन्यतरस्य वेति । **उपवासः** उभयोरपि कालयोरभोजनं, प्रसिद्धेः, अनुगमनानन्तरमेव चाग्निप्रकल्पनं सर्वप्रायश्चित्तहोमश्च । नन्वनुगतो मन्थ्य इति प्रकृतं तत्किमनुगत इति निमित्तनिर्देशेन ? उच्यते– दम्पत्योः प्रस्थानमिह प्रकृतम् । तां ततः प्र वा वाहयेदिति । प्रासङ्गिकस्त्वग्निधर्मः । ततश्चोपवासविधिरपि प्रस्थानशेष एव विज्ञायेत । तथा च "त्रिरात्रमुभयोरधश्शय्या बरह्मचर्यम्" इत्यादीनां प्रासङ्गिकेन संबन्धो न भवति । किन्तु प्राकरणिकेनैव । अनुगते उभयोरुपवासोऽन्यतरस्य वेत्येव सिद्धे भार्यायाः पत्युश्चेति पृथङ्निर्देशः कथमस्याग्नेरत्यन्तं भार्यासंबन्धः प्रतिज्ञापितस्यादिति । अत एव भार्यायाः पूर्वनिर्देशः तेन यस्मिन् कर्मणि भार्यायास्सहत्वं नास्ति यथोपाकरणसमापनयोस्तस्यैतस्मिन्नग्नावप्रवृत्तिः । सपत्नीबाधनादौ च पत्त्युस्सहत्वाभावेऽपि भार्यासबन्धादेवास्मिन्नग्नौ प्रवृत्तिः ॥१९॥

▼ सुदर्शनः

अन्यतरस्य कालस्य, अह्नो वा रात्रेर्वा सम्बन्धी उपवासः अनशनं भार्यायाः पत्युर्वा भवति । चकारोग्न्युत्पत्तिप्रायश्चित्तयोस् समुच्चयार्थः । यद्यहनि रात्रौ वा प्राग्भोजनादनुगतिस्तदा मथित्वाऽऽहृत्य वा "यत्र क्वचे"ति विधिनोपसमाधाय "यद्यविज्ञाता सर्वव्यापद्वा" इति सर्वप्रायश्चित्तं हुत्वा कालशेषमुपवसेत् । यदि भोजनादूर्ध्वं तदा तत्कालशेषमागामिकालं च । सर्वथा तु विज्ञातमात्र एवानुगमने उत्पादनादि कार्यम्, निमित्तानन्तरं नैमित्तिकस्यावश्यकर्तव्यत्वात् ॥ अन्ये तु– भार्यापत्योरुभयोरप्युपवासो न विकल्पः, स्वामित्वाविशेषात्, "पर्वसु चोभयोरुपवासः" (आप. ध.२-१-४.) इति स्मार्ते समुच्चयस्य दृष्टत्वाच्च । वाशब्दस्तु चार्थ इति । तेषामुपवासश्चान्यतरस्येत्येतावदेवालं सूत्रम् । अर्थादेव स्वामिनोरुभयोरप्युपवासो भविष्यति ॥ केचित् "उपवासश्चान्यतरस्य भार्यायाः पत्युर्वानुगते" इति सूत्रं छित्वा व्यवहितान्वयकल्पनया व्याचक्षते– अनुगतेऽग्नौ भार्यायाः पत्युश्चोपवासोऽन्यतरस्य वेति । अत्र प्रकृतेऽपि पुनरनुगत इति ग्रहणमधिकयत्नमन्तरेणैवंविधानां प्रासङ्गिकार्थता न स्यात्, किन्तु परमप्रकृतार्थतैवेति ज्ञापयितुमिति ॥१९॥

▼

⑤

>

उपवासश्चान्यतरस्य भार्यायाः पत्युर्वा।

# ०५ २० अनुगतेऽपि वोत्तरया②

अनुगते ऽपि वोत्तरया *(=अयाश्चाग्ने)* जुहुयान् नोपवसेत् *(- प्रायश्चित्तं त्वत्राप्य् अस्त्य् एव)*॥

अया"श्*(=एतुम् योग्यः, गमनशीलो वा)* चाग्ने" ऽस्य् अनभिशस्ती"श्च*(=अनवद्यः)*
सत्य"म् इ"त् त्व"म्*(←स्वरः शोधितः)* अया" असि ।
अय"सा*(=प्रतिगन्त्रा←स्वरः शोधितः)* म"नसा धृतो"
अय"सा हव्य"म् ऊहिषे*(=वहस्व)*
अया" नो धेहि भेषज"म् ।।*(५)*

▼

⑤

>

▼ Oldenberg

19. The next (verse; M. I, 6, 1) is for putting the chariot (on which the young couple is to depart), in position;

▼ हरदत्तः

उत्तरयर्चा "अयाश्चाग्ने" इत्येतया जुहुयात् आहुतिम् एकाम् ।

इयम् आहुतिस् *(उपवास-)*तन्त्र-वति न भवति ।

परिस्तरणाज्य-संस्कार-दर्वी-संमार्जनानि भवन्ति । अपि वेति वचनादेव वैकल्पिकत्वे सिद्धे उपवासप्रतिषेध इयमाहुतिरुपवासस्यैव प्रत्याम्नाया यथा स्यादिति । तेनेहापि सर्वप्रायश्चित्तहोमस्य समुच्चयो भवति । तदिदं प्रायश्चित्तमप्यपहरणादिनाग्निनाशेऽपि द्रष्टव्यम् । अस्यैवाग्नेर्बुद्धिपूर्वोत्सर्गे द्वादशाहादूर्ध्वं विच्छेदे च स्मृत्यन्तरे प्रायश्चित्तमुक्तम् । तत्राप्यग्निसंकार एतावानेव ॥२०॥

▼ सुदर्शनः

अपि वा अग्नाव् **अनुगते उत्तरया** "अयाश्चाग्ने" इत्येतयाऽऽज्यं जुहुयान् नोपवसेत् । अनुगत इति पुनर्-वचनान् नष्टापहृतयोर् नायं विकल्पः, किन्तूपवास एव । अपि वेत्यनेनैव उपवासपक्षे व्यावृत्ते, नोपवसेद् इत्य् आरम्भाद् उपवास-मात्रेणैवायं विकल्पः - प्रायश्चित्तं त्वत्राप्य् अस्त्य् एव *(5)*॥ २०॥

▼

⑤

>

अनुगतेऽपि वोत्तरया जुहुयान्नोपवसेत्।

# ०५ २१ उत्तरा रथस्योत्तम्भनी②

उत्तरा *(=सत्येनोत्तभितेत्येषा )* रथस्योत्तम्भनी ॥

सत्ये॑नो॑त्तभिता भू॑मिस्
सू॑र्येणो॑त्तभिता द्यौः॑ ।
ऋते॑नाऽऽदित्या॑स् ति॑ष्ठन्ति
दिवि॑ सो॑मो अ॑धि श्रितः॑ ।*(५)*

▼

⑤

>

▼ Oldenberg

20. With the next two (verses; M. I, 6, 2. 3), he puts the two animals to the chariot;

▼ हरदत्तः

अथ दम्पत्योः प्रस्थाने विशेषधर्मा उपदिश्यन्ते । **उत्तरा** सत्येनोत्तभितेत्येषा । **रथस्योत्तंभनी** अनयर्चा रथस्योत्तम्भनं कर्तव्यमित्यर्थः । केन? वरेण, अधिकृतत्वात् ॥२१॥

▼ सुदर्शनः

**उत्तरा** "सत्येनोत्तभिता" इत्येषा **रथस्योत्तम्भनी** उत्तम्भने करणमन्त्रः ॥२१॥

▼

⑤

>

उत्तरा रथस्योत्तम्भनी।

# ०५ २२ वाहावुत्तराभ्यां युनक्ति②

वाहावुत्तराभ्यां *(=युञ्जन्ति ब्रध्नं)* युनक्ति दक्षिणमग्रे ॥

युञ्ज॑न्ति ब्रद्ध्न॑म्*(=महान्तम्)* अरुष॑ञ्*(=गन्तारं)*
च॑रन्तम् प॑रि तस्थु॑षः ।
*(यावद्)* रो॑चन्ते रोचना॑ दिवि॑ ।*(२५)*

*(रथादि)*यो॑गेयोगे तव॑स्*(=गति[वत्])*तरवँ
वा॑जेवाजे हवामहे ।
*(वयं स्तोतृत्वेन)* स॑खाय*(ः)* इ॑न्द्रम् ऊत॑ये ।*(५)*

▼

⑤

>

▼ Oldenberg

21. First the right one.

▼ हरदत्तः

याभ्यामूह्यते रथः तौ **वाहौ** अश्वावनड्वाहौ वा । **उत्तराभ्यां** "युञ्जन्ति ब्रध्नं, "योगे योगे, इत्येताभ्यां **युनक्ति** युगधुरोराबध्नाति । युञ्जन्तीति दक्षिणं, योगे योगे इत्युत्तरम् । केचिद् उभाभ्यामेकैकस्य योगमिच्छन्ति ॥२१॥ अर्थात् पश्चात् सव्यम् । प्रत्यङ्मुखत्वे च न सिध्यति वचनम् । अन्यत्र तथापवर्ग इत्येव सिद्धम् ॥२२॥

▼ सुदर्शनः

**उत्तराभ्यां** "युञ्जन्ति ब्रध्नं" "योगे योगे" इति द्वाभ्यां अश्वावनड्वाहौ वा युगधुरोराबध्नाति । तयोश्च **दक्षिणं** वाहं पूर्वं **युनक्ति** । द्वाभ्यां द्वाभ्यामेकैकं, नैकैकया । अत्र च उत्तराभ्यामिति द्वन्द्वापवादेनैकशेषेण समभिव्याहृतयोजनक्रियापेक्षयेतरेतरयोगाभिहितयोर्द्वयोरपि मन्त्रयोस्सहितयोर्विनियोगात् "एकमन्त्राणि कर्माणि" (आप.प.१-४-१.) इत्यस्यापवादः । नन्वेवं द्वितीयस्य मन्त्रस्यादृष्टार्थता स्यात्? सत्यम्–तथापि, द्वाभ्यां द्वाभ्यामेकैकमिति परमाप्तभाष्यकारवचनादेकैकवाहयोजने सहितमन्त्रद्वयाचारः कृत्स्नदेशकालकर्तृव्याप्त इत्यनुमीयते ॥ २२ ॥
▼

⑤

>

वाहावुत्तराभ्यां युनक्ति दक्षिणमग्रे।

# ०५ २३ आरोहतीमुत्तराभिरभिमन्त्रयते अथ②

आरोहतीमुत्तराभिरभिमन्त्रयते *(="सुकिंशुकमि"त्येवमादिभिः)* ॥

सु॒किं॒शु॒क*(पुष्प)*ँ, *(निर्माणेन)* श॑ल्म॒लिं, वि॒श्वरू॑पँ॒,
हिर॑ण्य-वर्णँ, सु॒वृतँ, सुच॒क्रम् *(रथम्)*। आरो॑ह वध्व् अ॒मृत॑स्य लो॒कँ *(तत्सङ्केतत्वेन)*
स्यो॒नं*(=सुखं)* पत्ये॑ वह॒तुं*(=स्त्रीधनं)* कृ॑णुष्व ।*(४)*

उद॑ु॒त्त॒रम् आ॒रोह॑न्ती
व्य॒स्यन्ती॑ पृतन्य॒तः*(=योद्धुकामान्)* ।
मू॒र्द्धानं॒ पत्यु॒र् आ रो॑ह
प्र॒जया॑ं च वि॒राड् भ॑व ।*(५)*

सम्रा॒"ज्ञी श्व॒"शुरे भव
सम्रा॒"ज्ञी श्वश्रुवा॑" भव ।
न॒"नान्दरि सम्रा॒"ज्ञी भव
सम्रा॒"ज्ञी अ॒"धि देवृ॒"षु ।*(५)*

स्नुषाणाँ॒ श्वशु॑राणां
प्र॒जाया॑श्च॒ धन॑स्य च ।
पती॑नाञ्च देवॄ॒णाञ्च॑
सजा॒ताना॑ं वि॒राड् भ॑व ।*(५)*

▼

⑤

>
▼ Oldenberg

22. When she mounts (the chariot), he recites over her the next (verses; M. I, 6, 4-7).

▼ हरदत्तः

अथ तं रथं युक्तमारोहति वधूः । ताम् **आरोहतीम्** आरोहन्तीं उत्तराभिस्"सुकिंशुकम्" इत्येवमादिभिः अभिमन्त्रयते । इह बहुवचननिर्देशात् त्रिप्रभृति अनियमप्रसङ्गे मन्त्रलिङ्गाच्चतसृभिरिति नियमः । याने तूत्तंभनादि सर्वं भवति । अश्वपुरुषादिषु च अभिमन्त्रणादयः दम्पतीधर्मा भवन्तीत्त्युक्तम् । "सुचक्रम्" इति मन्त्रलिङ्गात् रथ एव मन्त्रा इत्येके । वधूप्रतिपादनपरत्वात् मन्त्रस्य रथलिङ्गत्वमर्थवाद इत्यन्ये ॥२३॥

▼ सुदर्शनः

**रथमारोहतिम्** आरोहन्तीं वधूम् । नुमभावश्छान्दसः । "सुकिंशुकम्" इत्यादिभिश्चतसृभिर् **अभिमन्त्रयते** । रथमेवारोहन्तीं नाश्वादिम्; सुचक्रिमिति लिङ्गविरोधात् । "उदुत्तरम्" इति वा तिसृभिरश्वादिकमारोहन्तीमभि मन्त्रयते ॥२३॥

▼

⑤

>

आरोहतीमुत्तराभिरभिमन्त्रयते।

# ०५ २४ सूत्रे②

*(द्वे)* सूत्रे वर्त्मनोर् *(=चक्रयोर्)* व्यवस्तृणात्त्य् *(=तिर्यक्स्तृणाति)* उत्तरया *(= नीललोहित इत्येतया)* नीलं दक्षिणस्यां लोहितमुत्तरस्याम् ॥

नी॒ल॒लो॒हि॒ते *(सूत्रे)* भं॑वतः
*(एकतरेण?) (कु)*कृ॒त्या-स॒क्तिर् *(दूरं)* व्यं॑ज्यते ।
एधं॑न्तेऽस्या ज्ञा॒तय॒ः
*(एकतरेण?)* पति॑र् ब॒न्धेषु॑ बद्ध्यते ।

▼

⑤

>

▼ Oldenberg

23. With the next (verse; M. I, 6, 8), he spreads out two threads in the wheel-tracks (in which the chariot is to go), a dark-blue one in the right (track), a red one in the left.

▼ हरदत्तः

द्वे **सूत्रे** नीललोहिते रथस्य वर्त्मनोरुभयोर् भविष्यन्निर्देशोऽयं ययोर्वर्तिष्येते रथचक्रे तयोर्वत्मनोः । वर्तिन्योरिति युक्तं पठितुम् । तथा च दक्षिणस्यामुत्तरस्यामित्युत्तरत्र स्त्रीलिङ्गनिर्दशोऽवकल्पते । **व्यवस्तृणाति** विशब्दस्तिर्यगर्थे, तिर्यगवस्तृणाति । **उत्तरया** "नीललोहित" इत्येतया ॥ २४॥ तयोस्सूत्रयोः यन्नीलं दक्षिणस्यां वर्त्मन्यां व्यवस्तृणाति ॥२५॥ उत्तरस्यामिति सव्यस्य चक्रस्य वर्त्मन्यामित्यर्थः । सूत्रे युगपत् गृहीत्वा सकृदेव मन्त्रुमक्त्वा व्यवस्तृणाति । सत्यपि देशभेदे मन्त्रलिङ्गात् ॥ अपर आह–देशभेदात् मन्त्राभ्यावृत्तिरिति । अभियानं तु सान्नाय्यकुम्भीवत् द्रष्टव्यम्–अप्रस्रेसाय यज्ञस्योऽखे उपदधाम्यहमिति । सूत्रव्यवस्तरणमश्वादिषु नास्ति रथसंबन्धात् ॥२६॥

▼ सुदर्शनः

**वर्त्मनोः** वर्तन्योरित्यर्थपाठः । नीलं दक्षिणस्यामिति स्त्रीलिङ्गनिर्देशात् । रथस्य भाविन्योर्वर्तन्योः "नीललोहिते भवतः" इत्येतया द्वे **सूत्रे व्यवस्तृणाति** तिर्यक्स्तृणाति । एतच्च युगपत्, नीललोहिते भवत इति द्विवचनलिङ्गात् । तयोश्च सूत्रयोर् **दक्षिणस्यां** वर्तन्यां **नीलं** व्यवस्तृणाति, **उत्तरस्यां** च **लोहितम्** ॥२४॥

▼

⑤

>

सूत्रे वर्त्मनोर्व्यवस्तृणात्युत्तरया नीलं दक्षिणस्यां लोहितमुत्तरस्याम् ।

# ०५ २५ ते उत्तराभिरभियाति②

ते ते उत्तराभिर् *(= ये वध्वश्चन्द्रमित्येताभिः)* अभियाति *(= उपरि गच्छति)* ॥

---

*(ते सूत्रे उत्तराभिरभियाति)*

ये᳚ वद्ध्व᳚श् चन्द्रं᳚ *(=आह्लादकं)* वहतुं᳚ *(=स्त्रीधनं)*
य᳚क्ष्मा य᳚न्ति ज᳚नाँ अ᳚नु ।
पु᳚नस् ता᳚न् यज्ञि᳚या देवा᳚
न᳚यन्तु य᳚त आ᳚गताः ।*(२४)*

मा᳚ विदन् परिपन्थि᳚नो
य᳚ आसी᳚दन्ति द᳚म्पती ।
सुगे᳚भिर् दुर्ग᳚म् *(तौ)* अ᳚तीताम्
अ᳚प द्रा*(द्रव)*न्त्व् अ᳚रातयः ।

सु॒गं पन्था॑न॒म् आरु॑क्ष॒*(ह)*म्
अरि॑ष्टँ स्वस्ति॒-वाह॑नम् ।
यस्मि॑न् वी॒रो न रिष्य॑त्य्,
अ॒न्येषां॑ वि॒न्दते॒ वसु॑ ॥ (6)

▼

⑤

>

▼ Oldenberg

24. With the next (verses; M. I, 6, 9-11), he walks on these (threads).

▼ हरदत्तः

**ते** सूत्रे **अभियाति** उपरियाति । उत्तराभिस्तिसृभिः ऋग्भिः ये वध्वश्चन्द्रमित्येताभिः तत्र रथेन गच्छन्नुपरियाति । मन्त्रास्त्वश्वादिगमनेऽपि वक्तव्याः गमनार्थत्वात्तेषां, नेत्यन्ये । मन्त्रलिङ्गात् त्रित्वनियमः । त्रयाणामन्ते गमनारम्भः ॥२५॥

▼ सुदर्शनः

"ये वध्वश्चन्द्रम्" इति तिसृभिर्व्यवस्तीर्णे सूत्रे **अभियाति** उपरिगच्छति ॥२५॥

▼

⑤

>

ते उत्तराभिरभियाति।

# ०५ २६ तीर्थस्थाणुचतुष्पथव्यतिक्रमे②

तीर्थ-स्थाणु*(=गवां कण्डूयनार्थं निखातः स्तम्भः)*-चतुष्पथव्यतिक्रमे चोत्तरां *(=ता मन्दसाना)* जपेत् ॥

## तीर्थादिव्यतिक्रमे जपः⑤

ता॑ *(=तौ)* मन्दसाना॑ *(=स्तूयमानौ)* म॑नुषो दुरोण॑ *(=गृहे)*
**आ॑ धत्तँ॑** रयिं॑ दश॑-वीरं वचस्य॑वे*(=वचनवते)* ।
**कृतं॑** *(=कुरुतं)* तीर्थँ॑ सु-प्रपाणँ॑ **शुभस्-पती** *(अश्विनौ)*,
स्थाणुं॑ पथेष्ठा॑म् अ॑प दुर्मतिँ॑ **हतम्** ।

▼

## ⑤

>
▼ Oldenberg

25. And when they pass by bathing-places, posts, or cross-roads, let him murmur the next (verse; M. I, 6, 12).

▼ हरदत्तः

अतीत्य गमनमतिक्रमः अतिक्रम एव व्यतिक्रमः, विशब्दोऽनर्थकः, यथोपाय एवाभ्युपाय इति । उत्तरामृचं जपेद्वरः तामन्दसानेत्येताम् । निमित्तावृत्तौ जपस्यावृत्तिः । च शब्दः प्रत्येकं जपसंबन्धार्थः । इतरथा त्रयाणामतिक्रमसन्निपाते जपः कार्यस्स्यात् मन्त्रलिङ्गात् । न च मन्त्रे तीर्थादयस्स्तूयन्ते । किंतर्ह्यश्विनौ, तेनैकातिक्रमणे इतरयोः श्रवणं व्यर्थं स्यादिति न चोदनीयं, तत्पदोद्धारो वा शङ्कनीयः ॥२६॥

▼ सुदर्शनः

**तीर्थं** पुण्यनद्यादि । **स्थाणुर्गवां** कण्डूयनार्थं निखातः । **चतुष्पथ;** प्रसिद्धः । एतेषां व्यतिक्रमे "ता मन्दसाना" इत्येतां जपेत् । तीर्थादीनां चान्यतमव्यतिक्रमेऽपि कृत्स्नाया एव जपः, न त्वितरपदरहितायाः; यतो लिङ्गाच्छ्रुतिर्बलीयसी, "ऐन्द्र्या गार्हपत्यमुपतिष्ठते" इतिवत् । नन्वत्राचाराच्छ्रुतिरनुमेयेति न तया लिङ्गबाधो युक्तः । मैवम्, लिङ्गस्यात्र श्रुतिविहितशोषिविषयसापेक्षत्वात् । तत्र ह्यनुमेयश्रुतेर्दौर्बल्यं यत्रास्याः प्रत्यक्षश्रुत्यैव विरोधः । अतोऽनुमेयापि श्रुतिस्सापेक्षलिङ्गबाधिकैव । वृत्तिभेदस्तु तीर्थादिशब्दानां तत्तद्व्यतिक्रमे मन्त्रप्रयोगभेदादुपपद्यते । अतस्तीर्थव्यतिक्रमेऽपि स्थाणुपथशब्दौ दुर्मतिस्थानसामान्यात्तीर्थमेवाभिवदतः । एवं स्थाणुमितरौ । चतुष्पथमपीतरौ । यथेध्मसम्भरणमन्त्रे उपवेषमेक्षणधृष्टिशब्दा अग्निसंस्पर्शिकाष्ठमयत्वसामान्यात् इध्मदारूण्येवाभिवदन्ति । यथा वा जातकर्मण्युत्तराभ्यामभिमन्त्रणं, मूर्धन्यवघ्राणं, दक्षिणे कर्णे जापः, (आप. गृ. १५-१.) इत्यभिमन्त्रणावघ्राणजपानां जातसंस्कारक्रियासामान्यादभिजिघ्रामीत्यभिवदनम् । किञ्चात्राश्विनोः प्राधान्येन स्तूयमानत्वात् तत्सकाशात् तीर्थादिव्यतिक्रमोत्थदोषोपहतेः प्रार्थ्यमानत्वादविकृताया एव जपः । अपि च पदान्तरोद्धारे जगतीत्वभङ्गप्रसङ्गः । न्यायतस्तु जपमन्त्रो नार्थपरः अतो नात्र तीर्थादयोऽश्विनौ वा तात्पर्येणाभिधीयन्ते । तस्मात् सूपपादः कृत्स्नाया एव जपः । एष एव न्यायो नदीनां धन्वनां च व्यतिक्रमे ॥२६॥

▼

## ⑤

>

तीर्थस्थाणुचतुष्पथव्यतिक्रमे चोत्तरां जपेत्।

# ०६ ०१ नावमुत्तरयाऽनुमन्त्रयते अथ②

नावम् उत्तरयानुमन्त्रयते *(=अयं नो मह्याः पारं स्वस्ति)* ॥

अ॒यन् नो॑ म॒ह्याः *(=महत्याः [नद्याः])* पा॒रँ
स्व॒स्ति नेँ॑षद् व॒न॒स्पतिः॑ ।
सीरा॑ *(=नदि!)* नस् सु॒तरा॑ भव
दीर्घायु॒त्वाय॒ वर्च॑से ।

▼

⑤

>
▼ Oldenberg

1. The next (verse; M. I, 6, 13), he recites over a boat (with which they are going to cross a river).

▼ हरदत्तः

अथ यदि पथि नावा तार्या नदी वापी वा स्यात्तत्र **नावम्** उत्तरयर्चा "अयं नो मह्याः पारं स्वस्ति" इत्येतया **अनुमन्त्रयते** अनुमन्त्रयेतेत्यर्थः । पृष्ठतः स्थित्वा अनुवीक्ष्य मन्त्रोच्चारणमनुमन्त्रणम् । कृतेऽनुमन्त्रणे वरो वधूश्च तामारोहतः ॥१॥

▼ सुदर्शनः

यदि पथि नदी नावा तरितव्या स्यात्, तदा वरः "अयं नो मह्याः पारम्" इत्येतया नावमनुमन्त्रयते । ततस्तामुभावग्निना सहारोहतः ॥१॥

▼

⑤

>

नावमुत्तरयाऽनुमन्त्रयते।

# ०६ ०२ न च②

न च नाव्यांस् *(=तरयितॄन्)* तरती वधूः पश्येत् ॥

▼

⑤

>
▼ Oldenberg

2. And let the wife, when she is crossing, not see the crew.

▼ हरदत्तः

ये नावं नयन्ति (ते) नावि भवा नाव्याः कैवर्ताः तान् **तरती** तरन्ती तरणकाल इत्यर्थः । स्त्रीलिङ्गनिर्देशादेव सिद्धे वधूग्रहणं दर्शनप्रतिषेधो वध्वा एव यथा स्यादिति । तेन तीर्त्वोत्तरां जपेदिति वरस्यैव भवति । चशब्दो वध्वा वरस्य च सहतरणप्रदर्शनार्थः । सहोभौ तरतः । वध्वास्त्वयं चापरो विशेष इति । केचित् नावा तार्या आपो नाव्या इति व्याचक्षते । तेषां पुंलिङ्गनिर्देशोऽनुपपन्नः ॥२॥

▼ सुदर्शनः

**नाव्यान्** नौनेतॄन् कैवर्तान् । **तरतीति** छान्दसं रूपम् । तरन्ती तरणकाले । "लक्षणहेत्वोः क्रियायाः" (पा.सू. ३-२-१२६.) इति शत्रादेशः । वधूर्न पश्येत् । चकारात् वध्वास्तरणदर्शनप्रतिषेधश्च, वरस्य केवलं सह तरणमिति ज्ञापयति ॥२॥

▼

⑤

>

न च नाव्यांस्तरती वधूः पश्येत् ।

# ०६ ०३ तीर्त्वोत्तराञ् जपेत्②

तीर्त्वोत्तरां *(=अस्य पारः)* जपेत् ॥

*(तीर्त्वा जपः)*
अ॒स्य *(नद्यादेः)* पा॒रे *(तीरे)* निर्ऋ॒तस्य॑ *(=निस्तरितस्य)*
जी॒वा **ज्योति॑र् अशीमहि** ।
म॒ह्या *(=महत्यै)* इ॑न्द्रस् स्व॒स्तये॑ *(ऽस्तु)*।

▼

⑤

>
▼ Oldenberg

3. When they have crossed, let him murmur the next (verse; M. I, 6, 14).

▼ हरदत्तः

**तीर्त्वा** पारं प्राप्य **उत्तराम्** ऋचं "अस्य पार" इत्येतां जपेद्वरः । यदि नदी न भवति तदा या ओषधय इत्येतामपि जपेत् । नदीनां धन्वनाञ्च व्यतिक्रमे इति वक्ष्यति ॥३॥

▼ सुदर्शनः

पारं प्राप्य "अस्य पारे" इत्येतां वर एव जपेत् ॥३॥

▼

⑤

>

तीर्त्वोत्तरां जपेत्।

# ०६ ०४ श्मशानादिव्यतिक्रमे भाण्डे②

श्मशानाधिव्यातिक्रमे भाण्डे रथे वा रिष्टे ऽग्नेरुपसमाधानाद्याज्यभागान्ते ऽन्वारब्धायाम् उत्तरा आहुतीर् *(= "यदृतेचिद्" इत्याद्यास्सप्त)* हुत्वा जयादि प्रतिपद्यते, परिषेचनान्तं करोति ॥

यद् ऋ॒ते-चि॑द् अभि॒श्रि*(श्लि)*षः॑
पु॒रा ज॒र्तृ*(तृ)*भ्यं॑ आ॒तृद॑ः *(=दृढीकुर्वन्ति)* ।
सन्धा॑ता स॒न्धिं म॒घवा॑ पुरो॒वसु॒र्*(=बहुधनः)*,
निष्*(=संस्)*क॑र्ता॒ विह्रु॑*(ह्रु)*तं॒ *(=विनष्टं)* पुन॑ः । *(स्वाहा!)*

इडा॑म्*(=अन्नम्)* अग्ने पुरु॒दँसँ॑*(=बहुदर्शनीयं)*
स॒निङ् गोश् शं॑श्वत्त॒मँ॑ हव॑म् आनाय साध*(य)* ।
स्यान् नं॑स् सू॒*(सु)*नुस् तन॑यो*(=पौत्रः)*
वि॒जावा*(विजनक)* ऽग्ने॒ सा तें॑ सुम॒तिर् भूंत्व् अ॒स्मे*(=स्मासु)* ।

इमं॑ मे वरुण श्रुधी *(=श्रुणु)*
ह॑वम्*(=आह्वानम्)* अद्या॑ च मृळय *(=सुखय)*।
त्वा॑म् अवस्यु॑र् आ॑ चके *(=अवदन्)*॥

▼

⑤

>

▼ Oldenberg

4. If they have to pass over a cemetery, or if any article (which they carry with them), or their chariot is damaged, the ceremonies from the putting of wood on the fire down to the Ājyabhāga oblations are performed, and while she takes hold of him, he offers the oblations (indicated by the) next (Mantras; M. I, 7, 1-7), then he enters upon the performance of the Jaya and following oblations, and performs (the rites) down to the sprinkling (of water) round (the fire).

▼ हरदत्तः

श्मशानभूमेरध्युपरि व्यतिक्रमे भाण्डे भाजनादौ रथे वा रिष्टे नष्टे रथ इति प्रदर्शनमन्येषु चैवंप्रकारेषु दुर्निमित्तेषु वक्ष्यमाणहोमः कार्यः । तत्राग्नेरुपसमाधानादि तन्त्रं प्रतिपद्यते । अधिशब्दप्रयोगाच्छ्मशानभूमेरुपरि गमन एवैतत् भवति । तीर्थादीनां तु समीपेनातिक्रमेऽपि भवति ॥४॥ उत्तरा आहुतीर्जुहोति । "यदृतेचि"दित्याद्यास्सप्त उत्तरमन्त्रैरेतैराहुतीर्जुहोतीत्यर्थः । मन्त्रलिङ्गात् सप्तनियमः । हुत्वा जयादितन्त्रशेषं प्रतिपद्यते । सकृत् पात्रप्रयोगः । शम्याः परिध्यर्थे । अग्नेरुपसमाधानादि वचनं तन्त्रप्राप्त्यर्थं, आज्यभागान्तवचनमन्वारम्भकालोपदेशार्थम् । "जयादि प्रतिपद्यत" इत्येतच्चान्वारम्भनिवृत्त्यर्थम् । तथा जयादि यथासिद्धं प्रतिपद्यत इति ॥५॥ यदिदमग्नेरुपसमाधानादि परिषेचनान्तं कर्म तदनन्तरं नैमित्तिकमुक्तं तत्करोति । सकृदेव, न पुनः पुनरित्यर्थः । अनन्तरोक्तानां निमित्तानां देशकालभेदेनावृत्तावपि सकृदोवान्तेऽयं होमो भवतीत्यर्थः ॥ ६॥

▼ सुदर्शनः

**श्मशानाधिव्यतिक्रमे** श्मशानभूमेरुपरि व्यतिक्रमे, **भाण्डे** वधूभूषणादौ **रथे वा रिष्टे** नष्टे, अग्नेरुपसमाधानादि परिषेचनान्तं करोति । केवलाज्यहविष्षु न वचनाभावे तन्त्रमित्युक्तमेव । आज्यभागान्त इति त्वन्वारम्भकालविध्यर्थम् । **उत्तराः** "यदृते चिदभिश्रिषः" इति सप्तकरणिका आहुतीः । शेषं व्यक्तम् ॥४॥

▼

⑤

>

श्मशानादिव्यतिक्रमे भाण्डे रथे वा रिष्टेऽग्नेरुपसमाधानाद्याज्यभागान्ते ऽन्वारब्धायामुत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते परिषेचनान्तं करोति ।

# ०६ ०५ क्षीरिणामन्येषां वा②

*("सकृदेव, न पुनः पुनरित्यर्थः" इति हरदत्तः।)* क्षीरिणाम् अन्येषां वा लक्ष्मण्यानां *(= प्रसिद्धानां सीमावृक्षणामित्यर्थः)* वृक्षाणां नदीनां धन्वनां *(=दीर्घाण्यरण्यानि येषु ग्राम्याः पशवो न निवसन्ति)* च व्यतिक्रम उत्तरे *(="ये गन्धर्वाः" इति वृक्षाणां व्यतिक्रमे,"या ओषधयः" इति नदीनां धन्वनाम् ।)* यथालिङ्गं जपेत्॥

ये ग॑न्ध॒र्वा अ॑प्स॒रस॑श् च दे॒वीर्
ए॒षु वृ॒क्षेषुं वानस्प॒त्येष् आस॑ते ।

शि॒वास् ते अ॒स्यै व॒द्ध्वै भवन्तु॒
मा हिँ॑सिषुर् वह॒तुम्*(=स्त्रीधनम्)* ऊ॒ह्यमा॑नाम् ।

### नद्याद्यतिक्रमे जपः⑤

या ओष॑धयो॒ या न॒द्यो॑
यानि॒ धन्वा॑नि॒*(=निर्जलस्थानानि)* ये वना॑ ।
ते त्वा॑ वधु प्र॒जाव॑तीं॒
प्र त्वे*(=त्वां)* मुं॑ञ्च॒न्त्व् अँह॑सः ।

▼

### ⑤

>
▼ Oldenberg

5. If they pass by trees with milky sap or by other trees that serve as marks, by rivers or by deserts, he should murmur the next two (verses; M. I, 7, 8. 9), according to the characteristics in them (which refer to these different cases).

▼ हरदत्तः

**क्षीरिणां** न्यग्रोधादीनामलक्ष्मण्यानाम्, अन्येषामपि **लक्षण्यानां** लक्षणयुक्तानां प्रसिद्धानां सीमावृक्षणामित्यर्थः । लक्ष्मण्यानामित्यपि पाठे अयमेवार्थः । **नदीनां** सोदकानां अनुदकानाञ्च । **धन्वनां** निर्जलानामरण्यानाञ्च **व्यतिक्रमे** उत्तरे ऋचौ यथालिङ्गं यस्य लिङ्गं यस्यां दृश्यते तद्व्यतिक्रमे तां जपेत् । तत्र वृक्षातिक्रमे ये गन्धर्वा इति, नद्यतिक्रमे या ओषधय इति, धन्वातिक्रमे यानि धन्वानीति । यथालिङ्गवचनं उभयत्रोभे मा भूदिति । नद्यतिक्रमेऽपि कृत्स्ना भवति । तथा धन्वातिक्रमेऽपि ॥५॥

▼ सुदर्शनः

**क्षीरिणः** क्षीरवन्तः प्लक्षन्यग्रोधादयः लक्ष्म चिह्नं तत्र भवाः **लक्ष्मण्याः** दुर्गा तिन्त्रिणिका सीमाकदम्बा इत्येवमादयः । **नद्यः** प्रसिद्धाः **धन्वानो** दीर्घाण्यरण्यानि येषु ग्राम्याः पशवो न निवसन्ति । एतेषां व्यतिक्रमे **उत्तरे यथालिङ्गं जपेत्** । "ये गन्धर्वाः" इति वृक्षाणां व्यतिक्रमे, "या ओषधयः" इति नदीनां धन्वनाम् । यथालिङ्गमिति वचनं जातकर्मवन्मा भूदिति । क्षीरिणामित्यादि बहुत्वमविवक्षितम्, निमित्तगतत्वात्, हविरुभयत्ववत् ॥५॥

▼

### ⑤

>

क्षीरिणामन्येषां वा लक्ष्मण्यानां वृक्षाणां नदीनां धन्वनां च व्यतिक्रम उत्तरे यथालिङ्गं जपेत् ।

## ०६ ०६ गृहानुत्तरया सङ्काशयति②

*(ज्ञातिधनसंयुक्तान् )* गृहान् उत्तरया *(="सङ्काशयामि" इत्यनया)* सङ्काशयति *(=दर्शयति)*॥

*(गृहानुत्तरया संकाशयति, तत्र वहतुः पूर्वं प्रापयितव्यः।)*

संका॑शयामि*(=प्रदर्शयामि)* वह॒तुं*(=स्त्रीधनं)* ब्रह्म॑णा
गृ॒हैर् *(सह)* अघो॑रेण॒ चक्षु॑षा॒ मैत्रे॑ण ।
*(आभरणादिकम्)* प॒र्या-ण॑द्धं वि॒श्वरू॑पं॒ यद् अ॒स्याँ
स्यो॒नं पति॑भ्यस्*(=पत्यादिभ्यः)* सवि॒ता कृ॑णोतु॒ तत् ।*(२४)*

▼

⑤

>
▼ Oldenberg

6. With the next (verse) he shows her the house(M. I, 7, 10).

▼ हरदत्तः

अथ स्वं गृहं प्राप्य रथादवरोप्य यद्धनं तस्या वहतुत्वेनागतं तच्च गृहान् प्रपाद्य ततस्तया तान् **सङ्काशयति** सम्यगीक्षयति उत्तरयर्चा सङ्काशयामीत्येतया । मन्त्रश्चास्मिन्नर्थे यथाकथञ्चित् योजनीयः । सङ्काशयामि दर्शयामि वहतुं वध्वाः पितृकुलादानीतं धनं ब्रह्मणा मैत्रेण अघोरेण चक्षुषा न केवलमघोरेण, किं तर्हि मैत्रेण गृहैर्मदीयैस्सार्धं गृहं च मदीयमित्यर्थः । अस्यां पर्याणद्धं विश्वरूपाख्यं यदाभरणं तत् परिभ्यः एकस्मिन् बहुवचनम् । पत्यै मह्यं स्योनं मुखम् । सविता करोत्विति ॥६॥

▼ सुदर्शनः

वरः स्वगृहान् ज्ञातिधनसंयुक्तान् वधूं"सङ्काशयामि" इति ऋचा **सङ्काशयति** दर्शयति । ननु–यद्यपि समित्युपसर्गः "समवदाय दोहाभ्यां" (आप.श्रौ.२-२०-३.) इत्यादौ सहार्थे दृष्टः, तथापि गृहाणां ज्ञातिधनसहिततत्वमेवात्राभिप्रेतमिति कुतो निश्चीयते? उच्यते– "सङ्काशयामि वहतुम्" इति मन्त्रलिङ्गानुसारात् । मन्त्रार्थश्च भाष्योक्तः ॥६॥

▼

⑤

>

गृहानुत्तरया सङ्काशयति ।

# ०६ ०७ वाहावुत्तराभ्यां विमुञ्चति②

वाहावुत्तराभ्यां *("आवामगन्" इति द्वाभ्याम्)* विमुञ्चति दक्षिणमग्रे।

*(वाहौ विमुञ्चति)*

आ॑ वाम् अगन्त् सुमति॑र्, वाजिनी*(=अश्वी)*वसू
न्य् *(हे)* अ॑श्विना, हृत्सु॑ *(गृहप्राप्ति)*का॑माँ अयँसत*(=नियती कृताः)* ।
अ॑भूतङ् गोपा॑ मिथुना॑ शुभस्पती
प्रिया॑ अर्यम्णो॑ दु॑र्याँ*(=गृहान्)* अशीमहि*(=प्रविशेम)* ।

*(वाह!)* अ॒यन् नो॑ दे॒वस् स॑वि॒ता बृह॒स्पति॑र्
इन्द्रा॒ग्नी मि॒त्रावरु॑णा स्व॒स्तये॑ ।
त्वष्टा॒ विष्णुः॑ प्र॒जया॑ सँररा॒णः*(=सन्ददानः)*
काम॒*(य्)* आया॑तु॒ कामा॑य त्वा॒ विमु॑ञ्चतु ॥ (7)

▼

⑤

>
▼ Oldenberg

7. With the next two (verses; M. I, 7, 11. 12) he unyokes the two animals; the right one first.

▼ हरदत्तः

उत्तराभ्यां आवामगन् "अयं नो देवस्सविता" इत्येताभ्याम् । योगवदेकैकेन मन्त्रेण विमोकः ॥९॥ अर्थात् सव्यं पश्चात् ॥१०॥

▼ सुदर्शनः

"आवामगन्" इति द्वाभ्यामेकैकं वाहं विमुञ्चति ॥७॥

▼

⑤

>

वाहावुत्तराभ्यां विमुञ्चति दक्षिणमग्रे।

# ०६ ०८ लोहितञ् चर्मानडुहम्②

लोहितं चर्माऽऽनडुहं प्राचीनग्रीवम् उत्तर*(=ऊर्ध्व)*लोमम् मध्येऽगारस्योत्तरया *(="शर्म वर्मे"त्येतया)* ऽऽस्तीर्य, गृहान् प्रपादयन्न् उत्तरां *(="गृहान् भद्रान्")* वाचयति, दक्षिणेन पदा *(गृहान् प्रपादयन्)*।

---

*(चर्मास्तरणम्)*

शर्म॒ वर्मे॒दम् आह॑रा॒+
ऽस्यै नार्यां॑ उप॒स्तिरे॑*(=उपस्तरणे)* ।
सिनी॑वालि॒*(=शुक्लप्रथमाकला)* प्रजा॑यताम्
इ॒यं भग॑स्य सुम॒ताव् अ॑सत् ।

---

*(गृहान् प्रपादयन् वधूं वाचयति)*

**गृहान्** भ॒द्रान्त् सु॒मन॑सः॒ **प्रप॒द्ये**
ऽवीर॑घ्नी वी॒रव॑तस् सु॒वीरा॑न् ।
इरां॑*(=अन्नं)* वह॑तो घृ॒तम् *(प्र+)*उ॒क्षमा॑णा॒स्
**तेष्व्** अ॒हँ सु॒मना॒स् **सं विंशामि** ।*(२५)*

▼

⑤

>

▼ Oldenberg

8. Having, with the next (verse; M. I, 8, 1), spread out, in the centre of the house, a red bull's skin with the neck to the east, with the hair up, he causes her to recite the next (verse; M. I, 8, 2), while he makes her enter the house, (which she does) with her right foot.

▼ हरदत्तः

विमुच्य वाहौ वरः पूर्वं गृहं स्वयं प्रविश्य यत्र दम्पत्योर्वासः तत्रागारस्य मध्ये चर्मास्तृणाति उत्तरयर्चा "शर्म वर्मे"त्येतया तच्चानडुहं भवति लोहितञ्च वर्णेन । प्राचीनमुत्तरलोमेत्यास्तरणे प्रकारः । आस्तीर्य ततो दक्षिणेन पदा गृहान् **प्रपादयति ।** वधूं प्रवेशयति । प्रपादयंस्तामुत्तरामृचं **वाचयति** "गृहान्" इत्येताम् । "गृहानि"ति प्रकृते पुनर्गृहानित्युच्यते– हतरथा अगारस्यापि प्रकृतत्वात् प्रवेशने मन्त्रः शंक्येत । इदमेव ज्ञापकमन्तरगारमध्ये चर्मास्तरणमिति । प्रपादयन् वाचयतीति वचनान्मन्त्रकर्मणोरादिसंयोगः । न मन्त्रान्ते प्रदानम् ॥०८॥

▼ सुदर्शनः

ततो वरः पूर्वं स्वगृहान् प्रविश्य "शर्म वर्म" इत्येतया यथासूत्रं चर्मास्तीर्य ततो वधूं **दक्षिणेन पदा** गृहान् **प्रपादयन्** प्रवेशयन् "गृहान् भद्रान्" इत्येतां वाचयति ॥०८॥

▼

⑤

>

लोहितं चर्मानडुहं प्राचीनग्रीवमुत्तरलोम मध्येऽगारस्योत्तरयाऽऽस्तीर्य गृहान् प्रपादयन्नुत्तरां वाचयति दक्षिणेन पदा।

# ०६ ०९ न च②

न च देहलीमभि*(ध्रि)*तिष्ठति।

▼

⑤

>

▼ Oldenberg

> 9. And she does not stand on the threshold.

▼ हरदत्तः

देहलीनामद्वाराधस्ताद्दारु । पर्यन्तवेदिकेत्यपरे । तां प्रपादनकाले स्वयं सा च नातिक्रामेदित्यर्थः । तयोः प्रपन्नयोरग्निमनुप्रपादयति ॥१२॥ प्रपद्य गृहान् अथ तत्कालमशनमश्नीयात्; ततो यस्मिन्नगारे चर्मास्तरणं तस्योत्तरपूर्वदेशे विवाहाग्निं प्रतिष्ठाप्याग्नेरुपसमाधानादि तन्त्रं प्रतिपद्यते । सकृत् पात्राणि शम्याः परिध्यर्थे ॥९॥

▼ सुदर्शनः

सा च प्रविशन्ती देहलीं नाभितिष्ठति । केचित् चकाराद्वरोऽपि–इति ॥९॥

▼

⑤

>

न च देहलीमभि तिष्ठति।

# ०६ १० उत्तरपूर्वे②

उत्तरपूर्वे देशे ऽगारस्याग्नेर् उपसमाधानाद्याज्यभागान्ते ऽन्वारब्धायाम् उत्तरा *(="आगन्गोष्ठ"मित्याद्याः, लिङ्गविरोधे सत्यपि वर एव जुहोति, विधेर्बलीयस्त्वात् )* आहुतीर् हुत्वा जयादि प्रतिपद्यते

आग॑न् गो॒ष्ठं महि॑षी॒ गोभि॒र् अश्वै॒र्
आयु॑ष्मत्पत्नी, प्र॒जया॑ स्व॒र्वित् *(यतो "नापुत्रस्य लोकोस्ति")*।
ब॒ह्वीं प्र॒जाञ् ज॒नय॑न्ती सुरत्ने॒- -मम् अ॒ग्निँ श॒त-हिं॑मास् *(शतवर्षाणि)* सपर्यात् *(=परिचरतु)* ।

*(पुरा हिमवदृतुभिर् वर्षाणि गण्यन्ते स्मेति विस्मयः।)*

अ॒यम् अ॒ग्निर् गृ॒ह-प॑तिस्*(।)*
सुस॒ँसत्*(=शोभनसदनः)* पु॑ष्टि॒वर्द्ध॑नः ।
यथा॒ भग॑स्या॒*(=भगाय)*ऽऽभ्यां दद॑द्
र॒यिं पुष्टि॒म् अथो॑ प्र॒जाम् ।

प्र॒जाया॑ आभ्यां प्रजापत॒
इन्द्रा॑ग्नी॒ शर्म॑ यच्छतम् ।
यथैनं॑यो॒र् न प्र॑मी॒याता॑*(यु)*
उ॒भयो॒र् जीव॑तोः प्र॒जा ।

### मन्त्रः⑥

तेन॑ भूतेन॑ ह॒विषा॒यमा प्या॑यता॒ं पुनः॑।
जा॒यां याम॑स्मा॒ आवा॑क्षु॒स्तां रसे॑ना॒भि व॑र्धताम् ॥

अ॒भिव॑र्द्धता॒ं पय॑सा॒
ऽभि रा॒ष्ट्रेण॑ वर्द्धताम् ।
र॒य्या स॒हस्र॑पोषसे॒-
मौ स्ता॒म् अन॑पेक्षितौ ।*(र४)*

इ॒हैव स्त॒ं मा वियो॑ष्टं॒
विश्व॒म् आयु॒र् व्य॑श्नुतम् ।
म॒ह्या*(यु)* इ॑न्द्रस् स्व॒स्तये॑ *(ऽस्तु)* ।*(र४)*

ध्रु॒वैधि पो॑ष्या॒ मयि॒
मह्य॑न् त्वा ऽदा॒द् बृह॒स्पतिः॑ ।
मया॒ पत्या॑ प्र॒जाव॑ती॒
सं जी॑व श॒रद॑श्श॒तम् ।*(र४)*

त्वष्टा॑ जा॒याम् अ॑जनयत्
*("त्वष्टा रुपाणि पिंशतु" इति गर्भाधाने)*
त्वष्टा॑ ऽस्यै॒*(स्याः)* त्वां पति॑म् ।
त्वष्टा॑ स॒हस्र॒म् आयूँ॑षि
दी॒र्घम् आयुः॑ कृणोतु वाम् ।

इमं᳚ मे वरुण श्रुधी *(=श्रुणु)*
ह᳚वम्*(=आह्वानम्)* अद्या᳚ च मृळय *(=सुखय)*।
त्वा᳚म् अवस्यु᳚र् आ᳚ चके *(=अवदन्)*॥

इति श्रीहरदत्तविरचिते एकाग्निकाण्डमन्त्रव्याख्याने अष्टमः खण्डः ॥

## उपवेषनम्⑤

परिषेचनान्तं कृत्वोत्तरया *(=इह गावः प्रजायध्वम्)* चर्मण्युपविशत उत्तरो वरः *(प्राङ्मुखौ)* ।

*(उत्तरया चर्मण्युपविशतः। आमन्त्रितनिघातः छान्दसत्वान्नभवति ।)*

इ॒ह गाव॒ः प्रजा॑यद्ध्वम्
इ॒हाश्वा॑ इ॒ह पूरु॑षाः ।

इ॒हो*(ह+उ)* स॒हस्र॑-दक्षिणो
रा॒यस्पोषो॒ निषी॑दतु ।*(२५)*

▼

⑤

>
▼ Oldenberg

10. In the north-east part of the house the ceremonies from the putting of wood on the fire down to the Ājyabhāga oblations are performed, and while she takes hold of him, he offers the oblations (indicated by the) next (Mantras; M. I, 8, 3-15); then he enters upon the performance of the Gaya and following oblations, and performs (the rites) down to the sprinkling (of water) round (the fire). Then they sit down with the next (verse; M. I, 9, 1) on the skin, the bridegroom to the north.

▼ हरदत्तः

उत्तरास्त्रयोदशप्रधानाहुतीः "आगन्गोष्ठम्" इत्याद्याः लिङ्गविरोधे सत्यपि वर एव जुहोति, विधेर्बलीयस्त्वात् । भवति लिङ्ग्ञ्चाविवक्षितम् । देवतास्मरणार्थत्वात् मन्त्राणाम् । उत्तरो वर इत्ययं विशेषः सर्वेषु होमेषु भवतीत्युक्तम् । उत्तरपूर्वदेशेगारस्येति विधिरग्नेस्सर्वत्र वेदितव्यः ॥१४॥ **उत्तरयर्चा** "इह गावः प्रजायध्वम्" इत्येतया । तदुपविशतः परिषेचनान्तवचनमानन्तर्यार्थं परिषेचनानन्तरमेवोपवेशनं कर्तव्यं नान्यदिति । तेन भोजनं प्रागेवेति सिद्धम् । तत्रोपवेशने मन्त्र उभयोरपि भवति । इहाग्निसम्बन्धाभावात् उत्तरो वर इत्युक्तम् । प्राङ्मुखौ चोपविशतः ॥१५॥

▼ सुदर्शनः

**उत्तराः** "आगन् गोष्ठम्" इत्यादित्रयोदशाहुतीः । **उत्तरया** "इह गावः प्रजायध्वम्" इत्येतया । पूर्वमास्तीर्णे **चर्मण्युपविशतः** । पूर्ववदुत्तर एव वरः ॥ १०॥

▼

⑤

>

उत्तरपूर्वे देशेऽगारस्याग्नेरुपसमाधानाद्याज्यभागान्तेऽन्वारब्धायामुत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते परिषेचनान्तं कृत्वोत्तरया चर्मण्युपविशत उत्तरो वरः ।

# ०६ ११ अथास्याः पुँस्वोर्जीवपुत्रायाः②

अथास्याः पुंस्वो *(=या पुमांसमेव सूते न स्त्रियं सा )* जीवपुत्रायाः पुत्रमङ्क उत्तरयोपवेश्य *(="सोमेनादित्या")* तस्मै फलान्युत्तरेण *(=प्रस्वस्थः प्रेयः)* यजुषा प्रदायोत्तरे *(="इह प्रियं प्रजयाः")* जपित्वा वाचं यच्छत *(=मौनमाचरतः)* आ नक्षत्रेभ्यः ॥

---

*(अथ या पुमांसमेव सूतवती जीवपुत्रा च, तस्याः पुत्रं वध्वा अङ्के उपवेशयति।)*

सोमे॑नादि॒त्या ब॒लिन॒स्
सोमे॑न पृथि॒वी दृ॒ढा ।
अथो॒ नक्ष॑त्राणाम् ए॒षाम्
उ॒पस्थे॒ सोम॒ आधि॑*(हि)*तः।

*( एवमयं बालः तवोपस्थे उपविशतु) (५)*

---

*(तस्मै फलानि प्रयच्छति)*

**मन्त्रः⑥**

*(हे फलानि!)* प्र स्वस्*(=सूताः)* स्थ॒ः,
प्रेयं प्र॒जया॒ भुव॑ने शोचेष्ट*(=सोषीष्ट, √ सू)* ।

---

*(उत्तरे जपति)*

इह॑ प्रिय॑म् प्रज॑या ते स॑म् ऋध्यताम्
अस्मि॑न् गृहे॑ गा॑र्हपत्याय जागृहि
एना॑ प॑त्या तनु॑वं सं॑ सृजस्व
अ॑धा जि॑व्री विद॑थम् आ॑ वदाथः

इ॒ह प्रि॒यं प्र॒जया॑ ते॒ समृ॑द्ध्यताम्,
अ॒स्मिन् गृहे गार्ह॑पत्याय *(भावाय)* जागृहि *(अतिथीनामग्नीनां च सेवया)*।
ए॒ना पत्या॑ त॒न्वँ॑ सँ सृ॒ज॒स्वा-
ऽथा॒ जीव्री॑*(=जीर्णा)* वि॒द॒थ॒म्*(=यज्ञं)* आ व॑दासि *(पौत्रादिभ्यः)*।

सुमङ्गली॑र् इयं॑ वधू॑र्
इमाँ॑ समेत प॑श्यत ।
सौ॑भाग्यम् अस्यै॑ दत्वा॑या॑*(=दत्वा)*॑
ऽथा॑ऽऽस्तं *(स्वस्वगृहाणि)* वि॑ प॑रेतन*(=गच्छत)* ।*(२४)*

▼

**⑤**

>
▼ Oldenberg

11. He then places with the next (verse; M. I, 9, 2), the son of a wife who has only sons and whose children are alive, in her lap, gives fruits to the (child) with the next Yajus (M. I, 9, 3), and murmurs the next ṭwo (verses; M. I, 9, 4-5). Then he (and his wife) observe silence until the stars appear.

▼ हरदत्तः

या पुमांसमेव सूते न स्त्रियं सा पुंसूः" तस्याः पुंस्वः पुंस्वो जीवपुत्राया इति पाठः । न रेफः पाठ्यः, पठ्यमानो वा छान्दसो द्रष्टव्यः । जीवा एव पुत्रा यस्या न मृताः जीवपुत्रायाः जीवपत्या इति च द्रष्टव्यम् । तथा मङ्गलानीति । एवं भूतायास्त्रैवर्णिकस्त्रियाः पुत्रमपत्तरयर्चा "सोमेनादित्या" इत्येतया अस्या वध्वा अङ्क उपवेश्य तस्मै कुमाराय फलान्युत्तरेण यजुषा "प्रस्वस्थः प्रेयम्" इत्यनेन प्रदाय तत उत्तरे ऋचौ "इह प्रियं" "सुमङ्गलीः" इत्येते जपित्वा तत उभौ तस्मिन्नेव चर्मण्यासीनौ वाचं यच्छतः । **आनक्षत्रेभ्यः** नक्षत्राणामुदयादित्यर्थः । कुमारश्च फलानि गृहीत्वा यथार्थं गच्छति ॥११॥

▼ सुदर्शनः

पुंस्वोः पुंस्वाः इत्यर्थपाठः । या पुंस एव सूते न स्त्रीरपि, या च सूत एव, न तु वन्ध्या सती क्रयादिना पुत्रवती, सा पुंसूः । जीवन्त एव पुत्राः पुमांसो यस्यास्सा जीवपुत्रा, न पुनः "भ्रातृपुत्रौ स्वसृदुहितृभ्याम्" (पा. १-२-६८.) इत्येकशेषवचनाद्यस्या दुहितरोऽपि जीवन्ति, पुत्रश्चैको जीवति, सापीह जीवपुत्रा विवक्षिता; पुंस्वोरिति विशेषणानुपपत्तेः । एवं भूतायाः पुत्रं "सोमेनादित्याः" इत्येतया वध्वा अङ्क उपवेश्य "प्र स्वस्थः" इति यजुषा पुत्राय फलानि कदल्यादीनि प्रदाय "इह प्रियं प्रजया" इति ऋचौ जपित्वा, उभौ वाचं यच्छतः । आनक्षत्रेभ्यः नक्षत्राणामोदयात् ॥११॥

▼

⑤

>

अथास्याः पुँस्वोर्जीवपुत्रायाः पुत्रमङ्क उत्तरयोपवेश्य तस्मै फलान्युत्तरेण यजुषा प्रदायोत्तरे जपित्वा वाचं यच्छत आ नक्षत्रेभ्यः ।

# ०६ १२ उदितेषु नक्षत्रेषु②

उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशम् उपनिष्क्रम्योत्तराभ्यां *(=ध्रुवक्षितिर् ध्रुवयोनिः)* यथालिङ्गं *(=तेनोत्तरस्याम् ऋचि सर्वेषां सप्तर्षीणां कृत्तिकादिनाम् अरुन्धत्याश्च सहदर्शनम्)* ध्रुवम् अरुन्धतीं च दर्शयति॥

*(ध्रुवं दर्शयति)*

ध्रु॒व-क्षि॑तिर् ध्रु॒व-यो॑निर्
ध्रु॒वम् अ॑सि ध्रु॒वत॑स् स्थि॒तम् ।
त्वन् नक्ष॑त्राणां मे॒थ्य*(=खलेवाली, खले धान्य-पेषण-स्थाने वाल्यन्ते वृषा इति)* असि॒
*(अन्यत्र ध्रुवसम्बन्धे मेढीकृत इति शब्दः प्रयुज्यते पुराणेषु।)*
स मा॑ पाहि पृतन्यु॒तः*(=योद्धुकामात्)* ।

---

*(अरुन्धतीं दर्शयति। ६ कृत्तिकाः + अरुन्धती = ७ कृत्तिकाः सप्तऋषिपन्त्यः। अरुन्धती स्थिरा, शिष्टास् त्यक्ताः शङ्कया।)*

स॒प्त॒ऋ॒षयः॑ प्रथ॒मां कृत्ति॑कानाम् अरुन्ध॒तीम् यद् ध्रु॒वता॒ँ ह नि॒न्युः। षट्कृत्ति॑कामुख्ययो॒गं वह॑न्ति *(तस्याम्)*।
*(वधूर्)* इयम् अ॒स्माक॑म् एधत्व् अष्ट॒मी ।*(२५)*

▼

⑤

>

▼ Oldenberg

12. When the stars have appeared, he goes out (of the house with her) in an easterly or northerly direction, and shows her the polar star and (the star) Arundhatī with the next two verses (M. I, 9, 6-7), according to the characteristics (contained in those verses).

▼ हरदत्तः

उदितेषु नक्षत्रेष्विति वचनात्ततः प्राक् तस्मिन्नेव चर्मणि वाग्यतयोरासनं पश्चादुपनिष्क्रमणम् । उदितेष्वित्येव सिद्धे नक्षत्रग्रहणं विस्पष्टार्थम् । **उत्तराभ्यां** "ध्रुवक्षिति" "सप्तर्षयः" इत्येताभ्याम् । उभयत्र मन्त्रेण दर्शनं वध्वाः कर्म, वरस्तु पश्यन् ध्रुवमिति निर्दिश्य पूर्वां वाचयति पश्चादरुन्धतीमित्त्युत्तराम् । ततो वाग्विसर्गः । मन्त्रलिङ्गादेव यथालिङ्गदर्शने सिद्धे यथालिङ्गवचनं विकल्पार्थम् । उत्तराभ्यां ध्रुवमरुन्धतीञ्च दर्शयति यथालिङ्गं वेति । तेनोत्तरस्यामृचि सर्वेषां सप्तर्षीणां कृत्तिकादीनामरुन्धत्याश्च सहदर्शनं वध्वाः कर्म पक्षे भवति, केवलमरुन्धत्या एव वा ॥१२॥

▼ सुदर्शनः

उत्तराभ्यां "ध्रुवक्षितिर्ध्रुवयोनिः" इत्येताभ्यां यथालिङ्गं पूर्वया ध्रुवमुत्तरयाऽरुन्धतीं च दर्शयति वधूम् । यथालिङ्गमिति च जातकर्मवद् द्वाभ्यां द्वाभ्यामेकैकं मा भूदिति ॥ केचित्– यथालिङ्गमित्यत्र नास्ति, प्रयोक्तॄणां प्रमादात् प्रदेशान्तरदृष्टमिह सञ्चरितपठितमिति ॥ अपरे– उत्तराभ्यां यथाक्रमं ध्रुवमरुन्धतीं च दर्शयति; यथालिङ्गं वा इति भित्वा सूत्रं साध्याहारं व्याचक्षते । "सप्तऋषयः प्रथमाम्" इत्येतया सप्तऋषीन् कृत्तिका अरुन्धतीं च सह दर्शयति । अरुन्धतीमेव वेति विकल्पार्थं यथालिङ्गवचनमिति ॥१२॥

द्वितीये पटले सिद्धं यथाभाष्यं यथामति । कृतं सुदर्शनार्येण गृह्यतात्पर्यदर्शनम् ॥ इति श्रीसुदर्शनाचार्यकृते गृह्यतात्पर्यदर्शने षष्ठः खण्डः ॥ ॥ द्वितीयः पटलश्च समाप्तः ॥

▼

⑤

>

उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य उत्तराभ्यां यथालिङ्गं ध्रुवमरुन्धतीं च दर्शयति ।

# ०७ ०१ अथैनाम् आग्नेयेन②

अथैनाम् आग्नेयेन स्थालीपाकेन *(वर ऋत्विग् इव)* याजयति *(अथेति वचनादेतस्यामव रात्र्यां स्थालीपाको भवति ।)*॥

▼

⑤

>

▼ Oldenberg

1. 8 He then makes her offer the sacrifice of a Sthālīpāka sacred to Agni.

▼ हरदत्तः

अथेति वचनाद् एतस्याम् एव रात्र्यां स्थालीपाको भवति ।

स्थाल्यां पच्यत इति स्थालीपाकः । तस्य देवताविधानं–आग्नेयेनेति ।

ननु–विधास्यते "अग्निर्देवता स्वाहाकारप्रदान" इति? सत्यम्, अपरम् अपि तत्र भवति – अग्नि-स्विष्टकृत् द्वितीय इति । ततश् च स एव यदि देवताविधिः स्यात् द्विदेवत्यम् इदं हविः स्यात् । ततश् च निर्वपण-काले ताभ्याम् उभाभ्यां सङ्कल्पः क्रियेत । यद्य् अपि वस्तुतो गुणभूतः स्विष्टकृद्-यागः, तथापि प्रधानवत् तत्र चोद्यते– "अग्नि-स्विष्टकृद्-द्वितीय" इति । ततश् च तस्मा अपि सङ्कल्पः क्रियेत । तस्मात् केवलोऽयमाग्नेयस्थालीपाक इति ।

(वक्तव्यम् । एवम् आग्नेयस्यैव प्रदानस्य) यद्य् अप्रत्तदैवतम् इत्येतत् प्रायश्चित्तं भवति । स्विष्टकृतस्तु प्रत्त-दैवमित्य् एतदेव ।

"एनां याजयती"ति वचनात् सहत्वम् उभयोर् अस्मिन् कर्मणि नास्ति । वध्वा एवेदं कर्म, वरस्य त्व् आर्त्विज्यम् एव । तेन यद् इदं स्थालीपाकरिवेषणं*(??)* व्रीह्यादि-दक्षिणा च तत् वधूधनस्यैव भवति । यत्रैदम् उच्यते "पत्नी हि पारीणह्यस्येशे" इति (तै.सं.६-१-६.) ॥१॥

▼ सुदर्शनः

ननु–"अथ पत्न्यवहन्ति" "श्रपयित्वा" इत्येतावद् एव वक्तव्यम् ; यत उत्तरत्र "अग्निर् देवता" (आप.गृ. ७-५.) इति विधानाद् आग्नेयत्वं सिद्धम्", स्थालीपाकेनेति तु श्रपयित्वेति विधानात्, एनां याजयतीति चान्वारब्धायाम् इति विधानात् ; अतः किमर्थम् इदम् अधिकम् आरभ्यते "अथैनाम् आग्नेयेन स्थालीपाकेन याजयति" इति ?

उच्येते– सूत्रं तावद् ऋषि-प्रणीतं नानर्थकं भवितुम् अर्हति । तेन लोके व्युत्पत्ति-सिद्धाध्याहारादिभिर् अपि यस् सूत्रस्यार्थस् सम्पाद्यते सोऽपि वेदार्थो ऽनुष्ठेय उच्यते– ध्रुवम् अरुन्धतीं च दर्शयित्वा, अनन्तरं यत्राग्नेयेन स्थालीपाकेन यागं करोति तत्रैवैनां पत्नीं याजयति, पत्न्याम् अन्वारब्धायां जुहोति, न पर्वसु पार्वणविकारेषु च । एवम् अतिदेश-विशेषार्थतया सूत्रम् अर्थवदेव ॥

अन्ये– याजयतीति वचनात् वरादन्योऽप्य् अस्य स्थालीपाकयागस्य कर्तेति ।
तन् न ; प्रकरणेनास्य विवाहाङ्गत्वात् "सहाङ्गं प्रधानम्" (आप. प. २-३९.) इति साङ्गस्य प्रधानस्यैक-कर्तृकत्वात् ॥

केचित्– उत्तरत्र न केवलम् अग्निर् देवतेति विधिः, "अग्निस् -स्विष्टकृत् द्वितीयः" इत्यपि । तेन द्विदैवत्योऽयं स्थालीपाको मा भूत्, किन्त्व् एक-दैवत्य एवेत्य् एवमर्थम् आग्नेयेनेति विधानम् । तेनाग्नेय एव सङ्कल्पितस्य व्रीह्यादेरर्थाक्षिप्तो लौकिको निर्वापः कार्यः ।

"एनां याजयति" इति तु नास्मिन् कर्मण्य् उभयोरधिकारः, किन्तु वध्वा एव । वरस्तु ऋत्विक्-स्थानीयः । तेन होमादौ द्रव्यत्यागस् स्त्रीधनाद् एवेति । तन् न ; वध्व् एकाधिकारे हि प्रकरणावगत-विवाहाङ्गत्व-बाधः, अधिकारसाध्यभेदेन शास्त्रतदर्थयोर्भेदात् । आचारसिद्ध-वर-कर्तृकत्व-बाधापत्तिश् च - अन्यार्त्विज्येऽप्य् अविरोधात् ॥१॥

▼

⑤

>

अथैनाम् आग्नेयेन स्थालीपाकेन याजयति।

# ०७ ०२ पत्न्यवहन्ति②

पत्न्य् अवहन्ति *(व्रीहीन् यवान् वा नवान्। न तु श्रपणादिकमपि। पर्वसु पतिर् एवावहन्यात्।)* ॥

▼

⑤

>
▼ Oldenberg

2. The wife husks (the rice grains out of which this Sthālīpāka is prepared).

▼ हरदत्तः

अरुन्धतीदर्शनानन्तरमगारं प्रविश्य व्रीहीन् यवान् वा नवानग्नये संकल्पितान् निर्वपति यावद्धोमाय ब्रह्मणभोजनाय च पर्याप्तं मन्यते । प्रोक्षणञ्च तूष्णीं संस्कृताभिरद्भिः । ततस्तान् **पत्न्यवहन्ति** । "एना पत्या" इत्यादिवत् सावहन्तीति सर्वनाम्ना निर्देशे कर्तव्ये पत्नीग्रहणं पत्नीकर्मेदं यथा विज्ञायेत । इतरथा याजमानं विज्ञायेत । वधूरिह यजमानेति कृत्वा पार्वणादिषु पत्युरवहननं प्राप्नोति ॥२॥

▼ सुदर्शनः

स्थालीपाकार्थं व्रीह्यादिकम् । "साऽवहन्ति" इति वक्तव्ये "पत्न्यवहन्ति" इत्यधिकाक्षरात् पत्न्यवघातमेव कुर्यात्, न तु श्रपणादिकमपि । तदादिकं वर एव । केचित्– पत्नीत्यारम्भादवहननं पत्नीकर्मैव, न तु यजमानकर्म । यजमानकर्मत्वे हि सहाधिकारे पार्वणादौ पत्युरवहननं स्यात्, तस्य तत्र यजमानत्वात् । अत एव पार्वणादौ नान्वारम्भः ; पत्न्यवहन्तीतिवत् पत्न्यामन्वारब्धायामित्यवचनादिति । मैवम् ; वध्वेकाधिकारस्यैव निरस्तत्वात् ॥ २॥

▼

⑤

>

पत्न्यवहन्ति।

# ०७ ०३ श्रपयित्वाभिघार्य②

श्रपयित्वा ऽभिघार्य प्रचीनम् उदीचीनं वोद्वास्य प्रतिष्ठितम् अभिघार्याऽग्नेरुपसमाधानाद्याज्यभागान्ते ऽन्वारब्धायां स्थालीपाकाज् जहोति ॥

▼

⑤

>
▼ Oldenberg

3. After he has cooked (the Sthālīpāka), and has sprinkled (Ājya) over it, and has taken it from the fire towards the east or the north, and has sprinkled (Ājya) over it while it stands (there near the fire), (the ceremonies) from the putting of wood on the fire down to the Ājyabhāga oblations (are performed), and while she takes hold of him, he sacrifices of that Sthālīpāka.

▼ हरदत्तः

ततस्तानवहतांस्त्रिष्फलीकृतान् प्रक्षाल्य श्रपयति वरः । अग्नेरुपसमाधानादिवचनं तन्त्रविधानार्थं कालविधानार्थं च प्रतिष्ठिताभिघारणान्ते कथं तन्त्रं प्रतिपद्येत, न प्रागिति । तेनाभिघारणमसंस्कृतेनाज्येन भवति । अत्रापि सकृदेव पात्रप्रयोगः । तथा शम्याः विवाहशेषत्वादस्य । नेत्यन्ये ॥३॥ आज्यभागान्तवचनं अन्वारम्भकालोपदेशार्थम् । स्थालीपाकादित्यनर्थकम्, तस्य होमार्थत्वात् । न च वाच्यं ब्राह्मणभोजनार्थं स्थालीपाको, होमस्त्वाज्यादेव प्राप्नोतीति । यागविधानात् देवताविधानाच्च । एवं तर्हि शैलीयमाचार्यस्य-यत्रोभयं हविर्भवत्याज्यञ्चौषधयश्च तत्र प्रधानाहुतिविशेषणं करोति स्थालीपाकादन्नादपूपादाज्याहुतिरिति । तेन यत्र विशेषणं नास्ति तत्रैकमेव हविरिति सिद्धं भवति । तेनाग्रयणे आज्यस्याभावः । ततश्च सकृदुपघातपक्ष एव तत्र भवति, आज्याभावेनोपस्तरणाभिघारणयोरसम्भवात् । विवाहे च "यथा स्थानमुपविश्ये"त्यत्र आज्याहुतिरिति विशेषणाभावादाज्यमेव तत्र धर्मवद्धविः, लाजास्त्वधर्मका इति सिद्धम् ॥३॥

▼ सुदर्शनः

उद्वास्य सौकर्यादपरेणाग्निं प्रतिष्ठाप्य । प्रतिष्ठितमभिघारयति । ओषधिहविष्केऽप्यत्र तन्त्रविधानं क्रमार्थमित्युक्तमेव । "आज्यभागान्तेऽन्वारब्धायाम्" । उपस्तरणप्रभृत्यन्वारम्भः प्रधानहोमान्तम् ॥३॥

▼

**⑤**

>

श्रपयित्वाभिघार्य प्राचीनमुदीचीनं वोद्वास्य प्रतिष्ठितमभिघार्याग्नेरुपसमाधानाद्याज्यभागान्तेऽन्वारब्धायां स्थालीपाकाज्जुहोति।

# ०७ ०४ सकृदुपस्तरणाभिघारणे②

सकृदुपस्तरणाभिघारणे द्विरवदानम् ॥

▼

**⑤**

>

▼ Oldenberg

4. The 'spreading under' and the sprinkling over (of Ājya are done) once; two Avadānas (or cut-off portions are taken).

▼ हरदत्तः

अनेन पौरोडाशिकोऽवदानकल्प इह प्रदर्शितो विज्ञेयः । "तस्मादङ्गुष्ठपर्वमात्रम्" ( आप. श्रौ. २-१८-९.) इत्याद्यपि भवति । पञ्चावत्तञ्च पञ्चावत्तिनाम् । प्रत्यभिघारणं च हविषः लाजावदानवत् । उपस्तीर्य द्विरवदाय द्विरभिघारयतीति वक्तव्ये सकृद्वचनमुपस्तरणाभिघारणयोश्चतुरवत्तसंपादनार्थतां ज्ञापयितुम् । तेन चतुरवत्ताभावे उपस्तरणाभिघारणयोरप्यभावः । यथा "सकृदुपहत्य जुहुयात्" (आप.गृ. ७-७.) "दध्न एवाञ्जलिने" (आप. गृ. २२-१०.)त्यादौ ॥४॥

▼ सुदर्शनः

होमदर्व्यां स्रुवेण दर्व्यन्तरेण वा सकृदुपस्तरणं कार्यम् । ततश्चरोर्द्विरवदानम् । त्रिर्जमदग्नीनाम्, सकृच्चाभिघारणम् । ततः स्विष्टकृदर्थं चरोः प्रत्यभिघारणम् । अस्यैष्टिकावदानविधिप्रदर्शनार्थत्वादाचाराच्च ॥४॥

▼

⑤

>

सकृदुपस्तरणाभिघारणे द्विरवदानम्।

# ०७ ०५ अग्निर्देवता स्वाहाकारप्रदानः②

*(त्रिर्जमदग्नीनाम्।)* अग्निर्देवता स्वाहाकारप्रदानः॥

▼

⑤

>

▼ Oldenberg

5. Agni is the deity (of the first oblation); the offering is made with the word Svāhā.

▼ हरदत्त-प्रस्तावः

देवतामाह–

▼ हरदत्तः

प्रधानद्वित्वादुत्तरविवक्षया सिद्धानुवादोऽयम् । अग्निरेव देवता पूर्वस्य होमस्य येयमाग्नेयेनेति विहिता । उत्तरस्यान्या विधीयत इति ॥६॥ स्वाहाकारेण प्रदानं प्रक्षेपो यस्मिन् स**स्वाहाकारप्रदानः ।** स्थालीपाकस्य होमः । अविशेषात् पूर्वश्चोत्तरश्च । तत्र स्वाहाकारसंयोगाद्देवताशब्दश्चतुर्थ्यन्तो भवति– अग्नये स्वाहा, अग्नये स्विष्टकृते स्वाहेति । "जुहोतिचोदनः स्वाहाकारप्रदानः" (आप. प. ३-४.) इत्येव सिद्धे वचनमिदं कल्पान्तरेषु केषुचित् मन्त्रेण प्रदानञ्चोदितम्" अमुष्मै स्वाहेति जुहुयात्, ऋचा वा तद्देवतया" इति "पुरोनुवाक्यामनूच्य याज्यया जुहुयाद्" इति च तत्प्रतिषेधार्थम् । एवमपि "स्थालीपाकाज्जुहोत्यग्नये स्वाहेत्येव वक्तव्यं" स्विष्टकृति च स्विष्टकृते स्वाहेति । इदं तु वचनं पार्वणातिदिष्टेषु यथोपदेशं देवता इत्यत्र मन्त्रप्रतिषेधार्थम् । तेन "पौर्णमास्यां पौर्णमासी" (आप. गृ. ७-२८.) इत्येवमादिषु यत्र स्थालीपाकस्य देवतैव चोद्यते तत्र देवताशब्देनैव होमः, न तद्दैवत्येन मन्त्रेणेति सिद्धम् ॥५॥

▼ सुदर्शनः

अग्निर्देवतेति विहिताग्निविशेषणार्थमयं परिभाषोक्तानुवादः । कथं विशेष्यते? इति चेत्, सोऽग्निस्स्वाहाकारप्रदानश्चेद्देवता, स्वाहाकारयोग्यया चतुर्थ्या विभक्त्या युक्तश्चेदित्यर्थः । ननु "अन्वारब्धायामग्नये जुहोति" इति वक्तव्ये किमर्थमधिकाक्षरं "अग्निर्देवता स्वाहाकारप्रदानः" इत्युपदिश्यते? उच्यते–शब्दो देवता, नार्थः ; अर्थोऽपि यागे चोदितचतुर्थ्यन्तस्ववाचकशब्देनैवोपकरोति, अर्थस्योद्देष्टुमशक्यत्वात् ; उपकारान्तरस्य च दुर्निरूपत्वादिति मीमांसकमतमिह नाभिमतम् ; अर्थ एव देवतेति स्वमतज्ञापनार्थम् । कथमिति चेत्? कर्मणि प्रयोगानर्हस्य प्रथमान्तस्याग्निशब्दस्य प्रयोगात् । नन्वर्थस्य देवतात्वे सत्यप्युकारश्शब्देनैवेति नानुष्ठाने विशेषः । मैवम् ; न केवलं चतुर्थ्यन्तशब्दोच्चारणमेवानुष्ठेयम्, किन्त्वर्थस्य ध्यानमपीति । अत्र तु ज्ञापकं "आग्नेया इति तु स्थितिः" ( निरु. ८-३-७.) इत्यादि निरुक्तकारवचनम् ॥ केचित्– कल्पान्तरेषु "अमुष्मै स्वाहेति जुहुयात् ऋचा वा तद्दैवत्यया" इति विकल्पः चोदितः । स माभूदस्माकम् । पार्वणेषु तद्विकारेषु च "अमुष्मै स्वाहा" इत्येव जुहुयादित्येवमर्थमिति ॥ ५॥

▼

⑤

>

अग्निर्देवता स्वाहाकारप्रदानः ।

# ०७ ०६ अपि वा②

अपि वा सकृदुपहत्य जुहुयात् ॥

▼

⑤

>
▼ Oldenberg

6. 9 Or he may sacrifice after having picked out, once, a portion (of the sacrificial food with the Darvi spoon).

▼ हरदत्तः

यया दर्व्या होमस्तयैव **सकृदुपहत्य** जुहुयात् । अत्र पक्षे उपस्तरणाभिघारणयोरप्यभाव इति सिद्धम् । केचित् कुर्वन्ति । जुहुयादिति वचनं स्विष्टकृत्यपि प्राप्यत्यर्थम् ॥६॥

▼ सुदर्शनः

अथवा दर्व्या सकृत् स्थालीपाकाद्गृहीत्वा जुहुयात्, न तु पूर्ववच्चतुरवत्तं पञ्चावत्तं वा अपूर्वत्वाद्दर्विहोमानाम् ॥६॥

▼

⑤

>

अपि वा सकृदुपहत्य जुहुयात् ।

# ०७ ०७ अग्निस्स्विष्टकृद् द्वितीयः②

अग्निस्स्विष्टकृद् द्वितीयः।

▼

⑤

>
▼ Oldenberg

7. Agni Sviṣṭakṛt is the second (deity).

▼ हरदत्तः

**अग्निः स्विष्टकृद् द्वितीयो** भवति देवतात्वेन । द्वितीयवचनं पूर्वेण तुल्यधर्मत्वज्ञापनार्थम् । तेन "यथोपदेशं प्रधानाहुतीर्" इत्यादौ स्विष्टकृतोऽपि ग्रहणं भवति । तथा "सकृदुपहत्य जुहुयात्" "स्वाहाकारप्रदान" इत्येतयोश्च प्रवृत्तिः ॥७॥

▼ सुदर्शनः

देवतेति शेषः । स्थालीपाकशेषात् द्वितीयो होमः कर्तव्यः । तस्मिन् अग्निस्स्विष्टकृद्देवतेत्यर्थः । अर्थसिद्धेऽपि द्वितीये "द्वितीय" इति ग्रहणे प्रयोजनं "सदसस्पतिर्द्वितीयः" (आप. गृ. ८-२.) इत्यत्र वक्ष्यते । केचित्– पूर्वहोमेन तुल्यधर्मत्वज्ञापनम् । तथा च सति "यथोपदेशं प्रधानाहुतीः" इत्यत्र स्विष्टकृतमपि हुत्वा जयादीत्येवमादि भवेदिति ॥७॥

▼

⑤

>

अग्निस्स्विष्टकृद् द्वितीयः।

## ०७ ०८ सकृदुपस्तरणावदाने②

सकृदुपस्तरणावदाने द्विरभिघारणम् *(जमदग्नीनां तु द्विरवदानम् ।)* ॥

▼

⑤

>

▼ Oldenberg

8. (At the Sviṣṭakṛt oblation) the 'spreading under' and taking an Avadāna are done once, the sprinkling over (of Ājya) twice.

▼ हरदत्त-प्रस्तावः

अस्य त्ववदानविधिमाह–

▼ हरदत्तः

अत्रापि पौरोडाशिकस्विष्टकृतोऽवदानकल्पः प्रदर्शितो विज्ञेयः । "तेन द्विः पञ्चावत्तिनः उत्तरमुत्तरं ज्यायांसम्, न हविः प्रत्यभिघारयति" (आप. श्रौ.२-२१-३,४,५.) इति विशेषाः इहापि द्रष्टव्याः ॥८॥

▼ सुदर्शनः

सकृदुपस्तरणमवदानं च द्विरभिघारणं च कार्यम् । जमदग्नीनां तु द्विरवदानम् । अवदानं दैवताज्ज्यायः । नापि हविःप्रत्यभिघारणम् ; ऐष्टिकसौविष्टकृतावदानविधिप्रदर्शनार्थत्वात्, आचाराच्च ॥८॥

▼

⑤

>

सकृदुपस्तरणावदाने द्विरभिघारणम्।

## ०७ ०९ मध्यात् पूर्वस्यावदानम्②

मध्यात् पूर्वस्यावदानम् ॥

▼

⑤

>

▼ Oldenberg

9. The Avadāna for the first deity (is taken) out of the middle (of the Sthālīpāka);

▼ हरदत्तः

**पूर्वस्य** प्रधानहोमस्येत्यर्थः । उपघातपक्षार्थं वचनम् । चतुरवत्तपक्षे तु पौरोडाशिकत्वात् सिद्धम्, ननु तत्रापि "पूर्वार्धाद्द्वितीयं पश्चार्धात् तृतीयम्" इत्येतयोर्देशविशेषयोः प्रतिषेधार्थं स्यात् । यद्येवं उत्तरार्धादुत्तरस्येति स्विष्टकृति नारब्धव्यं, विशेषाभावात् । तस्मात् चतुरवत्तपक्षे पौरोडाशिक एव विधिः । इदं तु वचनमुपघातपक्षार्थम् ॥९॥

▼ सुदर्शनः

हविषो मध्यात् पूर्वस्य दैवतस्यावदानं कार्यम् । उपघातपक्षार्थ एवायमारम्भः । चतुरवत्तपक्षे त्वैष्टिकविधिप्रदर्शनबलान् मध्यादङ्गुष्ठपर्वमात्रावदानम् । "तिरश्चीनमवद्यति पूर्वार्धाद् द्वितीयमनूचीनं चतुरवत्तिनः, पश्चार्धात्तृतीयं पञ्चावत्तिनः" (आप. श्रौ. २-१८-९.) इत्यवदानस्थानसिद्धेः । एतेनोपघातपक्षे चतुरवत्तधर्म उपस्तरणादिर्न प्रवर्तते इति दर्शयति ॥९॥

▼

⑤

>

मध्यात् पूर्वस्यावदानम्।

# ०७ १० मध्ये होमः②

मध्ये होमः ॥

▼

⑤

>

▼ Oldenberg

10. It is offered over the centre (of the fire).

▼ हरदत्तः

आघारसम्भेदो **मध्यम् ।** अत्रापि पौरोडाशिक एव होमदेशो दर्शितो विज्ञेयः । तेनाहुतीनामनेकत्वे "पूर्वां पूर्वां संहिताम्" (आप. श्रौ.२-१९-९.) इत्येवमादयो विशेषा इहापि भवन्ति ॥१०॥

▼ सुदर्शनः

**होमः** प्रक्षेपः । दैवतस्य अग्नेर् **मध्ये** आघारसम्भेदे । प्रधानाहुतिबहुत्वे "पूर्वां पूर्वां संहिताम्" (आप. श्रौ.२-१९-९.) इति च भवति । अयं तूभयपक्षार्थः ॥१०॥

▼

⑤

>

मध्ये होमः।

# ०७ ११ उत्तरार्धादुत्तरस्य②

उत्तरार्धादुत्तरस्य ॥

▼

⑤

>

▼ Oldenberg

11. (The Avadāna) for the second (deity is taken) from the northern part (of the Sthālīpāka);

▼ हरदत्तः

अयमप्युपघातपक्षार्थ आरम्भः ॥११॥

▼ सुदर्शनः

उत्तरार्धाद्धविष उत्तरस्य स्विष्टकृत अवदानं कार्यम् । अयमपि पूर्ववदुपघातपक्षार्थ एव ॥११॥

▼

⑤

>

उत्तरार्धादुत्तरस्य।

# ०७ १२ उत्तरार्धपूर्वार्धे होमः②

उत्तरार्धपूर्वार्धे होमः ॥

▼

⑤

>

▼ Oldenberg

12. It is offered over the easterly part of the northerly part (of the fire).

▼ हरदत्तः

अत्रापि पौरोडाशिकस्य स्विष्टकृतो धर्मो विज्ञेयः । तेना"संसक्तामितराभिर्" (आप. श्रौ. २-२१-६.) इति विशेष इहापि भवति । होमग्रहणे आश्रिमाणे उत्तरार्धपूर्वार्ध इत्यस्य लेपयोः प्रस्तरवदित्त्युत्तरेणापि सम्बन्धस्सम्भाव्येत ॥१२॥

▼ सुदर्शनः

तस्य स्विष्टकृतो **होमो**ऽग्नेर् **उत्तरार्धपूर्वार्धे** । अस्यापि प्रदर्शनार्थत्वात् "असंसक्तामितराभिराहुतिभिः" (आप. श्रौ. २-२१-६.) इत्यपि भवति ॥१२॥

▼

⑤

>

उत्तरार्धपूर्वार्धे होमः।

# ०७ १३ लेपयोः प्रस्तरवत्②

लेपयोः प्रस्तरवत्तूष्णीं बर्हिरङ्क्त्वा ऽऽग्नौ प्रहरति ॥

▼

⑤

>

▼ Oldenberg

13. 10 Having silently anointed (a part of) the Barhis (by dipping it) into the remains both (of the Sthālīpāka and the Ājya) in the way prescribed (in the Śrauta ritual) for the (part of the Barhis called) Prastara, he throws (that part of the Barhis) into the fire.

▼ हरदत्त-प्रस्तावः

होमोपस्तरणाद्यर्थदर्वीद्वयलेपयोः पात्रप्रयोगार्थं संस्तीर्णस्य च वर्हिषः प्रतिपत्तिमाह—

▼ हरदत्तः

यस्मिन् बर्हिषि प्रतिष्ठितं हविराज्यं च तस्मात् किञ्चिदुपादाय तद्बर्हिरन्नस्य चाज्यस्य च यौ लेपौ तयोः प्रस्तरवत् तूष्णीमङ्क्त्वा प्रस्तरवदेव तूष्णीमग्नौ प्रहरति । अत एव प्रतिपत्तिविधानादपरेणाग्निं बर्हिषः स्तरणं भवति । हविषश्च तत्रासादनम् । कल्पान्तरे च स्पष्टमेतत् । शृतानि हवींष्यभिघार्य उदगुद्वास्य बर्हिष्यासाद्येति । केचिदग्निपरिस्तरणादञ्जनं मन्यन्ते । प्रस्तरवदिति वचनात् त्रिषु स्थानेष्वञ्जनं भवति । तत्र चतुरवत्तपक्षे यया होमः तस्यामग्रस्य, ययोपस्तरणाभिघारणे तस्यां मध्यस्य, आज्यस्थाल्यां मूलस्य चाञ्जनं भवति । उपघातपक्षे तूपस्तरणाभिघारणार्थाया दर्व्या अभावादाज्यस्थाल्यां मध्यस्य मूलस्य चरुस्थाल्याम् । अक्तस्य तृणमपादायेत्येतदपि भवति । तथा यया होमस्तस्यां प्रतिष्ठापनं च आग्नीध्रकर्म च स्वयमेव करोति ॥१३॥

▼ सुदर्शनः

**लेपयोः** दर्वीद्वयलग्नयोः पात्रासादनार्थं संस्तीर्णं **बर्हिः** प्रस्तरवत्तूष्णीमङ्क्त्वा तद्वदेवाग्नौ प्रहरति । इदमपि प्रदर्शनार्थम् । तेनाञ्जनादिसंस्रावान्तं श्रौतवत्तूष्णीं करोति । ननु–प्रस्तरवदितीहानुपपन्नम् । बर्हिषोऽग्रमध्यमूलानां द्वयोर्दर्व्योः प्रस्तरवदञ्जनासम्भवात् । उच्यते–होमदर्व्यामग्रमनक्ति, इतरस्यां मध्यमूले; "अन्ताल्लोपौ विवृद्धिवा" (आप. प. ४-१३.) इति वचनाम् । एव त्रिर्द्विर्वा । "अथापरम्" इति पक्षे सकृदेवोपस्तरणाद्यर्थायां मूलं, होमार्थायां मध्याग्रे । अन्ये तु आज्यस्थालीं ध्रुवास्थाने पक्षत्रयेऽपि कुर्वन्ति, अञ्जनस्योपयुक्तपात्रलेपप्रतिपत्त्यर्थत्वात् "इडान्तं वाऽऽहवनीये शंय्वन्तं गार्हपत्ये" (आप. श्रौ. ३-१४-६.) इति पक्षे "आज्यस्थाल्यां मूलम्" (आप.श्रौ. ३-१४-७.) इति दर्शनाच्च । इह तु पक्षे लेपयोरिति द्विवचनमाज्यौषधलेपाभिप्रायम्, न तु पूर्ववदाघारद्वित्वाभिप्रायम् ॥ केचित्— कल्पान्तरादपरेणाग्निं यस्मिन् बर्हिषि हविराज्यं च प्रतिष्ठितं तस्माद्वा, परिस्तरणाद्वा किञ्चिदुपादायाञ्जनमिति । तन्न; कल्पान्तरोक्तबर्हिःप्रतिष्ठापनोपसंहारस्य पाक्षिकत्वेन नित्यत्ववदञ्जनानुपपत्तेः॥१३॥

▼

⑤

>

लेपयोः प्रस्तरवत् तूष्णीं बर्हिरङ्क्त्वाग्नौ प्रहरति ।

# ०७ १४ सिद्धमुत्तरम् परिषेचनम्②

सिद्धमुत्तरं परिषेचनम् *(= अनेनोपहोमा भवन्तीति केचिन्, नेत्यन्ये)*॥

▼

⑤

>

▼ Oldenberg

14. 11 (The rule regarding) the second sprinkling (of water round the fire) is valid (here).

▼ हरदत्त-प्रस्तावः

अत्र वचनाभावात् जयादिनिवृत्तौ सत्यां तद्बद्धक्रममपि परिषेचनं न निवर्तते, अग्नयङ्गत्वादित्याह—

▼ हरदत्तः

**उत्तरं** तन्त्रं जयादि यथासिद्धमत्रापि कर्तव्यमित्यर्थः । कथं च सिद्धम्? उपजुहोतीतिवचनात् । प्रधानहोमानन्तरं तेनोपहोमानामुपरिष्टाद्बर्हिषोऽनुप्रहरणं भवति । अन्यथा प्रधानहोमानन्तरमुपदेशादुपहोमानां पुरस्तादनुप्रहरणं स्यात् ॥१६॥ अत्र कृत्वेत्यध्याहर्तव्यम् । **परिषेचनं कृत्वा** परिषेचनान्तं कृत्वेत्यर्थः । किमर्थमिदम् ? परिषेचनान्ते ब्राह्मणभोजनाद्येव कर्म प्रतिपाद्येत नान्यदित्येवमर्थम् । अन्ये तु सिद्धमुत्तरं परिषेचनमित्येकमेव योगं पठन्तो व्याचक्षते । तेनेह स्थालीपाके प्रधानहोमानन्तरं तन्त्रशेषस्य प्राप्तस्य परिषेचनमेव सिद्धमन्यदसिद्धमिति । तेनोपहोमानामिह लोपश्चोद्यत इति । तेषाम् "उत्तरम्" इति व्यर्थम् ॥१४॥

▼ सुदर्शनः

स्पष्टमेतत् । ततः प्रणीताविमोकोऽपि । केचित्– सिद्धमुत्तरमिति पदद्वयमेकं वाक्यम् । सिद्धमविकृतम् । **उत्तरं** तन्त्रशेषं जयादि । एताच्चेहोत्कृष्य पठितमपि "यथोपदेशं प्रधानाहुतीर्हुत्वा जयाभ्यातानान्" (आप.गृ. २-७.) इति श्रौतक्रमस्य बलीयस्त्वात् प्रधानतुल्यधर्मकस्विष्टकृतोऽनन्तरमेव । तथा "परिषेचनम्" इत्यप्यानन्तर्यविध्यर्थम् । परिषेचनान्तं कृत्वा ब्राह्मणभोजनमेवेति । तन्न ; सिद्धमुत्तरं परिषेचनमिति प्रतीताभ्यर्हितसामानाधिकरण्यान्वयबाधने महादोषवाक्यभेदकल्पनापेक्षत्वात् । तथा वचनाभावादिह जयाद्येव नास्ति, दूरे क्रमबलाबलकथा । तथा "परिषेचनम्" इत्यस्यापि सिद्धमुत्तरमित्येतदन्वयनिराकाङ्क्षत्वात् कृत्वेत्यध्याहारो निर्बीजः । आनन्तर्यं तु पाठप्राप्तं न विधेयमेव । तस्माद्वरं यथोक्तशङ्कानिवृत्त्यर्थमेवेदं सूत्रमिति ॥१४॥

▼

⑤

>

सिद्धमुत्तरं परिषेचनम् ।

# ०७ १५ तेन सर्पिष्मता②

तेन सर्पिष्मता ब्राह्मणं भोजयेत् ॥

▼

⑤

>

▼ Oldenberg

15. He gives (the remains of) that (sacrificial food) with butter to a Brāhmaṇa to eat -

▼ हरदत्तः

**सर्पिष्मतेति** वचनमतिशयार्थमभिघारणेन प्रागपि सर्पिष्मत्वात् । लौकिकेन सर्पिषा प्रभूतेनोपसिच्येत्यर्थः । यो दक्षिणत आस्ते स इह ब्राह्मणः तं भोजयेत् वधूर्वरो वा ॥१५॥

▼ सुदर्शनः

**तेन** हविश्शेषेण । **सर्पिष्मता** प्रभूतलौकिकाज्योपसिक्तेन । **ब्राह्मणं** दक्षिणतो दर्भेषु निषादितं **भोजयेत्** तस्येह प्रकृतत्वात् । इह तु सर्पिष्मतेति मतुबतिशयार्थः । भोजयेदिति बलाच्च होमब्राह्मणभोजनायालं चरुः कार्यः ॥१५॥

▼

⑤

>

तेन सर्पिष्मता ब्राह्मणं भोजयेत्।

# ०७ १६ योऽस्यापचितस्तस्मा ऋषभम्②

योऽस्यापचितस् तस्मा ऋषभं ददाति *(वराय याजकेन न दक्षिणा वध्वा देयेति भावेन, तत्प्रतिनिधिः)*॥

▼

⑤

>

▼ Oldenberg

16. 12 Whom he reveres. To that (Brāhmaṇa) he makes the present of a bull.

▼ हरदत्तः

**अस्य** वरस्य **योऽपचितः** पूज्यः आचार्यः, **तस्मै ऋषभं** स्थालीपाकस्य दक्षिणां **ददति** वधूः । स्वकुलादानीयर्त्विजे वराय दातव्या सती दक्षिणा जायापत्योः अन्योन्यदानप्रतिग्रहाभावात् तदाचार्याय चोद्यते । तेनासौ परिक्रीतो भवति । दृश्यते चायं न्यायो धर्मशास्त्रे– "न पिता याजयेत् पुत्रं न पुत्रः पितृयाजनम्" इत्याद्युक्त्वा ऽऽचार्याय दक्षिणां दद्युरिति ॥१६॥

▼ सुदर्शनः

अत्रोच्यते– एवं तर्ह्यध्याहारेण वा विपरिणामेन वा व्याख्यायते । योऽस्यात्मनोऽपचितः पूज्यः तस्मा ऋषभं ददाति । यद्वा योऽस्य स्थालीपाकयागस्य कर्तुरपचितस्तस्मा एतद्यागकर्ता ऋषभं ददाति, न तु स्थालीपाकयागान्तराणां कर्ता; तेषामपूर्वत्वात् । अथवा– अस्येति षष्ठ्या अयमिति विपरिणामः । योऽयं लोके विद्याभिजनादिसम्पत्त्या अपचितः तस्मा अयमेतत्स्थालीपाककर्ता ऋषभं ददाति । सर्वथा त्वेतद्विकृतिष्वपि स्थालीपाकान्तरेषु ऋषभदानं नास्त्येव ॥१६॥

▼

⑤

>

योऽस्यापचितस्तस्मा ऋषभं ददाति।

# ०७ १७ एवमत ऊर्ध्वम्②

एवम् अत ऊर्ध्वं दक्षिणावर्जम् उपोषिताभ्यां पर्वसु कार्यः ॥

▼

**⑤**

>

▼ Oldenberg

17. In the same way, with the exception of the sacrificial gift, they should sacrifice a Sthālīpāka from then onwards, on the days of the new and full moon, after having fasted.

▼ हरदत्तः

**अतः** स्थालीपाकाद् **ऊर्ध्वं** दक्षिणां वर्जयित्वा **उपोषिताभ्यां** "पर्वसु चोभयोरुपवास, (आप.ध.२-१-४.) इत्यनेन प्रकारेण कृतोपवासाभ्यां गृहमेधिभ्यां **पर्वसु** पौर्णमासीषु चामावास्यासु च एवमेवाग्नेयस्थालीपाककल्पेन स्थालीपाकः कार्यः । कल्पातिदेशोऽयम्–पर्वसु स्थालीपाकः कार्यः, तस्य च "आग्नेयेन स्थालीपाकेन याजयति" इत्येवमादिः तस्मा ऋषभं ददाति "इत्येवमन्तः कल्प इत्यर्थः । 'अत्रोपोषिताभ्याम्' इति द्विवचननिर्देशादुभावप्यधिकारिणौ तत्र तु पत्न्येव । दक्षिणा चेह नास्तीत्येतावान् विशेषः । तत्र पार्वणे विवाहनिमित्ता विशेषाः सकृत्पात्राणि शम्या इत्यादयो न कर्तव्याः । अन्वारम्भोऽपि न कर्तव्यः, यजमानकर्मत्वात् । अत्र चोभयोर्यजमानत्वात् । अस्तु तर्ह्यन्यो याजयिता, अन्वारम्भश्चोभयोः । तदपि न, ज्ञापकात् । यदयं हृदयसंसर्गान्वारम्भं विदधाति तत् ज्ञापयति न पार्वणादिष्वन्वारम्भो भवतीति । अन्यथा पार्वणातिदेशादेवान्वारम्भः सिद्धस्स्यात् । "पाणिग्रहणादधि गृहमेधिनोर्व्रतम्" इत्यादौ साङ्गं विवाहकर्म विवक्षितम् । तेन संवेशनान्ते विवाहकर्मणि निष्ठिते पञ्चमहायज्ञादीनां गृहस्थधर्माणां प्रवृत्तिः । पार्वणस्थत्वस्य प्रागपि संवेशनात् स्यात् । पाकादूर्ध्वं पर्वप्राप्तौ प्रवृत्तिर्भवति । तदर्थमाह– अत ऊर्ध्वमिति । तस्य च पौर्णमास्यामुपक्रमो नामावास्यायाम् । श्रौतयोस्तथा दर्शनात् । तत्स्थानापन्नत्वाच्चानयोः । छन्दोगाश्चामनन्ति–अमावास्या चेत् पूर्वमापद्यते पौर्णमासेनेष्ट्वाथ तत् कुर्यात् । अकृत्वा पौर्णमासीमाकाङ्क्षेदित्येके' (खा.गृ. २-१-२.) इति । "पर्वसु चोभयोरुपवास" इत्येव सिद्धे उपोषिताभ्यामिति वचनमस्मिन् कर्मणि उभयोरप्यधिकारप्रदर्शनार्थम् । एवमप्युभाभ्यामित्येव वक्तव्यं नोपोषिताभ्यामिति । तस्मात् पर्वसु चोभयोरुपवास इति प्राप्तमुपवासं प्रकृत्यंशेनानूद्य द्विवचनेन द्वयोरधिकारः प्रदर्श्यते– उपोषिताभ्यामिति । तेन यजनीयेऽहन्येव स्थालीपाकस्सिद्धो भवति । पञ्चदश्यां पूर्वेद्युः कर्म । तथा चाश्वलायनः– "अथ पार्वणस्थालीपाकः । तस्य दर्शपूर्णमासाभ्यामुपवासः । इध्माबर्हिषोश्च सन्नहनम्" (आश्व. गृ. १-१०-१,२,३.) इति । उभाभ्यां पर्वसु कार्य इत्युच्यमाने पर्वस्वेव स्थालीपाकस्स्यात्, उपवासश्च, निर्देशतुल्यत्वात् ॥१७॥

▼ सुदर्शनः

**अतः** स्थालीपाकाद्** ऊर्ध्वं उपोषिताभ्यां** "पर्वसु चोभयोरुपवासः" (आप. ध. २-१-४.) इत्यादिविधिना कृतोपवासाभ्यां जायापतिभ्यां **पर्वसु** पौर्णमासीष्वमावास्यासु च द्वितीयासु **दक्षिणावर्जं** ऋषभदानवर्जं **एवम्** एवंप्रकार एतत्स्थालीपाकसदृशो होमः कर्तव्य इति विधिः । धर्मशास्त्रे तु "श्वोभूते स्थालीपाकः" (आप. ध.२-१-१०.) इत्युपवासादिधर्मसम्बन्धार्थोऽनुवादः । सादृश्यं चात्र द्रव्यदेवतादिसमस्तधर्मनिबन्धनम् । यथा "एतस्यैव रेवतीषु" (ताण्ड्य. ब्रा. १७-८-१.) इति, यथा वा "मासमग्निहोत्रं जुहोति" इति । तत्र तु "एतस्य" "अग्निहोत्रम्" इति पदाभ्यां, इह तु एवंपदेनेति भेदः । ननु–दर्वीहोमेष्वतिदेशो नास्ति, अपूर्वत्वात्तेषाम् । सत्यम्, नास्ति चोदनालिङ्गात्, वचनात्त्वतिदेशः केन वार्यते ? केचित्– नायं धर्मातिदेशः, सौर्यादिष्विव हविर्दैवतस्यानुपदेशात् । अतः कल्पातिदेश एव; "श्वोभूतेऽन्वष्टका, तस्या मासिश्राद्धेन कल्पो व्याख्यातः" इतिवदिति । नैतत् । हविर्दैवतस्यानुपदेशेऽपि "मासमग्निहोत्रं जुहोति" इत्यादिषु धर्मातिदेशस्य दृष्टत्वात् ॥ अपरे तु– एकस्य तूभयत्वे संयोगपृथक्त्वम् (जै. सू. ४-३-५.) इति न्यायेन प्रकृतस्यैव स्थालीपाकस्य "एवं पर्वसु कार्यः" इत्याधिकारान्तरसम्बन्धविधिरिति । एतदपि न; एवं सति "एष कार्य" इति सूत्रं स्यात्, "नत्वेवं कार्य" इति । किञ्च पर्वस्वन्वारम्भोऽपि स्यात् ; यतस्समस्तधर्मकस्यैव प्रकृतकर्मणोऽधिकारान्तरविध्युपगमः । धर्मातिदेशे तु यथा नान्वारम्भस्तथोक्तमेव "अथैनामाग्नेयेन" इति सूत्रमतिदेशविशेषार्थमिति वदता भाष्यकारेण । अत्र च "अत ऊर्ध्वम्" इति वचनं विवाहमध्येऽपि पर्वारम्भार्थम् । यद्यप्यत ऊर्ध्वमित्यविशेषवचनं, तथापि पौर्णमास्यामेवारम्भः । कालैक्येन प्रयोजनैक्यात्, स्थानापत्त्या चास्यामेवारम्भदर्शनात् । व्यक्तं चैतच्छन्दोगानाम् । "अमावास्या चेत् पूर्वमापद्येत पौर्णमासेनेष्ट्वाथ तत्कुर्यात्, अकुर्वन् पौर्णमासीमाकाङ्क्षेदित्येक" इति । तस्मात् स्थालीपाकानन्तरं पौर्णमासी चेत् पूर्वमागच्छेत्, तदा विवाहमध्येऽपि पर्वारम्भः । मासिश्राद्धस्य त्वारम्भश्चतुर्थीहोमान्ते अपरपक्षे; शिष्टाचारात्, बोधायनवचनात्, कर्ममध्ये कर्मान्तरारम्भस्यायुक्तत्वाच्च । तथा वैश्वदेवस्यापि, "तेषां मन्त्राणामुपयोगे द्वादशाहमधश्शय्या" (आप. ध.२-३-१३.) इत्यादिव्रतं सपत्नीकश्चरित्वा प्रशस्तेऽहन्यारम्भः ॥१७॥

▼

**⑤**

>

एवमत ऊर्ध्वं दक्षिणावर्जमुपोषिताभ्यां पर्वसु कार्यः ।

# ०७ १८ पूर्णपात्रस्तु दक्षिणेत्येके②

पूर्णपात्रस् तु *(=१००/ १२८ मुष्टिमात्रम् अन्नम् पात्रे)* दक्षिणेत्येके ॥

▼

⑤

>

▼ Oldenberg

18. Some say that a vessel full (of grain) is the sacrificial gift.

▼ हरदत्तः

पात्रशब्द उभयलिङ्गः । धान्यमुष्टिशतस्य पूर्णं पात्रं **पूर्णपात्रम्** इत्याहुः । दक्षिणा चेयं ब्रह्मणे देया ॥१८॥

▼ सुदर्शनः

धान्यादेः पूर्णं यत्किंचित् पात्रं **पूर्णपात्रम्** । यद्वा– "अष्टमुष्टि भवेत् किञ्चित् किञ्चिच्चत्वारि पुष्कलम् । पुष्कलानि च चत्वारि पूर्णमात्रं प्रचक्षते ॥" इति वचनात् धान्यमुष्टीनां अष्टाविंशत्यधिकं शतं पूर्णपात्रम् । पात्रशब्दश्चोभयलिङ्गः । तुशब्दात् पर्वस्वयं विकल्पो, न वृषभदाने ॥१८॥

▼

⑤

>

पूर्णपात्रस्तु दक्षिणेत्येके।

# ०७ १९ सायम् प्रातरत②

सायं प्रातरत ऊर्ध्वं हस्तेनैते आहुती तण्डुलैर्यवैर्वा जुहुयात् ॥

▼

⑤

>

▼ Oldenberg

19. 13 From then onwards he should offer morning and evening with his hand these two oblations (to Agni and to Agni Sviṣṭakṛt) of (rice) grains or of barley.

▼ हरदत्तः

अस्मात् स्थालीपाकादूर्ध्वं सायञ्च प्रातश्च एते आहुती व्रीहितण्डुलैर्यवैर्वा जुहुयात् । अत ऊर्ध्वमित्यस्य पार्वणवदेव प्रयोजनम् । तेन तस्यामेव रात्रावारम्भः । तस्मादूर्ध्वं दम्पत्योस्सायमशनम् । एते आहुती इत्युच्यते– ये अग्निहोत्राहुती आहिताग्नेस्ते एते इति प्रतिज्ञापनार्थम् । तेन तद्धर्माणामत्रप्रवृत्तिः । यथा "पालाशी समित् द्व्यङ्गुले मूलात् समिधं" (आप.श्रौ.६-१०-४.) इत्येवमादीनां प्रादुष्करणहोमकालयोश्च । तच्चोक्तमाश्वलायनके– तस्याग्निहोत्रेण प्रादुष्करणहोमकालौ व्याख्यातौ (आश्व. गृ. १-९-५.) इत्यादि । हस्तेनेति दर्व्या अपवादः । तन्त्रस्य चानुपदेशादपूर्वत्वम् । परिस्तरणं तु भवत्येव । परिषेचनं त्विहैव विधीयते ॥१९॥

▼ सुदर्शनः

सायं प्रातरित्यग्निहोत्रकालानां चतुर्णामुपलक्षणम् ; अग्निहोत्रानुकारित्वादौपासनहोमस्य । **अत ऊर्ध्वं** स्थालीपाकान्ताद्विवाहादूर्ध्वम्; विवाहस्यैवात्र परमप्रकृतत्वात्, न त्वनन्तरप्रकृतत्वात्पर्वण ऊर्ध्वम्, यतो न प्रासङ्गिकप्रकृतपरामर्शस्स्वरसस्सर्वनाम्नाम् । स्थालीपाकान्तादिति च स्थालीपाकं विधाय, "अत ऊर्ध्वम्" इति वचनात् । अस्य चारम्भोऽनन्तरं रात्रावेव यदि नव नाड्यो नातीताः । अतीताश्चेदपरेद्युस्सायमेवाग्निहोत्रारम्भवेलायाम् । अत्र हस्तेनेत्यादिना कृत्स्नविधानम् । हस्तेनेति विधानाद्दर्व्यादिनिवृत्तिः । तण्डुलैर्यवैर्वेति विधानात् पाकस्य । उभयतः परिषेचनमिति

परिसङ्ख्यानात् पार्वणधर्माणाम् । वैश्वदेवेऽपीत्थमेव व्याख्यानम् । "एते" इति विशेषणादत्रापि द्वितीयाहुतिः स्विष्टकृत्स्थानीत्या अङ्गमित्यर्थः । तेनैतां विस्मृत्य कर्मसमाप्तौ नैषा पुनर्होतव्या । किन्तु सर्वप्रायाश्चित्तमेव ॥१९॥

▼

⑤

>

सायं प्रातरत ऊर्ध्वं हस्तेनैते आहुती तण्डुलैर्यवैर्वा जुहुयात्।

# ०७ २० स्थालीपाकवद्दैवतम् देवतैव②

स्थालीपाकवद्दैवतम् ॥

▼

⑤

>

▼ Oldenberg

20. The deities are the same as at the Sthālīpāka (just described).

▼ हरदत्तः

देवतैव दैवतम् । अग्नये स्वाहेति पूर्वाहुतिः । अग्नये स्विष्टकृते स्वाहेत्युत्तरा ॥२०॥

▼ सुदर्शनः

अयं "एते आहुती" इति प्राप्तस्यानुवादः पूर्वाहुतेर्विकल्पं विधातुम् ; यथा–पात्नीवते "नानुवषट्करोति । अपि वोपांश्वनुवषट्कुर्यात्" ( आप. श्रौ. १३-१४-९,१०.) इति ॥२०॥

▼

⑤

>

स्थालीपाकवद्दैवतम्।

# ०७ २१ सौरी पूर्वाहुतिः②

सौरी पूर्वाहुतिः प्रातरित्येके ॥

▼

⑤

>

▼ Oldenberg

21. Some say that the first oblation in the morning is sacred to Sūrya.

▼ हरदत्तः

**सौरी** सूर्यदेवत्या । सूर्याय स्वाहेति वा पूर्वाहुतिर्भवति । अन्यत् समानम् । तत्र यथाकामी प्रक्रमेत । प्रक्रमात्तु नियम्यते ॥२१॥

▼ सुदर्शनः

**सौरी** सूर्यदेवत्या "सूर्याय स्वाहा" इति पूर्वाहुतिः प्रातर्होमे इत्येके ॥२१॥

▼

⑤

>

सौरी पूर्वाहुतिः प्रातरित्येके।

# ०७ २२ उभयतः परिषेचनम्②

उभयतः परिषेचनं यथा पुरस्तात् ॥

▼

⑤

>

▼ Oldenberg

22. 14 Before and after (those oblations) the sprinkling (of water) round (the fire is performed) as stated above.

▼ हरदत्तः

अस्य होमस्य परिषेचनं **उभयतः** पुरस्तादुपरिष्टाच्च कर्तव्यम्, यथा पुरस्ताच्चोदितम्— अग्निं परिषिञ्चति पूर्ववत् परिषेचमिति ॥२२॥

▼ सुदर्शनः

**उभयतः** एतयोराहुत्योः पुरस्तादुपरिष्टाच्च **परिषेचनं यथा पुरस्ताद्** विहितं "अग्निं परिषिञ्चति" (आप.गृ. २-३.) "पूर्ववत्परिषेचनमन्वमंस्थाः" (आप.गृ. २-८.) इति । पाकयज्ञेषु सप्तसु न विद्युद्वृष्टी । "सैषा मीमाँसाग्निहोत्र एव सम्पन्ना । अथो आहुः । "सर्वेषु यज्ञक्रतुष्विति" (तै. ब्रा. ३-१०-९.) इत्यत्र "तदिदं सर्वयज्ञेषूपस्पर्शनं भवति" (आप. श्रौ. ४-१-७.) इत्यत्र च सर्वशब्देन प्रकृतपरामर्शिना प्रकृतश्रौतसर्वयज्ञानामेव परामर्शात् । अस्मादेव हेतोः "द्विर्जुहोति" (आप. गृ. २-११.) इत्यादिना परिसङ्ख्याय कृत्स्नविधानाच्चाग्निहोत्रिकविधावपि नैव विद्युद्वृष्टी ॥२२॥

▼

⑤

>

उभयतः परिषेचनं यथा पुरस्तात्।

# ०७ २३ पार्वणेनातो ऽन्यानि②

पार्वणेनातो ऽन्यानि *(पक्व-हविर्-युक्तानि स्थालीपाक-पश्वादीनि)* कर्माणि व्याख्यातान्य् - आचाराद् *(→शास्त्रान्तराद् अपि)* यानि गृह्यन्ते २३

▼

⑤

>

▼ Oldenberg

23. 15 By the sacrifice of the new and full moon the other ceremonies have been explained (the knowledge of) which is derived from practice.

▼ हरदत्तः

पर्वसु भवः पार्वणः । तेन **पार्वणेन** स्थालीपाकेनातो ऽस्मात् पार्वणाद् **अन्यानि कर्माणि व्याख्यातानि यान्य् आचाराद् गृह्यन्ते** = ज्ञायन्ते तानि सर्वाणि । अयमपि कल्पातिदेशः ।

योऽयं पार्वणस्य कल्पः "एवम् अत ऊर्ध्वम्" इत्यादिः "पूर्णपात्रस् तु दक्षिणेत्य् एक" इत्येवम् अन्तः - स एव सर्वेषां पाकयज्ञानां कल्प इत्यर्थः । तत्रोपवासः पार्वणाद् अन्यत्र न भवति । पर्वसंयोगेन प्रकरणान्तरे विधानात् उपोषिताभ्याम् इत्य् अस्य चाविधायकत्वात् ।

नन्व् अस्मिन् वैवाहिके धर्मा आम्नाताः पार्वणस्यापि तत एवातिदिष्टाः । ततश् चान्येषाम् अपि तत एवातिदेशः कर्तव्यः । "दक्षिणावर्जं" "पूर्णपात्रस्तु दक्षिणेत्येके" इत्यस्य विशेषस्य परिग्रहार्थस्तु पार्वणेनातिदेशः ।

"अतोऽन्यानि" इति वचनं समान-जातीय-परिग्रहार्थम् । तेन पक्वगुणेष्व् एव स्थालीपाकेषु पशुषु चायम् अतिदेशो नाज्य-गुणकेषु । केचित् तत्रापीच्छन्ति ।

"कर्माणी"ति वचनात् कर्मणामेव पार्वण-व्याख्याततत्वम् । न काल-कर्तृ-धर्माणाम् । तेन "निऋतिं पाकयज्ञेन" (आप.ध.१-२६.) इत्य् अत्र पत्नीवत्त्वं पर्व-नियमश् च न भवति । हृदय-संसर्गादिषूपवासश् च ।

"व्याख्यातानी"ति वचनात् व्याख्यानम् एव पार्वणेनान्येषां कर्मणां, न प्रकृति-विकृति-भावः । तेनानारब्ध-पार्वणस्यापि कालागमे सर्पबल्यादौ प्रवृत्तिर् भवति ।

"आचाराद् यानि गृह्यन्त" इति वचनात् अस्मिन् शास्त्रे ऽनुपदिष्टानाम् अपि शास्त्रान्तर-दृष्टानां पक्व-गुणकानाम् अयम् उपदेशो भवति । यथा– काम्यानां स्थाने काम्याश् चरवः "षडाहुतिश् चरुर्" इत्य् एवमादीनाम् ॥२३॥

▼ सुदर्शनः

**पार्वणेन** वैवाहिकेन स्थाली-पाकेन । **अतोऽन्यानि** अस्माद् अन्यानि सर्प-बल्यादीनि **यान्य् आचाराद् गृह्यन्ते** तानि **कर्माणि व्याख्यातानि** तेष्व् एतद्-धर्मातिदेश इत्यर्थः ॥

ननु–कथं पार्वण-शब्दवाच्यत्वं वैवाहिक-स्थालीपाकस्य? इति चेत् नित्यस् तावत् "उपोषिताभ्यां पर्वसु कार्य" (आप.गृ. ७-१७.) इति पर्वसु भवत्वात् पार्वणः । तस्य च पार्वणस्यायं प्रकृतित्वे सम्बन्धीति "तस्येदम्" (पा. सू. ४-३-१२०.) इति पार्वण-शब्दाद् अण्-प्रत्यये कृते पार्वण इत्य् एवं रूपं भवति । यद्य् अपि कर्मान्तराणाम् अप्य् अयं प्रकृतिः, तथाप्य् अस्य पार्वण-सम्बधितया व्यपदेश्यत्वम् एव युक्तम् ; यतोऽत्र कर्मणि द्रव्यदेवतयोर् अप्य् अतिदेशः । कर्मान्तरेषु त्व् इतर-धर्माणाम् एवेति ।

नन्व् एवम् अपि शीघ्रावगतस्य नित्यस्य पार्वणस्य प्रकृतित्वे सम्भवति किम् इति विलम्बितावगम्यस्य वैवाहिकस्य प्रकृतित्वम् उच्यते ? इति चेत्– न ; वैवाहिक एव धर्मोपदेशपौष्कल्यात्, इतरत्र तदभावाच् च । प्रसिद्धश्चैष न्यायः– यस्य पुष्कलो धर्मोपदेशस् सोऽन्येषां प्रकृतिः; न हि भिक्षुको भिक्षुकान् याचितुम् अर्हतीति ।*(5)* तस्माद् युक्तं वैवाहिकस्यैव प्रकृतित्वम् ।

अस्य च वैवाहिकस्य पार्वणशब्द-वाच्यत्वं धर्मशास्त्रे व्यक्तम् एव । "पर्वसु चोभयोरुपवासः । औपवस्तमेव कालान्तरे भोजनम् । तृप्तिश्चान्नस्य । यच् चैनयोः प्रियं स्यात्तदेतस्मिन्न् अहनि भुञ्जीयाताम् । अधश्च शयीयाताम् । मैथुनवर्जनं च ।श्वोभूते स्थालीपाकः । तस्योपचारः पार्वणेन व्याख्यातः" (आप. ध. २-१-४....११.) इति नित्यस्य पार्वणेन व्याख्यानाभिधानात्, पर्वसम्बन्धिनः कर्मान्तरस्यात्रासम्भवात्, नित्यस्य च नित्येनैव व्याख्याने आत्माश्रयदोषात् ।

नन्व् अत्र केचित्– "यच्चैनयोः प्रियं स्यात् तद् एतस्मिन्न् अहनि" इत्य् एतच्छब्देनैकवचनान्तेन "पर्वसु च" इति बहुवचनान्त-निर्दिष्ट-पर्वाहः परामर्शानुपपत्तेः, "पाणिग्रहणादधि गृहमेधिनोर्व्रतम्" (आप. ध. २-१-१.) इति परमप्रकृतं पाणिग्रहण-नक्षत्रं परामृश्यते । तेन प्रतिसंवत्सरं पाणिग्रहण-नक्षत्रे प्रिय-भोजनादि कार्यम् । श्वोभूते च स्थालीपाकः कर्तव्यः । तस्य च कर्मान्तरस्योपचारः पार्वणेन नित्येन व्याख्यात इत्याहुः । तत् कथं धर्मशास्त्रे व्यक्तं वैवाहिकस्य पार्वणशब्दवाच्यत्वम् इति । तन् न ; यतोऽत्र व्रतम् एव परम-प्रकृतम्, पाणिग्रहणस्य तु तदवधितया कीर्तन-मात्रम् । नक्षत्रं तु गम्यमानमेव । गम्यमानं चैतच्-छब्देन परामृष्टुं प्रियभोजनादिना विशेषयितुं च नार्हम् ।

तदाहुराचार्याः –

> "गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम् ।
> शब्दान्तरैर्विभक्त्या वा धूमोऽयं ज्वलतीतिवत् ॥" (तन्त्र.वा.१-१-७.) इति ।

अतश् चात्र "पर्वसु च" इत्युद्देश्य-गतबहुत्वस्याविवक्षितत्वात् श्रुताव्यवहितस्य प्रकृतस्यपर्वाहस्यैव परामर्शो विशेषणं च युक्तम् ।

अत उपवासादेर् इव प्रियभोजनादेर् अपि पर्वसम्बन्धात् "श्वोभूते स्थालीपाकः" इत्य् उपवासादि-धर्म-विधानार्थम् एव ।

"उपोषिताभ्यां पर्वसु कार्यः" इति गृह्यविहितस्य स्थालीपाकस्यानुवाद एव, न कर्मान्तरस्य विधिः । अनुवादे च तस्योपचार इति दूरस्थस्य परामर्शो घटते । विधौ त्वस्योपचार इति स्यात् ।

एवं च यद्यपि "श्वोभूते स्थालीपाकः" इत्य् आपाततोऽनुवादस्वरूपः ; तथापि यस्येमे विधीयमाना उपवासप्रियभोजनादयो धर्मास् सम्बन्धिनस् तस्योपचारः पार्वणेन व्याख्यात इति साध्याहारम् एवेदं सूत्रं व्याख्येयम् ।

तस्माद् धर्मशास्त्रेऽपि वैवाहिकस्य पार्वणशब्द-व्यपदेश्यस्यैव प्रकृतित्वम्, न नित्यस्येति सिद्धम् । नन्व् एवमपि शीघ्रबोधकत्वात् वैवाहिकेनेति वक्तव्ये, किमर्थम् अस्य विवाहाङ्गस्यापि सतो विवाह-सम्बन्धं तिरस्कृत्य "पार्वणेन" इत्याह ? उच्यते– इतराङ्गवद् अस्य न शम्याः ; किन्तु शिष्टाचारसिद्धाः परिधय एवेत्य् एवम् अर्थम् ।

अत्र च अतोऽन्यानीत्याह– एतत् सदृशान्य् एवौषधप्रधान-हवींषि सर्पबल्यादीनि कर्माण्य् अनेन व्याख्यातानि, न त्व् अनेन तत्-सदृशानि पशु-प्रभव-प्रधान-हवींषि वपाहोमादीनीति वक्तुम् ।

कुत एतत्? "तत्र सामान्याद्विकारो गम्येत" (आप.प.३-४०.) इति परिभाषावचनात् । किञ्च अतोऽन्यानीत्यस्य नञ्समासप्रभेद-विग्रह-वाक्यत्वात् "नञिवयुक्तमन्यसदृशाधिकरणे तथाह्यर्थावगतिः" (वै. प. ७४.) इति नञ्समासभेदार्थनिर्णयात्, वाक्य-समासयोर् भिन्नार्थत्वे चासमर्थ-समासापत्तेः ।

औषधानि हवींषि पशुप्रभवानि च कानि कतिधा च ? इति चेत् - पुरोडाशः, ओदनो, यवागूस्, तण्डुलाः, पृथुकाः, लाजाः, सक्तवः, पिष्टानि, फलीकरणानि, धानाः, करम्भाः, सुरेत्य् औषधानि द्वादशाविधानि । पयो, दध्याऽज्यम्, आमिक्षा, वाजिनम् अवदानानि, पशुरसश्, शोणितं, त्वक्, वपेति - पशुप्रभवानि दशविधानि ।

"अथ कर्माण्याचाराद्यानि गृह्यन्ते" (आप. गृ. १-१.) इति प्रकृतेऽप्यत्र पुनर्वचनं गृह्यप्रश्नेऽनुक्तानां महाराजस्थालीपाकगणहोमादीनामेतद्विकृतित्वं वक्तुम् । ननु– यद्यनेनैव सूत्रेण औषधहविष्केषु कर्मसु पार्वणतन्त्रातिदेशः, किमर्थं "अस्तामिते स्थालीपाकः" "पार्वणवदाज्यभागान्ते" (आप. गृ. १८-५,६.) इति सर्पबलौ पुनर्वचनम् ? उच्यते– यद्यपि श्रौत आग्रयणे वैश्वदेवादीनां भूयस्त्वेन पौर्णमासतन्त्राशङ्कायां ऐन्द्राग्नस्य मुख्यत्वात् "मुख्यं वा पूर्वचोदनाल्लोकवत्" (जै. सू. १२-२-२३.) इति सिद्धान्तन्यायेन "आमावास्यं तन्त्रम्" (आप. श्रौ. ६-२९-५.) इति दर्शितम्, तथाप्यत्रान्येषां हविषां बहुत्वेऽप्यौषधस्य मुख्यत्वात् पार्वणतन्त्रतैवेति मुख्यन्यायं मन्दबुद्धिहितार्थं दर्शयितुमेव पुनश्चोक्तं "पार्वणवदाज्यभागान्ते" इति ।

तेन मासिश्राद्धे अष्टकाकर्मणि च पार्वणम् एव तन्त्रम् । यद्य् अप्य् अष्टकायां वपाहोमस्य मुख्यस्यापूर्वत्वं, तथाप्य् अन्येषां कृत्स्नविधानाभावाद् औषधत्वात् "स्विष्टकृत्प्रभृति समानमापिण्डनिधानात्" (आप. गृ. २२-८.) इति दर्शनाच्च पार्वणमेव तन्त्रम् । अपूपहोमे तु "पार्वणवत्" (आप. गृ. २२-१.) इति पुनर्-वचनम् अपूप-मांसौदन-पिष्टान्न-होमानां स्थाने विकल्पेन विहितस्यौषध-हविष्कस्यापि दधि-होमस्य पार्वण-तन्त्रप्राप्तिं ज्ञापयितुम्, न त्व् अपूप-होमार्थम्; तस्यौषध-हविष्ट्वाद् एव पार्वणतन्त्र-प्राप्तेः ।

तत्-स्थानापन्नेषु च तद्धर्म-प्राप्तिर् दृष्टा । यथा "यस्य हविषे वत्सा अपाकृता धयेयुस्तत्स्थाने वायव्यां यवागूं निर्वपेत्" (आप. श्रौ. ९-१-२३.) इति सान्नाय्यस्थाने विहिताया यवाग्वास्सान्नाय्यधर्माः ॥

केचिद्—नित्यस्य पार्वणस्य यः कल्पस् स एव सर्वेषां यज्ञानां कल्पः । यद्यपि वैवाहिके धर्माम्नानं, तथापि नित्यस्यैव कल्पातिदेशो "दक्षिणावर्जं" इत्यस्य परिग्रहार्थः । अतोऽन्यानीति वचनादेतत्सदृशानां पक्वगुणानामेव स्थालीपाकानां पशूनां चायं विकल्पो, न त्वाज्यगुणकानाम् । कर्माणीति वचनात् कर्ममात्रस्यैव व्याख्यानं, न तु कर्तृतद्धर्मकालादीनाम् । तेन "गर्दभेनावकीर्णी निरृतिं पाकयज्ञेन यजेत, (आप. ध. १-२६-८.) इत्यत्र पशौ न पत्नीवत्त्वं नापि हृदयसंसर्गादिषु पर्वणो नियमः, विशेषतश्चोपवासस्य धर्मशास्त्रे पर्वसम्बन्धेन विधानात् । व्याख्यातानीति वचनादन्येषां नैतद्विकृतित्वम् । तेनानारब्धपार्वणोऽपि तेष्वधिकारी । हृदयसंसर्गादिषु पुनस्तन्त्रविधानं आज्यहोमवन्नियमार्थम् । एतद्गृह्योपदिष्टेषु यत्र वचनं तत्रैव तन्त्रं, नान्यत्र । तेनाग्रयणे तन्त्रलोप इति । तन्न; यत उपदिष्टधर्मकस्य वैवाहिकस्य धर्मातिदेशेऽपि नैव दोषः । प्रत्युत नित्यस्य कल्पातिदेशे पर्वादीनामप्यतिदेशाद्दोषः । कर्माणीति वचनान्नेति चेत्–न; तस्योद्देश्यसमर्पणोपक्षीणत्वात् । अखण्डग्राहिणश्चोदकस्योच्छृङ्खलत्वात् । दक्षिणाऽभावस्तु प्रयोजनं तस्य "योऽस्यापचितस्तस्मा ऋषभं ददाति" (आप. गृ. ७-१६.) इति सिद्धम् । तथा सदृशेष्वयमतिदेश इत्युक्तिमात्रम्, असदृशेष्वपि पशुष्वभ्युपगमात् । पक्वत्वात् सादृश्ये द्रव्यत्वादाज्येऽपि स्यात् । न चैवं व्याख्यातशब्दः प्रकृतिविकृत्वाभावार्थः । "एतेन वैश्वसृजो व्याख्यातः (आप. श्रौ. १९-१५-१.) इत्यादौ प्रकृतिविकृतित्वस्य दृष्टत्वात् । तथा नैकस्मिन्नाग्रयणे तन्त्रलोपफलार्थं नियमार्थानि बहूनि सूत्राण्यारब्धव्यानि । अविकृतमातिथ्यमाग्रयणं चेत्येतावन्मात्रसूत्रादेव स्वाभिमतसिद्धेः । अतस्तानि तन्त्रसूत्राणि यथोक्तप्रयोजनार्थानि । आग्रयणमपि तन्त्रवदेव ॥२३॥
▼

⑤

>

पार्वणेनातो ऽन्यानि कर्माणि व्याख्यातान्य् - आचाराद् यानि गृह्यन्ते।

# ०७ २४ यथोपदेशन् देवताः②

यथोपदेशं देवताः २४

▼

⑤

>
▼ Oldenberg

24. The deities (of those rites) are as stated (with regard to each particular case),

▼ हरदत्तः

*(सम्पादकटिप्पानी - इदं सूत्रम् अग्रिमे व्याख्यातम्।)*

▼ सुदर्शनः

*(सम्पादकटिप्पानी - इदं सूत्रम् अग्रिमे व्याख्यातम्।)*

▼

⑤

>

यथोपदेशं देवताः।

# ०७ २५ अग्निं स्विष्टकृतम्②

अग्निं स्विष्टकृतं चान्तरेण २५

▼

⑤

>
▼ Oldenberg

having their place between Agni (Sūtra 5) and Sviṣṭakṛt (Sūtra 7).

▼ हरदत्तः

पार्वणेनातोन्यानीत्ययं कल्पातिदेशः इत्युक्तम् । तेन पार्वणे ये देवते यश्च स्थालीपाकः तेषां सर्वेषु कर्मसु प्रवृत्तिः । तत्र तत्रोपदिष्टाभिस्तु देवताभिः पार्वणदेवतयोः बाधे प्राप्ते तन्निवृत्त्यर्थं वचनं तत्र चोदितानां देवतानां देशविधानार्थञ्च योऽयमग्निः पार्वणो यश्च स्विष्टकृत्, तावन्तरेण तयोर्मध्ये ता

देवता यष्टव्या इति । तत्र पार्वणस्याग्नेः पार्वणमेव हविः तत्र तत्र विहितानां तत्र तत्र विहितम् । स्विष्टकृतस्तु सर्वो हविश्शेषः, अन्यत्र तथा दर्शनात् । अन्ये तु तत्र विहितादेव हविषः पार्वणदेवतयोरपीज्यामिच्छन्ति । अपर आह– नात्र पार्वणदेवते अनूद्येते अग्निश्च स्विष्टकृच्च । किं तर्हि ? आगन्तुके एते अनेनैव वचनेन विधीयेते । तत्र हविषोऽनुपदिष्टत्वात् अग्नेराज्यं हविः । स्विष्टकृतस्तु सर्वो हविश्शेष इति । सर्वथा सर्वेष्वेव पार्वणातिदिष्टेष्वग्निः पूर्वं यष्टव्यः । तथा च श्रौतेषु दृश्यते "येन यज्ञेनेर्त्सेत् कुर्यादेव तत्राग्नेयमिति । यथा भाष्यं व्याख्यायते । पार्वणव्याख्यातेषु सर्वेष्वेव कर्मसु यथोपदेशं देवता यजति अग्निं स्विष्टकृतं च यजति योयमग्निस्विष्टकृत् पार्वणे द्वितीयो देवताविशेषः तं च यजति तस्मादेव हविषः । यत्तत्र तत्रोपदिष्टानां हविरिति । तत्र यथोपदेशं देवता इत्यनुवादः स्विष्टकृतस्समुच्चयविधानार्थः । असति समुच्चये तेषु तस्य प्रवृत्तिर्न स्यात् । तत्र तत्रोपदिष्टभिर्देवताभिर्निवर्तितत्वात् । अग्नेरिव स्विष्टकृतोऽपि प्रधानदेवतावच्चोदितत्वात्—"अग्निस्विष्टकृद्द्वितीय इति । अन्तरेण इत्यनेन तु तस्यैव स्विष्टकृतो देशो नियम्यते –प्रधानाहुतीश्चोपहोमांश्चान्तरेणाग्निं स्विष्टकृतं यजतीति । तेन यत्राप्युत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते, "आज्याहुतीरुत्तराः जयादि प्रतिपद्यत" इति च क्रमपरं वचनं तत्रापि नित्यमग्निस्विष्टकृदस्मिन्नन्तराले यष्टव्यो भवतीति । प्रकरणाच्च प्रधानाहुतीरुपहोमाश्चान्तरेणेत्यर्थोऽपि लभ्यते ॥२५॥

▼ सुदर्शनः

अत्रास्वपदो विग्रहः, अव्ययीभावसमासत्वात् । अध्याहारश्च, साकाङ्क्षत्वात् । यथोपदेशं सर्पबल्यादिषु याश्च यावत्यश्च येन येन प्रकारेण मन्त्रविधानादिनोपदिष्टाः देवतास्ता एव भवन्ति, न पार्वणदेवताः । न तेषु पार्वणं प्रधानं समुच्चेतव्यमित्यर्थः । ननु– विकृतावुपकारमुखेन तज्जनकानां धर्माणामतिदेशः, प्रधानं चोपकार्यं, नोपकारजनकम् । पार्वणे च स्थालीपाकहोमयोः प्रथमो होमः प्रधानम् । अतस्तस्यातिदेश एव नास्ति । दूरे तत्समुच्चयाशङ्का, यन्निरासायेदं सूत्रं स्यात् । "षड्भिर्दीक्षयति" (तै. सं.५-१-९.) इत्यत्र तु प्राकृतीनां दीक्षाहुतीनां अङ्गत्वादतिदेशः, अदृष्टार्थत्वाच्च समुच्चयः, यथोपदिष्टानां प्रकृतिक्लृप्तक्रमबाधभयादन्ते निवेशश्च युक्त एव । सत्यमेवम् ; किन्तु गार्ह्यकर्मानुष्ठातॄणां मध्ये ये मन्दबुद्धयोऽङ्गप्रधानयोरतिदेश्यानतिदेश्ययोश्च अनभिज्ञास्ते पार्वणेनेत्यविशेषेणातिदेशप्रतिभासात् "षड्भिर्दीक्षयति", इत्यादौ दर्शनमात्राच्च प्रधानातिदेशतत्समुच्चयावुपदिष्टप्रधानानामन्ते निवेशं च मन्यन्ते । तन्निरासायेदं सूत्रम् ॥२४॥

अथ वैकृतप्रधानहोमानां स्थानमर्थादग्निमुखसौविष्टकृतयोश्च विदधाति– "यथोपदेशं देवताः" (आप.गृ.७-२४.) इत्यनुवर्तते । यथोपदेशं देवताः ये विकृतावुपदिष्टाः ते **अग्निं स्विष्टकृतं चान्तरेण** आग्नेयसौविष्टकृतयोर्होमयोर्मध्ये भवेयुः । अत्र च स्विष्टकृतमितिवदग्निमित्यपि सिद्धानुवादात्, अन्यतश्च प्राप्त्यभावात्, योगविभागेनाग्निमुद्दिश्य जुहुयादित्यन्योऽप्यर्थो विधीयते । विभक्तस्य सूत्रस्य चायं विवक्षितोऽर्थः–सर्वेषु तन्त्रवत्स्वौषधहोमेषु दधिहोमेषु चोपाकरणसमापनयोश्च शिष्टाचाराद् "अग्नये स्वाहा" इत्याज्येन अग्निमुखाख्यमङ्गहोमं सर्वेभ्योऽपि प्रधानहोमेभ्यः पूर्वं जुहुयादिति । नन्वत्र "स्विष्टकृतम्" इति व्यर्थम् ; सर्वत्र स्विष्टकृतश्शेषप्रतिपत्त्यर्थत्वात् स्वत एवासावन्ते एव भवतीति । नैवम्–विकृतिषु द्विविधाः प्रधानहोमाः–पार्वणविकारा अपूर्वाश्च; तेषामुभयेषामप्यन्त एव स्विष्टकृद्यथा स्यादित्येवमर्थत्वात् । अन्यथा यद्धोमाङ्गं स्विष्टकृत्तदन्त एव स्यात् । तथाग्निमिति चोभयेभ्यः प्रधानाहुतिभ्यः पूर्वमेवाग्निमुखमित्येवमर्थं स्विष्टकृद्वन्नियम इति ॥ केचित् "यथोपदेशं देवता अग्निं स्विष्टकृतं च" इत्येवमन्तमेकं सूत्रम् । तस्यार्थः—"अग्निस्स्विष्टकृत् द्वितीयः" (आप.गृ. ७-७०. ) इत्यत्र स्विष्टकृतः प्रधानहोमतुल्यधर्मत्वज्ञापनात् विकृतिषु च पार्वणप्रधानलोपे सति तस्यापि लोपस्स्यात्, स मा भूदित्यनेन सूत्रेण "यथापदेशं देवताः" इत्यनूद्य, अग्निं स्विष्टकृतं च कुर्यात् इति तासु तस्य समुच्चयो विधीयते । तथा "अन्तरेण" इति पदमेकं सूत्रं "अन्तरा त्वाष्ट्रेण" इत्यादिवत् । प्रकरणाद्वैकृतप्रधानहोमानां जयादीनां च मध्ये सर्वास्वपि विकृतिषु स्विष्टकृन्नित्य एवेत्यर्थः । इतरथा क्वचित्तस्य लेपः स्यात्, "स्थालीपाकादुत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते" (आप.गृ. ९-४.) इत्यादि परिसङ्ख्येति कृत्वेति । तन्न, –विभागे साकाङ्क्षयोर्द्वितीयान्तयोः "अग्निं" स्विष्टकृतं, इत्येतयोः अन्तरेणेत्यनेन सम्बन्धाकाङ्क्षेण एकवाक्यत्वे सम्भवति वाक्यभेदस्यायुक्तत्वात्, "अग्निस्स्विष्टकृद्द्वितीयः" इत्यस्य प्रयोजनान्तरपरत्वाच्च । तथापि यदि स्विष्टकृतः प्रधानतुल्यधर्मकत्वं, तदा तल्लोपेऽपि प्रधानलोपप्रायश्चित्तमेवापद्यते । तथा "अन्तरेण" इत्यस्य यथोक्तश्रुतसम्बन्ध्यन्वयसम्भवे अप्रकृतगम्यमानान्वयो न युक्तः । व्यर्थं चैतत्; स्वमते स्विष्टकृतस्समुच्चयविधानादेव त्रिदोषायाः परिसङ्ख्याया अपि निरस्तत्वात्, तस्य सर्वत्र नित्यत्वेनालोपसिद्धेः ॥२५॥

▼

⑤

>

अग्निं स्विष्टकृतं चान्तरेण ।

# ०७ २६ अविकृतमातिथ्यम्②

अविकृतम् आतिथ्यम् *(= गवालम्भे न स्थालीपाकतन्त्रम्)*२६

▼

⑤

>

▼ Oldenberg

25. 16 The sacrifice (of a cow) on the arrival of a guest (should be performed as stated below) without alterations.

▼ हरदत्तः

या गौरतिथय आलभ्यते "गौरिति गां प्राहेति" तदातिथ्यं नाम कर्म **तदविकृतम्** अपूर्वं पार्वणधर्मास्तद्वपाहोमे न कर्तव्या इत्यर्थः । इदमेव ज्ञापकं न स्थालीपाकेष्वेव सोऽतिदेशः । किं तर्हि ? सर्वेषु पक्वगुणेषु पशुष्वपीति । तेनाष्टकायां काम्यपशुषु च शास्त्रान्तरदृष्टेषु पार्वणधर्मसिद्धिः ॥२८॥

▼ सुदर्शनः

अतिथिर्यस्य कर्मणो निमित्तं त**दातिथ्यम्**, गवालम्भ इत्यर्थः । त**दविकृतं** यथोपदिष्टमेव स्यात् । नात्र "अग्निमिद्ध्वा" (आप. गृ. १-१२.) इत्यादि सामान्यमपि तन्त्रम्, पार्वणं तु दूरे; "कृत्स्नविधानात् यजतेरपूर्वत्वम्" (जै. सू. ८-१-५.) इति न्यायात् । "कृत्स्नविधानं च तस्यै वपां श्रपयित्वोपस्तीर्णाभिघारितां मध्यमेन्तमेन वा पलाशपर्णेनोत्तरया जुहोति" (आप. गृ. २२-४.) इति । एतच्च प्रदर्शनार्थम् । तेन वपाहोमानन्तरं किंशुकहोमसर्षपहोमफलीकरणहोमादयोऽप्यपूर्वा एव; कृत्स्नविधानस्य तुल्यत्वात् ।

▼

**⑤**

>

अविकृतमातिथ्यम् ।

# ०७ २७ वैश्वदेवे विश्वे②

वैश्वदेवे विश्वे देवाः २७

▼

**⑤**

>

▼ Oldenberg

26. 17 (The deities) of the Vaiśvadeva ceremony are the Viśve devās,

▼ हरदत्त-प्रस्तावः

ननु– "नानग्नौ प्रधानम्" इति याज्ञिकवचनात् वैश्वदेवबलिहरणानि तावदङ्गानि । अग्नौ होमेषु च आग्नेयसौविष्टकृतावन्तरेण ये होमास्त एव प्रधानाः । तौ तु सर्पबल्यादिसामान्यादङ्गमित्याशङ्क्याह—

▼ हरदत्तः

"आर्याः प्रयता वैश्वदेव" इति चोदिते वैश्वदेवाख्ये कर्मणि देवतोपदेशोऽयं निर्वापकाले सङ्कल्पार्थम् । यास्तु तत्र देवताः षड्भिराद्यैः प्रतिमन्त्रं ( आप. ध.२-३-१६.) इत्येवमाद्याः ताः प्रदानकाले देवताः, तेन विश्वेभ्यो देवेभ्यः इति सङ्कल्प्य गृहस्थेन स्वगृहे पाकः कार्यः । तथा पक्वादेवान्नात् होमा बलयश्च तस्यै तस्यै देवतायै । "अहरहर्भूतबलिर्" इत्येवमाद्याः पञ्चमहायज्ञानामुत्पत्तिविधयः । "आर्याः प्रयता" इत्यादिकस्तु तेषामेव प्रयोगविधिः । तस्मात् न पृथक् पञ्चमहायज्ञाः कर्तव्याः तत्रैव वैश्वदेवं यदग्नौ क्रियते स देवयज्ञः । यत् बलिहरणं स भूतयज्ञः । यद्दक्षिणतः पितृलिङ्गेनेति स पितृयज्ञः । यदग्नं च देयमित्यादि स मनुष्ययज्ञः । तत्र वैश्वदेवे सोमाय स्वाहेति द्वितीयाहुतिरिति मन्त्रव्याख्याकारेणोक्तम् । न च षड्भिराद्यैरिति विरोधः । तस्य प्रधानदेवताविषयत्वात्, स्विष्टकृतश्च तान्त्रिकत्वात् । अथ कस्मादिहैव वैश्वदेवस्य कृत्स्नकल्पो नोपदिश्यते? उच्यते– इहोपदेशे तस्य कल्पस्य सर्वचरणार्थता न स्यात्, इष्यते च । तस्मात् सर्वचरणसाधारणेषु सामयाचारिकेषूपदेशः । अथ तर्हि देवतोपदेशः तत्रैव कस्मान्न कृतः ? इहोपदेशप्रयोजनमस्मिन् गृह्ये तदपि वैश्वदेवं कर्मोपदिष्टं यथा स्यादिति । तेनास्मदीयानां स एव वैश्वदेवकल्पो नान्येषु धर्मशास्त्रेषु चोदितः । यज्ञोपवीतिना प्रदक्षिणमित्यादि परिभाषाप्रवृत्तिश्च भवति ॥२७॥

▼ सुदर्शनः

**वैश्वदेवम्** इति कर्मनामधेयम् । प्रवृत्ति-निमित्तं च, विश्वे सर्वे देवा अत्रेज्यन्त इति । इह च मन्त्रवर्णसिद्धानां देवतात्वस्याविधेयत्वात्, आग्नेयादयष् षड् अपि होमाः बलिहरणानि चानग्निदेश्यान्य् अपि सर्वाण्येव प्रधानानि ;

न तु किञ्चिदपि शेषापरनामाङ्गम्, इत्येवं सूत्रार्थः ।

अयं भावः– यादि नानग्नौ प्रधानम्,
किन्तु शेष एवेति
तर्ह्येतच्छेषलक्षणे तृतीयाध्याये दृश्येत । न तु दृष्टम्, नापि सूत्रकारोक्तं दृश्यते । किन्तु पिण्डपितृयज्ञे तावदापस्तम्बेन होमः पिण्डदानं चोभयं प्रधानमुक्तम्, पिण्डदानं प्रकृत्य यदि जीवपिता, न दद्यात्, आहोमात्कृत्वा विरमेत्" (आप.श्रौ.१-९-८.) इति । यदि हि पिण्डदानस्याङ्गता, तदा प्रधानभूतहोमानुष्ठाने सति, तस्याप्यनुष्ठानं स्यात्, न विरामः ।
तस्मादत्र प्रधानस्यैव पिण्डदानस्य "नासोमयाजी सन्नयेत्" (तै. सं.२-५-५.) इत्यादिवदनारम्भलक्षण एव विरामः ।
कात्यायनस्तु—प्रत्युत पक्षे पिण्डदानमेव प्रधानं, होमस्तदङ्गमित्याह "जीवपितृकस्य होमान्तम्, अनारम्भो वा" (का. श्रौ. ४-१-२४,२५.) इति ॥
तथा सर्पेशानबल्योरपि होमा बलयश्च प्रधानम् । अवभृथे त्वनग्नावेव प्रधानम् । सोमाङ्गत्वेऽप्यस्य प्राधान्यं स्वाङ्गापेक्षया । तथैव राक्षसे गर्दभपशौ अनग्नावेव प्रधानम् ; "अप्स्ववदानैश्चरेयुः" (आप. श्रौ. ९-१५-५.) इति वचनात् । वपायास्तूपदेशमतादग्नौ होमः । "यदि वपा हविरवदानं वा स्कन्देत्" (आप. श्रौ. ९-१८-१५.) इति वपायाः पृथग्ग्रहणात् । एवमनग्नावप्यन्यानि बहूनि प्रधानानि सन्ति, यथा श्राद्धे ब्राह्मणभोजनम् । एवमाग्नेयसौविष्टकृतहोमावपीह प्रधानम् ; "औपासने पचने वा षड्भिराद्यैः प्रतिमन्त्रं हस्तेन जुहुयात्" (आप. ध. २-३-१६.) इति कृत्स्नविधानेन, "उभयतः परिषेचनम्"(आप. ध. २-३-१७.) इति परिसङ्ख्यया चास्य वैश्वदेवस्यापार्वणविकारत्वात् । सर्पबल्यादिषु तु पार्वणविकारत्वात्तावदङ्गम् । किञ्च वैश्वदेवमन्त्रेष्वपि "अग्नये स्वाहा, अग्नये स्विष्टकृते स्वाहा" इत्येतयोरप्याम्नानात् प्राधान्यम् ।

ननु–वैश्वदेवमन्त्राणामपि न प्रत्यक्षस्समाम्नायः, स कथमवगम्यते? उच्यते–"षड्भिराद्यैः प्रतिमन्त्रम्" "अपरेणाग्निं सप्तमाष्टमाभ्याम्" (आप. ध. २-३-१६,२०.) इत्यादिसूत्रैः क्रमेण विनियोगात् क्वचिदाम्नानमस्तीत्यवगम्यते । तच्चाम्नानं प्राग्विवाहमन्त्रेभ्यः, भाष्यकारवचनात् । ततश्च ब्रह्मयज्ञपारायणयोरप्येतेषामेवंक्रमेणाध्ययनं वेदितव्यम् । सर्वप्राधान्ये च प्रयोजनम्-एषामेकतरमप्यकृत्वा प्रयोगे समापितेऽपि तत् प्राग्भोजनात् सप्रायश्चित्तं साङ्गमनुष्ठेयम् ; कृते तु भोजने पाकयज्ञलोपप्रायश्चित्तमेवेति । केचित्— वैश्वदेवे विश्वे देवा देवता विधीयन्ते निर्वापकाले सङ्कल्पार्थम्, ईशानयज्ञवत् । यास्तु धर्मशास्त्रे मन्त्रविनियोगात् कल्पितास्ताः प्रदानकाले देवताः । इह च देवतोपदेशो वैश्वदेवस्य गार्ह्यपरिभाषाप्राप्त्यर्थः । तत्र तस्योपदेशस्तु सर्वचरणार्थः । इदं च वैश्वदेवं न पञ्चमहायज्ञेभ्यः पृथग्भूतम् । "अहरहर्भूतबलिः" (आप. ध.१-१२-१५.) इत्यादयश्च पञ्चमहायज्ञानामुत्पत्तिविधयः । "आर्याः प्रयता वैश्वदेवे" (आप. ध.२-३-१.) इत्यादिस्तु प्रयोगविधिः । तत्र यदग्नौ क्रियते स देवयज्ञः, यत् बलिहरणं स भूतयज्ञः, यद्दक्षिणतः पितृलिङ्गेनेति स पितृयज्ञः, यच्चाग्रदानं स मनुष्ययज्ञः, इति ।

तन्न, स्वमते श्रुत्या चोदितान् विश्वान् देवान् वचनं विनाऽपनीय, तेभ्यस्सङ्कल्पितस्य हविषो देवतान्तरेभ्यो मन्त्रवर्णात् कल्पितेभ्यो दातुमयुक्तत्वात् । ईशानबलौ तु भवशर्वादिशब्दानामीशानाभिधानत्वात्, अर्थस्य देवतात्वमिति सूत्रकारमताच्च, युक्तं भवायेत्यादिभिर्मन्त्रैर्दानम् । यत्तु मीढुष्यै जयन्ताय चास्मात् स्थालीपाकाद्दानं तदप्यभ्युदयेष्ट्यादिवत् सवनीयपुरोडाशवच्च" त्रीनोदनान् कल्पयित्वोत्तरैरुपस्पर्शयित्वोत्तरैर्यथास्वमोदनेभ्यो हुत्वा" (आप. गृ.२०-४.) इति वचनैः स्थालीपाकांशद्वये पूर्वदेवतापनयेन देवतान्तरविधानाद्युक्तम् ।

पञ्चमहायज्ञेभ्यो न पृथग् वैश्वदेवम् इत्यपि न;
प्रकरणान्तरात् संज्ञा-भेदाच् च कर्म-भेदावगतेः ।
न च कर्मभेदे तेषां प्रयोगो दुरुपपाद
इति प्रमित-भेदापह्नवो युक्तः,
यतो *(कपर्दि??-)*भाष्ये वैश्वदेवस्य, तेषां च प्रयोगः पृथग् एवोपपादितः ॥

▼ विस्तारः (द्रष्टुं नोद्यम्)

अत्रानुवादः -

प्रकरणान्तरात् संज्ञा-भेदाच् च कर्म-भेदावगतेः = due to understanding in difference in the karma-s based on chapter/context -difference, name-difference.

न च कर्मभेदे तेषां प्रयोगो दुरुपपाद
इति प्रमित-भेदापह्नवो युक्तः = not proper to hide the evidenced difference (in the karmas) by saying that the procedures are unclarifiable.

भाष्ये वैश्वदेवस्य, तेषां च प्रयोगः पृथग् एवोपपादितः = the procedures are described separately in the bhAShya (अधुना नोपलभ्यते कपर्दिभाष्यम्। कारिकास् तु काश्चन लभ्यन्ते। )

अथ प्रयोगभाष्यम् ईषद्-भेदं लिख्यते–
"वैश्वदेवस्य कर्मोच्यते" प्रसङ्गात् पञ्च-महा-यज्ञानां च ।

## वैश्वदेवम्⑥

समावेशनजपान्ते विवाहे समाप्ते
वैश्व-देव--मन्त्राणाम् उपयोगे यद् व्रतं
"द्वादशाहमधश्शय्या" (आप.ध.२-३-१३.) इत्यादि
तत्स्वामित्वाविशेषात् सपत्नीकश् चरित्वा
प्रशस्तेऽहन्यारभ्य "आर्याः प्रयता वैश्वदेवेऽन्नसंस्कर्तारस्स्युः" इत्यादिविधिना सिद्धेऽन्ने तिष्ठन्नन्नसंस्कर्ता भार्यादिः "भूतम्" इति स्वामिने प्रब्रूयात् ।
तत् "सुभूतं सा विराडन्नं तन्माक्षायि" इति स्वामी प्रतिब्रूयात् ।

ततो यदि प्रयाणे गृहे वा वैश्वदेवस्य होमस्य स्थाने ऽग्निर् उपसमाधातव्यः, तत्र धर्मशास्त्रोक्तविधिना उपसमादधाति। एवम् अन्यत्राप्य् औपासनहोमादिषु।

अथ गृहमेधिनो यद् अशनीयमन्नं ततो होमार्थ हविष्यमन्नं पात्रे कल्पयति।
अहविष्यं श्रारलवणावरान्नसंसृष्टं द्वितीये।
हविष्यमन्नं देवयज्ञार्थं तृतीये।
सर्वतस्समवदाय अग्रार्थं चतुर्थे।
सर्वत एव समवदाय मनुष्ययज्ञार्थं पञ्चमे यदि ब्राह्मणतर्पणं नावकल्पते। "मनुष्येभ्यो यथाशक्ति दानम्" (आप. ध.१-१२-१५.) इति वचनात् ।

ततः परिषेचनं कृत्वा प्रथमकल्पितादन्नाद्यथाहुतिमात्रं अङ्गुष्ठपर्वमात्रं "अग्नये स्वाहे"त्यादिभिः षडैहुतीर्हुत्वा उत्तरं परिषेचनम् ।

अथ उदचीनमुष्णं भस्मापोह्य तस्मिन् अहविष्यं स्वाहाकारेण जुहोति; "यस्याग्नौ न क्रियते यस्यचाग्रं न दीयते न तद्भोक्तव्यम्" (आप. ध.२१५१३) इति वचनात् ।

अथ षडाहुति-होम-शेषम् अहविष्य-होम-शेषेण संसृज्यान्नेन सूपसंसृष्टेन धर्मशास्त्रोक्तेन विधिना रौद्रान्तं बलिं हृत्वा,
ऽग्रं ब्राह्मणाय दत्वा,
ब्राह्मणोक्तत्वाद् अपार्वण*(??)* व्याख्यातं सन्निपातीतिकर्तव्यताकं देवयज्ञं कुर्वीत ।

## देवयज्ञः⑥

देवयज्ञेन यक्ष्य इत्यागूर्य,
"विद्युदसि ।"
औपासने पचने वा कल्पिताद् अन्नात्,
तद्-अभावे हविष्यम् अन्नं व्रीहियवादि, आकाष्ठात्,
"देवेभ्यस् स्वाहे"ति हस्तेन जुहुयात् ;
"सन्निपाती"ति कर्तव्यतयोर् औपासन-होम--वैश्वदेवयोर् हस्तेन होमस्य दृष्टत्वात् ।
मन्त्रवच् चोभयतः परिषेचनम्, तयोर् दृष्टत्वाद् एव ।
"वृष्टिरसि ।"
"वषट्कार-होमेषु विद्युद्-वृष्टी" इत्युपदेशः ।

## पितृयज्ञः⑥

अथ प्राचीनावीती पितृयज्ञेन यक्ष्ये इत्युक्त्वा - विद्युद् असि ।
शुचौ भूमौ
कल्पिताद् ओदनात्
हस्तेन अङ्गुष्ठ-प्रदेशिन्याव् अन्तरेण "पितृभ्यः स्वधास्तु", इति दद्याद् आहुति-मात्रम् ।
वृष्टिरसि ।
पित्र्यं बलिहरणविधिनेत्युपदेशः ।

## भूत-यज्ञः⑥

अथ बलिहरणस्य होमतुल्यत्वात् यज्ञोपवीती "भूतयज्ञेन यक्ष्य" इत्युक्त्वा,
विद्युत् ।
शुचौ भूमाव् एव हस्तेन "इदं भूतेभ्योऽस्तु" इति दद्यात् ।
वृष्टिः

- बलिहरण-विधिनेत्य् उपदेशः ।

## मनुष्य-यज्ञः⑥

अथ दानस्य होमतुल्यत्वात् यज्ञोपवीती "मनुष्ययज्ञेन यक्ष्य" इत्युक्त्वा,
विद्युत ।
ब्राह्मणतर्पणं, सङ्कल्पितस्य वा दानम् ।
वृष्टिः -
दानमात्रम् इत्युपदेशः ।

## ब्रह्मयज्ञः⑥

ब्रह्मयज्ञं तु पूर्वमेव कुर्वीत अग्निहोत्रमौपासनं वा हुत्वा; "उदित आदित्ये" (तै. आ.२-११.) इति वचनात् । तस्य कर्मोच्यते– "ब्रह्मयज्ञेन यक्ष्यमाणः" (तै.आ.२-११.) इत्यादि ब्राह्मणोक्तदेशे यथाविध्याचमेत् । अस्मिंस्त्वाचमने विशेषः "दक्षिणत उपवीय" इत्यारभ्य "सकृदुपस्पृश्य" (तै.आ. २-११.) इत्येवमन्ते विगुणे कृते "यदि यजुष्ट" इति "भुवस्वाहा" इति होमः प्रायश्चित्तम् । "दक्षिणेन पाणिना सव्यं प्रोक्ष्य" इत्यारभ्य शेषे विगुणे कृते "यद्यविज्ञाता" इति प्रायश्चित्तम् ।

अथ क्रम उच्यते—
ब्रह्मयज्ञेन यक्ष्ये इत्युक्त्वा, विद्युत् ।
आचमनम् ।
आसनकल्पनादि सावित्रीजपान्तं कृत्वा वेदस्यादित आरभ्य यथाध्यायमध्ययनमध्यायः कृत्स्नस्य वेदस्यासमाप्तेः ; "श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्य" (आप.ध.१-९-१.) इति वचनात् येन प्रकारेणाध्यायो येन च क्रमेणाधीयतेऽविना चाम्नानैः आदिप्रदिष्टानुषङ्गप्रख्यादिभिः, उत्सृजन् उत्सृज्योत्सृज्य, वाचा मनसा च यावत्तरसं यावच्छक्यमधीयीत । परिधानीयां कृत्वा, वृष्टिरसि ।

एवम् अहरहः कृतान्तादारभ्य यावत् समाप्तो वेदः सहैकाग्निविधिकाण्डेन ।
समस्तमधीत्य वैश्वदेव मन्त्रानधीत्य ततः प्रसुग्मन्तेति प्रश्नद्वयमधीयीत । एवं विनियोगदर्शनात्,
"ऐकाग्निको विधिः काण्डं वैश्वदेवमिति स्थितिः, ॥ इति वचनाच्च ।

यद्यनेकशाखाध्यायी ततोऽनेनैव विधिना द्वितीयं पुनरधीयीत ऋग्यजुस्साम्नां क्रमेण अध्ययने यद्यनध्यायस्स्यात्, तदैकां वर्चमेकं वा यजुरेकं वा साम कृतांतादेवारभ्याभिव्याहरेत् । यदा ब्राह्मणस्य क्रमेण तदा "भूर्भुवस्सुवस्सत्यं तपश्श्रद्धायां जुहोमी"त्यभिव्याहरेत् ।

एवं यावज्जीवं ब्रह्मयज्ञं कुर्वीत ।

## रौद्रम्⑥

मनुष्ययज्ञान्ते "सर्वान् वैश्वदेवभागिनः कुर्वीत, (आप.ध.२-९-५.) इत्यादिविधानेन सर्वेषु पत्न्यन्तेषु भुक्तवत्सु, पाकपरिवेषणपात्रेभ्यो लेपान् सङ्कृष्योत्तरतः शुचौ देशे रुद्राय सम्प्रदानभूताय निनयेत्, "रुद्राय स्वाहा" इति । नित्यवच्च निनयनम्; प्रतिपत्तिकर्मत्वात् ।

"एवं वास्तु शिवं भवति" (आप.ध.२-४-२३.) इत्यर्थवादः । "द्रव्यसंस्कारकर्मसु परार्थत्वात्" (पू. मी.४-३-१.) इति न्यायात् । फलं वा, सूत्रकारेणोपदिष्टत्वात् "य एतानव्यग्रो यथोपदेशं कुरुते नित्यः स्वर्गः पुष्टिश्च" (आप. ध.२-४-९.)इति ।

एवम् ऋते महायज्ञेभ्यः
सायं रौद्रान्तं कृत्वा
वैहायसम् आकाशे भूतबलिं कुर्वीत ॥

अन्य आहुः–
"नक्तमेवोत्तमेन" (आप.२-४-८.) इत्य्-एव-कारस्य व्यवहितान्वयाद्
वैहायसमेव सायम् इति ॥
▼

⑤

>

वैश्वदेवे विश्वे देवाः।

# ०७ २८ पौर्णमास्याम् पौर्णमासी②

पौर्णमास्यां पौर्णमासी यस्यां क्रियते २८

▼

⑤

>
▼ Oldenberg

27. 18 Of ceremonies performed on full-moon days, the full-moon day on which they are performed.

▼ हरदत्त-प्रस्तावः

इदानीं प्रसङ्गात् सर्पबलेस्तदुत्सर्गस्य च देवतामुपदिशति–

▼ हरदत्तः

"श्रावण्यां 'पौर्णमास्यामस्तमिते स्थालीपाक" इत्यादि पौर्णमास्यां यत् कर्म चोदितं तत्र पौर्णमासीदेवता । का सा ? यस्यां तत् कर्म क्रियते श्रावण्यै पौर्णमास्यै स्वाहेति । एवं स्थालीपाकाद्धोमः । ततो यथोपदेशं किंशुकानि समिध आज्याहुतयश्च, ततः स्थालीपाकात् स्विष्टकृत् । ततो जयादि । "यस्यां क्रियत" इत्यनुच्यमाने पौर्णमास्यै स्वाहेत्येव होमः स्यात् ॥२८॥

▼ सुदर्शनः

यस्यां पौर्णमास्यां श्रावण्यां मार्गशीर्ष्यां च निमित्तभूतायां स्थालीपाकः क्रियते, तस्य सैव पौर्णमासी देवता । अयमर्थः सर्पबलौ "श्रावण्यै पौर्मास्यै स्वाहा" इति स्थालीपाकस्य होमः । उत्ससर्जने तु "मार्गशीर्ष्यै पौर्णमास्यै स्वाहा" इति ॥२८॥

इति श्रीसुदर्शनाचार्यकृते गृह्यतात्पर्यदर्शने सप्तमः खण्डः ॥

▼

⑤

>

पौर्णमास्यां पौर्णमासी यस्यां क्रियते।

# ०८ ०१ उपाकरणे समापने②

*(स्थालीपाकतन्त्रेण होमे - )* उपाकरणे समापने च ऋषिर् यः प्रज्ञायते १

▼

⑤

>
▼ Oldenberg

1. 19 At the opening and concluding ceremonies of the Vedic study, the Ṛṣi who is indicated (as the Ṛṣi of the Kāṇḍa which they study, is the deity to whom the ceremony belongs),

▼ हरदत्तः

*(सम्पादकटिप्पानी - इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼ सुदर्शनः

*(सम्पादकटिप्पानी - इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼

⑤

>

उपाकरणे समापने च ऋषिर्यः प्रज्ञायते।

# ०८ ०२ सदसस्पतिर्द्वितीयः②

*(सदसस्पतिमद्भुतमिति मन्त्रेण)* सदसस्पतिर् द्वितीयः *(स्विष्टकृतस् स्थान इति सुदर्शनसूरिः)* २

स॒दसस्प॑तिम् अ॒द्भुतं
प्रि॒यम् इ॒न्द्रस्य का॒म्यम् ।
स॒निं॑ *(=दानरूपम्)* मे॒धाम् अयासिषम् ६

▼

⑤

>
▼ Oldenberg

2. And in the second place Sadasaspati (cf. Mantrap. I, 9, 8).

▼ हरदत्तः

## उपाकर्मोत्सर्जनयोर् द्वैविध्यम्⑥

द्विविधम् **उपाकरणम्** – काण्डोपकरणम् अध्यायोपाकरणञ् चेति ।
तथा समापनम् ।

तथा चान्यपरे वाक्ये दर्शनं "काण्डोपाकरणे चामातृकस्य काण्डसमापने चापितृकस्ये"ति (आप.ध. १-११-१-२.)।

अध्यायोपाकरणं तु प्रसिद्धं- "श्रावण्यां पौर्णमास्यामध्यायमुपाकृत्येति" ।(आप. ध. १-९-१०.) । तथा समापनं - "तैष्यां पौर्णमास्यां रोहिण्यां वा विरमेत्", इति (आप. ध. १-९-२०.)।

तत्र द्विविधेऽपि **उपाकरणे समापने चर्षियः प्रज्ञायते** काण्डानुक्रमण्यां काण्डऋषित्वेन स तत्र देवता ।
तत्र सदसस्पतिर्द्वितीयः ।
काण्डऋषये हुत्वा सदसस्पतये होतव्यमित्यर्थः ।

## काण्डानि⑥

तत्र प्राजापत्यं सौम्यं आग्नेयं वैश्वदेवमिति **काण्डानि** ।
प्रजापतिः सोमो ऽग्निर् विश्वेदेवा इति **काण्डर्षयः** ।
**सारस्वतं** नाम सङ्कीर्णानि काण्डानि ।

यथाह बौधायनः – पौरोडाशिकं याजमानं होतारो हौत्रं पितृमेध इति सब्राह्मणानि सानुब्राह्मणानि **प्राजापत्यानि** ।
आध्वर्यवं ग्रहाः दाक्षिणानि समिष्टयजूंष्यवभृथयजूंषि वाजपेयश्शुक्रियाणि सवा इति सब्राह्मणानि सानुब्राह्मणानि **सौम्यानि** ।
अग्न्याधेयं पुनराधेयं अग्निहोत्रमग्न्युपस्थानमग्निचयनं सावित्रनाचिकेतचातुर्होत्रियवैश्वसृजारुणा इति सब्राह्मणानि सानुब्राह्मणान्य् **आग्नेयानि** ।
राजसूयः पशुबन्धः इष्टयो नक्षत्रेष्टयो दिवश्येनयोऽपाघाः सत्रायणमुपहोमाः सूक्तान्युपानुवाक्यं याज्या अश्वमेधः पुरुषमेधस्सौत्रामण्यच्छिद्राणि पशुहौत्रमुपनिषद इति सब्राह्मणानि सानुब्राह्मणानि **वैश्वदेवानीति** (बौ. गृ. ३-१-२१-२४.)।
अस्माकञ्च गृह्य-मन्त्र-प्रश्न-द्वयम् अप्य् **एकाग्निकाण्डं** नाम वैश्वदेवकाण्डे द्रष्टव्यम् ।

## उपाकरणसमापने⑥

तत्र **काण्डोपाकरणे** तस्य काण्डस्य ऋषिर्यः तस्मै होमः– प्रजापतये काण्डऋषये स्वाहेति ।
ततस् "सदसस्पतिम् अद्भुतम्" इति मन्त्रेण क्रम-प्राप्तेन सहित-मन्त्र-स्वाध्यायार्थं *(एकाग्निकाण्डे)* विवाहप्रकरणे पठितः ।
तस्यैव विनियोग-प्रदर्शनार्थम् इदं सूत्रम् अस्मिन् प्रदेशे पठितम् ।
अन्यथोपनयनानन्तरम् एव वक्तव्यं स्यात् ।

एवं तस्य तस्य समापने तस्मै तस्मै काण्डर्षये होमः ।
सदसस्पतये द्वितीयः ।
न जयादयः, प्रापकाभावात् ।*(4)*
सूत्रान्तराश्रयणेन केचिज् जुह्वति ।

तानीमानि **चत्वारि वेदव्रतानि** यानि प्रतिकाण्डम् **उपाकरणानि** ।
यानि समापनानि तानि **व्रतविसर्जनानि** ।

## अध्यायोपाकरणसमापने⑥

**अध्यायोपाकरणे** तु सर्वेषां काण्डर्षीणां होमः, ततस्सदसस्पतेः ।
जयादयश्च भवन्ति वा, न वा ।

## आर्षेय-पाठ-पक्षः⑥

तत्र काण्डोपाकरण-समापनयोर् उदगयनादि-प्राप्तेर् उपनयनानन्तरं तदानीम् एव *(→उपनयनात् समनन्तरम् एव)* प्राजापत्यं काण्डम् उपाकृत्य श्रावण्यां पौर्णमास्याम् उपाकृत्य प्राजापत्यस्य काण्डस्याध्ययनम् ।

तैष्यामुत्सर्गः ।
तत्रैतावता कालेन प्राजापत्यकाण्डस्य समाप्तौ तेनोत्सर्गः ।

अथ सौम्यस्योपाकरणम् *(प्राजापत्ये समाप्ते - नाध्यायोपाकरणं यावत् प्रतीक्षा)* ।
अथ यावद् अध्यायोपाकरणं तावत् प्राजापत्यस्य काण्डस्य धारणाध्ययनं शुक्ल-पक्षेषु ।*(5)* कृष्णपक्षेष्व् अङ्गाध्ययनम् ।*(5)*
श्रावण्याम् उपाकर्म ।
अथ सौम्यकाण्डस्याध्ययनम् ।
तैष्यामुत्सर्गः ।
काण्डसमापनम् ।

एवमितरयोः ।
सर्वत्र उत्सर्जनाद् ऊर्ध्वं पूर्व-गृहीतस्यांशस्य धारणाध्ययनम् अङ्गाध्ययनञ् च होमः प्रथमःकल्पः ।

## सारस्वत-पाठ-पक्षः⑥

अथ ये सारस्वतं पाठम् अधीयते तेषाम् उपनयनानन्तरं तदानीम् एव चत्वारि वेदव्रतानि क्रमेण कृत्वा कालेऽध्यायमुपाकृत्य यथापाठम् अध्ययनं तैष्याम् उत्सर्गः ।*(5)*
पूर्ववद्धारणाध्ययनम् अङ्गाध्ययनं च, पुनर् उपाकरणम् इत्यादि ।

## आर्षेय-पाठिष्व् आचारभेदाः⑥

आद्यकल्पे तु केचिद् उत्सर्जनं न कुर्वते ।
ओपाकरणाद् अधीत्य पुनर् उपाकुर्वते ।
अन्ये तूत्सृज्य पुनरधीयते । वेदव्रतानि च यदा कदाचित् कुर्वते ।
तेषां मूलं मृग्यम् ।

## शुक्रियाणाम्⑥

सर्वेष्व् अपि पक्षेषु शुक्रियाणां पृथग् उपाकरणम् उत्सर्जनञ् च ।

तत्र प्रयोगः—

पर्वण्य् उदयगयन इत्यारभ्याज्यभागान्ते सोमाय काण्डर्षये स्वाहेति, सदसस्पतिम् इति च हुत्वा
जयादि-परिषेचनान्ते मदन्तीर् उपस्पृश्येत्य् एवमादि प्रतिपद्यते । एवम् एव पूर्ववत् विसृज्येत्य् अत्रापि प्रयोगः ॥२॥
▼ सुदर्शनः

अत्र विषयशुध्यर्थम् अध्यायस्य च, प्राजापत्य-सौम्याग्नेय-वैश्वदेवाख्यानां काण्डानां च, तत्-तत्-काण्डाख्य-व्रतानां चोपाकरण-समापनयोश् च स्वरूपम् उच्यते।

## अध्यायानाम्⑥

तत्राध्यायस्योपाकरणं, श्रावण्यां पौर्णमास्यां विहित-होम-पूर्वकम् अध्यायानाम् आरम्भः ।
समापनं च, तस्य तैष्यां पौर्णमास्याम् इत्यादिषु होम-पूर्वकम् एवाध्ययनोत्सर्गः ।

## काण्डानाम्⑥

काण्डानाम् उपाकरणं तु, क्रम-प्राप्ते काले होम-पूर्वकम् एव तत्-तत्-काण्डानाम् अध्ययनोपक्रमः ।
समापनं चैषां तत्-तत्-काण्डाध्ययने समाप्ते होम-पूर्वकम् एवोत्सर्गः ।
य एते काण्डानाम् उपाकरण-समापने, ते एव व्रतानाम् इति, न भेदेन, अध्ययनाङ्गत्वात् सर्वेषां ब्रह्मचारि-व्रतानाम् ।*(4)*

सारस्वतपाठाध्ययने तु काण्डानां सङ्कीर्णत्वेन यथाकाण्डम् अध्ययनासम्भवात्, व्रतान्य् एवोदगयने काण्डवद् एकैकशः उपाकृत्य संवत्सरं चरित्वा विधिवद् उत्सृजेत् ।

## वेदव्रतानि⑥

चत्वार्येव च वेदव्रतानि, न तु गृह्यान्तरोक्ते सावित्र-सम्मिताख्ये वेद-व्रते, सावित्र-सम्मिताख्य-काण्डयोर् अभावात् ।
"चौलोपनयनं, चत्वारि वेदव्रतानि", (गौ. ध. ८-१५.) इति गौतमवचनाच् च ॥

## प्रयोगः⑥

तथा विषयशुध्यर्थम् एव प्रयोग-भाष्यम् अल्प-भेदम् एव लिख्यते ।
आपस्तम्ब-दर्शनानुगतोपदेशेनाध्यायोपाकरणादीनां कर्मोच्यते ।

## अध्यायोपाकरणस्य⑥

तत्र तावद् अध्यायोपाकरणस्य -

श्रावण्यां पौर्णमास्यां आचार्यश् शिष्यैस् सह कृत-प्राणायामो "ऽध्यायमुपाकरिष्य" इति सङ्कल्प्य महा-नद्यां विधिवत् स्नात्वा पवित्रपाणिः नव ऋषीन् तर्पयेत्–

> प्रजापतिं काण्डऋषिं तर्पयामि।
> सोमं काण्डऋषिं तर्पयामि।
> अग्निं काण्डऋषिं तर्पयामि।
> विश्वान्देवान् काण्डऋषिं तर्पयामि।

> सांहितीर् देवता उपनिषदस् तर्पयामि।
> याज्ञिकीर् देवता उपनिषदस् तर्पयामि।
> वारुणीर् देवता उपनिषदस् तर्पयामि।
> ब्रह्माणं स्वयंभुवं तर्पयामि।
> सदसस्पतिं तर्पयामि

इति।

ततो ऽग्नेर् उपसमादानाद्य्--अग्नि-मुखान्ते
अन्वारब्धेष्व् अन्तेवासिषु नवाज्याहुतीर् जुहोति।

> प्रजापतये काण्डऋषये स्वाहा।
> सोमाय काण्डऋषये स्वाहा।
> अग्नये काण्डऋषये स्वाहा।
> विश्वेभ्यो देवेभ्यः काण्डऋषिभ्यः स्वाहा।

*(उपहोमाः)*

> साँहितीभ्यो देवताभ्य उपनिषद्भ्यः स्वाहा । याज्ञिकीभ्यो देवताभ्य उपनिषद्भ्यः स्वाहा । वारुणीभ्यो देवताभ्य उपनिषद्भ्यस्स्वाहा ।
> ब्रह्मणे स्वयंभुवे स्वाहा ।

सदसस्पतिम् इत्य् एतय र्चा नवमीम् आहुतिं जुहोति ।

तत आचार्य-प्रमुखाः दर्भेष्व् आसीना
दर्भान् धारयमाणा
वेदस्यादितश् चतुरो ऽवरार्ध्यान् अनुवाकान् अधीयीरन् ।
अथ जयादि, परिषेचनान्ते ब्राह्मण-तर्पणम् ।

### उत्सर्गः⑥

एवम् एवोत्सर्गो,
न ततोऽधिकं स्मृत्य्-अन्तरोपसंहारेणापि, किन्तु यथापस्तम्बीयं सूत्रम् ।

तथा नादितो वेदस्यानुवाकानाम् अध्ययनम् ।
जयादयस् तु भवन्ति ।

### सौम्ये विशेषः⑥

सौम्याद् ऋते काण्डोपाकरण-समापनयोश् च
न सूक्तोपहोम-देवतोपस्थान-जयादयः ।
सौम्यस्यैव सूक्त-जयादयः । एवम् आपस्तम्ब-मत एवावस्थिताः
केचित् कुर्वते यथोक्तम् ॥

### प्राजापत्य-व्रतम्⑥

### आरम्भः⑥

अथ प्राजापत्ये व्रते
पूर्ववत् स्नात्वा
सोमाग्नि-विश्वेदेव-वर्ज्यानां तर्पणम् ।
अग्नि-मुखान्ते चान्वारब्धे
व्रतिनि जुहोति-

> प्रजापतये काण्डऋषये स्वाहा ।

"प्रजापते न त्वदेतान्यन्यः" ( तै. ब्रा. २-८-१-२.)
इति सूक्तेन प्रत्यृचं षडाहुतीः,
चतस्र उपहोमाहुतीः -
साँहितीभ्य इत्यादिभिर् एव,
"सदसस्पतिम्" इत्य् एतयैव सदसस्पतिं च ।

अथ व्रती उपस्थेय-
देवता अभिसन्धायाग्निपुरोगाश् चतस्रो देवता उपतिष्ठते ।

> "अग्ने व्रतपते काण्डऋषिभ्यः {प्राजापत्यं} व्रतं चरिष्यामि,
> तच् छकेयं, तन् मे राध्यताम् ।

> {वायो व्रतपते, आदित्य व्रतपते, व्रतानां व्रतपते} -
> काण्डऋषिभ्यः {प्राजापत्यं} व्रतं चरिष्यामि, तच् छकेयं, तन् मे राध्यताम्," (तै.आ. ४-४१-३.)

इत्येतैश् चतुर्भिर् यथादैवतम् ।

ततो जयादि, ब्राह्मणतर्पणं च ।

## समाप्तिः⑥

एवम् एव समापने प्रयोगः - संवत्सरे संवत्सरे पर्यवेते *(=समाप्ते)* ।
तत्रोपस्थान-मन्त्रेषु "अचारिषम् अशकम् अराधीति" विशेषः ।

केचित्— सौम्ये केश-श्मश्रु-वापनस्य दृष्टत्वात्
प्राजापत्यादिष्व् अपीच्छन्ति ॥

एवम् एवाग्नेये वाश्वदेवे च ।

## आग्नेयम्⑥

अग्नये काण्डऋषये स्वाहा;
"अग्ने नय" (तै.ब्रा.२-८-३.) इति षड्चं सूक्तम्, ;
"अग्ने व्रतपते काण्डऋषिभ्यः {आग्नेयं} व्रतं चरिष्यामि" इत्याग्नेये विशेषः ।

## वैश्वदेवम्⑥

विश्वेभ्यो देवेभ्यः काण्डऋषिभ्यः स्वाहा ; "आ नो विश्वे अस्क्रागमन्तु" (तै. ब्रा.२-८-६-३.) इति षड्चं सूक्तम् ; "वैशवदेवं व्रतं चरिष्यामी"ति वैश्वदेवव्रते विशेषः ॥

## सौम्यम् - शुक्रियम्⑥

## उपाकर्म⑥

सोमस्य काण्डोपाकरण-समापने शुक्रिय-कल्पोक्ते । अत्राप्युक्तं यत्तदुच्यते– पूर्ववद् उपाकृत्याग्नेर् उपसमाधानाद्य्-अग्निमुखान्ते, "सोमाय काण्डऋषये स्वाहा" ।
"सोमो धेनुम्" (तै.ब्रा.३-९-३-१.) इति षड्चं सूक्तम् ।

उपहोमान्, सदसस्पतिं च हुत्वा,
एवं पुर्ववद् उपाकृत्य,
मदन्तीम् उपस्पृश्य
प्रथमेनानुवाकेन शान्तिं कृत्वा
चतस्र औदुम्बरीस् समिधो घृतान्वक्ता अभ्यादधाति - "पृथिवी समित्" (तै. आ. ४-४१-१०.) इत्यादिभिः ।

अथ देवतोपस्थानम् -
"अग्ने व्रतपते काण्डऋषिभ्यः सौम्यं व्रतं चरिष्यामि" इत्यादिभिः ।

ततः प्रभृति शुक्रिय-मन्त्र-ब्राह्मणानुवाकानां प्रथम-पदानि "युञ्जते" (तै. आ. ४-२.) "सविता" (तै. आ. ५-१२.) इति वाभिव्याहार्य वाचयित्वा जयादि प्रतिपद्यते ।

परिषेचनान्तं कृत्वा
मदन्तीम् उपस्पृश्य,
उत्तमेनानुवाकेन शान्तिं कृत्वा
ततस् सम्मीलनादि यथासूत्रम् ।

श्वो-भूते "वयः सुपर्णाः" (तै.आ. ४-४२-३.) इत्यादित्योपस्थानान्ते ब्राह्मण-भोजनम् ।

अथास्य स्वाध्यायविधिः शुक्रिय-कल्प एवोक्तः ।

## समाप्तिः⑥

एवं समापने ।
विशेषस्तु "द्यौस् समिद् आदित्य व्रतपते" (TA.4.41.2,4) इत्याद्य्-आवृत्ताः समिदाधानोपस्थान-मन्त्राः । उत्तमेनानुवाकेन शान्तिं कृत्वा गुरवे वरं दत्वा केशश्मश्रु वापयित्वा ब्राह्मणभोजनम् ।

## सूत्रपरीक्षा⑥

## सूत्राव्यर्थता⑥

अथ सूत्रम् आक्षिप्यते— ननु- "उपाकरणे समापने च ऋषिर् यः प्रज्ञायते" इति यः प्रजापत्यादीनाम् अन्यतमः काण्डानुक्रमण्यां काण्ड-ऋषित्वेन समाम्नायते स ऋषिः देवतेति व्यर्थम् एवेदं सूत्रम् ।

> काण्डोपकरणेष्वेतान् पुरस्तात् सदसस्पतेः ।
> जुहुयात् काण्डसमाप्तौ च श्रुतिरेषा सनातनी ॥
> (काण्डा.२-११.)

इति काण्डानुक्रमण्यां काण्डर्षिदेवतात्वस्य सिद्धत्वात् ।

सत्यम्, अत एव प्रजापत्य्-आदयश् चत्वारः प्रधान-होम-देवताः ; साँहित्य्-आदयस् स्वयम्-भु-पर्यन्ताश् चत्वार उपहोम-देवताः ।
तेनैते चत्वारस् सर्वकाण्डानाम् उपाकरण-समापनयोर् अनुवर्तन्ते प्रधानानुवर्तित्वाद् अङ्गानाम् इत्य्-एवं-परं सूत्रम्, न देवतात्व-विधि-परम् ॥१॥

## सदसस्पतेर् द्वितीयता⑥

ननु– सदसस्पतिर् अध्यायोपाकरण-समापनयोर् नवमः । काण्डोपाकरण-समापनयोष् षष्ठः ।
एवमयमद्वितीयोऽपि किमर्थं द्वितीय इत्युच्यते? ।

द्वतीयस्य स्विष्टकृतः स्थानेऽयं सदसस्पतिर् भवेद् इत्येवमर्थम् ।
इदमर्थमेव च पूर्वत्र "अग्निस्विष्टकृद्द्वितीयः" (आप. गृ. ७-७.) इत्युक्तम् ।

## होम-स्थान-निर्देशः⑥

उपाकरण-समापनयोर् आज्यहविष्कयोः स्विष्ट-कृद् एव नास्ति, कथं तत्स्थाने सदसस्पतिविधिः? इति चेत्—
अनेनैव वचनेनास्य प्रसङ्गो विधीयते, यथा अग्निहोत्रे द्वितीयस्या आहुतेश् शातपथेन ब्राह्मणेन ।
तेनाग्नेर् उत्तरार्ध-पूर्वार्धे ऽस्मै होमः ।
एतद्-विस्मरणे स्विष्टकृल्-लोप-प्रायश्चित्तं च ।

अयं च होमो लिङ्गक्रमाभ्यां "सदसस्पतिम् अद्भुतम्" इत्येतया होतव्य इति स्पष्टत्वात् सूत्रकारस्यानादरः *(प्रतीकग्रहणे)*॥

### आक्षेपान्तरम्⑥

केचित्—

> "उपाकरणे समापने च यः काण्डऋषिः प्रज्ञायते तस्य द्वितीयस् सदसस्पतिः । काण्डऋषेर् उपरिष्टाद् अयं मन्त्रस् सदसस्पतिर् विनियुज्यते, न तु विवाहे, 'उद्दीप्यस्वे'ति ऋग्-द्वयम् इव । विवाह-मध्ये पाठस् त्व् अध्ययन-विध्यर्थः"

इत्य् एवं सदसस्पति-मन्त्रस्य विषय-ज्ञापन-व्याजेन एतयोः कर्मणोः प्रयोग-कल्पस्यान्यत्र प्रसिद्धस्यात्राप्रसिद्धत्वात् अवश्याश्रयणीयस्य इह शास्त्रेऽभ्यन्तरीभावोऽस्य सूत्रस्य प्रयोजनम्, ततश् च क्रिया-प्रवृत्तिर् इति ।

तन् न; सूत्रस्थस्य सदसस्पति-शब्दस्य मुख्यार्थ-देवतापरत्व-सम्भवेऽपि
मन्त्र-प्रतीकं लक्षयित्वा तेन लक्षितेन मन्त्र-लक्षणाया अयुक्तत्वात्,
उक्तविधयानयोर् इहैव प्रयोगस्य प्रसिद्धत्वात्,
अन्यत्र प्रसिद्धस्याभ्यन्तरीभाव-वैयर्थ्याच् च ॥२॥

▼

### ⑤

>

सदसस्पतिर्द्वितीयः।

# ०८ ०३ स्त्रियाऽनुपेतेन②

स्त्रिया ऽनुपेतेन क्षार-लवणावरान्न-संसृष्टस्य च होमं परिचक्षते ३

▼

### ⑤

>

▼ Oldenberg

3. They reject a sacrifice performed by a wife or by one who has not received the Upanayana initiation, and a sacrifice of salt or pungent food, or of such food as has an admixture of a despised sort of food.

▼ हरदत्त-प्रस्तावः

> "यस्याग्नौ न क्रियते
> न तद् भोक्तव्यम्" (आप.ध.२-१५-११.)

इति धर्मशास्त्रवचनात्
शरीर-स्थित्य्-अर्थम् अपि भोजनं

द्विजस्य वैश्व-देव-शेषेणैव भवितव्यम् ।

> "चतू-रात्रम् अहूयमानो ऽग्निर्
> लौकिकस् सम्पद्यते"

इति वचनाद्
अहुते ऽग्निहोत्रे
सर्वक्रत्व्-अर्थो ऽग्निर् लौकिकस् स्यात् ।

ततश् च ज्वरादिभिर् उपद्रवे सत्य् अपि
वैश्वदेवाग्निहोत्रादेः तत्-प्रायश्चित्तानां वा होमानाम् अवश्य-कार्यत्वाद्
ऋत्विग्-अन्तर+अलाभे सत्य् अपि
द्वयोर् अपि स्त्र्य्-अनुपेतयोः येन केनचित् प्रकारेण मन्त्र-लिङ्ग-लोपेनापि तत्र प्रसक्तिः ।

तथा वैश्वदेवस्य श्राद्धादिषु
"अथ गृह-मेधिनो यद् अशनीयस्य होमा बलयश्च" (आप.ध. २-३-१२.)
इति वचनात्,
सुवर्चकायव-**क्षाराभ्यां लवणेन चावरान्नेन** च कोश-धान्यापर-नाम्ना माषादिना तिल-व्यतिरिक्तेन
**संसृष्टस्यापि** भवति हविषो होमे प्रसक्तिः ।

तद् उभयनिषेधार्थम् आह—
▼ हरदत्तः

पाक-यज्ञाधिकारे सर्वत्रायं प्रतिषेधः श्रद्धादिष्व् अप्य्
**अवरान्नानि** कोशी-धान्यानि माषादीनि कृष्ण-धान्यानि चणक-कोद्रवादीनि
**परिचक्षते** वर्जयन्ति शिष्टाः ।

> "न स्त्री जुहुयात् । नानुपेतः । न क्षारलवणहोमो विद्यते"

इति प्रतिषेधेनैव सिद्धे
उत्तरार्थोऽयं प्रतिषेधः ।

किञ्च

> "पाणिग्रहणादि गृह्यं परिचरेत् -
> स्वयं, पन्त्य् अपि वा पुत्रः कुमार्यन्तेवासीव"(आश्व.गृ.१-९-१.)

इति आश्वलायन-वचनेन
पन्त्य्-आदीनाम् औपासन-होम-प्राप्त्य्-आशङ्कायां प्रतिषेधः ॥३॥

▼ सुदर्शनः

**स्त्रिया +अनुपेतेन** अनुपनीतेन च
**होमं** होम-मात्रं - श्रौतं स्मार्तं च
शिष्टाः **परिचक्षते** वर्जयन्ति "यस्मात्,
तस्माद् एव ताभ्यां न होतव्यम्" इति वाक्यशेषः ।

**होमम्** इति च सामान्याभिधानेन
श्रौतहोमेऽपि स्त्र्यनुपनीतौ शिष्टाः वर्जयन्तीति ज्ञापनात्
गार्ह्याधिकारापवादः ।

क्षारेत्यादि व्याख्यात-प्रायम् एव ।

यत् तु धर्मशास्त्रे

> "न क्षार-लवण-होमो विद्यते ।
> तथा ऽवरान्न-संसृष्टस्य च" (आप.ध.२-१५-१२,१३.)

इति, तत्

> "उदीचीनम् उष्णं भस्मापोह्य
> तस्मिन् जुहुयात्" (आप.ध.२-१५-१४.)

इति विधानार्थोऽनुवादः।

यद् अपि तत्रैव
"न स्त्री जुहुयात् नानुपेतः" (आप.ध.२-१५-१५,१६) इति
तत् क्षारादि यथोष्ण-भस्मनि हूयते,
तथा तस्मिन्न् अपि स्त्र्य्-अनुपनीताभ्यां न होतव्यम् इति निषेद्धुम् ॥३॥
▼

⑤

>

स्त्रियाऽनुपेतेन क्षारलवणावरान्नसंसृष्टस्य च होमं परिचक्षते।

# ०८ ०४ यथोपदेशङ् काम्यानि②

यथोपदेशं काम्यानि बलयश् च ४

▼

⑤

>
▼ Oldenberg

4. Sacrifices connected with special wishes and Bali sacrifices (should be performed) as stated (even against the clauses of the last Sūtra).

▼ हरदत्त-प्रस्तावः

अस्य प्रतिषेधस्य प्रतिप्रसवमाह–

▼ हरदत्तः

योऽयं स्त्र्यादीनां प्रतिषेधः स काम्येषु कर्मसु नादरणीयः।
**यथोपदेशमेव** तानि कर्तव्यानि ।
तथा **बलयश् च** यथोपदेशम् एव कर्तव्याः ।

सिध्य्-अर्थे - यदस्य गृहे पण्यं स्याद् इति काम्योदाहरणम् ।

एवम् अत ऊर्ध्वं - यद्-अशनीयस्येत्यादि बलीनां होमे चोदितस्य स्त्र्यादिप्रतिषेधस्य बलिषु प्रसङ्गाभावात् ज्ञापकम् इदं होमधर्मो बलिषु प्रवर्तत इति । तेन अपरेणाग्निं दक्षिणं जान्वाच्येत्य्-एवम्-आदि बलिष्वपि भवति ।

"न काम्येषु बलिषु च" इत्येव सिद्धे यथोपदेशम् इति वचनम्
उपदेशाद् एवैषां प्रवृत्तिः -
स्वशास्त्रेण शास्त्रान्तरेण वा न प्रतिनिधित्वेन ॥४॥

▼ सुदर्शनः

यानि **काम्यानि** येन प्रकारेणोपदिष्टानि तानि तथैव भवन्ति - नैव तत्र क्षारादिवर्जनम्।

"यदस्य गृहे पण्यं स्यात्" (आप.गृ. २-३-५.) इत्य् उपदेशस्य गृह-शब्देन विशेषितत्वात् । यदि तत्र क्षारादि-वर्जनम् इष्टं स्यात्, तदा "यदस्य पण्यं स्याद्" इत्य् एतावद् एव ब्रूयात् ।*(???)*

तथा **बलयश् च** यथोपदेशम् एव ।
न तु क्षारादि-निषेधः, "सति सूप-संसृष्टेन कार्याः" (आप.ध.२-३-१९.) इत्यारम्भ-सामर्थ्यात् ।
अन्यथा "गृह-मेधिनो यद्-अशनीयस्य होमा बलयश् च" इति वचनाद् एव क्षारादि-व्यतिरिक्त-शाक-मांसादि-सूप-संसृष्टेनान्नेन कार्यास् स्युः ।
अत्र च "यदशनीयस्य होमा बलयश्च" इति होम-साहचर्यात् बलिष्व् अपि या क्षारादि-निषेध-शङ्का सा वार्यते ।

केचित्— **यथोपदेशं काम्यानि बलयश्** चेत्य् अस्माद् एव ज्ञापनाद्+धोम-धर्माणां बलिष्व् अपि प्रसक्तिर् इति ।
तेषां सर्पबलौ सक्तु-निर्वापे स्वाहा-कारो दुर्वारः ॥४॥
▼

⑤

>

यथोपदेशं काम्यानि बलयश्च।

# ०८ ०५ सर्वत्र स्वयम्②

सर्वत्र स्वयं *(धमनादि पुरुषप्रयत्नमन्तरेण)* प्रज्वलितेऽग्नावुत्तराभ्यां *(=उद्दीप्यस्व जातवेदः, मा नो हिंसीः)* समिधावादध्यात् ५

उद्दी॑प्यस्व जातवेदो
ऽप॒घ्नन् निर्ऋ॑तिं॒ मम॑ ।
प॒शूँश् च॒ मह्य॒म् आ व॑ह॒
जीव॑नञ् च॒ दिशो॑ दश ।*(२५)*

मा नो॑ हिँसीज् जातवेदो॒
गाम् अश्वं॒ पुरु॑ष॒ञ् जग॑त् ।
*(परहवींष्य्)* अबि॑भ्र॒द्*(न्)* अग्न॒ आग॑हि*(=आगच्छ)*,
श्रि॒या मा॒ परि॑पातय ॥ (9)

▼

⑤

>
▼ Oldenberg

5. Whenever the fire flames up of itself, he should put two pieces of wood on it with the next two (verses: M. I, 9, 9-10),

▼ हरदत्तः

**सर्वत्र** सर्वेषु पाकयज्ञेषु अग्नौ स्वयं प्रज्वलिते धमनादि पुरुषप्रयत्नमन्तरेणेत्यर्थः । एतस्मिन् निमित्ते संप्राप्ते उत्तराभ्यामृग्भ्यां द्वे समिधावग्नावादध्यात् "उद्दीप्यस्व" "मा नो हिंसीः" इति । आदधातिचोदितत्वात् स्वाहाकारो नास्ति । सर्वत्र ग्रहणात् सर्वपाकयज्ञेष्वयं विधिर्भवति । अन्यथा प्रकरणाद्विवाह एव स्यात् । सर्वत्र लौकिके वैदिके गार्ह्ये वाग्नाविति । एककर्मकालेष्वित्यन्ये ॥५॥

▼ सुदर्शनः

**सर्वत्र** सर्वाचारलक्षणेषु कर्मसु । अन्ये— सर्वदा अकर्मकालेष्वपीति । स्वयंप्रज्वलितेऽग्नौ प्रयत्नमन्तरेणौपासने प्रज्वलिते । उत्तराभ्यां ऋग्भ्यां "उद्दीप्यस्व जातवेदः" इत्येताभ्यां समिधावादध्यात् । प्रत्यृचमेकैकां समिधमादध्यात्, स्वतस्साधनभेदे क्रियाभेदात् । आदधातिप्रहरतीत्याद्यजुहोतिचोदितेषु न स्वाहाकारो विहितः । प्रस्तरप्रहरणेऽपि "न स्वाहाकरोति" (आप.श्रौ.३-६-७.) इत्येतत्, आदधातीत्यादिष्वपि प्रतिषेधदर्शनार्थम् । अन्ये तु– "न स्वाहाकरोति" इत्येष प्रतिषेधः अजुहोतिचोदितेष्वप्यादधातीत्यादिषु स्वाहाकार् ज्ञापयतीति ॥५॥

▼

⑤

>

सर्वत्र स्वयं प्रज्वलितेऽग्नावुत्तराभ्यां समिधावादध्यात् ।

# ०८ ०६ आपन्माश्रीः श्रीर्मागादिति②

"आपन् मा श्रीः, श्रीर् मा गाद्" इति वा ६

▼

⑤

>

▼ Oldenberg

6. Or with (the two formulas), 'May fortune reach me! May fortune come to me!'

▼ हरदत्तः

एताभ्यां यजुर्भ्यां एते समिधावादध्यादिति मन्त्रविकल्पः ॥६॥

▼ सुदर्शनः

"उद्दीप्यस्वे"ति ऋग्द्वयेन आपन्मेत्येतद्यजुर्द्वयं विकल्प्यते ॥६॥

▼

⑤

>

आपन्माश्रीः श्रीर्मागादिति वा।

# ०८ ०७ एतदहर्विजानीयाद्यदहर्भार्यामावहते②

एतदहर् विजानीयाद् यदहर् भार्याम् आवहते *(विवाहाब्दिकम् अत्रोक्तम् इति हरदत्तः)* ७

▼

⑤

>

▼ Oldenberg

7. Let him notice the day on which he brings his wife home.

▼ हरदत्तः

**एतदहः** एतन्नक्षत्रम् । **विजानीयात्** न विस्मरेत् । **यदहः** यस्मिन्नक्षत्रे भार्यां **आवहते** तत्कुलादानयति । यस्मिन्नक्षत्रे पाणिग्रहणं कृतं तत् न विस्मर्तव्यमित्यर्थः । आवहत इत्यनेनादिपाणिग्रहणं विवक्षितम् । अविस्मरणोपदेशे प्रयोजनं संवत्सरे संवत्सरे तस्मिन्नक्षत्रे कर्मविशेषः । कः पुनरसौ

? "यच्चैनयोः प्रियं स्याद्"(आप.ध.२१७) इत्यादि सामयाचारिकेषूपदिष्टः । न चासौ विधिः । पार्वणविशेषो यदि स्यात् तस्योपचारः पार्वणेन व्याख्यात इत्येतदसमञ्जसं स्यात् । अथ स विधिरेवेह कस्मान्नोपदिश्यते? उच्यते– इहोपदेशे प्रकरणाद्विवाहाङ्गत्वं विज्ञायेत । ततश्च शम्यादयोऽपि विवाहधर्माः स्युः किञ्च सर्वचरणार्थः तत्रोपदेशः ॥७॥
▼ सुदर्शनः

यस्मिन्नहनि गृहप्रवेशनादि स्थालीपाकान्तं कर्म करोति तद् **एतदहर्** अवधित्वेन **विजानीयात्** तत आरभ्य त्रिरात्रमुभयोरधश्शय्येत्यादि कर्तुम् । केचित्—यस्मिन्नक्षत्रे विवाहोऽभूत् तस्य न विस्मरेत् । धर्मशास्त्रे "श्वोभूते स्थालीपाकः" (आप. ध.२-१-१०.) इत्युपदिष्टकर्म प्रतिसंवत्सरं कर्तुम् । तस्य चेहोपदिष्टस्य तत्रोपदेशः– कथं विवाहाङ्गत्वं शम्याश्च मा भूवन्, सर्वचरणार्थता च कथं स्यादिति । प्रकृतत्वादेव च स्थालीपाकादारभ्य त्रिरात्रमुभयोरधश्शय्येत्यादि भविष्यतीति । तन्न; यथोक्तकर्मान्तरे विधेरेव निरस्तत्वात् "पार्वणेन" (आप. गृ. ७-२-३.) इत्यत्र ॥७॥
▼

⑤

>

एतदहर्विजानीयाद्यदहर्भार्यामावहते ।

# ०८ ०८ त्रिरात्रमुभयोरधश्शय्या②

त्रिरात्रमुभयोरधश् शय्या ब्रह्मचर्यं क्षारलवणवर्जनं च ८

▼

⑤

>
▼ Oldenberg

8. (From that day) through three nights they should both sleep on the ground, they should be chaste, and should avoid salt and pungent food.

▼ हरदत्तः

स्थालीपाकादारभ्य **त्रिरात्रमुभयोः** दम्पत्योः **अधश्शय्या** नोपरि खट्वादौ । **ब्रह्मचर्यं** मैथुनवर्जनं, **क्षारलवणयोश्च वर्जनं** भोजने । तत्र क्षारलवणवर्जनं स्थालीपाकात् प्रागध्वनि न भवति । ब्रह्मचर्यं तु तत्रापि भवति । चतुर्थ्यां समावेशनविधानात् इदं तु ब्रह्मचर्यवचनं दार्ढ्यार्थम् । यद्यपि सहशयनमुभयोः, तथापि मैथुनवर्जने यत्नः कार्य इति ॥८॥

▼ सुदर्शनः

**उभयोर्** दम्पत्योः स्थालीपाकादारभ्य त्रिरात्रम् **अधश्शय्या** स्यात्, न तु खट्वादौ । नापि पृथक्शय्या, उभयोरिति ग्रहणात् । तथाष्टाङ्गमैथुनवर्जनलक्षणं **ब्रह्मचर्यं** स्यात् । मैथुनस्याष्टाङ्गत्वमपि बृहस्पतिनोक्तम्— "स्मरणं कीर्तनं केळिः प्रेक्षणं गुह्यभाषणम् । सङ्कल्पोऽध्यवसायश्च क्रियानिर्वृतिरेव च ॥ एतन्मैथुनमष्टाङ्गं प्रवदन्ति मनीषिणः ॥" इति । एतच्च स्थालीपाकात् प्रागप्यध्वनि, "शेषं समावेशने जपेत्" (आप. गृ. ८-१०.) इत्युत्तरत्र क्रमविधानात् । अत एवात्र सूत्रे शय्यैक्यात् दुर्वारमपि मैथुनमतिप्रयत्नेन वर्जनीयमित्येवमर्थस्तन्निषेधः । तथैव **क्षारलवणवर्जनं च** स्यात् । चकारान् मधुमांसदन्तधावनाञ्जनाभ्यञ्जनानुलेपनस्रग्धारणानां वर्जनमपि । यद्वा ब्रह्मचर्यपदेनैव मध्वादिसप्तकमपि निषिद्धम् । चकारस्तूक्तसमुच्चयार्थ एव । सर्वत्र त्रिरात्रमित्येव ॥८॥

▼

⑤

>

त्रिरात्रमुभयोरधश्शय्या ब्रह्मचर्यं क्षारलवणवर्जनं च ।

# ०८ ०९ तयोश्शय्यामन्तरेण दण्डो②

तयोश् शय्यामन्तेरण दण्डो गन्धलिप्तो वाससा सूत्रेण वा परिवीतस्तिष्ठति ॥

▼

⑤

>

▼ Oldenberg

9. Between their sleeping-places a staff is interposed, which is anointed with perfumes and wrapped round with a garment or a thread.

▼ हरदत्तः

**तयोः** दम्पत्योः **शय्यामन्तरेण** शयनस्य मध्ये **दण्डः** क्षीरिवृक्षोद्भवः **गन्धेन** सुरभिणा **लिप्तः** पुष्पैश्चालङ्कृतः **वाससा सूत्रेण वा परिवीतः तिष्ठति** स्थापयितव्यः । अन्योन्यसंस्पर्शो मा भूदिति ॥९॥

▼ सुदर्शनः

**तयोः** व्रतस्थयोर्दम्पत्योर्यावत्त्रिरात्रमभिन्ना शय्या ताम् **एवान्तरेण** तस्या एव मध्ये, न तु त्रिरात्रादूर्ध्वं नानाशय्यामेकशय्यां चान्तरेणापीति ; तयोरिति प्रकृतपरामशात् । **दण्डो गन्धलिप्तः** चन्दनानुलिप्तः । गन्धस्य प्रदर्शनार्थत्वात् पुष्पैरप्यलङ्कृतः । **वाससा सूत्रेण वा परिवीतस्तिष्ठति** स्थापयितव्यः । अस्मिंश्च दण्डे गन्धर्वो विश्वावसुर्भावयितव्यः, "उदीर्ष्वातो विश्वावसो" इति मन्त्रलिङ्गात् । अत एवायं दण्डो नैयग्रोध औदुम्बर आश्वत्थः प्लाक्षो वा, "एते वै गन्धर्वाप्सरसां गृहाः" (तै.सं.३-४-८.) इत्यर्थवादात् ॥९॥

▼

⑤

>

तयोश्शय्यामन्तरेण दण्डो गन्धलिप्तो वाससा सूत्रेण वा परिवीतस्तिष्ठति ।

# ०८ १० तञ् चतुर्थ्याऽपररात्र②

तं *(दण्डं)* चतुर्थ्या ऽपररात्र *(=रात्रेस्तृतीयो भागः)* उत्तराभ्याम् *(="उदीर्ष्वात" इत्येताभ्यां)* उत्थाप्य, प्रक्षाल्य, निधाय,

उदीर्ष्वा"ऽतो विश्वावसो *(गन्धर्व)*
न"मसेडामहे त्वा ।
अन्या"म् इच्छ प्रफर्व्यँ *(=प्रथमवयसं)*
सञ्जायां" प"त्या सृज ।

उ"दीर्ष्व" *(=उद्गच्छ)* +अ"तः प"तिवती ह्ये३"षा"
विश्वा"वसुं न"मसा गीर्भि"र् ईळे ।
अन्या"म् इच्छ पितृष"दं व्य्क्तां
स" ते भागो" जनु"षा त"स्य विद्धि ॥२१

उ॒दी॒र्ष्वातः॒ पति॑वती॒ ह्य् ए॑षा
वि॒श्वाव॑सुं॒ नम॑सा गी॒र्भिर् ई॑ट्टे *(=याचे)* ।
अ॒न्याम् इ॑च्छ पितृ॒षदं॒ व्य॑क्ताँ॒
स ते॑ भा॒गो ज॒नुषा॒ तस्य॑ विद्धि ।

## शेष-होम-मन्त्राः⑤

अग्नेरुपसमाधानाद्याज्यभागान्ते ऽन्वारब्धायाम् उत्तरा आहुतीर् *(=सप्त प्रधानाहुतीर्जुहोति "अग्ने प्रायश्चित्ते"इत्येवमाद्याः)* हुत्वा जयादि प्रतिपद्यते।

अग्नें प्रायश्*(=विनाश)*-चित्ते*(=सन्धातः)*! त्वन् देवानां प्रायश्चित्तिर् असि।
ब्राह्मणस् त्वां नाथ-कामः प्रपंद्ये।
याऽस्यां पतिघ्नी तनूः प्रंजाघ्नी पंशुघ्नी लंक्ष्मिघ्नी, जांरघ्नीम् अंस्यै ताङ् कृंणोमि स्वाहां ।*(र५)*

वायों प्रायश्चित्ते! त्वन् देवानां प्रायश्चित्तिर् असि।
ब्राह्मणस् त्वां नाथ-कामः प्रपंद्ये।
याऽस्यां पतिघ्नी तनूः प्रंजाघ्नी पंशुघ्नी लंक्ष्मिघ्नी, जांरघ्नीम् अंस्यै ताङ् कृंणोमि स्वाहां ।*(र५)*

आदिंत्य प्रायश्चित्ते! त्वन् देवानां प्रायश्चित्तिर् असि।
ब्राह्मणस् त्वां नाथ-कामः प्रपंद्ये।
याऽस्यां पतिघ्नी तनूः प्रंजाघ्नी पंशुघ्नी लंक्ष्मिघ्नी, जांरघ्नीम् अंस्यै ताङ् कृंणोमि स्वाहां ।*(र५)*

प्रजांपते प्रायश्चित्ते! त्वन् देवानां प्रायश्चित्तिर् असि।
ब्राह्मणस् त्वां नाथ-कामः प्रपंद्ये।
याऽस्यां पतिघ्नी तनूः प्रंजाघ्नी पंशुघ्नी लंक्ष्मिघ्नी, जांरघ्नीम् अंस्यै ताङ् कृंणोमि स्वाहां ।*(र५)*

प्रसवश्*(=अनुज्ञा)* चोंपयामश्*(=पृथिवी)* च

*(इयं वा उपयामः इति श्रुतेः)*
काटंश्*(=लिङ्गरूपरुद्रः)* चार्णवश् चं
धर्णसिश्*(=गृहं)* च द्रविंणञ् च
भगंश् चान्तरिंक्षञ् च
सिन्धुंश् च समुद्रश् च
सरंस्वाँश् च विश्वव्यंचाश् च
ते यं द्विष्मो यश्चं नो द्वेष्टि, तमेंषाञ् जम्भें*(=दन्ते)* दद्ध्मस् स्वाहां ।

*(वसन्तादीनां षण्णामृतूनां द्वौद्वौ मासौ-)*

मधुंश्च माधंवश्च
शुक्रश्च शुचिंश्च
नभंश्च नभस्यंश् च
+इषश् चोर्जश्च
सहंश् च सहस्यंश् च
तपंश् च तपस्यंश् च
ते यं द्विष्मो यश्चं नो द्वेष्टि तमेंषाञ् जम्भें*(=दन्ते)* दद्ध्मस् स्वाहां ।

चित्तञ् च चित्तिश् चा+
ऽकूंतञ्*(=अभिप्रेतम्)* चाकूंतिश्*(=अभिप्रायः)* च
+अधींतञ् चाधींतिश्च
विज्ञांतञ्च विज्ञानंञ्च
नामं च क्रतुंश्*(=आकृतिः)* च
दर्शश्च पूर्णमांसश्च
ते यं द्विष्मो यश्चं नो द्वेष्टि तमेंषाञ् जम्भें*(=दन्ते)* दद्ध्मस् स्वाहां ।

## वध्वाश् शिरस्य् आज्यशेषानयनम्⑥

भूस् स्वाहा, भुवस् स्वाहा, सुवस् स्वाहों स्वाहां ॥ (10)

*(भूरादयः त्रयो लोकाः । ओमिति ब्रह्म ॥)*

इति श्रीहरदत्तविरचिते एकाग्निकाण्डमन्त्र व्याख्याने दशमः खण्डः

## परस्परवीक्षणम्⑥

परिषेचनान्तं कृत्वा, अपरेणाग्निं प्राचीम् उपवेश्य तस्याश् शिरस्याज्यशेषाद् व्याहृतिभिर् ओङ्कारचतुर्थाभिरानीयोत्तराभ्यां *(="अपश्यं त्वे"त्येताभ्यां)* यथालिङ्गं *(=पूर्वया वधूः उत्तरया वरः)* मिथस्समीक्ष्य,

*(वधूर् वरं समीक्षते)*

अप॑श्यन् त्वा॒ मन॑सा॒ चेकि॑ताने॒*(=जानन्तं)*
तप॑सो जा॒तं तप॑सो॒ विभू॑तम् ।
इ॒ह प्र॒जाम् इ॒ह र॒यिँ ररा॑णः॒
प्रजा॑यस्व प्र॒जया॑ पुत्रकाम ।

---

*(वरो वधूम् ईक्षते)*

अप॑श्यन् त्वा॒ मन॑सा॒ दीध्या॑ना॒ँ*(=ध्यायन्तीं)*
स्वायां॑ त॒नूँ*(=त्वां)* ऋ॒त्विये॒ *(काले)* नाथ॑मानाम् ।
उप॒ माम् *(सम्भोगकाले)* उ॒च्चा यु॑व॒तिर् बुभू॑याः॒*(=अनुभूयाः)*
प्रजा॑यस्व प्र॒जया॑ पुत्रकामे ।*(४)*

उत्तरया *(="समञ्जन्त्वि"त्येतया)* ऽज्यशेषेण हृदयदेशौ संमृज्य,

---

*(उत्तरयाऽऽज्यशेषेण हृदयदेशौ समनक्ति)*

स"मञ्जन्तु वि"श्वे देवाः"
स"मा"पो हृ"दयानि नौ ।
सं" मातरि"श्वा सं" धाता"
स"मु दे"ष्ट्री*(=दात्री [फलानाम्])* दधातु नौ ॥

सम॑ञ्जन्तु॒ विश्वे॑ दे॒वास्
समापो॒ हृद॑यानि नौ ।
सं मा॑त॒रिश्वा॒ सं धा॒ता
समु॒ देष्ट्री॑*(=सरस्वती)* दिदेष्टु नौ ।*(२५)*

## अथ जपः⑥

उत्तरास् तिस्रो *(="प्रजापते तन्व"मित्याद्याः)* जपित्वा,

प्रजा॑पते त॒न्वं॑ मे जुषस्व॒
त्वष्ट॑र् दे॒वेभि॑स् स॒हसा॒म*(न= सममान)* इन्द्र ।
विश्वै॑र् दे॒वै रा॒तिभि॑स् सँ ररा॒णः
पुँ॒सां ब॑हू॒नां मा॒तर॑स् स्याम ।*(२४)*

*(गृहप्रवेशे - )*

आ" नः प्रजा"ञ् जनयतु प्रजा"पतिर्
आजरसा"य *(स्नेहाय)* स"मनक्त्व् अर्यमा" ।

अʺ-दुर्-मङ्गलीः पतिलोकʺम् आʺ विश
शʺन् नो भव द्विपʺदे शʺञ् चʺतुष्पदे ।

तांʺ पूषञ् छिवʺतमाम् एʺरयस्व
यʺस्यां बीʺजं मनुष्या॒ वʺपन्ति ।
याʺ न ऊरूʺ उशतीʺ *(=कामयमाना)* विस्रʺ *(श्र)*यातै *(=विश्लिष्टौ कुर्यात्)*
यʺस्याम् उशʺन्तः *(=कामयमानाः)* प्रʺहरेम शेʺफम् ॥ *(५)* (11)

शेषं *(="आरोहोरु"मित्यादि)* समावेशने जपेत् ॥

*(अन्तरात्मन्!)* आरो॑हो॒रुम् उप॑बर्हस्व बा॒हुं
परि॑ष्वजस्व जा॒याँ सु॑मन॒स्यमा॑नः *(=प्रीयमाणः)* ।
तस्यां॑ पुष्यतं मिथु॒नौ सयो॑नी (=सङ्गतोपस्थौ)
ब॒ह्वीं प्र॒जां ज॒नय॑न्तौ॒ सरे॑तसा ।

आ॒र्द्रया *(आज्याक्तया)*ऽर॑ण्या॒ *(अग्निम्)* यत्रा *(था)*ऽम॑न्थ॒त्,
*(तथा)* पुरु॑षं॒ *(गर्भम्)* पुरु॑षेण *(शेफेन)* श॒क्रः ।
तद् ए॒तौ मि॑थु॒नौ सयो॑नी *(=सङ्गतोपस्थौ)*
प्र॒जया॒ऽमृते॑ने॒ह ग॑च्छतम् ।

▼

### ⑤

>
▼ Oldenberg

10. In the last part of the fourth night he takes up the (staff) with the next two (verses; M. I, 10, 1-2), washes it and put it away; then (the ceremonies) from the putting of wood on the fire down to the Ājyabhāga oblations (are performed), and while she takes hold of him, he sacrifices the oblations (indicated by the) next (Mantras; M. I, 10, 3-9); then he enters upon the performance of the Jaya and following oblations, and performs (the rites) down to the sprinkling (of water) round (the fire). Then he makes her sit down to the west of the fire, facing the east, and pours some Ājya of the remains (of those oblations) on her head with the (three) Vyāhṛtis and the word Om as the fourth (M. I, 10, 10-13). Then they look at each other with the next two verses (M. I, 11, 1-2), according to the characteristics (contained in those verses); with the next verse (M. I, 11, 3) he besmears the region of their hearts with remains of Ājya; then he should murmur the next three verses (I, 11, 4-6), and should murmur the rest (of the Anuvāka; I, 11, 7-11) when cohabiting with her.

▼ हरदत्तः

**अपररात्रो** रात्रेस्तृतीयो भागः **उत्तराभ्याम्** उदीर्ष्वात इत्येताभ्याम् । अत्र प्राप्तस्य निधानस्य विधानं पुनस्तस्मिन् शयने दण्डस्य निधानं मा भूदिति ॥९॥ **उत्तराः** सप्त प्रधानाहुतीर्जुहोति– "अग्ने प्रायश्चित्ते" इत्येवमाद्याः । तत्रादितश्चतुर्षु मन्त्रेषु "त्वं देवानां प्रायश्चित्तिर्" इत्ययमनुषङ्गः । उत्तरे मन्त्रास्त्रयः । आज्यभाग इत्यन्वारम्भकालोपदेशः । जयादि प्रतिपद्यत इति च तन्निवृत्तिः ॥१०॥ तन्त्रशेषं समाप्य ततः ताम् **अपरेणाग्निं** अग्नेः पश्चात् **प्राचीं** प्राङ्मुखीं **उपवेश्य** यो हुतस्याज्यस्य शेषः तस्मादवदाय दर्व्या **तस्या** वध्वाश् **शिरसि व्याहृतिभिरोङ्कारचतुर्थाभिः** स्वाहाकारान्ताभिः प्रतिमन्त्रम् **आनयति** । ततः **उत्तराभ्याम्** ऋग्भ्यां "अपश्यं त्वा" इत्येताभ्यां **यथालिङ्गं मिथः** अन्योऽन्यं युगपत् **समीक्षेते**, पूर्वया वधूः उत्तरया वरः । ततो वर **उत्तरयर्चा** "समञ्जन्तु" इत्येतया वधूवरयोरुभयोर्हृदयदेशौ समनक्ति तेनैवाज्यशेषेण सकृत् गृहीतेनाज्येन सकृदेव मन्त्रं चोक्त्वा । ततः **उत्तरास्तिस्त्रो जपति** "प्रजापते तन्वम्" इत्याद्याः । ततः **शेषम्** अनुवाकशेषं "आरोहोरुम्" इत्यादि **समावेशने** समागमनकाले **जपेत्** । समावेशनं च तस्मिन्नेवापररात्रे नियमेन भवति । इदमेव समावेशनं मन्त्रवत् नान्यानि । परिषेचनान्तवचनमानन्तर्यार्थम् । परिषेचनान्ते एतदेव कर्म यथा स्यात् । तेन भोजनं प्रागेव भवति ॥१०॥

▼ सुदर्शनः

चतुर्थ्या अपररात्रे इति विवृत्यार्थपाठः । चतुर्थ्या रात्रेः चतुर्थस्याहोरात्रस्यापररात्रे रात्रेरपरत्र तृतीयभागे **तं दण्डं उत्तराभ्यां** "उदीर्ष्वात" इत्येताभ्यां **उत्थाप्याद्भिः प्रक्षाल्य** शयनादन्यत्र **निधायाग्नेरुपसमाधानादि** तन्त्रं प्रतिपद्यते । **आज्यभागान्ते** कृते **वध्वामन्वारब्धायां उत्तराः** "अग्ने प्रायश्चित्ते" इत्याद्यास्सप्ताहुतीर्जुहोति । तत्र द्वितीयतृतीययोरपि "त्वं देवानां" इत्याद्यनुषङ्गः । ततोऽन्वारम्भवर्जं जयादौ प्रणीता मोचनान्ते कृते **अपरेणाग्निं** वधूं **प्राचीं** प्राङ्मुखीमुपवेश्य हुतशेषादाज्यमादाय **तस्याश्शिरसि व्याहृतिभिर्** ओङ्कारचतुर्थाभिस्वाहाकारान्ताभिस्सर्वेषामन्ते सकृदानयति । केचित्— प्रतिमन्त्रमिति । अथ **उत्तराभ्यां** "अपश्यं त्वा मनसा" इत्येताभ्यां **यथालिङ्गं**, पूर्वया वधूरुत्तरया वरः, **मिथः** अन्योन्यं युगपत् **समीक्ष्य उत्तरया** "समञ्जन्तु" इत्येतया **आज्यशेषेण हृदयदेशौ** युगपदङ्गुष्ठविस्रंसिनीभ्यां समनक्ति, "समापो हृदयानि नौ" इति द्विवचनलिङ्गात् । अथ **उत्तरास्तिस्रः** "प्रजापते तन्वं मे" इत्याद्या जपित्वा **शेषम्** अनुवाकशेषं "आरोहोरुम्" इत्यादिकं **समावेशने** समावेशनकाले जपेत् । समावेशनं च वध्वा सह मैथुनार्थं शयनम्, "ऋतुसमावेशने" (आप.गृ.८-१३.) इत्यृतुलिङ्गात् । एतच्च रागप्राप्तसमावेशनाश्रितं विवाहकर्मार्थं क्रमजपयोर्विधानम्, यथा भोजनपर्यायव्रताश्रितं पयआदिविधानम् । केचित्– असत्यपि रागे कर्मार्थमस्मिन् क्रमे समविशनं नियतमेवेति । समावेशनान्तरेषु तु अकर्मार्थत्वादेव नायं जपः । बौधायनेन तु विकल्पोऽभिहितः (बौ.गृ.२-७-१२.) इति । अस्मिन्नेव क्रमे यदि दैवादृतुगमनमपि कर्तव्यं स्यात् तदा पूर्वं "आरोहोरुम्" इत्यादिजपः । ततो "विष्णुर्योनिम्" इत्यादिभिरभिमन्त्रणम् ॥१०॥
▼

⑤

>

तं चतुर्थ्याऽपररात्र उत्तराभ्यामुत्थाप्य प्रक्षाल्य निधायाग्नेरुपसमाधानाद्याज्यभागान्तेऽन्वारब्धायामुत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते परिषेचनान्तं कृत्वाऽपरेणाग्निं प्राचीमुपवेश्य तस्याश्शिरस्याज्यशेषाद्व्याहृतिभिरोङ्कारचतुर्थाभिरानीयोत्तराभ्यां यथालिङ्गं मिथस्समीक्ष्योत्तरया ऽऽज्यशेषेण हृदयदेशौ सम्मृज्योत्तरास्तिस्रो जपित्वा शेषँ समावेशने जपेत् ।

# ०८ ११ अन्यो वैनामभिमन्त्रयेत②

अन्यो वैनाम् अभिमन्त्रयेत *(अत्र सुदर्शनाचार्यः - इदं च "अहं गर्भमदधाम्" इत्यादि लिङ्गविरोधेऽपि श्रुतेर्बलीयस्त्वा)*११

अ॒हं गर्भ॒म् अद॑धा॒म् ओष॑धीष्व्
अ॒हं विश्वे॑षु॒ भुव॑नेष्व् अ॒न्तः ।
अ॒हं प्र॒जा अ॑जनयं पितॄ॒णाम्
अ॒हं जनि॑भ्यो *(=जन्याः = वध्वाः)* अप॒रीषु॑ *(=पश्चात्कालस्नुषासु)* पु॒त्रान् ।*(५)*

पु॒त्रिणे॒मा कु॑मा॒रिणा॒ विश्व॒म् आयु॒र् व्य॑श्नुतम् ।
उ॒भा हिर॑ण्य-पेशसा*(=रूपौ)* वी॒ति*(=हविर्)*हो॑त्रा कृ॒तद्व॑सू (=कृतवसू)।

द॒श॒स्यन्त्वा॒ *(=दशस्यन्तौ =दातारौ)* ऽमृता॑य॒ कँ (पादपूरणे) श*(स)*म् ऊधो॑
रोम॒शँ हं॑थो*(=श्लिष्टं कुरुतम्)* दे॒वेषु॑ कृ॒णुतो॒ दुव॑ः (=परिचरणम्)।*(४)*

▼

⑤

>
▼ Oldenberg

11. Or another person should recite (the rest of the Anuvāka) over her, (before they cohabit).

▼ हरदत्तः

**अन्यो वा** ब्राह्मणः कश्चित् एनौ जायापती समागमिष्यन्तौ अनुवाकशेषेणा**भिमन्त्रयेत** । न स्वयं वरो जपेत् । तत्र यत् वधूवासः प्रागनेन परिधापितं तत् व्रतान्ते विमुच्यान्यत् वासः परिधाय संस्पृशति वधूः । तेन हस्तस्पर्शने दोषदर्शनात् परादेहि शाबल्यमित्येतासु । व्रतचर्यायां तु दण्डेनान्तर्हितत्वादसंस्पर्शः । तद्वासः श्वोभूते परादेहि शावल्यमित्येताभिश्चतसृभिः ऋग्भिस्सूर्याविदे ब्राह्मणाय वरो दद्यात् । यथा वक्ष्यति– "वधूवास उत्तराभिरेतद्विदे दद्यात्" (आप. गृ. ९-११.) इति आश्वलायनेनाप्युक्तं– "सूर्याविदे वधूवस्त्रं दद्यात् । अन्नं ब्राह्मणेभ्यः" (आश्व. गृ. १-८-१३,१४) इति ॥११॥

▼ सुदर्शनः

व्यक्तार्थम् । इदं च "अहं गर्भमदधाम्" इत्यादि लिङ्गविरोधेऽपि श्रुतेर्बलीयस्त्वात् ॥११॥

▼

⑤

>

अन्यो वैनामभिमन्त्रयेत।

# ०८ १२ यदा मलवद्वासाः②

यदा मलवद्वासाः स्यादथैनां ब्राह्मण-प्रतिषिद्धानि कर्माणि संशास्ति "यां मलवद्वाससम्" *(तै.सं. २.५.१)* इत्येतानि ॥

▼

⑤

>

▼ Oldenberg

12. 20 During her (first) monthly illness he instructs her about the things forbidden (to menstruous women), contained in the Brāhmaṇa, in the section, 'A menstruous woman with whom,' &c.

▼ हरदत्तः

**मलवद्वासा** इति रजस्वलाया अभिधानम् । यदेतिवचनं विवाहादूर्ध्वमपि प्राप्त्यर्थम् । अन्यथा विवाहमध्य एव स्यात्; प्रकरणात् । संशासनं च प्रथमर्तौ सकृत् भवति । तदेव सर्वार्थं भवति । यथा ब्रह्मचारिण उपनयने । एनामित्यनुच्यमाने अन्य एनौ संशास्तीत्येवं विज्ञायेत । "अन्यो वैना"विति प्रकृतत्वात् । ब्राह्मणप्रतिषिद्धानीत्युच्यते लोकप्रतिषिद्धान्युपरिशय्यासनादीनि लोकत एव प्रत्येतव्यानीति ज्ञापनार्थम् । कर्माणीति वचनात् कर्मणामेव शब्दान्तरैरवबोधनम्, न ब्राह्मणवाक्येन संप्रैषः । "एतानी"तिवचनं "यां मलवद्वाससम्" इत्यादीनां प्रतिषिद्धानां विहितानां च संशासनं यथा स्यात् । तेन "तिस्रो रात्रीर्व्रतं चरेदञ्जलिना वा पिबेत्" (तै. सं.२-५-१.) इति विहितयोरपि संशासनं भवति । एवञ्च "ब्राह्मणप्रतिषिद्धानी"ति प्रतिषिद्धग्रहणमुपलक्षणम् । तत्र "यां मलवद्वाससम्" इति वाक्ये स्नानात् प्राक् समागमप्रतिषेधः । "यामरण्य" इति देशप्रतिषेधः । स्नातायामपि "यां पराचीम्" इति पराङ्मुख्या गमनप्रतिषेधः । "या स्नाती"ति त्रिरात्रमध्ये स्नानस्य प्रतिषेधः । "याऽभ्यङ्ते" इत्यभ्यञ्जनस्य । "या प्रलिखत" इति शिरसि प्रलेखनस्य कङ्कतादिना । "याऽऽङ्ते" इति चक्षुषोरञ्जनस्य । "या दतः" इति दन्तधावनस्य । "या नखानी"ति नखनिकृन्तनस्य । "या कृणत्ती"ति कार्पासादेस्तन्तुकर्मणः । "या रज्जुम्" इति रज्जुक्रियायाः । "या पर्णेने"ति पर्णेनाशनस्य । "या खर्वेणे"ति खर्वेण पात्रेण । एकदेशविलुप्तं खर्वम् । "तिस्रो रात्रीर्" इत्येतेषां प्रतिषेधानां कालनियमः । "अञ्जलिना वा पिबेद्" इत्यादिर्भोजने पात्राविधिः॥१२॥

▼ सुदर्शनः

**मलवद्वासाः** कालनिर्गतेन शोणितेन मलिनं वासो वसनं यस्यास्सा; रजस्वलेत्यर्थः । रूढशब्दत्वाद्यदृच्छया निर्मलवासा अपि यदेयं रजस्वला स्यात्, तदा पतिरेवैनां **ब्राह्मणप्रतिषिद्धानि कर्माणि संशास्ति** लौकिकभाषया शिक्षयति । कानि तानि ब्राह्मणप्रतिषिद्धानीत्यत आह– **यां मलवद्वाससम्" इत्येतानि ।** "यां मलवद्वाससँ संभवन्ति" (तै. सं.२-५-१-४.) इत्येतद्ब्राह्मणचोदितानि, तान्येतान्यपि सर्वाणीत्यर्थः । अथ तानि सुग्रहार्थं क्रमेणोच्यन्ते– न स्नानात्पूर्वं मैथुनम् । तदेव न स्नानादूर्ध्वमप्यरण्ये । तदेव न स्नातयापि पराङ्मुख्या अनिच्छन्त्या वा । अपूर्णे त्रिरात्रे न स्नानम् । न तैलाभ्यञ्जनम् । न कङ्कतादिना शिरसि लेखनम् । न चक्षुषोरञ्जनम् । न दन्तधावनम् । न नखनिकृन्तनम् । न कार्पासादिना तन्तुकरणम् । न रज्जुक्रिया । इत्येतान्येकादश । अथाशनपात्रमञ्जलिरखर्वो वा । खर्वः अल्पः, खण्डो वा दग्धोऽपि वा । ततोऽन्योऽखर्वः । अत्र चामी मैथुनादिनिषेधा अमैथुनादिसङ्कल्प विधयो वेति भाष्ये न विविक्तम् । न्यायतस्तु "तिस्रो रात्रीर्व्रतं चरेत्" (तै. सं.२-५-१.) इति वचनात् "नेक्षेतोद्यन्तमस्तंयन्तमादित्यम्" इत्यादि प्राजापत्यविधिवत् सङ्कल्पविधय एव ॥१२॥

▼

⑤

>

यदा मलवद्वासाः स्यादथैनां ब्राह्मणप्रतिषिद्धानि कर्माणि सँशास्ति "या मलवद्वासस"मित्येतानि ।

---

1. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩
2. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩
3. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩
4. 12 seq. Description of the regular form of a Pākayajña.↩
5. Comp. Śrauta-sūtra I, 11, 6 seqq.↩
6. This is the Praṇītā water.↩
7. The Brahman.↩
8. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩
9. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩
10. 12 seq. Description of the regular form of a Pākayajña.↩
11. Comp. Śrauta-sūtra I, 11, 6 seqq.↩
12. This is the Praṇītā water.↩
13. The Brahman.↩
14. Comp. Taitt. Brāhmaṇa II, 1, 4, 5; Śatapatha Brāhmaṇa II, 3, 1, 18. 21. - At the Agnihotra the sacrificer, having wiped off the Sruc with his hand, wipes off the hand on the Barhis or on the earth (Āpast.-Śraut. VI, 10, 11; 11, 4; Kātyāyana IV, 14, 20). As to the following acts alluded to in this Sūtra, comp. Āpastamba VI, 11, 4. 5; 12, 2.↩
15. On the Nakṣatra Invakās, comp. Section 3, Sūtra 4. This Sūtra forms a Śloka-hemistich, on which Haradatta observes, 'This verse has not been made by the Sūtrakāra.'↩
16. See below, V, 13, 16.↩
17. See Āpastamba Dharma-sūtra II, 2, 3, 1 (S.B.E., vol. ii, p. 103).↩
18. For instance, the Srāvaṇī paurṇamāsī is the deity of the ceremony described below, VII, 18, 5 seq.↩
19. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩
20. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

# ०५ ऋतुसमवेशनम्①

## ०८ १३ रजसः प्रादुर्भावात्②

रजसः प्रादुर्भावात्स्नातामृतुसमावेशने उत्तराभिरभिमन्त्रयेत *(=ऽविष्णुर्योनिऽमित्यादिभिः त्रयोदशभिः)* १३

▼

⑤

>

▼ Oldenberg

13. After the appearance of her monthly illness, he should, when going to cohabit with her after her illness, recite over her, after she has bathed, the next verses (M. I, 12, 1-13, 4).

▼ हरदत्तः

**रजसः** लोहितस्य । **ऋतौ** यत् **समावेशनं** तत्र कर्तव्ये, **उत्तराभिर्** ऋग्भिः "विष्णुर्योनिम्" इत्यादिभिः त्रयोदशभिर् **अभिमन्त्रयेत** । "रजसः प्रादुर्भावाद्" इति वचनात् सर्वस्मिन् रजसः प्रादुर्भावेऽभिमन्त्रणं भवति । न संशासनवत् प्रथम एवर्तौ । "स्नाताम्" इत्येतत् ब्राह्मणप्रतिषिद्धानां सर्वेषां प्रतिप्रसवार्थम् । **स्नातां** कृतमङ्गलामित्यर्थः । तेनाञ्जनाभ्यञ्जनान्यपि भवति ॥१३॥

इति श्रीहरहरदत्तविरचितायां गृह्यसूत्रवृत्तावनाकुलायामष्टमः खण्डः ॥

▼ सुदर्शनः

**रजसः** शोणितस्य । **प्रादुर्भावात्** काले निर्गमात्कारणात्, न मालिन्यादेः । **स्नातां** पूर्णे त्रिरात्रे स्नातां भार्याम् । **ऋतुसमावेशने** ऋतुकालीनसमावेशनकाले । "ऋतुश्च स्त्रीणां रजोनिर्गमनादारभ्य षोडश दिवसाः, "ऋतुस्वाभाविकस्स्त्रीणां रात्रयष्षोडश स्मृताः" (म.स्मृ.३-४६.) इति मनुवचनात् । उत्तराभिः "विष्णुर्योनिं कल्पयतु" इत्यादिभिस्त्रयोदशभिर् **अभिमन्त्रयते** । अत्र रजसः प्रादुर्भावात् स्नातामितिवचनाच्चतुर्थऽहनि प्रायत्यार्थमनया स्नातव्यमेव ॥१३॥

इति श्री सुदर्शनाचार्यविरचिते गृह्यतात्पर्यदर्शनेऽष्टमः खण्डः॥

▼

⑤

>

रजसः प्रादुर्भावात् स्नातामृतुसमावेशने उत्तराभिरभिमन्त्रयते ।

## ०९ ०१ चतुर्थीप्रभृत्याषोडशीमुत्तरामुत्तरां②

चतुर्थीप्रभृत्याषोडशीमुत्तरामुत्तरां युग्मां प्रजानिःश्रेयसमृतुगमन इत्युपदिशन्ति १

▼

⑤

>

▼ Oldenberg

1. Each following night with an even number, from the fourth (after the beginning of her monthly illness) till the sixteenth, brings more excellent offspring to them, if chosen for the (first) cohabiting after her illness; thus it is said.

▼ हरदत्तः

**षोडशीम्** इति पञ्चम्यर्थे द्वितीया । आषोडश्या इत्यर्थः । आङ्चाभिविधौ । रजसः प्रादुर्भावादारभ्य चतुर्थीषोडश्यौ गृह्येते, प्रकरणात् । चतुर्थीप्रभृत्याषोडश्याः सर्वा रात्रय ऋतुगमनकालाः । तत्रापि **उत्तरामुत्तरां युग्मां** रात्रिं **प्रजानिश्श्रेयसं** विद्यादिति । ऋतुगमन इति वचनात् वैवाहिके प्रथमगमने सत्यपि ऋतुनिमित्तेनायमुपदेशः प्रवर्तते । चतुर्थ्या अपाररात्रे नियमेन गमनं भवति । तत्र च शेषं समावेशने जपेत् । उत्तराभिरभिमन्त्रयत इति च गमनमन्त्राणां समुच्चयो भवति । तत्र पूर्वमृतुगमनमन्त्राः । पश्चात् समावेशनमन्त्राः । विपरीतमन्ये ॥१॥

▼ सुदर्शनः

चतुर्थीप्रभृतीति दीर्घेणार्थपाठः । **चतुर्थी** रात्रिमारभ्य् **आषोडशीं;** आङ् अभिविधौ, द्वितीया च पञ्चम्यर्थे; आषोडश्या इति यावत् । **उत्तरामुत्तरां युग्मां** रात्रिं प्रति **ऋतुगमने** ऋतौ मैथुने कृते, **प्रजानिःश्रेयसं,** प्रजाः पुत्राः तेषां निश्श्रेयसं आयुरादीप्सितगुणसम्पत्तिर्भवति **इत्युपदिशन्ति** मन्वादयः । एतदुक्तं भवति–त्रयोदशसु रात्रिषु ऋतुगमने शुक्लाधिक्ये सति पुत्रा जायन्ते । उत्तरोत्तरासु च युग्मासु यथाक्रमं तरतमभावेन ते सद्गुणाधिका भवन्ति ॥१॥

▼

⑤

>

चतुर्थीप्रभृत्याषोडशीमुत्तरामुत्तरां युग्मां प्रजानिश्श्रेयसमृतुगमन इत्युपदिशन्ति ।

# ०६ कर्मान्तराणि①

# ०९ ०२ अर्थप्राध्वस्य परिक्षवे②

अर्थप्राध्वस्य *(अर्थाय प्रस्थितस्य)* परिक्षवे परिकासने चाप उपस्पृश्योत्तरे *(अनुहवं परिहवं)* यथालिङ्गं *(अनुहवे = अन्वाह्वाने, परिहवे, दुःस्वप्ने … ऽपीति हरदत्तः)* जपेत् ॥

▼

**⑤**

>

▼ Oldenberg

2. If he sneezes or coughs while going about on business, he should touch water and should murmur the two following (verses; M. I, 13, 5. 6) according to the characteristics (which they contain).

▼ हरदत्त-प्रस्तावः

संस्कारकाण्डे कर्मान्तरव्याख्यानम् असङ्गतम् अपि मन्त्राम्नान-क्रमेणैव कार्यम् इत्युत्तरसूत्रजातं यावत्पटलान्तरमारभ्यते—

▼ हरदत्तः

अध्वानं प्रस्थितः प्राध्वः । अर्थः प्रयोजनम् । यत्किञ्चित् प्रयोजनमुद्दिश्य योऽध्वानं प्रस्थितः, तस्य **अर्थप्राध्वस्य । परिक्षवे परिकासने** वा दुर्निमित्ते प्राप्ते प्रायश्चित्तं अप उपस्पृश्योत्तरे ऋचौ ** जपेत्** "अनुहवं परिहवं" इत्येते । परितः क्षवः **परिक्षवः**। सर्वतः स्थितैर्जनैःकृतक्षवथुः । तथा परिकासनम् । उपस्पर्शनं पाणिना संस्पर्शः, स्नानमाचमनं वा । तत्र यस्मिन् कृते प्रयतो मन्यते तत्र तत् कुर्यात् । यथालिङ्गमित्यनुपपन्नम् । परिक्षवपरिकासलिङ्गाभावात् । अथ पूर्वस्यामृचि परिक्षवशब्द एकदेश विकृतो लिङ्गमित्युच्यते तथाप्युत्तरस्यां परिकासनलिङ्गं नास्त्येव । तस्मादेवं व्याख्येयम्— एतयोर्निमित्तयोरेकस्मिन्नपि सति मन्त्रयोरेतयोर्जपः कार्यः । अन्येषु च मन्त्रलिङ्गप्रतीतेष्वनुहवादिषु दुर्निमित्तेष्विति । तत्र पृष्ठत आह्वानम् **अनुहवः** । सर्वत आह्वानं **परिहवः** । **परिवादो**ऽभिशंसनम् । **परिक्षव** उक्तः । **दुःस्वप्नः** प्रसिद्धः । **दुरुदितम्** अल्पायुरित्यादि । **अनुहूतं परिहूतम्** इति शकुनेरशोभना वागुच्यते । **अशाकुनं** अनिमित्तभूतम् । **मृगस्य** सृगालादेः । **अक्षणया सृतम्** तिर्य्यग्गमनमपसव्यादि । एतेषामेकस्मिन्नपि निमित्ते द्वयोरपि मन्त्रयोर्जपः कार्यः । परिक्षवपरिकासनयोश्च लिङ्गाभावेऽपि । परिक्षवशब्दस्तु क्षवधुलिङ्गं न भवति, रूपभेदात् । एकदेशविकारस्तु परिक्षवस्यापि संभवति । तन्निमित्ते तु अन्यस्मिन् प्रकरणे एतद्वक्तव्यम् । इह च वचनप्रयोजनं विवाहार्थं गच्छतोऽपि एतेषु निमित्तेषु प्रायश्चित्तमेतत् यथा स्यादिति । प्रकरणान्तरे तु श्रुतानां विवाहादूर्ध्वमेव प्रवृत्तिः । इदं तु अर्थप्राध्वस्येति वचनात् सर्वार्थं च भवति । प्रकरणात् विवाहेऽपि स्वाध्यायस्थाननियमार्थं च मन्त्रयोरेतयोरिह पाठः ॥२॥

▼ सुदर्शनः

**अर्थः** प्रयोजनं, धर्मार्थ तदुपकारकाणि । अर्थमुद्दिश्य यः प्रसिद्धमध्वानं प्रस्थितः सोऽर्थप्राध्वः, न तु स्नान, ब्रह्मयज्ञोदक,युग्यघासादिकमुद्दिश्य समीपदेशं प्रति निर्गतः । तस्य **परिक्षवे** क्षवधौ **परिकासने** कासे च दुर्निमित्ते जाते **अप उपस्पृश्य** उपस्पर्शनमाचमनं स्पर्शनमात्रं वा यथातुष्टि कृत्वा **उत्तरे** "अनुहवं परिहवम्" इत्येते **यथालिङ्गे** परिक्षवे पूर्वां, परिकासने चोत्तरां **जपेत्** । जपत्वाच्चानयोश्चातुस्स्वर्यमेव । अत्र च यथालिङ्गमित्यनेनैतत् ज्ञापयति–पूर्वया वर्णव्यत्ययेन परिक्षव एव प्रकाश्यः, उत्तरया त्वध्याहृतं परिकासनमेव । यथा चैते ऋचौ क्षवधुकासावेव तात्पर्येण प्रकाशयतः, तथा व्याख्याते भाष्यकारेण । केचित्– यथालिङ्गमिति न केवलं परिक्षवे परिकासने चानयोर्जपः, अन्येषु च मन्त्रलिङ्गप्रतीतेष्वनुहवादिषु दुर्निमित्तेष्वपीति ॥२॥

▼

**⑤**

>

अर्थप्राध्वस्य परिक्षवे परिकासने चाप उस्पृश्योत्तरे यथालिङ्गं जपेत्।

# ०९ ०३ एवमुत्तरैर्यथालिङ्गञ्②

एवम् *(अर्थप्राध्वस्य दुर्निमित्ते ऽप उपस्पृश्य)* उत्तरैर्यथालिङ्गं *(=अग्निरस्त्विति चित्रियपक्षे, सिग्वाते सिगसिनसि, शकुनौ "उद्गातेव शकुने", "आरात्ते अग्निः" इति वनस्पतौ, "नमश्शकृत्सदे" इति शकृद्रीतौ)* चित्रियं *(=अश्वत्थविशेषं)* वनस्पतिं *(पुष्पैर्विना फलवन्तम्)* शकृद्रीति सिग्वातं *(=सिचो वस्त्रस्य वातम्)* शकुनिम् *(=सुवचनम्। अशुभवचनम् इति सुदर्शनः।)* इति ॥

▼

⑤

>

▼ Oldenberg

3. In the same way with the next (Mantras - M. I, 13, 7-10 - he should address the following objects), according to the characteristics (which those Mantras contain): a conspicuous tree, a heap of excrements, the skirt (of his garment) which is blown against him by the wind, and a shrieking bird.

▼ हरदत्तः

**एवम्** इत्यनेन "अर्थप्राध्वे"ति च, अप उपस्पृश्येति च, "जपेद्" इति चापेक्ष्यते । एवञ्च यथालिङ्गवचनं विस्पष्टार्थम् । **चित्रियः** प्रसिद्धः तत्रार्थप्राध्वः चित्रियं वृक्षमासाद्याप उपस्पृश्य "अग्निरस्त्वि"ति एतयर्चानुमन्त्रयते । "नयश्शकृत्सदे" इति **शकृद्रीतिम्** उपतिष्ठेत । "सिगसी"ति **सिग्वातम्** अन्यकृतम् । आत्मसंस्पृष्टो वाससा कृतो वातः सिग्वातः । सिगसि नासीति दीर्घान्ते प्राप्ते छान्दसो ह्रस्वः । **शकुनिं** शुभां वाचमनुमन्त्रयेत "उद्गातेव शकुने" इत्येतयर्चा अशुभवचने तु प्रागुक्तो जपः । केचिदिदमपि तत्रैवेच्छन्ति ॥३॥

▼ सुदर्शनः

एवमित्यनेन अर्थप्राध्वोऽप उपस्पृश्येत्याकृष्यते । इहोत्तरैरिति करणविभक्तिदर्शनाद् वनस्पत्यादीनि यथालिङ्गमभिमन्त्रयते । न तु पूर्ववज्जपेत् । **चित्रियं** लोकप्रसिद्धम्, चयनमूलं वा । **वनस्पतिं** पुष्पैर्विना फलवन्तम् । अस्य प्रदर्शनार्थत्वात् वृक्षमप्येवंविधं "आरात्ते अग्निः" इत्येतयाऽभिमन्त्रयते । "नमश्शकृत्सदे" इति **शकृद्रीतिं** शकृत्सन्ततिम् । "सिगसिनसि" इति **सिग्वातम्** । सिचो वस्त्रस्य वातस्सिग्वातः । स चान्यकृतः स्वदेहसंस्पृष्टश्चेदमङ्गलः । "उद्गातेव शकुने" इत्येतया **शकुनिम्** अशोभनवाचम्, "प्रति नस्सुमना भव" इति मन्त्रलिङ्गात् ॥ केचित्— शुभवाचं, अशुभदर्शने तु पूर्वसूत्रेणोक्तो जप इति ॥३॥

▼

⑤

>

एवमुत्तरैर्यथालिङ्गं चित्रियं वनस्पतिं शकृद्रीतिं सिग्वातं शकुनिमिति ।

# ०९ ०४ उभयोर्हृदयसंसर्गेऽप्सुस्त्रिरात्रावरम्②

उभयोर् हृदय-संसर्गेप्सुस् त्रिरात्रावरं ब्रह्मचर्यं चरित्वा, *(पुनर्वस्वोः)* स्थालीपाकं श्रपयित्वा ऽऽग्नेरुपसमाधानाद्याज्यभागान्ते ऽन्वारब्धायाँ स्थालीपाकादुत्तरा आहुतीर् *(सप्त प्रधानाहुतयः प्रातरग्निमित्येवमाद्याः)* हुत्वा, जयादि प्रतिपद्यते, परिषेचनान्तं कृत्वा, तेन *(स्थालीपाकेन)* सर्पिष्मता युग्मान् द्व्यवरान् ब्राह्मणान् भोजयित्वा सिद्धिं वाचयीत।

▼

⑤

>

▼ Oldenberg

4. One (for instance, the wife's father) who wishes that the hearts of both (husband and wife) may be in accord should observe chastity through at least three nights and should prepare a Sthālīpāka. Then (the ceremonies) from the putting (of wood) on (the fire) down to the Ājyabhāga oblations (are performed), and while the wife takes hold of him, he sacrifices of the Sthālīpāka the oblations (indicated by the) next (Mantras; M. I, 14, 1-7); then he enters upon the performance of the Jaya and following oblations, and performs (the rites) down to the sprinkling (of water) round (the fire). (The remains of) the (sacrificial food) with butter, he should give to eat to an even number of Brāhmaṇas, at least to two, and should cause them to pronounce wishes for his success.

▼ हरदत्तः

यदि वरस्य मनो वध्वां न तुष्येत् अथ तत्सिद्धिकामेन वध्वाः पित्रादिना तपोयुक्तेनेदं कर्म कर्तव्यमज्ञातं वरस्य । वशीकरणार्थत्वात् । औपासने च कर्तव्यम् । तदुक्तं पुरस्तात् ब्रह्मचर्यविधानस्य दृष्टार्थत्वात् यावता तपसार्थसिद्धिं मन्यते तावत् कर्तव्यम् । पुनर्वस्वोश्चेदं कर्म भवति । "श्वस्तित्येण" (आप.गृ.९-६.) इति वचनात् । किं पुनस्तत् कर्म? स्थालीपाकः, पाठार्चनं च । सर्वं कर्म पार्वणवत् । विवाहप्रकरणे तूपदेशात् सकृत् पात्रप्रयोगः शम्याश्च । कालस्य चानियमः । विवाहप्रकरणे चास्यास्समाप्तिः तच्छेषभूतस्य वासोदानस्योपरिष्टादुपदेशादवगन्तव्या । एवमर्थमेव च तस्योपरिष्टादुपदेशः ॥४॥ सप्त प्रधानाहुतयः प्रातरग्निमित्येवमाद्याः । ततः स्विष्टकृत्, ततो जयादि ॥५॥ पार्वणातिदेशात् एकस्यैव ब्राह्मणस्य भोजने प्राप्ते बहुत्वं विधीयते । तेन स्थालीपाको महान् कर्तव्यः । सर्पिष्मद्वचनं नियमार्थं परिषेचनादूर्ध्वं पार्वणधर्माणां सर्पिष्मत्वमेव भवतीति । तेन "पूर्णपात्रस्तु दक्षिणेत्येक" इत्येतन्न भवति । **सिद्धिं वाचयीत** तैर्भुक्तवद्भिः सङ्कल्पसिद्धिरस्तित्वति वाचनम् । परिषेचनान्तवचनं कर्तृनियमार्थम् । कथम्? यो होमस्य कर्ता स एव ब्राह्मणभोजनं सिद्धिवाचनं च कुर्यादिति तेन यदुत्तरं कर्म परिकिरणादि तस्य वधूः कर्त्रीति ॥६॥

▼ सुदर्शनः

**उभयोर्** जायापत्योः "त्रिरात्रमुभयोरधश्शय्या" इत्यधिकारात्, इह अन्वारब्धायामिति स्त्रीलिङ्गनिर्देशाच्च । **हृदयसंसर्ग** मनसोस्सम्प्रीतिमीप्सुः वध्वा हितैषी पितृभ्रात्रादिरपापोऽपि त्रिरात्रादनूनं यावन्मनस्तोषं **ब्रह्मचर्यं चरित्वा** तस्यौपासन एव स्थालीपाकश्रपणाद्यग्निमुखान्तं कृत्वा तस्याम्** अन्वारब्धायां स्थालीपाकाद्** अवदाय "प्रातरग्निम्" इत्यादिभिस्सप्तभिर्मन्त्रैः प्रत्यृचं प्रधानाहुतीर्हुत्वा जयादि प्रतिपद्यते । तदनन्तरं स्विष्टकृदादि तन्त्रशेषं पार्वणवत् समाप्य, **तेन** हुतशेषेण **सर्पिष्मता युग्मान् द्व्यवरान्** द्वाववरौ संख्यातो येषां तान् **ब्राह्मणान्** यथालाभं **भोजयित्वा** तैरेव भुक्तवद्भिः कर्मफलसिद्धिरस्त्विति **सिद्धिं वाचयीत** । तेन सर्पिष्मतेति च पार्वणसिद्धानुवादो युग्मानिति विधातुम् ॥४॥

▼

⑤

>

उभयोर्हृदयसंसर्गेऽप्सुस्त्रिरात्रावरं ब्रह्मचर्यं चरित्वा स्थालीपाकं श्रपयित्वाऽग्नेरुपसमाधानाद्याज्यभागान्तेऽन्वारब्धायां स्थालीपाकादुत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते परिषेचनान्तं कृत्वा तेन सर्पिष्मता युग्मान् द्व्यवरान् ब्राह्मणान् भोजयित्वा सिद्धिं वाचयीत ।

# ०९ ०५ श्वस्तिष्येणेति②

*(विवाहप्रकरणे तूपदेशात्सकृत्पात्रप्रयोगः शम्याश्च ।)*

श्वस्तिष्येणेति त्रिस्सप्तैर्*(=२१)* यवैः पाठां*(=ओषधिविशेषम्)* परिकिरति - "यदि वारुण्यसि वरुणात्त्वा निष्क्रीणामि यदि सौम्यसि सोमात्त्वा निष्क्रीणामि" इति ५

▼

⑤

>

▼ Oldenberg

5. 1 When the moon, on the following day, will be in conjunction with Tiṣya, she strews three times seven barley-grains around (the plant) Clypea Hernandifolia with (the formula), 'If thou belongest to Varuṇa, I redeem thee from Varuṇa. If thou belongest to Soma, I redeem thee from Soma.'

▼ हरदत्तः

**श्वो** यत् करणीयं कर्म तत् **तिष्येण** नक्षत्रेण सम्पाद्यत इति कृत्वा पूर्वेद्युस्सिद्धिवाचनान्ते कर्मणि कृते पित्रादिना ऋत्विजा यजमानभूता वधूः यत्र प्रदेशे पाठा तिष्ठति तत्र गत्वा तां **पाठां त्रिस्सप्तैः एकविंशत्या यवैः परिकिरति** "वारुण्यसी"त्येताभ्याम् । त्रिस्सप्तैरिति छान्दसो निर्देशः पाठा ओषधिविशेषः । आथर्विणिकास्तु पाशेत्यधीयते ॥५॥

▼ सुदर्शनः

पाठोत्थापनादि भर्तृपरिग्रहणान्तं कर्म श्वोभूते परेद्युस्तिष्यो भवतीति कृत्वा पूर्वेद्युः **श्वस्तिष्यः** पुनर्वसू इत्यर्थः । तस्मिन् नक्षत्रे पित्रादिना सिद्धिवाचनान्ते कर्मणि कृते, अनन्तरं वधूर्यत्र भूमौ पाठास्ति तत्र गत्वा तां **पाठां त्रिस्सप्तैः** एकविंशत्या यवैः "यदि वारुण्यसि" इत्येताभ्यां **परिकिरति** परितो वपति । त्रिस्सप्तैरिति छान्दसं रूपम् ॥५॥

▼

**⑤**

>

श्वस्तिष्येणेति त्रिस्सप्तैर्यवैः पाठां परिकिरति "यदि वारुण्यसि वरुणात्त्वा निष्क्रीणामि यदि सौम्यसि सोमात्त्वा निष्क्रीणामी"ति ।

# ०९ ०६ श्वोभूते②

*(उपोष्य)* श्वोभूते *(पाठाम्)* उत्तरया *("इमां खनीमि")* +उत्थाप्य *(उत्खाय खनित्रेण)*
+उत्तराभिस् तिसृभिर् *("उत्तानपर्णे")* अभिमन्त्र्य
उत्तरया *("अहमस्मी"ति)* प्रतिच्छन्नां *(छित्त्वा)* हस्तयोराबध्य
शय्याकाले बाहुभ्यां भर्तारं परिगृह्णीयाद् उपधानलिङ्गया *("उपतेऽधा")* ६

▼

**⑤**

>

▼ Oldenberg

6. On the following day she should set upright (the plant) with the next (verse; M. I, 15, 1), should recite the next three (verses; M. I, 15, 2-4) over it, should tie (its root) with the next (verse; M. I, 15, 5) to her hands so that (her husband) does not see it, and should, when they have gone to bed, embrace her husband with her arms, with the verse alluding to the word upadhāna ('putting on;' M. I, 15, 6).

▼ हरदत्तः

कृत्वा परिकिरणमुपोष्य ततः **श्वोभूते** तां पाठां उत्थापयति खनित्रेण खात्वोत्खिदति **उत्तरयर्चा** "इमां खनीमी"त्येतया । ततस्तामुत्तराभिस् तिसृभिः ऋग्भिः अभिमन्त्रयेत "उत्तानपर्णे" इत्येताभिः । तस्या मूलं द्वेधा प्रच्छिद्य हस्तयोराबध्नाति उत्तरयर्चा "अहमस्मी"त्येतया । प्रतिच्छन्नां यथा भर्ता न पश्यति तथेत्यर्थः । उभयत्र मन्त्रस्यावृत्तिः आबध्य ततो रात्रौ शय्याकाले भर्तारं परिगृह्णीयात् । **उपधानलिङ्गया** ऋचा "उपतेऽधाम्" इत्येतया उत्तरयेति वक्तव्ये उपधानलिङ्गयेति वचनं परिग्रहे विशेषविधानार्थम् । यथा मूलयोः अन्यतरदधस्तादुपधानं भवति इतरच्चोपरिष्टादपिधानं तथा परिग्रहः कर्तव्यः ॥६॥

▼ सुदर्शनः

परेद्युर्वधूरेव तां पाठां "इमां खनामि" इत्येतया खमित्रेणोत्खाय "उत्तानपर्णे" इत्यादिभिस् **तिसृभिरभिमन्त्र्य** तस्याः मूलं द्विधा छित्वा उपायेन भर्तुरदृश्ये कृत्वा "अहमस्मि सहमाना" इत्येतयाभ्यस्तया स्व**हस्तयोराबध्य** रात्रौ **शय्याकाले** "उपतेऽधाम्" **इत्युपधानलिङ्गया बाहुभ्यां भर्तारं परिगृह्णीयात्** । उपधानलिङ्गयेति ज्ञापनं च कर्माङ्गम् ॥ केचित्— आबध्य पाठामूलयोर्हस्तयोरुपधानमेको ऽन्यश्चापिधानं यथा स्यात् तथा परिगृह्णीयादिति ॥६॥

▼

⑤

>

श्वोभूते उत्तरयोत्थाप्योत्तराभिस्तिसृभिरभिमन्त्र्योत्तरया प्रतिच्छन्नां हस्तयोराबध्य शय्याकाले बाहुभ्यां भर्तारं परिगृह्णीयादुपधानलिङ्गया ।

# ०९ ०७ वश्यो भवति②

वश्यो भवति ७

▼

⑤

>

▼ Oldenberg

7. Thus he will be subject to her.

▼ हरदत्तः

यदि भार्या भर्तरि न रमते तदा नैवैतत्कर्म भवतीति प्रदर्शनार्थमिदं **वश्यः** पतिर्भवति भार्यायाः, न भार्या भर्तुरिति ॥७॥ इदं स्पष्टम् । वश्य इति पुल्लिङ्गनिर्देशात् वधूरिह यजमाना ॥७॥

अस्या अधिकारान्तरसंयोगमाह—

▼

⑤

>

वश्यो भवति।

# ०९ ०८ सपत्नीबाधनञ्च②

सपत्नीबाधनं च।

▼

⑤

>

▼ Oldenberg

8. By this (rite) also (a wife) overcomes her co-wives.

▼ हरदत्तः

न केवलमुभयोर्हृदयसंसर्गसाधनमेवैतत्कर्म, किं तर्हि? **सपत्नीबाधनञ्च** सपत्न्यप्यनेन बाधितुं शक्येत्यर्थः । अस्मिन्नपि पक्षे औपासन एवाग्निः योऽस्या विवाहेन सम्पादितः या सप्तनीं बाधते । विवाहभेदाद्ध्यग्निस्संसृज्येत । तथा च राजसूय इत्युक्तं–"तस्या औपासने प्रतिनिहितम्"(आप. श्रौ.१८-१६-१४.) इति । तथा अग्निसंसर्गो बौधायनीयेऽभिहितः संसर्गादूर्ध्वमपि तस्मिन्नेव भवति । यथा बाध्यमाना सपत्नी न जानाति । केचित् पूर्वस्मिन्नेवाग्नौ द्वितीयं विवाहमिच्छन्ति । तेषामपि तस्मिन्नेव कर्म ॥८॥

▼ सुदर्शनः

सपत्नी बाध्यते येन तत् **सपत्नीबाधनम्** । एतत्कर्म सपत्नीबाधनमपि भवति । अधिकारान्तरं च युक्तम्; य एकया संसृष्टहृदयोऽप्यन्यां तत्सपत्नीं भार्यां तदधीनधर्मादावपि लोभान्न बाधते सोऽपि कथं नु नाम तदधीनधर्माद्युपेक्षयापि तां बाधेतैवेत्येवमर्थत्वादस्य कर्मणः ॥८॥

▼

**⑤**

>

सपत्नीबाधनञ्च ।

# ०९ ०९ एतेनैव कामेनोत्तरेणानुवाकेन②

एतेनैव कामेनोत्तरेणानुवाकेन *("उदसौ सूर्यो अगात्")* सदादित्यमुपतिष्ठते ९

▼

**⑤**

>

▼ Oldenberg

9. For this same purpose she worships the sun daily with the next Anuvāka (M. I, 16).

▼ हरदत्त-प्रस्तावः

अथान्यदपि सपत्नीबाधनमाह—

▼ हरदत्तः

**एतेनैव** सपत्नीबाधनेन **कामेन उत्तरेणानुवाकेन** "उदसौ सूर्यो अगात्" इत्यनेन **सदा** अहरहः **आदित्यमुपतिष्ठते ।** सदार्थक एवकारः पौनर्वाचनिकः ॥९॥

▼ सुदर्शनः

एतस्मिन्नेव कामे वधूः "उदसौ सूर्यो अगात्" इत्यनुवाकेन प्राग्भोजनादहरहरादित्यमुपतिष्ठते । सदेति वचनं च सिद्धेऽपि सपत्नीबाधने, यावदविधवा तावन्नित्यमिदमुपस्थानमित्येवमर्थम् । केचित्—इदमुपस्थानं पूर्वाधिकारशेषो वा, सपत्नीबाधनकामे कर्मान्तरं वेति ॥९॥

▼

**⑤**

>

एतेनैव कामेनोत्तरेणानुवाकेन सदादित्यमुपतिष्ठते ।

# ०९ १० यक्ष्मगृहीतामन्यां वा②

यक्ष्मगृहीतामन्यां *(मातृप्रभृतिं)* वा ब्रह्मचर्ययुक्तः पुष्करसंवर्तमूलैरुत्तरैर् *("अक्षीभ्यां ते नासिकाभ्यां")* यथालिङ्गमङ्गानि संमृश्य प्रतीचीनं निरस्येत् *(प्रतिमन्त्रं सम्मर्शनं निरसनं च ।)* १०

▼

⑤

>

▼ Oldenberg

10. If a wife is affected with consumption or is otherwise sick, one who has to observe chastity, should rub her limbs with young lotus leaves which are still rolled up, and with lotus roots, with the next (formulas, limb by limb) according to the characteristics (contained in those formulas; M. I, 17, 1-6), and should throw away (the leaves and roots) towards the west.

▼ हरदत्तः

**यक्ष्मा** राजयक्ष्मा क्षयरोगः । तेन गृहीतां **भार्या अन्यां वा** स्वां स्त्रियं मातृप्रभृतिं ज्ञात्वा भैषज्यमिदं कर्तव्यम् । किं तत्? उत्यते— ब्रह्मचर्येण युक्तः **पुष्करस्य संवर्तमूलैः** परिमण्डलाकारैः मूलैः । संवर्तमूलैश्चेत्यन्ये । संवर्तिका नवदलमिति नैघण्टुकाः । **उत्तरैर्मन्त्रैः** "अक्षीभ्यां ते नासिकाभ्यां" इत्यादिभिः । **यथालिङ्गं** तस्या अक्ष्यादीन्यङ्गानि संमृश्य **प्रतीचीनं** यथा तथा **निरस्येत् ।** यथालिङ्गवचनात् प्रतिमन्त्रं सम्मर्शनं निरसनं च । एकैकेन मूलेन सम्मर्शनम्, बहुवचनस्य सर्वापेक्षत्वात् । आन्त्रादीनामन्तर्गतत्वात् बहिस्तत्प्रदेशे सम्मार्जनम् ॥१०॥

▼ सुदर्शनः

**राज्यक्ष्मणा गृहीतां, अन्यां वा** राजयक्ष्मणोऽन्यैः कुष्ठादिभिर्गृहीतां वा वधूं तद्धितैषी उक्तलक्षणब्रह्मचर्ययुक्तः **पुष्करस्य** पद्मस्य **संवर्तिकाभिर्** दलैर्मूलैश्च "अक्षीभ्यां ते" इत्याद्यृग्रूपैषड्भिर्मन्त्रैः **यथालिङ्गं** मन्त्रलिङ्गप्रतिपन्नानि भाष्ये व्याख्यातान्यक्ष्यादीन्य् **अङ्गानि संमृश्य** प्रतिमन्त्रं तानि **प्रतीचीनं निरस्येत् ।** एतेन भैषज्येनागदा स्यादिति तात्पर्यम् ॥ केचित्— यक्ष्मगृहीतां भार्यां अन्यां वा मात्रादिं पुष्करस्य संवर्तैः परिमण्डलाकारैः मूलैरिति ॥१०॥

▼

⑤

>

यक्ष्मगृहीतामन्यां वा ब्रह्मचर्ययुक्तः पुष्करसंवर्तमूलैरुत्तरैर्यथालिङ्गमङ्गानि सम्मृश्य प्रतीचीनं निरस्येत् ।

# ०९ ११ वधूवास उत्तराभिरेतद्विदे②

वधूवास उत्तराभिर् *("परा देही"त्यादयश्चतस्रः)* एतद् *(मन्त्रकर्म-)* विदे दद्यात् ११

▼

⑤

>

▼ Oldenberg

11. With the next (verses; M. I, 17, 7-10) he should give the wife's garment (which she has worn at the wedding [?]) to (a Brāhmaṇa) who knows this (ceremony).

▼ हरदत्तः

विवाहकाले यत् **वासः** परिधापितं, तत् **एतद्विदे** ब्राह्मणाय दद्यात्, योऽस्मिन् प्रश्ने पठितान् मन्त्रान् सार्थान् वेद तस्मै । केचित्–भैषज्यशेषमिदं मन्यन्ते । आनन्तर्यात् । तेषां वधूवास इति विशेषणमन्यस्याः स्त्रियाः यक्ष्मगृहीतायाः वाससो दाननिवृत्त्यर्थम् । एतद्विद इति च भैषज्यकर्मकृत इत्यर्थः मन्त्रेषु तु परादेहि इत्यादिषु विवाहकाले परिहितस्य वधूवाससः स्पर्शनिन्दा । सूर्याविदे ब्राह्मणाय तद्दानं च **दृश्यते** । कल्पान्तरे च तद्व्यक्तम्– "चरितव्रतः सूर्याविदे वधूवस्त्रं दद्यात्" (आश्व.गृ. १.८.१३.) इति । तस्मात् भैषज्यशेषत्वमनुपपन्नम् । यत् पुनरुक्तं आनन्तर्यादिति, तत्र कारणमुक्तमेव । कथम्? एवमन्तं विवाहप्रकरणं स्यादिति ॥११॥

▼ सुदर्शनः

यस्या **वध्वा** इदं भैषज्यं क्रियते तस्या **वासः** । **एतद्विदे** एतत्कर्म समन्त्रार्थं यो वेत्ति तस्मै "परा देहि" इत्यादिभिश्चतसृभिर्दद्यात् । केचित्— विवाहकाले वध्वा यदाच्छादितं वासस्तद्विमुच्यासंस्पृशन्नेव पञ्चम्यां "परा देहि" इत्यादिभिश्चरितव्रताय **एतद्विदे** सूर्याविदे, य एतान् मन्त्रान् सार्थान् वेद तस्मै दद्यात् । असंस्पर्शश्च "क्रूरमेतत्" इति लिङ्गात् । अस्य च समावेशनानन्तरमुपदेष्टव्यस्य इहोपदेशो हृदयसंसर्गार्थे कर्मणि शम्याज्ञापनार्थमिति । नेदं युक्तम्, सन्निहितकर्मपरित्यागेन वासोदानस्य अतिव्यवहितविवाहार्थज्ञानानुदयात्, अस्मदीयानामाचाराभावाच्च ॥११॥

इन्थं सुदर्शनार्येण साहसैकप्लवाश्रयात् । कृच्छ्रात्तीर्णोऽतिगूढार्थस्तृतीयपटलोदधिः ॥१॥ अत्रानुक्तं दुरुक्तं वा मतेर्मान्द्याच्छ्रुतस्य वा । सन्मार्ग प्रवणत्वेन तत्क्षमध्वं विपश्चितः ॥२॥

इति श्रीसुदर्शनाचार्यकृते गृह्यतात्पर्यदर्शने नवमः खण्डः ॥ तृतीयश्च पटलः समाप्तः ॥
▼

**⑤**

>

वधूवास उत्तराभिरेतद्विदे दद्यात् ॥

---

1. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

# ०७ उपनयनप्रकरणम्①

# १० ०१ उपनयनं व्याख्यास्यामः②

उपनयनं व्याख्यास्यामः १

▼

⑤

>

▼ Oldenberg

1. We shall explain the Upanayana (or initiation of the student).

▼ हरदत्तः

येन आचार्यकुलमुपनीयते कुमारः **तदुपनयनं** नाम कर्म श्रौतः पुरुषसंस्कारः । "गर्भाष्टमेषु ब्राह्मणमुपनयीत" इति वक्ष्यमाणेनैवोपनयनाधिकारे सिद्धे प्रतिज्ञाकरणं प्राधान्यख्यापनार्थम् । यथा "अग्न्याधेयं व्याख्यास्याम" (आप. श्रौ. ५.१.१.) इत्यादौ । कथं पुनरुपनयनस्य प्राधान्यम्? यस्मादनुपनीतस्य श्रौतस्मार्तेषु सर्वेषु कर्मस्वनधिकारः । उपनयने तु गर्भाधानादिभिरसंस्कृतस्यानधिकारः । यत्र ब्रह्मचारिधर्माः सामयाचारिकेषु तत्रैवोपनयनेऽप्युच्यमाने सर्वचरणार्थता स्यात् । इष्यते चास्मदीयानामेवायं कल्पः । तस्मादत्रोपदेशः ॥१॥

▼ सुदर्शनः

**उपनयन**मिति कर्मनामधेयम् । कुमारस्याचार्यसमीपनयनमस्मिन् कर्मणीति, पङ्कजादिवत् । विर्विस्तरार्थः । आङ् बलवदर्थः । चक्षिङोऽत्र व्यक्तवागर्थस्य ख्याञादेशात् **व्याख्यास्याम** इति रूपम् । तथा चायमर्थः उपनयनाख्यं कर्म वैकल्पिककल्पोक्त्या विस्तृतं बलवत्प्रमाणोपपन्नं असाधारणैश्शब्दैर्वक्ष्याम इति । इयं च प्रतिज्ञा श्रोतृजनमनोऽवधारणार्था । केचित्–दैवादेर्विघ्नात् पूर्वैर्निषेकादिभिरसंस्कृतस्याप्युपनयनं भवत्येव । न तूपनयनासंस्कृतस्य उत्तराणि श्रौतस्मार्तानीत्येवमुपनयनप्राधान्यज्ञापनार्था प्रतिज्ञा । किञ्च गृह्योपदिष्टकर्मसु गृहस्थस्यैवाधिकारो न ब्रह्मचारिण इत्येवंरूपं विशेषं ज्ञापयितुमप्रतिज्ञं विवाहमुपदिश्य उपनयनकल्पोपदेशः सप्रतिज्ञः क्रियते । अस्य च कल्पस्य धर्मशास्त्रे "उपनयनं विद्यार्थस्य" (आप.ध.१-१-९.) इत्य त्रानुपदेशः सर्वचरणार्थतां निवर्तयितुमिति ॥१॥

▼

⑤

>

उपनयनं व्याख्यास्यामः।

# १० ०२ गर्भाष्टमेषु ब्राह्मणमुपनयीत②

गर्भाष्टमेषु*(=गर्भवर्षाद्य्-अष्टमं येषां तेषु [वर्षेषु])* ब्राह्मणम् उपनयीत २

▼

⑤

>

▼ Oldenberg

2. Let him initiate a Brāhmaṇa in the eighth year after the conception,

▼ हरदत्तः

यस्मिन् वर्षे गर्भो भूत्वा शेते तद्वर्षं गर्भशब्देनोच्यते तदष्टमं येषां तानीमानि **गर्भाष्टमानि** वर्षाणि । बहुवचनं सौरादिभेदेन वर्षाणं भिन्नत्वात् ।

अपर आह– जन्मप्रभृति सप्तानां वर्षाणां गर्भमष्टमं भवति । तेन सप्तस्वपि वर्षेषूपनयनं चोद्यते । तत्र चतुर्षु वर्षेष्वयोग्यत्वात् चौलादि-संस्कारान्तर-विरोधाच् च पञ्चमादिषु त्रिषूपनयनमिति । अत्र षष्ठसप्तमयोः काम्यम् उपनयनम्, अष्टमे नित्यमित्य् अयं विशेषो न स्यात् । सर्वत्र नित्यम् एव स्यात् ।

किंच पञ्चमे षष्ठे वा वर्षे वर्तमाने कथं गर्भवर्षमष्टमं भवति । नह्य् असत्य-पूरणीयेषु पूरणत्वम् उपपद्यते । तस्मात् सप्तमे वर्तमान एव गर्भ-वर्षम् अष्टमं भवति । तस्माद् अविवक्षितं बहुवचनम् ।

पूर्वोक्तो वा निर्वाहः । काम्यं तूपनयनं विध्य्-अन्तर-लभ्यम् । उपनयीतेति पाठः श्रुत्य्-अनुसारेण शब्-विकरणस् तु धातुः । राजन्य-वैश्ययोः विशेषोपदेशाद् एव गर्भाष्टम-विधेः ब्राह्मण-विषयत्वे सिद्धे ब्राह्मण-विधिः श्रुत्य्-अनुवाद एव । पुनर् उपनयीतेत्य् अनुच्यमाने पूर्वम् उपनयन-ग्रहणम् अधिकारार्थम् एव स्यात्, तम् अर्थं न साधयेत् यस् तत्र साध्यः ॥२॥

▼ सुदर्शनः

**गर्भाष्टमेषु** वर्षेष्विति शेषः । "गर्भादिस् सङ्ख्या वर्षाणाम्" (गौ.ध.२-७.) इति गौतमवचनात् । गर्भ-शब्देन यस्मिन् वर्षे गर्भो वर्धते, तल् लक्ष्यते । तद्-अष्टमं येषां जन्मादीनां सप्तानां तानि गर्भाष्टमानि वर्षाणि । तेषु **ब्राह्मणम् उपनयीत** ।

एवं यद्यपि जन्मादि-सप्तस्व् अप्य् उपनयनं प्राप्तं, तथापि जन्मादिषु त्रिषु चौलान्तैः गर्भ-संस्कारैर् अवरुद्धत्वान् न क्रियते । चतुर्थेऽपि नैव ; कुमारस्य व्रतासामर्थ्यात्। अतोऽत्रोपादेय-गता बहुत्व-सङ्ख्या (१)कपिञ्जल-न्यायेन गर्भाद् आरभ्य षष्ठ-सप्तमाष्टमेषु त्रिष्व् एवावतिष्ठते - सामर्थ्यात् प्रयोगभेदेन ।

ननूत्तरत्र "राजन्यं" "वैश्यम्" इति विशेषोपादानाद् एव गर्भाष्टमविधिर् ब्राह्मणस्यैवेत्य् अर्थसिद्धत्वात् ब्राह्मणम् इति न वक्तव्यम् । तथोपनयनं व्याख्यास्याम इति प्रकृतत्वाद् उपनयीतेत्यपि । मैवम् ; उपनयनं श्रौतम् इति ज्ञापयितुम् । *(यतः)* "अष्टवर्षं ब्राह्मणम् उपनयीत" इत्य् एतच् छ्रुत्य्-अनुकारित्वात् ।

केचित्–गर्भाष्टम एव वर्षे, न तु षष्ठ-सप्तमयोः तयोर् गर्भाष्टमत्वाभावाद् इति । तन्न - बहुवचनानर्थक्यात् ॥२॥
▼

**⑤**

>

गर्भाष्टमेषु ब्राह्मणमुपनयीत।

# १० ०३ गर्भैकादशेषु राजन्यम्②

गर्भैकादशेषु राजन्यं
गर्भद्वादशेषु वैश्यम् ३

▼

**⑤**

>
▼ Oldenberg

3. A Rājanya in the eleventh, a Vaiśya in the twelfth year after the conception.

▼ हरदत्तः

*(सम्पादकटिप्पानी - "सूत्रमेतद् अग्रिमे व्याख्यातम्" )*

▼ सुदर्शनः

*(सम्पादकटिप्पानी - "सूत्रमेतद् अग्रिमे व्याख्यातम्" )*

▼

### ⑤

>

गर्भैकादशेषु राजन्यं गर्भद्वादशेषु वैश्यम्।

# १० ०४ वसन्तो ग्रीष्मश्②

वसन्तो ग्रीष्मश् शरद् इत्य् ऋतवो वर्णानुपूर्व्येण ४

▼

### ⑤

>

▼ Oldenberg

4. Spring, summer, autumn: these are the (fit) seasons (for the Upanayana), corresponding to the order of the castes.

▼ हरदत्तः

उदगयने वसन्त-नियमः ब्राह्मणस्य । क्षत्रियस्यापवादो नियमो वा । वैश्यापवादः पूर्वपक्षादयस्तु स्थिता एव ।

वर्षाण्य् ऋतवश्च विधीयन्ते इह सामयाचारिकेषु च । तत्र सामयाचारिकेषु विधानं सर्व-चरणार्थम् । इह विधानं वर्ण-नियमार्थम् । शास्त्रान्तर-दृष्टानां कालान्तराणाम् इह प्रवृत्तिर् मा भूद् इत्य् एवं ब्रुवन्न् एतत् ज्ञापयति - चौलादिषु शास्त्रान्तर-दृष्टोऽपि कालः पक्षे भवतीति ॥४॥*(5)*

▼ सुदर्शनः

उभयत्रापि कपिञ्जलन्यायेन बहुवचनस्य त्रित्वम् एवार्थः ॥३॥

**ऋतवो** वसन्तादयस्(१) त्रयो ब्राह्मणादि-वर्ण-क्रमेणोपनयनस्य काला भवन्ति । अयं चर्तु-विधिस् सामान्य-विधि-प्राप्तोदगयनस्य यथार्हं नियमापवादार्थः । पूर्व-पक्षादिस् तु भवत्य् एव ।

धर्म-शास्त्रे तु "वसन्ते ब्राह्मणम्" (आप.ध. १-१-१९.) इत्यादिः "शिशिरे च वा सर्वान्" इति भरद्वाज-गृह्योक्त-शिशिर-प्रतिषेधार्थः ।

"गर्भाष्टमेषु ब्राह्मणम्" इत्यादिस् तु "अथ काम्यानि" (आप.ध.१-१-२०.) इत्यादि विधातुम् अनुवादः ॥४॥

▼

### ⑤

>

वसन्तो ग्रीष्मश् शरद् इत्य् ऋतवो वर्णानुपूर्व्येण।

# १० ०५ ब्राह्मणान् भोजयित्वाशिषो②

ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा कुमारं भोजयित्वा

*(उपनयने - एवमन्तं पित्रादेः कर्म । अथाचार्यः उष्णाश्शीताश्चापः संसृजति।)*
ऽनुवाकस्य प्रथमेन यजुषाऽपः *("उष्णेनवाय" वित्येतेन)* संसृज्योष्णाश् शीतास्व् आनीय *(न शीता उष्णासु)*

हरदत्तो ऽत्र।

*(उष्णा आपः शीतास्वानयति)* उ॒ष्णेन॑ वायवुद॒केनेह्य्, अदि॑तिः॒ केशान्॑ **वपतु** ।

उत्तरया *(आप उन्दन्त्विऽत्येतया)* शिर उनत्ति ५

*(शिरस उन्दनम् = आर्द्रीकरणम्)* आप॑ **उन्दन्तु** जी॒वसे॑
दीर्घायु॒त्वाय॒ वर्च॑से ।
ज्योक् च॒ सूर्यं॑ दृ॒शे ।

▼

⑤

>
▼ Oldenberg

5. (The boy's father) serves food to Brāhmaṇas and causes them to pronounce auspicious wishes, and serves food to the boy. (The teacher?) pours together, with the first Yajus (of the next Anuvāka, warm and cold) water, pouring the warm water into the cold, and moistens (the boy's) head with the next (verse; M. II, 1, 2).

▼ हरदत्तः

अथोपनयनविधिः–पूर्वेद्युर्नान्दीश्राद्धम् । ततः श्वोभूते ब्राह्मणान् भोजयित्वा तैराशिषो वाचयति–पुण्याहं स्वस्यृद्धं इति । ततः कुमारं भोजयेत् । एवमन्तं पित्रादेः कर्म । अथाचार्यः उष्णाश्शीताश्चापः संसृजति । **अनुवाकस्योत्तरस्य प्रथमेन यजुषा "उष्णेनवाय"वित्येतेन । संसृजंश्चोष्णाश्शीतास्वानयति, न शीता उष्णासु । ततस्ताभिरद्भिः कुमारस्य शिर उनत्ति क्लेदयति–उत्तरयर्चा** "आप उन्दन्त्वि"त्येतया । उत्तरेण यजुषेत्येव सिद्धे अनुवाकस्य प्रथमेन यजुषेत्युक्तं संज्ञाकरणार्थम् । तेन उष्णेन वायवुदकेनेत्येष इत्यत्रानुवाकस्य ग्रहणं भवति । अन्यथा संशयः स्यात्–अनुवाको मन्त्रा वेति । उष्णाश्शीतास्वानीयेत्येव सिद्धे संसृज्येतिवचनं सर्वार्थत्वप्रदर्शनार्थम् । अत्मनश्च नापितस्य च या उन्दनार्थास्ताः संसृजति तच्चान्येषां व्यक्तम्–नापितं शिष्यात्–शीतोष्णाभिरद्भिरबर्थं कुर्वाणोऽक्षण्वन् कुशलीकुर्विति ॥ (आश्व.गृ.१-१७-१६.) ॥५॥

▼ सुदर्शनः

ब्राह्मणान् भोजयित्वेत्यनेन यच्छ्राद्धं धर्मशास्त्रे "शुचीन् मन्त्रवतस्सर्वकृत्येषु भोजयेत्" (आप.ध. २-१५.९.) इति विहितं, यदेव नान्दीश्राद्धमभ्युदयश्राद्धमिति प्रसिद्धं, तदेवोच्यते । तच्च स्मृत्यन्तरप्रसिद्धविधिना कर्तव्यम् । तस्य त्विह पुनः पाठः पाठक्रमेणानुष्ठानार्थः । अन्यथा पदार्थानां बद्धक्रमत्वाद्विवाहादिष्विवान्त एव स्यात् । आशीर्वचनेऽपि धर्मशास्त्रविहितेऽयमेव न्यायः आशीर्वचनविधिश्च भाष्योक्तः । केचित् — पूर्वेद्युर्नान्दीश्राद्धम्, आचारात् स्मृत्यन्तराच्च । श्वोभूते च ब्राह्मणानां भोजनं, भुक्तवद्भिरेवाशिषां वाचनार्थम् । सर्वकर्मणां चान्ते "शुचीन् मन्त्रवतस्सर्वकृत्येषु भोजयेत्" इति वचनादिति । अत्र च कुमारस्य स्नवभोजनात्प्राक् "यज्ञोपवीतं परमं पवित्रम्" (१)इत्यादिमन्त्रेण यज्ञोपवीतधारणम् । "भोजन आचमने स्वाध्याये च यज्ञोपवीती स्यात्" इति धर्मशास्त्रवचनात् ॥ "केचित्–समिदाधानात्प्रागेवेति" ॥ कुमारभोजनं च विना क्षारलवणादिभिः । आद्यन्तयोश्च द्विराचमनम् । केचित्–एवमन्तं मातापितरौ कुरुतः, अत ऊर्ध्वमाचार्य इति ॥ **अनुवाकस्य प्रथमेन यजुषा** "उष्णेन वायो" इत्यनेन **अपः** उष्णाश्शीताश्च **संसृजति** । संसृजंश्चो**ष्णाश्शीतास्वानयति,** न त्विनियमेन । अत्र चानुवाकग्रहणं गृह्यमन्त्रास्समाम्नाता एव न कल्पसूत्रस्था इति ज्ञापनार्थम् । तत्प्रयोजनं चैते ब्रह्मयज्ञादिष्वध्येतव्या इत्युक्तम् । ततस्ताभिरद्भिः "आप उन्दन्तु" इत्येतया कुमारस्य **शिर उनत्ति** । प्रागारभ्य प्रदक्षिण**मुनत्ति** क्लेदयति ॥५॥

▼

⑤

>

ब्राह्मणान् भोजयित्वाशिषो वाचयित्वा कुमारं भोजयित्वाऽनुवाकस्य प्रथमेन यजुषाऽपः संसृज्योष्णाश् शीतास्वानीयोत्तरया शिर उनत्ति।

# १० ०६ त्रींस्त्रीन्②

त्रींस्त्रीन् दर्भान् अन्तर्धायोत्तराभिश् चतसृभिः *("येनावपत्"इत्यादिभिः)* प्रतिमन्त्रं प्रतिदिशं प्रवपति ६

*(प्राच्यान्दिशि)* **येनावंपत्** सवि॒ता क्षु॒रेण॒
सोमं॑स्य॒ राज्ञो॒ वरु॑णस्य वि॒द्वान् ।
तेन॑ ब्रह्माणो! **वपते॒दम्** अ॒स्या-
ऽऽयु॑ष्मा॒ञ् जर॑दष्टि॒र् यथा **ऽसंद्** अ॒यम्
अ॒सौ *(←अत्रोहः)*।

*(दक्षिणतः)* येन॑ पूषा बृह॒स्पते॑र् अ॒ग्नेर्
इन्द्र॑स्य॒ चाऽऽयु॒षे **ऽवंपत्** ।
तेना॒स्याऽऽयु॑षे **वप॒**
सौश्लो॑क्याय स्व॒स्तये॑ ।

*(पश्चात्)* येन॒ भूय॒श् **चरा॑त्य्** अ॒यञ्,
ज्योक् च॒ **पश्या॑ति॒** सूर्य॑म् ।
तेना॒स्याऽऽयु॑षे **वप॒**
सौश्लो॑क्याय स्व॒स्तये॑ ।

*(उत्तरे)* येन॑ पूषा बृह॒स्पते॑र् अ॒ग्नेर्
इन्द्र॑स्य॒ चाऽऽयु॒षे **ऽवंपत्** ।
तेन॑ ते **वपाम्य्** असा॒व्*(←अत्रोहः)*
आयु॑षा॒ वर्च॑सा॒ यथा॒ ज्योक् सु॒मना॒ **असाः॑** ।

▼

⑤

>
▼ Oldenberg

6. 1 Having put three Darbha blades into his hair (towards each of the four directions) (the teacher [?]) shaves his hair with the next four (verses; M. II, 1, 3-6) with the different Mantras, towards the different (four) directions.

▼ हरदत्तः

**प्रवपति** प्रथमं वपति वपनं प्रारभत इत्यर्थः । तेन पूर्वं मन्त्रवद् वपनं करोत्याचार्यः पश्चान् नापित इत् उक्तं भवति ।

तत्रायं प्रयोगः – कुमारस्य शिरसि प्राच्यां दिशि त्रीन् दर्भान् अन्तर्धाय "येनावपद्" इत्येतया प्रच्छिनत्ति क्षुरेण ।

असाव् इत्यस्य स्थाने तस्य नाम प्रथमया विभक्त्या गृह्णाति -
यथा - "असाव् अयं यज्ञदत्तशर्मा" । एवं सर्वत्रादसः प्रयोगे नाम निर्देष्टव्यम् ।

प्रच्छिद्य् **आनडुहे शकृत्-पिण्डे** यवमति केशान् प्रक्षिपति ।

अथाप उपस्पृश्य तथैव दक्षिणस्यां दिशि "येन पूषे"ति ।
प्रतीच्यां "येन भूयः" इति ।
उदीच्यां "येन पूषे"ति ।
अत्र संबुध्या नामग्रहणं– "तेन ते वपामि यज्ञदत्तशर्म्मन्न् आयुषे"ति ॥६॥

▼ सुदर्शनः

ततो "येनावपत्" इत्य्-आदिभिश् चतसृभिः प्रतिमन्त्रं प्रतिदिशं त्रींस्त्रीन् दर्भान् अन्तर्धाय केशान् प्रवपति । प्रशब्दात् कुशली-करणम् अप्य् आचार्यस्यैव ।

तत्र प्रथमे मन्त्रे असाव् इत्यस्य स्थाने विष्णुशर्मेति कुमारस्य नामग्रहणम् । चतुर्थे तु सम्बुद्ध्या ॥६॥

▼

⑤

>

त्रींस्त्रीन् दर्भानन्तर्धायोत्तराभिश् चतसृभिः प्रतिमन्त्रं प्रतिदिशं प्रवपति।

# १० ०७ वपन्तमुत्तरयानुमन्त्रयते②

वपन्तम् उत्तरया *("यत् क्षुरेण" इत्य् एतया)* ऽनुमन्त्रयते दक्षिणतो माता ब्रह्मचारी वा ७

*(नापितम् अनुमन्त्रयति-)* यत् क्षु॒रेण॑ म॒र्चय॑ता *(=तीक्ष्णेन)*
सुपे॒शसा॒ वप्त्रा॒ **वप॑सि॒** केशा॑न् ।
**शुन्धि॒** शिरो॒, मास्यायु॒: **प्रमो॑षीः** ।

▼

⑤

>

▼ Oldenberg

7. 2 With the following (verse, M. II, 1, 7, somebody) addresses him while he is shaving.

▼ हरदत्तः

एवमाचार्येण प्रतिदिशं प्रवपने कृते नापितस् तस्य केशान् वपति संसृष्टाभिर् एवाद्भिर् अबर्थं कुर्वाणः । तं नापितं **वपन्तमुत्तरयर्चा** "यत् क्षुरेणेत्येतया"**ऽनुमन्त्रयत** आचार्यः ॥७॥

▼ सुदर्शनः

दक्षिणत उपविश्य कुमारस्य **माता ब्रह्मचारी वा** कश्चित् "यत् क्षुरेण" इत्येतया **वपन्त**माचार्यम् अनुमन्त्रयते । कस्मादेवं सूत्रच्छेदः? उच्यते । अस्य कुमारस्यायुर् मा प्रमोषीरिति मध्यमपुरुषलिङ्गके ऽनुमन्त्रणे वपनव्यापृताचार्यकर्तृकत्वविरोधात् । मातृब्रह्मचारिव्यतिरिक्तस्य प्रकृतस्याभावात् ॥७॥

▼

⑤

>

वपन्तमुत्तरयानुमन्त्रयते दक्षिणतो माता ब्रह्मचारी वा।

# १० ०८ आनडुहे शकृत्पिण्डे②

आनडुहे शकृत्पिण्डे यवान् निधाय तस्मिन् केशान् उपयम्योत्तरया *("उप्त्वाय केशा"नित्येतया)* उम्बर-मूले दर्भ-स्तम्बे वा निदधाति ८

**उ॒प्त्वास्य॒** केशा॒न् वरु॑णस्य॒ राज्ञो॒,
बृह॒स्पति॑स् सवि॒ता सोमो॑ अ॒ग्निः ।

तेभ्यो॑ *(=केशेभ्यः)* नि॒धानं॑ बहु॒धा **ऽन्वविन्दन्न्**
अन्त॒रा द्यावा॑पृथि॒वी अ॒पस् सुवः॑ ॥

▼

⑤

>

▼ Oldenberg

8. Towards the south, his mother or a Brahmacārin strews barley-grains on a lump of bull's dung; with this (dung) she catches up the hair (that is cut off), and puts it down with the next (verse; M. II, 1, 8) at the root of an Udumbara tree or in a tuft of Darbha grass.

▼ हरदत्तः

अथ कुमारस्य **माता ब्रह्मचारी वा** कश्चित् तस्य दक्षिणत उपविश्य कस्मिंश्चित् पात्रे आनडुहं शकृत्पिण्डं कृत्वा यवांश्च तस्मिन् पिण्डे निधाय तस्मिन् केशानुपयच्छति उपगृह्णाति यथा भूमौ न पतन्ति तथा सर्वानुपयम्य ततस् तान् केशान् उदुम्बरस्य वृक्षस्य मूले दर्भस्तम्बे वा निदधाति । **उत्तरयर्चा** "उप्त्वाय केशा"नित्येतया । यदि माता तामन्तो मन्त्रं वाचयति ॥८॥

▼ सुदर्शनः

उपनयनस्य प्रकृतत्वान् माता ब्रह्मचारी वा "उप्त्वाय केशान्" इत्येतया **आनडुहे शकृत्पिण्डे** इत्यादि यथोपदेशं करोति । केचित्–आचार्यः पूर्वं वपनमारभते । ततो नापितस् संसृष्टाभिरेवाद्भिर् अबर्थं कुर्वन् केशान् प्रवपति । तं च वपन्तमुत्तरया आचार्योऽनुमन्त्रयते । दक्षिणतो मातेत्युक्तार्थमेवेति । तन्नैतद् वपनं नापितस् समापयतीत्यत्र वचनाभावात्, तत् कल्पनायां चानुपत्त्य् अभावात् । प्रशब्दस्य निपातस्य प्रमाणान्तरावगतार्थद्योतकत्वात्, उक्तसूत्रभेदेन स्ववाक्योक्तस्यैव मात्रादेरनुमन्त्रणकर्तृत्वोपपत्तेश्च ॥८॥

▼

⑤

>

आनडुहे शकृत्पिण्डे यवान्निधाय तस्मिन् केशानुपयम्योत्तरयोदुम्बरमूले दर्भस्तम्बे वा निदधाति।

# १० ०९ स्नातम् अग्नेर्②

स्नातम् *(शुचि-वाससं बद्ध-शिखं यज्ञोपवीतिनम्)* अग्नेर् उपसमाधानाद्य् आज्य-भागान्ते *(शम्याः परिध्यर्थे, सकृत्पात्रप्रयोगः)*
पालाशीं समिधम् उत्तरया *("आयुर्दा देव"इत्येतया ऽऽचार्योक्तया)* ऽऽधाप्य

आ॒यु॒र्दा दे॑व ज॒रसं॑ गृणा॒नो
घृत*(√ क्षरणदीप्त्योः)*-प्र॑तीको*(=अवयवो)* घृत-पृ॑ष्ठो अग्ने ।
घृ॒तं पिब॑न्न् अ॒मृत॒ञ् चारु॒ गव्यं॑
पि॒तेव॑ पु॒त्रञ् ज॒रसे॑ नये॒मम् ।

उत्तरेण अग्निं, दक्षिणेन पदा ऽश्मानम् आस्थापयत्य् - आतिष्ठेति ९
*(तत्रैव चावस्थापनं यावत् तिष्ठति। )*

आति॑ष्ठे॒मम् अश्मा॑न॒म्
अश्मे॑व॒ त्वँ स्थि॒रा*(रो पुंसि)* भ॑व ।
अ॒भिति॑ष्ठ पृतन्य॒तस्*(=पृतनाकामान्)*
सह॑स्व पृतनाय॒तः*(=पृतनाकामान्)* ।*(२५)*

▼

⑤

>
▼ Oldenberg

9. 3 After (the boy) has bathed, and (the ceremonies) from the putting (of wood) on (the fire) down to the Ājyabhāga oblations (have been performed), he causes him to put a piece of Palāśa wood on the fire with the next (verse; M. II, 2, 1), and makes him tread with his right foot on a stone to the north of the fire, with (the verse), 'Tread' (M. II, 2, 2).

▼ हरदत्तः

"स्नातं कुमारं शुचिवाससं बद्धशिखं यज्ञोपवीतम् आसञ्जति– (१)यज्ञोपवीतं परमं पवित्रमिति । ततस् तं यज्ञोपवीतिनं देवयजनम् उदानयती" (बौगृ.२-५.)ति बौधायनः । तस्य सर्वस्योपलक्षणं स्नातवचनम् ।

ततो**ऽग्नेर् उपसमाधानादि** तन्त्रं प्रतिपद्यत आचार्यः । विवाहवद् अग्न्य्-उत्पत्तिः । शम्याः परिध्यर्थे । सकृत् पात्रप्रयोगः । वासो-मेखलादीनाम् अपि सह सादनम् । तत **आज्यभागान्ते** कुमारं **पालाशीं समिधम्** आधापयति **उत्तरयर्चा** "आयुर्दा देव" इत्येतया । कुमारो मन्त्रेण समिधम् आदधाति । तम् आचार्यः प्रयुङ्क्ते मन्त्रं च वाचयति, समिधं चाधापयति । देवताया अभिधेयत्वान्न मन्त्रलिङ्गविरोधः । अन्ये त्वाचार्यस्यैव मन्त्रप्रयोगमिच्छन्ति ।

आधाप्य समिधम् **उत्तरेणाग्निं अश्मानं** प्रतिष्ठितम् अनेना **ऽऽस्थापयति दक्षिणेन पदा** "आतिष्ठेमम्" इति मन्त्रेण । अयं मन्त्र आचार्यस्यैव, कुमारस्याभिधेयत्वात् । तेनाचार्यो मन्त्रमुक्तत्वा धत्रिणं पादं हस्ताभ्यां गृहीत्वा ऽश्मनि निधापयति ॥९॥

▼ सुदर्शनः

अथ **अग्नेरुपसमाधानादि** तन्त्रं प्रतिपद्यते । पात्रसादनकाले अश्मवासोमेखलाजिनदण्डकुशकूर्चाश्च सहैव सादयति । केचित् दर्व्यादीन्य् अपि सहैवेति । **आज्यभागान्ते** कृते **स्नातं** कुमारं "आयुर्दा देव" इत्येतया **पालाशीं समिधं** हस्ते गृहीत्वा ऽधापयति । मन्त्रान्ते चाधेहीति ब्रूयात् । आधापनमन्त्रश्चायम् ।

केचिद् आधानमन्त्र-वाचयीताचार्य इति । तेषां "जरसे नयेमम्" इति मन्त्रालिङ्गविरोधः । अथाधापनार्थे मन्त्रे अश्मास्थापन-मन्त्रवत् कुमाराभिधानार्थम् उच्चारणं स्यात्, न देवताभिधानार्थम्- सकृद् उच्चरितस्योभयाभिधानाशक्तिर् इति चेत्, न- "घृतपृष्टो अग्ने" इतीह देवताया एवाभिधेयत्वात् । अत एवोक्तं "मन्त्रमुक्त्वा"ऽऽधेहि जुहुधीति ब्रूयात्" इति । शेषं व्यक्तम् ॥९॥
▼

⑤

>

स्नातम् अग्नेर् उपसमाधानाद्य्-आज्यभागान्ते पालाशीं समिधम् उत्तरया ऽऽधाप्योत्तरेणाग्निं दक्षिणेन पदाऽश्मानम् आस्थापयत्य् आतिष्ठेति।

# १० १० वासः②

वासः सद्यःकृत्तोतम् *(=सद्यः कृत्तम् ऊतं च - विनूतनम्)* उत्तराभ्याम् *("रेवतीस्त्वे"त्येताभ्यां)* अभिमन्त्र्य

*(नक्षत्रेषु)* रे॒वतीं॑स् त्वा॒ **व्यक्ष्ण॒न्***(=व्यध्वंसयन् [मेषादिभ्यः])*
कृत्ति॑का॒श् **चाकृं॑न्तँ॑स्** त्वा ।
धियों॑ **ऽवय॒न्न्,** अव॒ ग्न*(=देवता)* **आं॑वृञ्जन्त्***(=अच्छिन्दन्)*
स॒हस्र॒म् अन्ताँ॑*(=दशासूत्राणि)* अ॒भितो॑ **अयच्छन्** ।

दे॒वीर् दे॒वायं॑ *(वस्त्र)*परि॒धी*(धौ)* सं॑वि॒त्रे ।
म॒हत् तद् आ॑साम् **अभवन्** महित्व॒नम्*(=महत्वम्)* ।*(र४)*

## वासः-परिधापनम्⑥

उत्तराभिस्तिसृभिः *("या अकृन्त"न्नित्येताभिः)* परिधाप्य

*(पूर्वमन्त्रस्योल्लेखो ऽत्र)*

या **अकृ॑न्त॒न्न् अव॑यन्॒** या **अत॑न्वत॒**
याश् च॑ दे॒वीर् *(वस्त्रस्य)* अन्ता॑न् अ॒भितो॑ **ऽददन्त** *(←दद् दाने)* ।
तास् त्वा॑ दे॒वीर् ज॒रसे॒ **संव्य॑य॒न्त्व्॒**
आयु॑ष्मान् इ॒दं **परि॑धत्स्व॒** वासः॑ ।

**परि॑धत्त धत्त॒** वास॑सैनँ
श॒तायु॑षं **कृणुत** दी॒र्घम् आयुः॑ ।
बृह॒स्पतिः॒ **प्राय॑च्छ॒द्** वास॑ ए॒तत्
सोमा॑य॒ राज्ञे॒ **परि॑धात॒वा** उ॑ ।

ज॒रां **ग॑च्छासि॒, परि॑धत्स्व॒** वासो॒
**भवा॑** कृष्टी॒नाम् *(=मनुष्याणां)* अ॑भिशस्ति॒-पावा॑ *(ता)* ।
श॒तञ् च॑ **जीव** श॒रद॑स् सु॒वर्चा॑
रा॒यश् च॒ पोष॒म् उप॒ **संव्य॑यस्व** *(वासो यथा रायस्पोषं भवति तथा)*।

परिहितम् उत्तरयानुमन्त्रयते *("परीदं वास")* १०

*(परिहितवन्तं कुमारम् उत्तरयानुमन्त्रयते)*

परी॒दं वासो॒ **अधि॑** *(+अ)* **धास्** स्व॒स्तये
**ऽभूर्॑** आपी॒नाम् *(=आप्तानां)* अ॑भिशस्ति॒-पावा॑ *(ता!)* ।
श॒तञ् च॑ **जीव** श॒रदः॑ पुरू॒चीर् *(=बहुगतीः)*
वसू॑नि चा॒र्यो **वि॑भजासि॒** *(←स्वरः??)* **जीव॑न्** ।

▼

⑤

>
▼ Oldenberg

10. Having recited the next two (verses; M. II. 2, 3. 4) over a garment that has been spun and woven on one day, and has caused him, with the next three (verses; M. II. 2, 5-7), to put it on, he recites over him, after he has put it on, the next (verse; M. II, 2, 8).

▼ हरदत्तः

एकस्मिन्न् एवाहनि तन्तु-क्रिया वयनक्रिया च यस्य तत् **सद्यःकृत्तोतं** ।

एवंभूतं **वास उत्तराभ्यां** ऋग्भ्यां"रेवतीस्त्वे"त्येताभ्यां अभिमन्त्रयेत । ततस्त **दुत्तराभिस्तिसृभिः** "या अकृन्त"न्नित्येताभिः परिधापयति । आचार्यस्यैव मन्त्राः । वचनादेकमिति तिसृणामन्ते परिधापनम् । ततः तं परिहितवन्तं कुमारं आचार्यः **उत्तरया" परीदं** वास" इत्येतया **अनुमन्त्रयते** ॥१०॥

▼ सुदर्शनः

**वासः ** यच्छाण्यादि धर्मशास्त्रे विहितं ** तत्सद्यःकृत्तोतं** सद्य एव छिन्नोतं, नान्यस्मिन्नहनि प्रशस्तेऽपि ।

केचितेकस्मिन्न् एवाहनि तन्तुक्रिया वयनक्रिया च यस्य, तत् सद्यःकृत्तोतम् इति ।

एवंभूतं"रेवतीस्त्वा" इति द्वाभ्यामभिमन्त्र्य"या अकृन्तन्" इत्येताभिस् **तिसृभिः परिधाप्य परिहितं** कुमारं "परीदं वासः" (२)इत्यनयाऽ**नुमन्त्रयते** ॥१०॥

▼

⑤

>

वासः सद्यःकृत्तोतमुत्तराभ्यामभिमन्त्र्योत्तराभिस्तिसृभिः परिधाप्य परिहितमुत्तरयाऽनुमन्त्रयते।

# १० ११ मौञ्जीम् मेखलाम्②

## मौञ्जी⑥

मौञ्जीं मेखलां त्रिवृतां*(तं)* त्रिःप्रदक्षिणम् उत्तराभ्यां *("इयं दुरुक्ता"दित्येताभ्यां कुमारोक्ताभ्यां)* परिवीय

इ॒यं दुरु॑क्तात् **परि॒बाध॑माना॒**
शर्म॒ वरू॑थं*(=वरणीयं)* **पुन॒ती** न॒ **आगा॑त्** ।
प्रा॒णा॒पा॒नाभ्या॒ं बल॑म् **आ॒भर॑न्ती**
प्रि॒या दे॒वानाँ॑ सु॒भगा॒ मेख॑ले॒यम् ।

ऋ॒तस्य॑ **गो॒प्त्री**, तप॑सः **पर॒स्*(=प्र)*पी** *(=पात्री)*
घ्न॒ती रक्ष॒स् **सह॑माना॒** अरा॑तीः ।
सा न॑स् सम॒न्तम् अनु॒ **परी॑हि** भ॒द्रया॑
भ॒र्तार॑स्*(=बिभ्राणाः)* ते मेखले॒ मा रि॑षाम ।

## अजिनमन्त्रः⑥

+अजिनम् उत्तरमुत्तरया *(मित्रस्य चक्षुरित्येतया कुमारोक्तया)* ११

*(धर्मसूत्रेषु - "क्षत्र-वृद्धिम् इच्छन् वस्त्राण्य्, एवोभय-वृद्धिम् इच्छन्न् उभयमिति हि ब्राह्मणम् ९" इत्यादि विकल्पा उक्ताः। तस्मिन् पक्षे ऽजिनप्रतिनिधित्वेन प्रायेण ग्राह्यं वस्त्रम्। )*

## ११ मित्रस्य चक्षुर्धरुणम्⑥

मि॒त्रस्य॒ चक्षु॒र्, धरु॑णं॒ बली॑य॒स्
तेजो॑ यश॒स्वि स्थवि॑रँ॒ समि॑द्धम् ।
अ॒ना॒ह॒न॒स्यं*(=अधूर्तयोग्यं)* वस॑नञ् जरि॒ष्णु
परी॒दं वा॒ज्य्*(=अन्नवत्)* अजिन॑न् **दधे॒** ऽहम् ॥ (२)

▼

⑤

>

▼ Oldenberg

11. 4 He ties thrice around him, from left to right, a threefold-twisted girdle of Muñja grass with the next two (verses; M. II. 2, 9. 10), and (gives him) a skin as his outer garment with the next (verse; II, 2, 11).

▼ हरदत्तः

अथ **मेखलाम्** उत्तराभ्यामृग्भ्यां "इयं दुरुक्ताद्" इत्येताभ्यां त्रिः प्रदक्षिणं परिव्ययति कुमारम् । स्वयमेव मन्त्रमुक्त्वा तं वाचयत्याचार्यः । मन्त्रलिङ्गात् त्रिवृत् मेखला **मौञ्जी** मुञ्जतृणैः कल्पिता । **त्रिवृत्** त्रिगुणा । त्रिवृतामिति छान्दसो दीर्घपाठः ।

ततो **ऽजिनमुत्तरं** वासः करोति **उत्तरयर्चा ।** मित्रस्य चक्षुरित्येतया स्वयमेव मन्त्रमुक्त्वा । सामयाचारिकेषु वर्णविशिष्टा मेखलाविशेषाश्चोदिताः । इदं तु सर्ववर्णानां मौञ्जीप्राप्त्यर्थं वचनम् । अजिनविशेषास्तु सामयाचारिका इहापि प्रत्येतव्याः"कृष्णं ब्राह्मणस्ये"त्यादयः॥११॥

▼ सुदर्शनः

**मौञ्जीं**मुञ्जैः कल्पिताम् । **त्रिवृतां** त्रिवृतम् । दीर्घश्छान्दसः । **मेखलां** "इयं दुरुक्तात्" इत्येताभ्यां **त्रिः प्रदक्षिणं परिव्ययति ।** त्रिवृतामिति च "शक्तिविषये दक्षिणावृत्तानाम् । ज्या राजन्यस्य"(आप.ध.१-२-३३,३४.) इत्यादीनां प्रदर्शनार्थम् । **अजिनं**"कृष्णं ब्राह्मणस्य" (आप.ध.१-३-३) इत्यादि धर्मशास्त्रे विहितम् **उत्तरं वासः** करोति "मित्रस्य चक्षुः" इत्येतया ॥११॥

▼

### ⑤

>

मौञ्जीं मेखलां त्रिवृतां त्रिः प्रदक्षिणमुत्तराभ्यां परिवीयाजिनमुत्तरमुत्तरया।

# १० १२ उत्तरेणाग्निन् दर्भान्②

उदकाञ्जलिम् अस्मा अञ्जलाव् *(प्रोक्षणार्थम्)* आनीयोत्तरया *("समुद्रादूर्मि"रित्येतया)* त्रिः प्रोक्ष्य *(कुमार-कृत्यम् एतत्। आचार्यः प्रोक्षति तत इति विश्वासः। सकृत् मन्त्रेण, द्विस्तूष्णीम् ।)*

*(प्रोक्षणमन्त्रः)*

स॒मु॒द्राद् ऊ॒र्मिर् मधु॑माँ॒ **उदा॑रद्** *(=उदागमद् [एतैः प्रोक्षणबिन्दुभिः])*
उ॒पाँ॒शुना॑ *(=उपांशैः →अंशुनिभैः)* सम् अ॑मृत॒त्वम् **अ॑श्याम्** ।
इ॒मे नु ते र॒श्मय॒स् सूर्य॑स्य
येभि॑स् सपि॒त्वं *(=समानपानं)* पि॒तरो॑ न॒ **आय॑न्** ।

*(यैः रश्मिभिस् सह वामदेवस्य पितरो सोमपानं कृतवन्तः , तत्कारणका बिन्दवो मयि पतिताः )*

## हस्तग्रहणम्⑥

उत्तरैर् *(अग्निष्टे हस्तमग्रमीदित्यादिभिः)* दक्षिणे हस्ते गृहीत्वा *(- प्रतिमन्त्रं ग्रहणावृत्तिः)*

अ॒ग्निष् टे॒ हस्त॑म् **अग्रभी** *(ही)* **त्**।
सोम॑स् ते॒ हस्त॑म् **अग्रभीत्**।
स॒वि॒ता ते॒ हस्त॑म् **अग्रभीत्।**
सर॑स्वती ते॒ हस्त॑म् **अग्रभीत्।**
पू॒षा ते॒ हस्त॑म् **अग्रभीत्।**
अ॒र्य॒मा ते॒ हस्त॑म् **अग्रभीत्।**
अँ॒शु॑स् ते॒ हस्त॑म् **अग्रभीत्।**
भग॑स् ते॒ हस्त॑म् **अग्रभीत्।**
मि॒त्रस् ते॒ हस्त॑म् **अग्रभीत्।**

मि॒त्रस् त्वम् **अ॑सि॒** धर्म॑णा॒,
ऽग्निर् आ॑चा॒र्यस् तव॑ ।*(५)*

*(कीदृशश्च सः? मित्रं देवा अब्रुवन्त - सोमं राजानं हनामेति। सो ऽब्रवीन् - नाहं सर्वस्य वा अहं मित्रम् अस्मि ।)*

## परिदानम्⑥

उत्तरैर् *("अग्नये त्वा परिददामी"त्यादिभिः)* देवताभ्यः परीदाय

*(असौशब्दस्य स्थाने माणवकस्य नाम निर्देशः संबुद्ध्या ॥)*

*(असौशब्दस्य स्थाने माणवकस्य नाम निर्देशः संबुद्ध्या, स्वरं विना ॥)*

अ॒ग्नये॑ त्वा॒ परि॑ददाम्य्*(→रक्षार्थे दानं परिदानम्)* असौ।
सोमा॑य त्वा॒ परि॑ददाम्य् असौ।
स॒वि॒त्रे त्वा॒ परि॑ददाम्य् असौ।
सर॑स्वत्यै त्वा॒ परि॑ददाम्य् असौ।
मृ॒त्यवे॑ त्वा॒ परि॑ददाम्य् असौ।
य॒माय॑ त्वा॒ परि॑ददाम्य् असौ।
ग॒दाय॑ त्वा॒ परि॑ददाम्य् असौ।
अन्त॑काय त्वा॒ परि॑ददाम्य् असौ।
अ॒द्भ्यस् त्वा॒ परि॑ददाम्य् असौ।
ओष॑धीभ्यस् त्वा॒ परि॑ददाम्य् असौ।
पृ॒थि॒व्यै त्वा॒ सवै॑श्वा॒न॒रायै॒*(←उदात्तद्वयम्??)* परि॑ददाम्य् असौ ।

## उपनयनम्⑤

उत्तरेण यजुषा *("देवस्य त्वा सवितुः" इत्येतेन स्वसमीपं)* +उपनीय

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒व*(=अनुज्ञायाम्)* उप॑नये॒ ऽसौ *(←नामनिर्देशः पूर्ववत् । केचित्तु - अन्तोदात्तस्य पाठात् आचार्यस्य नाम्नः प्रथमया निर्देशं मन्यन्ते ॥ )* ।

सुप्रजा इति *("सुपोषः पोषै"रित्येवमन्तम्)* दक्षिणे कर्णे जपति १२

*(कर्णे जपः)*

सु॒प्र॒जाः प्र॒जया॑ **भूयास्,**
सु॒वीरो॑ वी॒रैस्,
सु॒वर्चा॒ वर्च॑सा,
सु॒पोष॒ः पोषैः॑ ।
*(→सूपसर्ग-बहुव्रीहाव् उत्तरपदादिर् उदात्तः। )*

▼

### ⑤

>
▼ Oldenberg

12. 5 To the north of the fire (the teacher) spreads out Darbha grass; on that he causes (the boy) to station himself with the next (verse; M. II. 3, 1), pours his joined hands full of water into (the

boy's) joined hands, makes him sprinkle himself three times with the next (verse; M. II, 3, 2), takes hold of his right hand with the next (formulas; M. II, 3, 3-12), gives him with the next (formulas; M. II, 3, 13-23) in charge to the deities (mentioned in those Mantras), initiates him with the next Yajus (M. II, 3, 24), and murmurs into his right ear the (Mantra), 'Blessed with offspring' (II, 3, 25).

▼ हरदत्तः

अथाचार्यः **उत्तरेणाग्निं दर्भान्त् संस्तीर्य तेष्व् एनं** कुमारं **उत्तरया** "आगन्त्रा समगन्मही"त्येतया ऽवस्थापयति । कुमारस्य मन्त्रः आचार्यो वाचयति *(मन्त्रलिङ्गविरोधो ऽस्मिन्न् अभिप्राये??)*।

**अवस्थाप्य** स्वयं पश्चात् भूमाव् अवस्थाय स्वम् अञ्जलिम् उदकेन पूरयित्वा तम् अञ्जलिम् **अस्मै** कुमाराय प्रतिमुखं दर्भेष्व् अवस्थिताय प्रोक्षणार्थम् आनयति तस्याञ्जलौ । **अस्मा** इति चतुर्थी-निर्देशात् कुमारार्थो ऽयम् उदकाञ्जलिः ।

तेन प्रोक्षणस्य कुमारः कर्ता भवति । आनीय ततः प्रोक्षणं प्रयोजयत्य् आचार्यः - **उत्तरयर्चा** "समुद्रादूर्मिर्" इत्येतया । कुमारस्य मन्त्रः । आचार्यो वाचयति ।

( त्रिः प्रोक्षयति । सकृत् मन्त्रेण द्विस्तूष्णीम् । सव्येन धारणमुदकस्य, दक्षिणेन प्रोक्षणम् । प्रोक्ष्येत्यत्र णिचो लोपो द्रष्टव्यः।)

अथ कुमारस्य हस्तं गृह्णाति **उत्तरैर्** दशभिर्मन्त्रैः** "अग्निष्टे हस्तमग्रभीद्" इत्यादिभिः । प्रतिमन्त्रं ग्रहणावृत्तिः ।

तत **उत्तरैर्** एकादशभिः"अग्नये त्वा परिददामी"त्यादिभिः **तं** देवताभ्यः **परिददाति** । सर्वेष्वसौशब्देषु नामग्रहणं संबुध्या ।

परिदाय **तमुत्तरेण यजुषा** "देवस्य त्वा सवितुः" इत्येतेन उपनयते विद्यानुष्ठानार्थं आचार्यः स्वकुलं प्रापयतीत्य् अर्थः । यजुर् उच्चारणम् एव तत्र व्यापारः, नान्यः कश्चित् ।*(4)* नामग्रहणं च संबुध्या ।

केचित्–असाव् इत्य् अन्तोदात्तस्य पाठात् आचार्यस्य नाम प्रथमया निर्देश्यं मन्यन्ते । एतत्-सम्बन्धात् समस्तम् एव कर्मोपनयनं, यथा पशु-बन्ध इति । उपनीय **सुप्रजा इति दक्षिणे कर्णे जपति** । "सुपोषः पोषैर्" इत्येवमन्तो जपः ॥१२॥

▼ सुदर्शनः

**उत्तरया** "आगन्त्रा समगन्महि" इत्येतया । अस्मा इति चतुर्थी षष्ठ्यर्थे ।

**उत्तरया** "समुद्रादूर्मिः" इत्येतया **त्रिः प्रोक्षति** । सकृन्मन्त्रेण, द्विस्तूष्णीम् ।

**उत्तरैः** "अग्निष्टे हस्तम् अग्रभीत्" इत्यादिभिर् दशभिर् मन्त्रैः । सर्वेषां चान्ते सकृद्धस्तग्रहणम् ।

**उत्तरैः** "अग्नयेत्वा परिददामि" इत्य् एकादशभिः प्रतिमन्त्रं **देवताभ्यो** मन्त्रलिङ्गप्रतीताभ्यः **परिददाति** रक्षणार्थम् । ततश् च यदि सकृत्-परिदानं स्यात् तदा विध्यपराधात् सर्वप्रायश्चित्तं होतव्यम् । असौशब्देषु च सर्वेषु सम्बुद्ध्या नामग्रहणम् ।

**उत्तरेण यजुषा** "देवस्य त्वा सवितुः" इत्यनेन **उपनयते** आत्मनस् समीपं नयति । नामग्रहणं च सम्बुद्ध्यैव ।

केचित्– कुमारस् स्वाञ्जलाव् आचार्येणानीतम् उदकं सव्ये हस्ते धारयन्, दक्षिणेन हस्तेनात्मानं त्रिः प्रोक्षति । आचार्यस् तु प्रोक्षयति । णिचश्च लोपो द्रष्टव्यः । हस्त-ग्रहणं च प्रति-मन्त्रमित्य् अनेक-कल्पनासापेक्षं व्याचक्षते ॥१२॥

इति श्रीसुदर्शनाचार्यविरचिते गृह्यतात्पर्यदर्शने दशमः खण्डः ॥

▼

### ⑤

>

उत्तरेणाग्निं दर्भान् सँस्तीर्य तेष्व् एनम् उत्तरया ऽवस्थाप्योदकाञ्जलिम् अस्मा अञ्जलाव् आनीयोत्तरया त्रिः प्रोक्ष्योत्तरैर् दक्षिणे हस्ते गृहीत्वोत्तरैर् देवताभ्यः परीदायोत्तरेण यजुषोपनीय "सुप्रजा" इति दक्षिणे कर्णे जपति ॥

# ११ ०१ ब्रह्मचर्यमागामिति कुमार②

"ब्रह्मचर्यम् आगाम्" इति *(सवित्रा प्रसूत इत्येवमन्तो मन्त्रः)* कुमार आह १

*(कुमारस्य मन्त्रः)*

ब्र॒ह्म॒चर्य॒म् आग॒ाम्, उप॒ माऽऽनंयस्व, दे॒वेनं सवि॒त्रा प्रसूंतः *(=अनुज्ञातः)* ।

▼

⑤

>
▼ Oldenberg

1. The boy says, 'I am come to be a student' (II, 3, 26).

▼ हरदत्तः

सवित्रा प्रसूत इत्येवमन्तो मन्त्रः आहेति वचनं उच्चैः प्रयोगार्थम् ॥१॥

▼ सुदर्शनः

व्यक्तम् ॥१॥

▼

⑤

>

ब्रह्मचर्यमागामिति कुमार आह।

# ११ ०२ प्रष्टम् परस्य②

प्रष्टं परस्य प्रतिवचनं कुमारस्य २

*(आचार्यः-)* को नामा॑सि?
*(ब्रह्मचारी-)* अ॒सौ *(←नामनिर्देशः प्रथमया)* नामा॑ऽस्मि।
*(आचार्यः-)* कस्यं ब्रह्मचा॒र्यसि असौ *(←नामनिर्देशस्संबुद्ध्या)*?
*(ब्रह्मचारी-)* "प्रा॒णस्यं ब्रह्मचा॒र्य् अंस्मि अ॒सौ" *(←स्वनामनिर्देशः प्रथमया)*।

▼

⑤

>
▼ Oldenberg

2. The other (i.e. the teacher) has to ask; the boy has to answer (II, 3, 27-30).

▼ हरदत्तः

"को नामासी"त्येवमादयः चत्वारो मन्त्राः पृष्टप्रतिवचनार्थाः । तत्र यत्र पृष्टं तत आरभ्य कर्माचार्स्येत्यर्थः । प्रष्टमिति संप्रसारणाभावश्छान्दसः, अपपाठो वा । यत् प्रतिवचनं तत् कुमारस्य । असौशब्देषु नाम निर्दिशति कुमारः प्रथमया । आचार्यः संबुध्या कुमारस्य नाम । तत्र को नामासीत्याचार्यः । (१)यज्ञशर्मनामास्मीति कुमारः । कस्य ब्रह्मचार्यसि (२)श्रीयज्ञशर्मन् इत्याचार्यः, प्राणस्य ब्रह्मचार्यस्मि यज्ञशर्मेति कुमारः । (२)आहेत्यनुवृत्तेरुच्चैः प्रयोगः ॥२॥

▼ सुदर्शनः

**प्रष्टं** प्रश्न इत्यर्थः । रूपं तु छान्दसम् । "को नामासी"त्यादिषु प्रश्नप्रतिवचनार्थेषु चतुर्षु मन्त्रेषु प्रष्टं परस्याचार्यस्य, प्रतिवचनं तु कुमारस्य । ततश्चैवं प्रयोगः–"को नामासि?" इत्याचार्यः पृच्छति । विष्णुशर्मा नामास्मि"इति कुमारः प्रतिब्रूयात् । तथा "कस्य ब्रह्मचार्यसि विष्णुशर्मन्?" इत्याचार्यः । "प्राणस्य ब्रह्मचार्यस्मि" इति कुमारः ॥२॥

▼

**⑤**

>

प्रष्टं परस्य प्रतिवचनं कुमारस्य।

# ११ ०३ शेषम् परो②

शेषं *("एष ते देव सूर्ये")* परो *(आचार्यः)* जपति ३

*(आचार्यः-)* ए॒ष ते॑ देव सूर्य ब्रह्मचा॒री।
तं गो॑पाय, स॒ मा मृ॑त।
ए॒ष ते॑ सूर्य पु॒त्रस्, स दी॑र्घा॒युस्, स॒ मा मृ॑त ।
याँ स्व॒स्तिम् अ॒ग्निर् वा॒युस् सूर्य॑श् च॒न्द्रमा॒ आपो ऽनु॑ **स॒ञ्चर॑न्ति॒**,
ताँ स्व॒स्तिम् अनु॒ **सञ्च॑रासौ***(←नामनिर्देशस्संबुद्ध्या)* ।

▼

**⑤**

>

▼ Oldenberg

> 3. The other murmurs the rest (of the Anuvāka),

▼ हरदत्तः

पृष्टप्रतिवचनादूर्ध्वं अनुवाकस्य **यश् शेषः** तं "एष ते देव सूर्ये"त्यादिकं **पर** आचार्यो जपति ॥३॥

▼ सुदर्शनः

**शेषम्** अनुवाकशेषैकदेशं "विष्णुशर्मैष ते देव" इत्यादि "अनुसञ्चर विष्णुशर्मन्" इत्येवमन्तमाचार्यो जपति । "अध्वनामध्वपते" इत्यस्य प्रत्यगाशिषो वाचनविधानात् ॥३॥

▼

**⑤**

>

शेषं परो जपति।

# ११ ०४ प्रत्यगाशिषञ् चैनम्②

प्रत्यगाशिषं *(आत्मगाम्याशीःफलं यस्मिन्मन्त्रे,अध्वनामित्यारभ्य आ उपनयनसमाप्तेर्ये प्रत्यगाशिषो मन्त्राः"योगे"इत्यादयः )* चैनं वाचयति ४

*(ब्रह्मचारी सूर्यम् प्रति-)* अध्व॑नाम् अध्वपते *(सूर्य)* श्रेष्ठ॒स्याऽध्व॑नः *(ब्रह्मचर्यामार्गस्य)* पा॒रम् अ॑शीय ॥ (3)

▼

⑤

>
▼ Oldenberg

4. And causes the boy to repeat (the Mantra) which contains wishes for himself (II, 3, 32).

▼ हरदत्तः

तत्रैव शेषे या **प्रत्यगाशीः** "अध्वनामध्वपत" "इत्येवमाद्या" ताम् **एनं** कुमारं वाचयति ॥४॥

▼ सुदर्शनः

आत्मगाम्याशीःफलं यस्मिन् मन्त्रे स **प्रत्यगाशीः** । जात्यभिप्रायमेकवचनम् । अध्वनामित्यारभ्य आ उपनयनसमाप्तेर् ये प्रत्यगाशिषो मन्त्राः"योगे योगे" इत्यादयः, तान् सर्वान् कुमारं **वाचयति** ॥४॥

▼

⑤

>

प्रत्यगाशिषं चैनं वाचयति।

# ११ ०५ उक्तमाज्यभागान्तम्②

उक्तम् आज्यभागान्तम् *("आ॒यु॒र्दा दे॑व ..." इति समिदाधाने)* ५

▼

⑤

>
▼ Oldenberg

5. 6 (The rites) down to the Ājyabhāgas have been prescribed.

▼ हरदत्तः

*(सम्पादकटिप्पनी - "सूत्रमेतद् अग्रिमे सूत्रे व्याख्यातम्" )*

▼ सुदर्शनः

*(सम्पादकटिप्पनी - "सूत्रमेतद् अग्रिमे सूत्रे व्याख्यातम्" )*

▼

⑤

>

उक्तमाज्यभागान्तम्।

# ११ ०६ अत्रैनमुत्तरा आहुतीर्हावयित्वा②

अत्रैनम् उत्तरा *("योगे योगे" इत्येकादर्शचः)* आहुतीर् हावयित्वा जयादि प्रतिपद्यते ६

*(तत्र द्वितीयचतुर्थौ "इममग्न आयुषे" "अग्निष् ट आयुः प्रतराम्" इति लिङ्गविरोधात् "आयुर्दा देव जरसम्" इतिवत् स्वयमेव ब्रूयात्, नैनं वाचयति । प्रधान-होमेषु हावयित्वेति वचनाद् उपहोमेष्व् आचार्य एव कर्ता।)*

*(ते च सर्वे माणवकस्यैव । द्वितीयचतुर्थाव् आचार्यस्येत्येके ।)*

######## ०७ योगेयोगे तवस्तरं

*(रथादि)*यो॒"गेयोगे तव॒"स्*(=गति[वत्])*तरवँ्
वा॒"जेवाजे हवामहे ।
*(वयं स्तोतृत्वेन)* स॒"खाय*(ः)* इ॒"न्द्रम् ऊत॒"ये ।*(५)*

####### ०२ इममग्न आयुषे

इ॒मम् अ॑ग्न॒ आयु॑षे॒ वर्च॑से **कृधि**
ति॒ग्मम् ओजो॑ वरुण॒ **सँशि॑शाधि** ।
मा॒तेवा॑स्मा अदिते॒ शर्म॑ **यच्छ॒**
विश्वे॑ देवा॒ जर॑दष्टि॒र् यथा **ऽस॑त्** *(जनः)*॥

(अग्नि-वरुण-सोमादिति-विश्वेभ्यः देवेभ्यः इदन्न मम ।)

शत॒"म् इ॒"न् नु॒" शर॒"दो अ॒"न्ति*(कं)* देवा,
य॒"त्रा नश् **चक्रा॒"** *(क्रुः)* जर॒"सन् तनू॒"नाम् ।
पुत्रा॒"सो य॒"त्र पित॒"रो **भ॒"वन्ति**
*(तादृशे काले)* **मा॒"** नो मध्या॒" **रीरिषता॒"ऽऽयुर्** *(आ स्वतो)*ग॒"न्तोः*(=गमनात्)* ।*(४)*

(दे॒वेभ्य॒ः इद॒न्न मम॑ । )

अ॒ग्निष् ट॒ आयु॑ः प्र*(कृष्ट)*त॒रां **द॑धात्व्**
अ॒ग्निष् टे॒ पुष्टि॑ प्रत॒रां **कृ॑णोतु** ।
इन्द्रो॑ म॒रुद्भि॑र् ऋतु॒-धा *(पुष्टिं)* **कृ॑णोत्व्**
आदि॒त्यैस् ते॒ वसु॑भि॒र् **आ द॑धातु** ।

(अग्नीन्द्र-मरुद्-आदित्य-वसुभ्य इदन्न मम ।)

मे॒धां मह्य॒म् अङ्गि॑रसो
मे॒धाँ स॑प्तऋ॒षयो॑ **ददुः** ।
मे॒धां मह्यं॑ प्र॒जाप॑तिर्
मे॒धाम् अ॒ग्निर् **द॑दातु** मे ।

(अङ्गिरस्-सप्तर्षि-प्रजापति+अग्निभ्यः इदन्न मम । )

अ॒प्स॒रासु॒ या मे॒धा
ग॑न्ध॒र्वेषु॑ च॒ यद् यशः॑ ।
दैवी॒ या मा॑नुषी मे॒धा
सा मामा वि॑शतादि॒ह ।

(मेधायशोभ्याम् इदन्न मम ।)

इमं" मे वरुण श्रुधी *(=श्रुणु)*
ह"वम्*(=आह्वानम्)* अद्या" च मृळय *(=सुखय)*।
त्वा"म् अवस्यु"र् आ" चके *(=अवदन्)*॥

त"त् त्वा **यामि** ब्र"ह्मणा **व"न्दमानस्**
त"द् **आ" शास्ते** य"जमानो हवि"र्भिः ।
अ"हेळमानो *(=अक्रुध्यन्)* वरुणेह" **बोध्य्** उ"रुशंस
मा" न आ"युः **प्र" मोषीः** ॥

त्व"न् नो अग्ने व"रुणस्य विद्वा"न्
देव"स्य हे"डो" *(=क्रोधो )* ऽव यासिसीष्ठाः*(=यक्षीष्ठाः)* ।
य"जिष्ठो *(हविर्)*व"ह्नितमश् शो"शुचानो*(=देदीप्यमानः)*
वि"श्वा द्वे"षाँसि प्र" मुमुग्ध्य् अस्म"त् ।

*(अग्नीवरुणाभ्याम् इदं न मम)*

स" त्व"न् नो अग्ने ऽवमो"*(=मूलभूतो)* **भव**+ऊती"*(त्या)*
*("अग्निरवमो देवतानां विष्णुः परमः" इति ब्राह्मणम्)*
ने"दिष्ठो*(=अन्तिकतमो)* अस्या" उष"सो व्युष्टौ*(=व्युष्टायाम्)* ।
**अ"व यक्ष्व** नो व"रुणँ, **र"राणो**
**वीहि"** *(=खाद)* मृडीकँ" *(=सुखयितारं [हविः])* सुह"वो न **एधि** ।

*(अग्नीवरुणाभ्याम् इदं न मम)*

## १६ त्वमग्ने अयाऽस्यया⑥

त्वम् अ॑ग्ने अ॒या*(=एतव्यः/ प्रत्येता)* **ऽस्य्**
अ॒या **सन्** मन॑सा **हि॒तः** ।
अ॒या **सन्** ह॒व्यम् **ऊ॑हिषे॒**
ऽया नो॑ **धेहि** भेष॒जम् ॥ (4)

▼

⑤

>
▼ Oldenberg

6. Having then caused him to sacrifice the oblations (indicated in the) next (Mantras; M. II, 4, 1-11), he enters upon (the performance) of the Jaya and following oblations.

▼ हरदत्तः

**आज्यभागान्तं** तन्त्रं प्रागेवोक्तम् । अत्रेदानीम् एनं कुमारं **उत्तरा** एकादश प्रधानाहुतीर् **हावयति** "योगे योगे" इत्येवमाद्याः ।

उत्तरैर्मन्त्रैः कुमारो जुहोति । तम् आचार्यः प्रयुङ्क्ते मन्त्रवाचनेन ।

द्वितीय-चतुर्थयोरपि मन्त्रयोः कुमार एव वक्ता, देवताभिधानार्थत्वात् ।

अपर आह– लिङ्गविरोधाद् आचार्यो वक्ता कुमारस् तु (१)होतेति । प्रधानहोमेषु हावयित्वेति वचनात्(२) उपहोमेष्वाचार्य एव कर्ता ॥६॥

▼ सुदर्शनः

इदम् अनुवाद-मात्रं मा भूद् इति साध्याहारं व्याख्यायते । न केवलम् अध्वनाम् इत्यारभ्य प्रत्यगाशिषो मन्त्रान् वाचयति । आज्यभागान्तम् उक्त्वा ये पश्चात् प्रत्यग्-आशिषो मन्त्राः मेखला-परिव्ययणादिषूक्ताः "इयं दुरुक्ताद्"-इत्याद्यास् तानपि(३) स्वयम् उक्त्वा वाचयति । **उक्तम्** इति जात्यभिप्रायम् ।

इदं त्व् इह वक्तव्यं - यासु मेखला-परिव्ययणादिषु कुमार-प्रधानासु संस्कार-क्रियासु ये प्रत्यग्-आशिषो मन्त्राः, तच्-चोदकैर् आख्यातैः करणत्वेन चोदिताः क्रियाः तैर् मन्त्रैः कृत्वा पश्चाद् वाचयति - स्वतः करण-मन्त्राणां क्रिया-गुण-भूतैः कर्तृभिर् एवोच्चार्यत्वात्, कुमारस्य चात्र संस्कार्यत्वेन प्राधान्यात् ।

यत्र पुनर् होमादिषु कुमारस्य गुणभाव एव, न संस्कार्यत्वं, तत्र तान् प्रत्यगाशिषो वाचयत्य् एव । केचित्— परिव्ययणादिष्व् अपि कुमारस्यैव मन्त्रः, परस् तु वाचयत्य् एवेति ॥५॥

अत्र अस्मिन् क्रमे, न तु "यथोपदेशं प्रधानाहुतीः" इति सामान्य-वचनाद् आज्यभागानन्तरम् एव ।

**एनं** कुमारम् । **उत्तराः** "योगे योगे" इत्येकादर्शचः प्रत्यगाशिषो वाचयन् हस्ते गृहीत्वा प्रतिमन्त्रं **हावयति** । तत्र द्वितीयचतुर्थौ "इममग्न आयुषे" "अग्निष्ट आयुः प्रतराम्" इति लिङ्गविरोधात्" आयुर्दा देव जरसम्" इतिवत् स्वयमेव ब्रूयात्, नैनं वाचयति । केचित्—एतयोरपि देवताभिधानार्थत्वात् कुमारस्यैवोच्चारणमिति । ततो "जयाभ्यातानान् राष्ट्रभृत" इति सामान्यविधिप्रसिद्धमेवाचार्यो **जयादि प्रतिपद्यते** । ततश्च अग्निर्भूतानामधिपतिस्समावतु" इत्यादीनां प्रत्यगाशिषामपि वाचनं न भवति । नैव च हावनम् ॥६॥
▼

**⑤**

>

अत्रैनमुत्तरा आहुतीर्हावयित्वा जयादि प्रतिपद्यते।

# ११ ०७ परिषेचनान्तङ्②

परिषेचनान्तं कृत्वा
ऽपरेणाग्निम् उदग्-अग्रं कूर्चं निधाय
तस्मिन्न् उत्तरेण *("राष्ट्रभृदसि"इत्यनेन)* यजुषोपनेता *(आचार्यः)* +उपविशति ७

*(हे कूर्च!)* रा॒ष्ट्र॒भृद् अ॒स्य् आचार्याऽऽस॒न्दी, मा त्वद् *(तः)* यो॑षम् *(←यौतिः पृथग्भावे)* ।

▼

**⑤**

>
▼ Oldenberg

7. Having performed (the rites) down to the sprinkling (of water) round (the fire), he puts down, to the west of the fire, a bunch of northward-pointed grass; on that (the teacher) who performs the initiation, sits down with the next Yajus (M. II, 4, 12).

▼ हरदत्तः

**उत्तरेण यजुषा** राष्ट्रभृदसीत्येतेन । परिषेचनान्तवचनमानन्तर्यार्थम् । केचित् सावित्रं नाम व्रतमस्मिन् काल उपाकुर्वन्ति । केचित् त्रिरात्रान्ते सावित्रीमनुब्रुवते । तदुभयमप्यनिष्टमाचार्यस्य । निधायेति वचनादाचार्य एव निधाने कर्ता, न माणवकः । अधिकारादेव सिद्धे उपनेतेति वचनमुत्तरार्थम् । पुरस्तात् प्रत्यङ्ङासीन इत्यत्र उपनेतुः पुरस्तात् यथा स्यात् अग्नेः पुरस्तात् मा भूत् इति । तथा दक्षिणेन पाणिना दक्षिणं पादमित्यत्रोपनेतुः पादो न माणवकस्य ॥७॥

▼ सुदर्शनः

**कूर्चं** दर्भमयमासनम् । उत्तरेण यजुषा "राष्ट्रभृदसि" इत्यनेन । **उपनेता** आचार्यः । शेषं व्यक्तम् ॥७॥

▼

⑤

>

परिषेचनान्तं कृत्वापरेणाग्निमुदगग्रं कूर्चं निधाय तस्मिन्नुत्तरेण यजुषोपनेतोपविशति।

# ११ ०८ पुरस्तात्प्रत्यङ्ङासीनः कुमारो②

पुरस्तात् प्रत्यङ्ङ् आसीनः कुमारो दक्षिणेन पाणिना दक्षिणं पादम् अन्वारभ्य *(=उपसंगृह्य)* आह "सावित्रीं भो अनुब्रूहि" इति ८

▼

⑤

>

▼ Oldenberg

8. The boy, sitting to the east (of him), facing the west, seizes with his right hand (the teacher's) right foot and says, 'Recite the Sāvitrī, Sir!'

▼ हरदत्तः

दर्भेष्वासीन इति गृह्यान्तरे । दक्षिणेनेति वचनमुभाभ्यामेवोभावित्ययं पक्षोऽत्र मा भूदिति । तेन सकुष्ठिकमुपसङ्गृह्णीयादित्ययं विशेषः प्रवर्तते ॥८॥

▼ सुदर्शनः

उपनेतुः **पुरस्तात् प्रायङ्मुखः आसीनः कुमारो दक्षिणेन पाणिना** उपनेतुर् **दक्षिणं पादं अन्वारभ्य** उपसंगृह्य **"सावित्रीं भो । अनुब्रूहि"** इति प्रार्थयते ॥८॥

▼

⑤

>

पुरस्तात्प्रत्यङ्ङासीनः कुमारो दक्षिणेन पाणिना दक्षिणं पादमन्वारभ्याह"सावित्रीं भो अनुब्रूहि" इति ॥

# ११ ०९ तस्मा अन्वाह②

तस्मा अन्वाह - "तत् सवितुर्" इति ९

त॑त् सवितु॑र् व॑रेण्य॑ *(णिय)*म्
भ॑र्गो *(=भर्जनम्)* देव॑स्य धीमहि *(←धा धारणे/ ध्यै ध्याने / धी आराधने)* ।
धि॑यो यो॑ नः प्रचोद॑यात् ॥
(परो॑-रजसे ऽसा॑वद् ओ॑३म् ॥)

▼ प्र॑चो॑द॑या॑त्-स्व॑रः॑

प्र॑ + चु॑द् + णि॑च् उ॑दा॑त्तः॑ + श॑प् अ॑नु॑दा॑त्तः॑ पि॑त्त्वा॑त् + [ले॑ट् → आ॑ट् + ति॑प् अ॑नु॑दा॑त्तः॑ पि॑त्त्वा॑त्]।

प्रा॑नु॑दा॑त्त॑त्वं॑ ति॑ङ॑न्त॑स्यो॑दा॑त्त॑व॑त्त्वा॑त्। त॑च्च॑ य॑त्का॑र॑स॑द्भा॑वा॑त्।

▼

⑤

>
▼ Oldenberg

9. He recites (the Sāvitrī) to him, 'That (glorious splendour) of Savitṛ' (Taitt. Saṃh. I, 5, 6, 4; M. 4, 13);

▼ हरदत्तः

*(सम्पादकटिप्पनी - "सूत्रमेतद् अग्रिमे सूत्रे व्याख्यातम्" )*

▼ सुदर्शनः

*(सम्पादकटिप्पनी - "सूत्रमेतद् अग्रिमे सूत्रे व्याख्यातम्" )*

▼

⑤

>

तस्मा अन्वाह तत्सवितुरिति।

# ११ १० पच्छोऽर्धर्चशस्ततस्सर्वाम्②

पच्छो ऽर्धर्चशस् ततस् सर्वाम् १०

▼

⑤

>
▼ Oldenberg

10. Pāda by Pāda, hemistich by hemistich, and the whole (verse).

▼ हरदत्तः

**तस्मा** इति वचनात् कुमारस्य ग्रहणार्थमनुवचनम् । तेन त्रिष्वपि वचनेषु कुमारस्यानुग्रहणं भवति । अनुशब्दोऽनुग्रह द्योतनार्थः । अनुग्रहेणाह **अन्वाहेति** । तेन यद्यसमर्थः कुमारः तावत् वक्तुं ततो यथाशक्ति वाचयति । स्वयं विधिवत् पूर्वमुक्त्वा प्रथमं पच्छः पादेपादेऽवसानम् । द्वितीयमर्धर्चशः, ततस्सर्वामन्वाहेति । उत्तरमिति वक्तव्ये तत्सवितुरिति निर्देशः सावित्रीप्रदेशेषु सावित्र्या समित्सहस्रमादध्याद्(आप.ध.१-२७-१)इत्यादिषु अस्या एव ग्रहणं यथा स्यात् । यस्याः कस्याश्चित् सवितृदेवत्याया मा भूदित्येवमर्थम् । तत इति वचनादेतावदेवास्मिन्नहन्यनुवचनम् । एतैर्वचनैरग्रहणे कालान्तरेऽध्यापनम् ॥१०॥

▼ सुदर्शनः

**तस्मै** कुमाराय ग्रहणार्थं "तत्सवितुर्वरेण्यम्" इत्येतामृचमाचार्यो**ऽन्वाह** । तत्र च सवितृदेवत्यामृचमनुब्रूहीत्यविशेषेण प्रार्थनायां कृतायामपि योयं "तत्सवितुरित्यन्वाह" इति नियमः स ज्ञापयति– धेनुपङ्कजादिशब्दवत् सावित्रीशब्दस्य यौगिकस्यापि "तत्सवितुर्वरेण्यम्" इत्यस्यामेव प्रयोगो नियतः, न तु "आसत्येन रजसा" इत्यादिष्वपीति । ततश्च धर्मशास्त्रे "सावित्रीं प्राणायामशः" (आप.ध.१-२६-१५.) सावित्र्या समित्सहस्रमादध्यात्" (आप.ध.१-२७-१.) इत्यादिष्वस्या एवर्चस्सम्प्रत्ययो नान्यस्या अपीति ॥९॥

कथमन्वाह? इत्यत्राह— **पच्छः** पादे पादे अवसाय । **अर्धर्चशः** अर्धचे अवसाय । **ततः सर्वां** समस्तां अनवसानामित्यर्थः । अत्र च सर्वानुवचनस्यादृष्टार्थत्वात्, ग्रहीतुमसमर्थस्यापि कुमारस्य सर्वा निगद्यते ॥१०॥
▼

⑤

>

पच्छोऽर्धर्चशस्ततस्सर्वाम्।

# ११ ११ व्याहृतीर्विहृताः②

व्याहृतीर् विहृताः - पादादिष्व् अन्तेषु वा, तथार्धर्चयोर्, उत्तमां कृत्स्नायाम् ११

(आद्युच्चारणपक्षे)

### पादशः⑥

ओं भूस् तत् सवि॒तुर् वरे॑ण्य*(णिय)*म्।
ओं भुव॒र् *(पापादि)*भर्गो॑*(=भर्जनम्)* दे॒वस्य॑ धीमहि*(←ध्यै ध्याने / धी आराधने)* ।
ओं सुव॒र् धियो॒ यो नः॑ प्रचो॒दया॑त् ॥

### अर्धशः पूर्णश्श्च⑥

ओं भूस् तत् सवि॒तुर् वरे॑ण्य*(णिय)*म् *(पापादि)*भर्गो॑*(=भर्जनम्)* दे॒वस्य॑ धीमहि*(←ध्यै ध्याने / धी आराधने)* ।
ओं भुव॒र् धियो॒ यो नः॑ प्रचो॒दया॑त् ॥

ओं सुव॒स्

त॑त् सवितु॑र् व॑रेण्य॑*(णिय)*म्
भ॑र्गो*(=भर्जनम्)* देव॑स्य धीमहि*(←धा धारणे/ ध्यै ध्याने / धी आराधने)* ।
धि॑यो यो॑ नः प्रचोद॑यात् ॥
(परो॑-रजसे ऽसा॑वद् ओ॑३म् ॥)

▼ प्र॑चो॑द॑या॑त्-स्व॑रः॑

प्र॑ + चु॑द् + णि॑च् उ॑दा॑त्तः॑ + श॑प् अ॑नु॑दा॑त्तः॑ पि॑त्त्वा॑त् + [ले॑ट् → आ॑ट् + ति॑प् अ॑नु॑दा॑त्तः॑ पि॑त्त्वा॑त्]।

प्रा॑नु॑दा॑त्त॑त्वं॑ ति॑ङ॑न्त॑स्यो॑दा॑त्त॑व॑त्त्वा॑त्। त॑च्च॑ य॑त्का॑र॑स॑द्भा॑वा॑त्।

### पुनः पूर्णोच्यते कैश्चित्⑥

ॐ भूर्-भुव॒स्-सुव॒स्

त॑त् सवितु॑र् व॑रेण्य॑*(णिय)*म्
भ॑र्गो*(=भर्जनम्)* देव॑स्य धीमहि*(←धा धारणे/ ध्यै ध्याने / धी आराधने)* ।

धि॑यो यो॑ नः प्रचोद॑यात् ॥
(परो॑-रजसे ऽसा॑वद् ओ॑३म् ॥)

▼ प्र॑चो॑द॑या॑त्-स्व॑रः॑

प्र॑ + चु॑द् + णि॑च् उ॑दा॑त्तः॑ + श॑प् अ॑नु॑दा॑त्तः॑ पि॑त्त्वा॑त् + [ले॑ट् → आ॑ट् + ति॑प् अ॑नु॑दा॑त्तः॑ पि॑त्त्वा॑त्]।

प्रा॑नु॑दा॑त्त॑त्वं॑ ति॑ङ॑न्त॑स्यो॑दा॑त्त॑व॑त्त्वा॑त्। त॑च्च॑ य॑त्का॑र॑स॑द्भा॑वा॑त्।

▼

⑤

>

▼ Oldenberg

11. (When repeating the Sāvitrī Pāda by Pāda, he pronounces) the Vyāhṛtis singly at the beginning or at the end of the Pādas;
12. In the same way (the first and the second Vyāhṛti at the beginning or at the end) of the hemistichs; the last (Vyāhṛti, when he repeats) the whole verse.

▼ हरदत्त-प्रस्तावः

अथ तस्मिन्नेवानुवचने विशेषमाह—

▼ हरदत्तः

तत्रैवानुवचने विशेषः – प्रथमे वचने पादानां त्रयाणां आदिष्वन्तेषु वा तिस्त्रो व्याहृतयः क्रमेण वक्तव्याः ॥९॥ द्वितीय वचने अर्धचयोरादितः अन्ततो वा द्वे व्याहृती क्रमेण वक्तव्ये । तत उत्तमा शिष्यते सुवरिति । ताम् **उत्तमां कृत्सनायां** वचनेऽनुब्रूयादिति । तत्र प्रयोगः–प्रणवोऽग्रे वक्तव्यः । "ओंकारः स्वर्गद्वारम्, तस्मात् ब्रह्माध्येष्यमाणः"(आप.ध.१-१३-६.) इति वचनात् । ओं भूः तत्सवितुर्वरेण्यम् । ओं भुवः भर्गो देवस्य धीमहि । ओं सुवः धियो यो नः प्रचोदयात् । ओं भूः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । ओं भुवः धियो यो नः प्रचोदयात् । ओं सुवः तत्सवितुर्वेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् ॥११॥

▼ सुदर्शनः

**विहृताः** व्याहृतीः त्रिष्वपि पादादिष्वेकैकामन्वाह । अथवा पादानामन्तेषु । तथार्धर्चेऽवसाय प्रयोगेऽपि प्रत्यर्धर्चमादावन्ते वैकैकामन्वाह । अविशिष्टां **तूत्तमां** व्याहृतिं **कृत्स्नायाम्** इति षष्ठ्यार्थपाठः । प्रयोगस्तु– प्रथमं प्रणवमन्वाह; ओमिति ब्राह्मणः प्रवक्ष्यन्नाह (तै.उ.१-८.) इति श्रुतेः, "ओंकारस्स्वर्गद्वारं तस्माद्ब्रह्माध्येष्यमाण एतदादि प्रतिपद्येत" (१-१३-६.) इति धर्मशास्त्रवचनाच्च । "ओं भूः तत्सवितुर्वरेण्यम् । ओं भुवः भर्गो देवस्य धीमहि । ओं सुवः धियो यो नः प्रचोदयात् ॥ ओं भूः तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । ओं भुवः धियो यो नः प्रचोदयात् ॥ ओं सुवः तत्सवितुर्वरेण्यं भर्गोदेवस्य धीमहि धियो यो नः प्रचोदयात्" । अन्तेषु वेति पक्षे प्रयोगः – "ओं तत्सवितुर्वरेण्यं भूः । ओं भर्गो देवस्य धीमहि भुवः । ओं धियो यो नः प्रचोदयात् सुवः ॥ ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि भूः । ओं धियो यो नः प्रचोदयात् भुवः ॥ ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः प्रचोदयात् सुवः" इति ॥११॥

▼

⑤

>

व्याहृतीर्विहृताः पादादिष्वन्तेषु वा तथार्धर्चयोरुत्तमां कृत्स्नायाम्।

# ११ १२ कुमार उत्तरेण②

कुमार उत्तरेण *("वृधमसौ सोभ्ये"त्यनेन, असावित्यनेन प्राणोऽभिधीयते)* मन्त्रेणोत्तरमोष्ठम् उपस्पृशते १२

*(सावित्रीग्रहणात्)* अवृ॑धम् अ॒सौ*(←प्राण-सम्बोधने)* सौम्य प्रा॒ण, स्वं में गोपाय ।*(५)*

*(सम्बोधने स्वरः कथम्??)*

▼

⑤

>
▼ Oldenberg

13. With the next Mantra (M. II, 4, 14) the boy touches his upper lip;

▼ हरदत्तः

अथ तत्रैवासीनः **कुमारः उत्तरेण** मन्त्रेणा"वृधमसौ सोम्ये"त्यनेन स्वयम्**उत्तरमोष्ठमुपस्पृशते ।** अप उपस्पृशति । ओष्ठयो र्द्वित्वात् उत्तरमिति विशेषणम् । मन्त्रग्रहणमुत्तरशब्दस्य दिग्वाचिताशङ्का मा भूदित्येवमर्थम् । मन्त्रे असावित्यनेन प्राणोऽभिधीयते नाचार्यो नापि (१)माणवकः । तेन नामनिर्देशो न कर्त्तव्यः ॥११॥

▼ सुदर्शनः

आचार्यवाचितेन "अवृधमसौ सोम्य" इत्यनेन **मन्त्रेण कुमारः स्वमुत्तरमोष्ठम्** उपस्पृशति । छान्दसमात्मनेपदम् । असावित्यत्र च नास्ति नामग्रहणम्, प्राणाभिधानत्वात् । "श्यावान्तपर्यन्तावोष्ठावुपस्पृश्याचामेत्" (आप.ध.१-१६-१०.) इति वचनात् आचमनं तु कर्तव्यम् ॥१२॥

▼

⑤

>

कुमार उत्तरेण मन्त्रेणोत्तरमोष्टमुपस्पृशते।

# ११ १३ कर्णावुत्तरेण②

कर्णावुत्तरेण *("ब्रह्मण आणी स्थ"इत्यनेन)* १३

*(सावित्री)*ब्रह्म॑ण*(=मन्त्रस्य)* आ॒णी*(=कीले)* स्थः॑ ॥*(५)*

▼

⑤

>
▼ Oldenberg

14. With the next (II, 4, 15) both his ears;

▼ हरदत्तः

**उत्तरेण** मन्त्रेण "ब्रह्मण आणी स्थ" इत्यनेन । सकृन्मन्त्रः । कर्णाविति द्विवचनयोगात् क्रमेणोपस्पर्शनम् ॥१३॥

▼ सुदर्शनः

स एव युगपद्धस्तद्वयेन स्वीयौ **कर्णौ** स्पृशति । **उत्तरेण** "ब्रह्मण आणी स्थः" इति द्विवचनलिङ्गेन ॥१३॥

▼

⑤

>

कर्णावुत्तरेण ।

# ११ १४ दण्डमुत्तरेणाऽऽदत्ते②

*(पलाश-)*दण्डमुत्तरेणाऽऽदत्ते *("सुश्रवस्सुश्रवस"मित्यनेन)*१४

सु॒श्रव॑स् *(पलाश!)* सु॒श्रव॑सं मा कुरु।*(५)*
यथा॒ त्वँ सु॒श्रव॑स् सु॒श्रवा॑ अस्य्,
ए॒वम् अ॒हँ सु॒श्रव॑स् सु॒श्रवा॑ भूयासम्॥
यथा॒ त्वँ सु॒श्रव॑स्! सु॒श्रवो॑! दे॒वानां॑ निधिगो॒पो॑ ऽस्य्,
ए॒वम॒हं ब्रा॑ह्म॒णाना॒ं ब्रह्म॑णो निधि-गो॒पो भू॑यासम् ।*(५)*

▼

⑤

>

▼ Oldenberg

15. With the next (II, 5, 1) he takes up the staff.

▼ हरदत्तः

**उत्तरेण** मन्त्रेण "सुश्रवस्सुश्रवसम्" इत्यनेन ॥१४॥

▼ सुदर्शनः

**उत्तरेण** "सुश्रवः" इत्यनेन ॥१४॥

▼

⑤

>

दण्डमुत्तरेणाऽऽदत्ते।

# ११ १५ पालाशो दण्डो②

पालाशो दण्डो ब्राह्मणस्य
नैय्यग्रोधस् स्कन्धजो ऽवाङ्ग्रो*(=अवाजग्रः)* राजन्यस्य
बादर औदुम्बरो वा वैश्यस्य १५

▼

⑤

>

▼ Oldenberg

16. 7 The staff of a Brāhmaṇa is made of Palāśa wood, that of a Rājanya of a branch of the Nyagrodha tree, so that the downward-turned end (of the branch) forms the tip (of the staff), that of a Vaiśya of Bādara or Udumbara wood.

▼ हरदत्तः

राजन्यवैश्ययोः विशेषविधानादेव सिद्धे ब्राह्मणग्रहणं अयमपि विधिर्वणसंयुक्तो यथा स्यादिति । तेन "वार्क्षो दण्ड" इत्ययं विकल्पो ब्राह्मणस्यापि भवति । इतरथा राजन्यवैश्ययोरेव स्यात् तयोरेव वर्णसंयुक्त विधानमिति कृत्वा ॥१४॥ न्यग्रोधस्य विकारो **नैय्यग्रोधः** । स्कन्धे जातः **स्कन्धजः** । अवाचीनाग्रः **अबाङग्रः** । ङकारपाठश्छान्दसः ॥१५॥ बदर्या विकारो **बादरः** । वृक्षप्रकरमात् उदुम्बरो वृक्षः, न ताम्रम् ॥१६॥

▼ सुदर्शनः

**पालाशः** पलाशवृक्षस्य विकारः । एवमुत्तरेष्वपि विग्रहः । स्कन्धे जातः **स्कन्धजः । अवाङग्रः** अवाचीनमग्रं यस्य दण्डस्य ॥१५॥

▼

**⑤**

>

पालाशो दण्डो ब्राह्मणस्य नैय्यग्रोधस्स्कन्धजोऽवाङ्ग्रो राजन्यस्य बादर औदुम्बरो वा वैश्यस्य।

# ११ १६ वार्क्षो दण्ड②

वार्क्षो दण्ड इत्य् अवर्ण-संयोगेनैक उपदिशन्ति १६*(5)*

▼

**⑤**

>

▼ Oldenberg

17. Some state (only), without any reference to caste, that the staff should be made of the wood of a tree:

▼ हरदत्तः

वृक्षस्य विकारो **वार्क्षः ।** यज्ञियस्य वृक्षस्य इति कल्पान्तरे । पूर्वो विधिर्वणसंयुक्तः, अयं तु सर्वसाधारणो न केनचित् वर्णविशेषेण संयुज्यते । अत्र च सामयाचारिक एव दण्डविधिस्सर्वचरणार्थः सन्निहानूद्यते नैय्यग्रोधादिषु मन्त्रप्रापणार्थम् । अन्यथा पालाशस्यैव मन्त्रेणादानं स्यात् तूष्णीमन्येषाम् । "सुश्रवः" इत्यस्य पालाशाभिधानत्वात् । "देवा वै ब्रह्मन्नवदन्त तत् पर्ण उपाश्रृणोत् सुश्रवा वै नामेति"(तै.सं.३-५-७.) वार्क्षो दण्ड इत्वेतावतैव सिद्धे अवर्णसंयोगेनेति वचने कल्पान्तरयोरसंभेददर्शनार्थम्–यदि वर्णसंयुक्तः कल्पः प्रक्रान्तः स एवासमावर्तनात् कर्तव्य इति ॥१६॥

▼ सुदर्शनः

**वार्क्षः** वृक्षस्य यज्ञियस्य विकारः, न तु वेणुवेत्रादेः । **अवर्णसंयोगेन** सर्ववर्णानामविशेषेण **इत्येवा उपदिशन्ति** । अत्र यद्यपि "तत् पर्ण उपाश्रृणोत् सुश्रवा वै नाम" (तै.सं.३-५-७) इत्यर्थवादेन मन्त्रस्थसुश्रवशब्दस्य पालाशाभिधानलिङ्गत्वात् अनेन मन्त्रेण नैय्यग्रोधादिदण्डानामप्युपादाने लिङ्गविरोधः तथापि "दण्डमुत्तरेणादत्ते" इति श्रुतिप्राबल्यात् लिङ्गं बाधित्वाऽनेनैव सर्वदण्डानामुपादानम् । धर्मशास्त्रे "पालाशो दण्डो ब्राह्मणस्य" (आप.ध.१.२.३८)इत्यादि पुनर्विधानं च "त्रैविद्यकं ब्रह्मचर्यं चरेत्" (आप.ध.१.१.२८) इत्युपनयनकालातिपत्तिप्रायश्चित्तानुष्ठानेऽपि तत्तद्वर्णेन तत्तद्दण्डधारणार्थम् । केचित्–तत्रैव सर्वचरणार्थं विहितानां दण्डानां गृह्येऽनुवादः सर्वेषामुपादानेऽपि श्रुत्यैतन्मन्त्रविधानार्थं इति ॥१६॥

▼

**⑤**

>

वार्क्षो दण्ड इत्यवर्णसंयोगेनैक उपदिशन्ति।

# ११ १७ स्मृतञ् च②

"स्मृतं च म" इत्य् एतद्वाचयित्वा

स्मृ॒तञ् च॒ मे, ऽस्मृ॑तञ्च मे॒ - तन् म॑ उ॒भयं॑ व्र॒तं,
नि॒न्दा च॒ मे ऽनि॑न्दा च मे॒ - तन् म॑ उ॒भयं॑ व्र॒तँ,
श्र॒द्धा च॒ मे ऽश्र॑द्धा च मे॒ - तन् म॑ उ॒भयं॑ व्र॒तं,
वि॒द्या च॒ मे ऽवि॑द्या च मे॒ - तन् म॑ उ॒भयं॑ व्र॒तँ,
श्रु॒तञ् च॒ मे ऽश्रु॑तञ्च मे॒ - तन् म॑ उ॒भयं॑ व्र॒तँ,
स॒त्यञ् च॒ मे ऽनृ॑तञ्च मे॒ - तन् म॑ उ॒भयं॑ व्र॒तं,
तप॑श् च॒ मे ऽत॑पश्च मे॒ - तन् म॑ उ॒भयं॑ व्र॒तं,
व्र॒तञ् च॒ मे ऽव्र॑तञ्च मे॒ - तन् म॑ उ॒भयं॑ व्र॒तं,

यद् ब्रा॑ह्म॒णाना॒ं ब्रह्म॑णि *(=वेदविषये)* व्र॒तम्,
यद् अ॒ग्नेस् *(→यातृत्वं)* सेन्द्र॑स्य॒ *(→प्राधान्यम्)* सप्र॑जापतिकस्य॒ *(→स्रष्टृत्वं)* सदे॑वस्य॒ *(→दातृत्वादि)* सदे॑वराजस्य॒ सम॑नुष्यस्य॒ *(→प्रियवचनादि)*
सम॑नुष्यराजस्य॒ *(→प्रजारक्षणम्)* सपि॑तृकस्य॒ *(→पुत्रोत्पत्ति)* सपि॑तृराजस्य॒ *(यमस्य → सर्वसमत्वं)* सग॑न्धर्वाप्सर॒स्कस्य॑ *(→परिचरणकौशलम्, उदात्तद्वयम्?? )*,
यन् म॑ आ॒त्मन॑ आ॒त्मनि॑ व्र॒तन्,
तेना॒हँ सर्व॑व्रतो भूयासम् ।

## वरदानम्⑤

गुरवे वरं *(अग्न्याधाने "गौर्वै वरः"(आप.श्रौ.४११४))* दत्त्वा

## उत्थापनमन्त्रः⑥

+उदायुषेत्य् उत्थाप्य

*(कुमारो वदति -)*

उद् आयु॑षा स्वा॒युषा,
+उद् ओष॑धीना॒ँ रसे॑न॒+,
+उत् प॒र्जन्य॑स्य॒ शुष्मे॑ण *(=बलेन)*+
+उद् अ॑स्थाम्,
अ॒मृता॒ँ *(=देवान्)* अनु॑ ।

## आदित्योपस्थानम्⑤

उत्तरैर् *("तच्चक्षुर्देव हितम्")* आदित्यम् उपतिष्ठते १७

*(सूर्यस्)* तच् चक्षु॑र् दे॒व *(नि)* हि॑तं पु॒रस्ता॑च् छु॒क्र *(द्ध)* म् उ॒च्चर॑त् -
पश्ये॑म श॒रद॑श् श॒तं
जीवे॑म श॒रद॑श् श॒तं
नन्दा॑म श॒रद॑श् श॒तं

मोदा॑म श॒रद॑श् श॒तं
भवा॑म श॒रद॑श् श॒तँ
शृ॒णवा॑म श॒रद॑श् श॒तं
प्रब्र॑वाम श॒रद॑श् श॒तम्
अजी॑ताः स्याम श॒रद॑श् श॒तं
ज्योक्*(=दीर्घकालं)* च॒ सूर्यं॑न् दृ॒शे ।

▼

**⑤**

>

▼ Oldenberg

18. After (the teacher) has made him repeat (the formula), 'My memory' (M. II, 5, 2), and he has bestowed an optional gift on his teacher, and (the teacher) has made him arise with (the formula, M. II, 5, 3), 'Up, with life!' (the student) worships the sun with the next (Mantras; II, 5, 4).

▼ हरदत्तः

अथ दण्डमादाय तत्रैवासीनः कुमारः **स्मृतञ्च म इत्येतत्** व्रतसंकीर्तनमाह । ततो **गुरवे वरं** ददाति । तत **उदायुषेति** मन्त्रेणोत्तिष्ठेत् **उत्तरैर्मन्त्रैरादित्यमुपतिष्ठते** "तच्छक्षुर्" इत्यादिभिः "सूर्यं दृशे" इत्यवमन्तैः । व्रतसंकीर्तनादि पदार्थचतुष्टयस्य कुमार एव कर्ता । हेत्वभिधानं तूभयत्राविवक्षितं-वाचयित्वोत्थाप्येति च । विवक्षिते तु तस्मिन् वरदाने उपस्थाने चाऽऽचार्य एव कर्ता स्यात् । तस्मादर्थप्राप्तस्य हेतुव्यापारस्यानुवादः ॥१७॥

▼ सुदर्शनः

अथाचार्यः"स्मतं च मे" इत्येतन्मन्त्रजातं कुमारं वाचयति । तत्राष्टौ मन्त्रास्समानोदर्काश्शेषो नवमः । तेषां प्रत्यगाशिष्ट्वादेव वाचने प्राप्ते वाचयित्वेति पुनर्वचनं वाचनवरदानयोः नैरन्तर्यार्थम् । अथ **गुरवे** आचार्याय कुमारो वरं गां "गुरो! वरं ते ददामि" इति ददाति । अग्न्याधाने "गौर्वै वरः" (आप.श्रौ.५-११-४) इत्युक्तत्वात् । आचार्यस्तु सप्तदशकृत्वोऽपान्य होतॄणां दशमानुवाकस्य "देवस्य त्वा" इत्यादित आरभ्य "देवि दक्षिणे" इत्येवमन्तमुक्त्वा "रुद्राय गां तेनामृतत्वमश्याम्" इत्यादि सन्धाय "उत्तानस्त्वाङ्गीरसः प्रतिगृह्णातु" (तै.आ.३-१०.) इत्येवमन्तेन श्रौतवत् प्रतिगृह्णाति; "उपनयनं विद्यार्थस्य श्रुतितस्संस्कारः" (आप.ध.१-१-९.) इति धर्मशास्त्रवचनात् । ततः कुमारं "उदायुषा" इत्युत्थाप्य इदं च वाचयति । अथ कुमारः"तच्चक्षुर्देव हितम्" इत्यादिभिराचार्यवाचितैर्दशभिर्मन्त्रैरादित्यमुपतिष्ठते । अत्र वाचयित्वेत्यादेः क्त्वाप्रत्ययस्य, क्रियाविधानमात्रे तात्पर्यं, न तु समानकर्तृकत्वेऽपि । ज्ञापितं चैतत् "योक्त्रं विमुच्य तां ततः प्र वा वाहयेत्" (आप.गृ.५-१३.) इत्यत्र । अथवा व्यवधानेन सम्बन्धः; आचार्यस्स्मृतादि वाचयित्वा "उदायुषा" इत्युत्थाप्य "यं कामयेत" इत्यादि कुर्यात् । कुमारस्तु गुरवे वरं दत्वोत्तरैरादित्यमुपतिष्ठते । केचित्– स्मृतसङ्कीर्तनादि पदार्थचतुष्टयमपि कुमारकर्तृकम् । वाचयित्वोत्थाप्येति तु णिजर्थो हेतुरविवक्षितः, अन्यथा त्वसमानकर्तृकत्वात् वरदानमुपस्थानं चाचार्यकर्तृकं स्यात् तथा गुरुग्रहणं चौलादौ ब्रह्मणे वरदानार्थमिति ॥१७॥

▼

**⑤**

>

स्मृतं च म इत्येतद्वाचयित्वा गुरवे वरं दत्त्वोदायुषेत्युत्थाप्योत्तरैरादित्यमुपतिष्ठते।

# ११ १८ यङ् कामयेत②

यं कामयेत *(मत्)* नायमाच्छिद्येतेति, तम् उत्तरया *("यस्मिन् भूतमि"त्येतया)* दक्षिणे हस्ते गृह्णीयात् १८

यस्मि॑न् भू॒तञ् च॒ भव्यं॑ञ् च॒
सर्वे॑ लो॒कास् स॒माहि॑ताः ।
तेन॑ गृह्णामि त्वाम् अ॒हं,

मह्यं गृह्णामि त्वाम् अ॒हं
प्र॒जापतिना त्वा॒ मह्यं गृह्णाम्य् असौ*(→नामनिर्देशः)* ॥

▼

⑤

>
▼ Oldenberg

19. If (the teacher) wishes, 'May this (student) not be estranged from me,' let him take (the student) by the right hand with the next (verse; II, 5, 6).

▼ हरदत्तः

**यं** कुमारं उपनेता **कामयेत** गुरुः, किमिति? अयं मत्तो **न छिद्येत** न वियुज्येत मदधीन एव स्यादासमावर्तनादिति तमेतस्मिन् काले दक्षिणे हस्ते गृह्णीयात् **उत्तरया** ऋचा "यस्मिन् भूतम्" इत्येतया । नामनिर्देशः सम्बुध्या । काम्योऽयं विधिः न नित्यः । एतदेव ज्ञापकमासमावर्तनात् नोपनेतुरेव समीपे वर्तितव्यमिति ॥१८॥

▼ सुदर्शनः

**यं** कुमारं **अयम्** आसमावर्तनान्मत्तो **न** च्छिद्येत न वियुज्येतेति **कामयेत, तमुत्तरया** "यस्मिन् भूतम्" इत्यनयर्चा सम्बुद्ध्या च नाम गृहीत्वा **दक्षिणे हस्ते गृह्णीयात्** यद्यमाचार्यश्चतुर्वेदी सर्वशास्त्रवित् अध्यापयितुं व्याख्यातुं च शक्नोति ॥१८॥

▼

⑤

>

यं कामयेत नायमाच्छिद्येतेति तमुत्तरया दक्षिणे हस्ते गृह्णीयात्।

# ११ १९ त्र्यहमेतमग्निन् धारयन्ति②

*(पित्रादयः)* त्र्यहम् एतम् अग्निं धारयन्ति १९

▼

⑤

>
▼ Oldenberg

20. They keep that fire (used at the Upanayana) three days,

▼ हरदत्तः

एतमुपनयनाग्निं **त्र्यहं धारयन्ति** - अविनाशिनं कुर्वन्ति पित्रादयः ॥१९॥

▼ सुदर्शनः

स्पष्टमेतत् ॥१९॥

▼

⑤

>

त्र्यहमेतमग्निं धारयन्ति।

## ११ २० क्षारलवणवर्जनञ् च②

*(त्र्यहम्)* क्षार-लवण-वर्जनं च २०

▼

⑤

>

▼ Oldenberg

21. And (during that time) salted and pungent food should be avoided.

▼ हरदत्तः

क्षार-लवणयोर् वर्जनं भवति भोजने त्र्यहम् । अस्य ब्रह्मचारिणः सामयाचारिकः प्रतिषेधः सार्वकालिकः ।

अयं तु त्र्यहसम्बन्धः । तयोर् विकल्पः । मध्वादि-प्रतिषेधस् तु सामयाचारिको नित्यम् एव भवति ॥२०॥

▼ सुदर्शनः

त्र्यहं क्षारलवणयोर् वर्जनं च भवति । अत्र च त्र्यहम् इति नियमाद् धर्मशास्त्रे "यथा क्षार-लवण-मधु-मांसानि" (आप.१-४-६.) " इत्यनेन क्षार-लवणयोर् द्वयोर् निषेधः । त्र्यहाद् ऊर्ध्वं पाक्षिकः । मध्वादेस् तु नित्य एव ॥२०॥

▼

⑤

>

क्षारलवणवर्जनं च।

# ११ २१ 'परित्वे' ति②

परि त्वेति परिमृज्य

प॑रि त्वाऽग्ने प॑रिमृजाम्य् आ॑युषा च ध॑नेन च ।
सुप्रजाः॑ प्रज॑या भूयासँ,
सुवी॑रो वीरै॑स्, सुव॑र्चा व॑र्चसा, सुपो॑षः पो॑षैस्, सुगृ॑हो गृहै॑स्, सुप॑तिः प॑त्या*(→आचार्येण)*, सुमेधा॑ मेध॑या, सुब्र॑ह्मा *(स)*ब्रह्मचारि॑भिः ।

### समिदाधानम्⑤

तस्मिन्न् उत्तरैर् मन्त्रैस् *("अग्नये समिध"मित्यादिभिः द्वादशभिः प्रतिमन्त्रं)* समिध आदध्यात् २१

अग्न॑ये समि॑धम् आ॑हार्षं
बृहते॑ जात॑-वेदसे ।

य″था त्व″म् अग्ने समि″धा समिद्ध्य″स,
एवं″ मा″म् आ″युषा व″र्चसा सन्या″ *(=लाभेन)* मेध″या प्रज″या पशु″भिर् ब्रह्मवर्चसे″नान्ना″द्येन*(=अन्नादनेन)*
स″मेधय स्वा″हा ।

*(हे समित्, अग्नेर्)* ए″धो*(←इन्धी दीप्तौ)* ऽस्य्,
एधिषीम″हि स्वा″हा ।

समि″द् असि,
समेधिषीम″हि *(अग्निं)* स्वा″हा ।

ते″जोसि,
ते″जो म″यि धेहि स्वा″हा ।*(५)*

**अ″पो***(=कर्म)* अद्य″ +**अ″न्वचारिषँ**
*(श्रद्धा)***र″सेन स″मसृक्ष्महि***(=संसृष्टो भवेयम्। समगन्महीति शाकले)* ।
प″यस्वाँ*(→हविष्मान्)* अग्न आ″गमन्
तं″ मा सँ″सृज व″र्चसा स्वा″हा ।

सं″ माऽग्ने व″र्चसा सृज
प्रज″या च ध″नेन च स्वा″हा ।

विद्यु″न्*(र्)* मे अस्य देवा″
इ″न्द्रो विद्या″त् सह″र्षिभिः स्वा″हा ।*(५)*

अग्न″ये बृहते″ ना″काय स्वा″हा ।
*(दिविनाको नामाग्निः इति ब्राह्मणम् ।)*

द्या″वापृथिवी″भ्याँ स्वा″हा ।

एषा″ ते अग्ने समि″त्,
त″या व″र्द्धस्व चा″प्यायस्व च,
त″याऽहं″ व″र्धमानो भूयासम्, आप्या″यमानश्च स्वा″हा ।

यो″ माऽग्ने भागि″नँ सन्त″म्
अ″थाभाग″ञ् चि″कीर्षति ।
अभाग″म्*("नञ्सुभ्याम्")* अग्ने तं″ कुरु
मा″म् अग्ने भागि″नं कुरु स्वा″हा ।*(५)*

समि″धम् आधा″याग्ने
स″र्वव्रतो भूयासँ स्वा″हा ।

▼

### ⑤

>
▼ Oldenberg

22. Having wiped (with his hand wet) around (the fire) with (the formula), 'Around thee' (M. II, 6, 1), he should put (twelve) pieces of wood on that (fire) with the next Mantras (II, 6, 2-13).

▼ हरदत्तः

तमुपनयनाग्निं "परि त्वे"त्यनेन मन्त्रेण **परिमृज्य** सर्वतो मार्जनमुदकेन कृत्वा **उत्तरैर्मन्त्रैः** "अग्नये समिधम्" इत्यादिभिः द्वादशभिः प्रतिमन्त्रं समिधो नित्यमादध्यात् ब्रह्मचारी । "सायं प्रातर्" (आप.ध.१४-१६) इति विशेषः सामयाचारिकः प्रत्येतव्यः । "सायमेवाग्निपूजेत्येके" (आप.ध.१-४-१७.) इति च । अयं तूपदेशोऽस्मिन् काले प्रारम्भार्थः । तेन प्रातरुपक्रमं समिदाधानं सायमपवर्गम् (१)पक्षान्तरे सायमेवोपक्रमः,

नान्यस्मिन् काले । तत्र यथाकामी प्रक्रमे । अधिकारादेव सिद्धे तस्मिन्निति वचनं त्र्यहादूर्ध्वमपि तस्मिनुपनयनाग्नावेव समिदाधानं यथा स्यादिति । तेन नित्यधारणमप्यस्य विकल्पेन साधितं भवति । व्याहृतिभिरप्यन्ते चतस्रस्समिध आदधाति । तत्प्रायश्चित्तत्वेन द्रष्टव्यम्, (२)कल्पान्तरदर्शनाच्च । "यत्ते अग्ने तेजः" इत्यादिभिरुपस्थानं समाचाराद्भसितधारणम् ॥२१॥

▼ सुदर्शनः

"परित्वाग्ने" इत्यग्निं **परिमृज्य** परिसमूह्य, तस्मिन् उपनयनाग्नौ यावद्धारणम् **उत्तरैर्मन्त्रैर्** द्वादशभिः "अग्नये समिधमाहार्षं" इत्यादिभिः प्रतिमन्त्रमेकैकां समिधमादध्यात् । (३)पुनश्चान्ते तूष्णीं परिसमूहनम् । (४)अनन्तरमुभयस्तूष्णीं समन्तं परिषेचनं, स्मृत्यन्तराद् आचाराच्च । एतच्च समिदाधानं पूर्वं काष्ठैरग्निमिद्ध्वा कार्यम्; धर्मशास्त्रे "अग्निमिद्ध्वा परिसमूह्य समिध आदध्यात्" (आप.ध.१-४-१६.) इति वचनात् । परिसमूहनस्य "परित्वेति परिमृज्य" इति विधिः । तथा धर्मशास्त्रे तु "समिद्धमग्निं पाणिना परिसमूहेन्न समूहन्या" (आप.ध.१-४-१८) इति गुणार्थोऽनुवादः ॥२१॥

▼

⑤

>

'परित्वे' ति परिमृज्य तस्मिन्नुत्तरैर्मन्त्रैस्समिध आदध्यात् ॥

# ११ २२ एवमन्यस्मिन्नपि②

एवम् अन्यस्मिन् अपि *(अग्नौ, तस्मिन् एव वा धार्यमाणे -)* सदा ऽरण्याद् *(न ग्राम्यात् फलवतः)* एधान् आहृत्य *(समिदाधानं कुर्यात्)*२२ *(नात्र पलाशनियमः!)*

▼

⑤

>

▼ Oldenberg

23. In the same way also on another (fire, when the Upanayana fire is kept no longer),
24. Fetching fuel regularly from the forest.

▼ हरदत्तः

यथा ऽस्योपनयनाग्नेः नित्य-धारण-पक्षे समिधादानं नित्यत्वेन चोदितं,
**एवं** त्र्यहं धारणपक्षे त्र्यहाद् ऊर्ध्वं **अन्यस्मिन्नप्य्** अग्नाव् इदं कर्म कर्तव्यमित्यर्थः ॥२३॥

अरण्य-ग्रहणात् ग्राम्याणां फलवतां वृक्षाणां प्रतिषेधः । **आहृत्येति** वचनात् अन्यैर् आहृतानां प्रतिषेधः ।

**एधाः** काष्ठानि । एध-ग्रहणम् अग्नेर् आहरण-शङ्का-निवृत्त्य्-अर्थम् । सामयाचारिकेषु विधिः - गुर्वर्थं ब्रह्मचारिणस् समिद्-आहरणं विधत्ते । इदं त्व् आत्मार्थम् ॥२२॥

▼ सुदर्शनः

**एवम्** उक्तेन विधिना सदा उपनयन-प्रभृत्यासमावर्तनात् अहर् अहस् सायं प्रातः, सायमेव वा समिदाधानं कर्तव्यम् ।
एतच् च **त्र्यहाद् ऊर्ध्वम् अन्यस्मिन् अपि** लौकिकेऽग्नौ भवति । न तूपनयनाग्निर् नष्ट इति नित्यस्य समिदाधानस्य लोपः ।

समिधश् **चारण्याद्** एवाहृत्याधेयाः ।

यच् च धर्मशास्त्रे "सायं प्रातर् यथोपदेशम्" इति "सायम् एवाग्नि-पूजेत्येके" (आप.ध.१-४-१६,१७.) इति स विकल्पविध्यर्थो ऽनुवादः ।*(5)*

केचित्–नित्यस्य समस् समिदाधानस्य अत्रोपदेशोऽस्मिन् काले प्रारम्भार्थः । ततश् चेदं प्रातर् उपक्रमं सायम् अपवर्गम् ।

सायम् एवेति पक्षे तु सायम् एवोपक्रमो नान्यत्र । तत्र यथा-कामी प्रक्रमेत । तथा तस्मिन्न् "अन्यस्मिन् अपी"त्यारम्भात् उपनयनाग्नेस् त्र्यहाद् ऊर्ध्वम् अपि विकल्पेन धारणं, तत्रैव समिदाधानं चेति ॥२२॥*(5)*

▼

⑤

>

एवमन्यस्मिन्नपि सदारण्यादेधानाहृत्य।

# ११ २३ उत्तरया सँशास्ति②

उत्तरया *("ब्रह्मचार्यसी"त्येतया)* सँशास्ति २३ *(बाढमिति प्रतिवचनम् ।)*

ब्रह्मचार्य् अ॒सि।
(वटुः - बाढ॑म्।)

अ॑पोऽशान *(नानिवेदितम् अन्नम्)*।
(वटुः - बाढ॑म्।)

क॑र्म कुरु।
(वटुः - बाढ॑म्।)

मा॑ सु॑षुप्थाः।
*(अथ यः पूर्वोत्थायी जघन्यसंवेशी तमाहुर्न स्वपितीति एवंविधो वा स्वापाभावः ।)*
(वटुः - बाढ॑म्।)

भिक्षाचर्यू॒ञ् चर। (वटुः - बाढ॑म्।)

आचार्याधीनो॑ भव ।
(वटुः - बाढ॑म्।)

▼

⑤

>
▼ Oldenberg

25. With the next (formula - M. II, 6, 14 - the teacher) instructs (the student in his duties).

▼ हरदत्तः

अथं तं **उत्तरयर्चा** "ब्रह्मचार्यसी"त्येतया **संशास्ति** गुरुः संशिक्षयतीत्यर्थः यथापाठामृचा संशासनं अर्थं च कथयति । **ब्रह्मचार्यसि** ब्रह्मचर्याश्रमं प्राप्तोऽसि । तस्मात् कामचारवादभक्षो मा भूः । "बाढम्" इति प्रतिवचनम् । **अपोऽशान,** मयाननुज्ञातः अप एवाशान, नान्यत् । पूर्ववत् प्रतिवचनं सर्वत्र। **कर्म कुरु** गुरुशुश्रूषणादि । **मा सुषुप्थाः** दिवा स्वापप्रतिषेधः । "दिवा मा स्वाप्सीर् (आश्व.गृ.१-२२-२,) इत्येवाश्वलायनः । अपर आह– अथ यः पूर्वोत्थायी जघन्यसंवेशी तमाहुर्न स्वपितीति । एवं विधोऽत्र स्वापाभाव इति । **भक्षाचर्यं चरेति** नियमेन भैक्षविधिः । **आचार्याधीनो भव** मातापित्रोरपि वशं त्यक्त्वा आचार्यवशे वर्तस्वेत्यर्थः । संशासनानन्तरं भिक्षाचरणम् । अत्र बोधायनः–"अथास्मा अरिक्तं पात्रं प्रयच्छान्नाह मातरमेवाग्रे भिक्षस्वेति" । (भौ.गृ.२-७.) आश्वलायनस्तु"अप्रत्याख्यायिनमग्रे भिक्षेताप्रत्याख्यायिनीं वा" (आश्व.गृ.१-२२-७) इति ॥२३॥

▼ सुदर्शनः

"ब्रह्मचार्यसि" इत्यनया कुमारं **संशास्ति** शिक्षयति । (१)अथ संशासनार्थज्ञापनाय मन्त्रार्थ उत्यते । **ब्रह्मचार्यसि** (२)कामचारवादभक्षो मा भूः । **अपोऽशान** मयानुज्ञातोऽप (३)एव पिब, बुभुक्षां तु धारय । **कर्म कुरु,**अस्मदर्थं कर्म मयानुक्तोऽपि कुरु, मा सुषुप्थाः पूर्वोत्थायी जघन्यसंवेशी भूयाः, "तामाहुर्न स्वपिति" (आप.१-४-२८) इत्युक्तत्वात्, मा दिवा स्वाप्सीरिति वा । **भिक्षाचर्यं चर**, निमन्त्रणादिना भुञ्जानोऽप्यस्मदर्थं भैक्षमाचर । **आचार्याधीनो भव,** मयाननुज्ञातो याजनादिकर्म मा कार्षीरिति । अत्र चासीतिछान्दसो लकारः, सुषुप्था इति रूपं

च । संशासनेषु च सर्वेषु कुमारो **'बाढम्'** "एवं करोमि" इति प्रतिवचनं(४) दाप्यः । संशासनान्ते च भिक्षाचरणम् । अथास्मा अरिक्तं पात्रं प्रयच्छन्नाह — मातरमेवाग्रे भिक्षस्वेति (बौ.गृ.२-५-४०.) इति बौधायनगृह्यात् ।
▼

**⑤**

>

उत्तरया सँशास्ति।

# ११ २४ वासश्चतुर्थीमुत्तरयादत्तेऽन्यत्परिधाप्य②

*(त्र्यहं मन्त्रवत्-परिहितमेव)* वासश् चतुर्थीम्*(चतुर्थहोरात्रे अहन्येव)* उत्तरया *("यस्य ते प्रथमवास्य"मित्येतया)* ऽऽदत्ते *(=स्वीकरोति)*

य॑स्य ते प्रथमवास्यँ*(=प्रथमाच्छादितं)* **ह॑रामस्**
तं॑ त्वा वि॑श्वे **अवन्तु** देवाः॑ ।
त॑न् त्वा भ्रा॑तरस् **सुवृ॑धो** व॑र्धमानम्
अ॑नु **जायन्तां** बह॑वस् सु॑जातम् ॥

ऽन्यत् परिधाप्य २४

▼

**⑤**

>
▼ Oldenberg

26. 8 On the fourth day (after the Upanayana the teacher) takes the garment (of the student) for himself with the next (verse; M. II, 6, 15), having made him put on another (garment).

▼ हरदत्तः

अथ त्रिरात्रे(५) निवृत्ते **चतुर्थी** रात्रिं सप्तम्यर्थे द्वितीया । चतुर्थ्यामित्यर्थः । तत्र किम्? **यद्वासः** कुमारस्य धार्यं सद्यःकृत्तोतं परिधापितं तदाचार्य आदत्ते **उत्तरया** ऋर्चा "यस्य ते प्रथमवास्य"मित्येतया । **अन्यद्वासः** परिधाय । त्र्यहे तु तस्मिन्नियमेन सद्यःकृत्तोतमेव । चतुर्थीमित्यत्र न रात्रिर्विवक्षिता । किं तर्हि? अहोरात्रसमुदायः । तत्राहन्यवादानं वाससः "उदगयनपूर्वपक्षाहः" इति नियमात् । मेखलामजिनं दण्डमुपवीतं कमण्डलुम् । अप्सु प्रास्य विनष्टानि (१)धार्याण्यन्यानि मन्त्रवत् ॥२४॥

▼ सुदर्शनः

**चतुर्थीम्** इति सप्तम्यर्थे द्वितीया । चतुर्थ्यां रात्रौ चतुर्थाहोरात्रे अहन्येव "उदगयनपूर्वपक्षाहः" (आप.गृ.१-२.) इति नियमात् । **वासः** उपनयनकाले यत्परिधापितं तदाचार्यः सप्तशकृत्वोऽपान्य "यस्य ते प्रथमवास्यम्" इत्यनयैव स्वीकरोति, न तु सावित्रेण; अत्र विशेषविधेर्बलीयस्त्वात् । उपदेशमतं तु "देवा वै वरुणमयाजयन्, (तै.ब्रा.२-२-५.) इति लिङ्गादयज्ञेषु न प्रतिग्रहविधिरिति । एतच्चान्यद्वासः कुमारं **परिधाप्यैव** कर्तव्यम् । स तु "गुरो वासस्ते ददामि, इति दद्यात् । एतच्च त्र्यहं मन्त्रवत्परिहितमेव वासः परिधेयम् । आपस्तम्बमत्या एतदन्तमुपनयनम् ॥२४॥

अथ पालाशकर्मभाष्यं लिख्यते— केचित्– स्मृत्यन्तरोपसंहारेण पलाशवृक्षसमीपे पालाशं कर्म कुर्वते समानम् । अन्येषां च श्रद्धधानानां हितार्थं (२)पालाशकर्मणो विधिरुच्यते-त्रीण्यहानि प्रत्यहमामभैक्षमाचरेत् । चतुर्थेऽहन्यन्नसंस्कारेण संस्कृत्याचार्येण सह प्राचीमूदीचीं वा दिशमुपनिष्क्रम्य पूर्वेणोत्तरेण वा पलाशवृक्षं त्रीण्युदगपवर्गाणि स्थण्डिलानि कल्पयित्वा तेषु यथाक्रमं प्रत्यङ्मुखः
प्रणवश्रद्धामेधाभ्योऽर्घ्यपाद्याचमनस्नानवस्त्रगन्धमाल्यधूपदीपबलींश्च दत्वाऽथोपतिष्ठते । "यश्छन्ददसाम्" इत्यनेन "श्रुतं मे गोपाय" (तै.उ.१-४.) इत्यन्तेन प्रणवम् । "श्रद्धयाग्निः समिध्यते" (तै.ब्रा.२-८-८.) इति सूक्तेन श्रद्धाम् । (३)"मेधा देवी" (तै.उ.४-४१.) इत्यनुवाकेन मेधाम् । ततः पलाशमूले दण्डं विसृज्य अन्यदण्डमादाय सहाचार्यो गृहमागच्छतीति ॥ चतुर्थे पटलेपीत्थं यथाभाष्यं यथामति । कृतं सुदर्शनार्येण गृह्यतात्पर्यदर्शनम् ॥ सुबद्धं दुर्लभं भाष्यं भाष्यार्थश्च सुदुर्ग्रहः । अतोऽनुकम्प्या विद्वद्भिः मन्दबुद्धिश्रुता वयम् ॥ इति श्रीसुदर्शनाचार्यकृतौ गृह्यसूत्रतात्पर्यदर्शने एकादशः खण्डः ॥ समाप्तश्चतुर्थः पटलः ॥

▼

⑤

>

वासश्चतुर्थीमुत्तरयादत्तेऽन्यत्परिधाप्य ।

---

1. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩
2. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩
3. 12 seq. Description of the regular form of a Pākayajña.↩
4. Comp. Śrauta-sūtra I, 11, 6 seqq.↩
5. This is the Praṇītā water.↩
6. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩
7. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩
8. 12 seq. Description of the regular form of a Pākayajña.↩

# ०८ उपाकर्मोत्सर्जनप्रकरणम्①

# ११उ ०१②

अथात उपाकरणोत्सर्जने व्याख्यास्यामः १

▼

⑤

>
▼ हरदत्तः

अथात उपाकरणोत्सर्जने व्याख्यास्यामः ॥१॥ अथ शब्दः आदौ मङ्गलार्थः प्रकरणान्तरत्वात् । अतश्शब्दो हेतौ । यस्मादेतयोर्व्याख्यानमन्तरेण प्रयोगो न शक्यते कर्तुं अत एते व्याख्यास्यामः इति ॥१॥

▼

⑤

>

अथात उपाकरणोत्सर्जने व्याख्यास्यामः।

# ११उ ०२②

*(आर्तव)*श्रवणा*(पूर्व)*पक्ष
ओषधीषु जातासु
हस्तेन पौर्णमास्यां वा ऽध्यायोपाकर्म २

▼ विश्वास-टिप्पनी

वर्षऋताव् एव प्ररोहन्ति धन्याः।

▼

⑤

>
▼ हरदत्तः

**श्रवणापक्षे**श्रवणस्य मासस्य पूर्वपक्ष इत्यर्थः । **ओषधीषु जातासु** प्रवर्षणाद् रूढासु **हस्तेन नक्षत्रेण पौर्णमास्यां** वा श्रावणस्य कर्तव्यमित्यर्थः । अध्यायस्योपाकरणं **अध्यायोपाकर्मप्रारम्भ** इत्यर्थः । ओषधीषु जातास्विति वचनादाजातास्वोषधीषु प्रोष्ठपद्यां भवति । तथा च कल्पान्तरं-श्रावण्यां पौर्णमास्यां प्रोष्ठपद्यामाषाढ्यां वेति ॥२॥

▼

⑤

>

श्रवणापक्ष ओषधीषु जातासु हस्तेन पौर्णमास्यां वाध्यायोपाकर्म ॥२॥

## ११उ ०३②

*(शिष्टाचारानुसारेण मध्याह्नात् परं)*
अग्नेर् उपसमाधानाद्य्-आज्यभागान्ते
ऽन्वारब्धेषु *(शिष्येषु)* काण्ड-ऋषिभ्यो जुहोति,
सदसस्पतये, सावित्र्या,
ऋग्वेदाय यजुर्वेदाय सामवेदायाथर्वणवेदायेति हुत्वा
उपहोमो *(= सांहितीभ्यो, याज्ञिकीभ्यो, वारुणीभ्यो, ब्रह्मणे स्वयंभुवे इति सुदर्शनसूरिः। हरदत्तस्तु जयादय इति।)*,
वेदाहुतीनाम् उपरिष्टात् सदसस्पतिम् इत्येके ३

######## ०८ सदसस्पतिमद्भुतम् प्रियमिन्द्रस्य

स॒दसस्प॑तिम् अ॒द्भुतं
प्रिय॒म् इ॒न्द्रस्य का॒म्यम् ।
सनिं॒ *(=दानरूपम्)* मेधा॒म् अयासिषम् ६

▼ विश्वास-टिप्पनी

होम-स्थाने तर्पणम् बहुधा क्रियते।
होमाङ्गत्वेनाध्ययनम् इच्छन्ति केचित्।

▼

⑤

>
▼ हरदत्तः

एवमुपाकरणस्य काल उक्तः ।

अथ प्रयोगः– अग्नेरुपसमाधानादि तन्त्रं प्रतिपद्यते । अग्निश्च श्रोत्रियागाराद्वाहार्यः, मन्थ्यो वा, न त्वौपासनो बहूनामत्र सहत्वाभावात् । भार्यायाश्च सहत्वाभावात् वचनमत्र प्रयोग? । विद्यासंस्कारार्थमिदं कर्म वेदसंयुक्तम् । तत्राज्यभागान्ते ऽन्वारब्धेषु शिष्येषु प्रधानाहुतीर्जुहोति । काण्डऋषिभ्यः प्रजापतिस्सोमोऽग्निर्विश्वदेवा ब्रह्मा स्वयंभूः इति पञ्च काण्डऋषयः । तत्र प्रजापतये स्वाहेति होमः । प्रजापतये काण्डऋषये स्वाहेत्यन्ये । "सदसस्पतिमद्भुतम्" इत्यनेन सदसस्पतये जुहोति । "तत्सवितुर्" इत्येतया सावित्र्यै, कल्पान्तरे तथा दर्शनात् । ऋग्वेदाय यजुर्वेदाय सामवेदायाथर्वणवेदायेति चतस्रो वेदाहुतयः । तत उपहोमाः । जयादि प्रतिपद्यते इत्यर्थः । एक आचार्या वेदाहुतीनामुपरिष्टात् सदसस्पतिं होतव्यं मन्यन्ते ॥३॥

▼

⑤

>

अग्नेरुपसमाधानाद्याज्यभागान्तेऽन्वारब्धेषु काण्डऋषिभ्यो जुहोति सदसस्पतये सावित्र्या ऋग्वेदाय यजुर्वेदाय सामवेदायाथर्वणवेदायेति हुत्वा उपहोमो वेदाहुतीनामुपरिष्टात्सदसस्पतिमित्येके ॥३॥

## ११उ ०४②

परिषेचनान्तं कृत्वा

त्रीन् अनुवाकान् आदितो ऽधीयीरन् ४

▼

⑤

>
▼ हरदत्तः

तन्त्रशेषं समाप्य वेदस्य **आदितः त्रीननुवाकानधीयीरन्**(१) "इषे त्वोर्जेत्वा" (२)"आप उन्दन्तु" (३)"उद्धन्यमानं" (४)"अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति धेनुर्दक्षिणा" । एते प्राजापत्यसौम्याग्नेयवैश्वदेवानामादितश्चत्वारोऽनुवाकाः । (५)"सह वै देवानां चासुराणां च" इति स्वयंभुवः । एतेषां वा पञ्चानां अनुवाकानां अध्ययनम् ॥४॥

▼

⑤

>

परिषेचनान्तं कृत्वा त्रीननुवकानादितोऽधीयीरन् ॥४॥

# ११उ ०५②

प्रथमोत्तमाव् अनुवाकौ वा ५

▼

⑤

>
▼ हरदत्तः

यदि वा वेदस्य प्रथमोत्तमौ अनुवाकावधीयीरन् "इषे त्वा" (६)"भृगुर्वैवारुणिर्" इति ॥५॥

▼

⑤

>

प्रथमोत्तमावनुवाकौ वा ॥५॥

# ११उ ०६②

त्र्यहम् एकाहं वा क्षम्याधीयीरन् ६

▼

⑤

>
▼ हरदत्तः

यस्मिन्न् अहन्न्य् उपाकरणं कृतं
तत आरभ्य **त्र्यहमेकाहं वा क्षम्य** विरम्याधीयीरन् ।
उपाकृते त्र्यहम् एकाहं वानध्याय इत्यर्थः ।
तत्र काण्डोपकरणे एकाहः
पारायणोपाकरणे त्र्यहः ।
अधीयीरन्न् इति वचनं
उपाकृत्य त्र्यहाद् ऊर्ध्वं नियमेनाध्ययनं यथा स्याद् इति ॥६॥
▼

⑤

>

त्र्यहमेकाहं वा क्षम्याधीयीरन् ॥६॥

# ११उ ०७②

यथोपाकरणमध्यायः *(नाम त्रीनध्यायान् अधीयीरन्, प्रथमोत्तमौ वा)* ७

▼

⑤

>
▼ हरदत्तः

येन प्रकारेणोपाकरणं कृतं तथाऽध्ययनं कर्तव्यम् । यदि सर्वेभ्यः काण्डऋषिभ्यो हुत्वा वेदादौ त्रयाणामनुवाकानामारम्भः कृतः प्रथमोत्तमयोर्वा तथा सति यथाध्यायमध्ययनं कर्तव्यम् । यदि तु काण्डादीनां सर्वेषामारम्भः तथा सति यथाकाण्डमध्येतव्यम् । यस्तु कृत्स्नं वेदमरण्येऽनुवाक्यानि परिहाप्य प्रागुत्सर्जनादध्येतुं न शक्नोति तस्य पृथक्काण्डोपाकरणम् । तत्र तस्यैव काण्डस्यैक ऋषिः सदसस्पतिः सावित्री वेदाहुतय उपहोमाः परिष्चनान्ते तस्यैव काण्डस्यानुवाकं एकाहमनध्यायः तस्यैव काण्डस्याध्ययनम् ॥

▼

⑤

>

यथोपाकरणमध्यायः ॥७॥

# ११उ ०८②

तैषी*(=पौष)*-पक्षस्य रोहिण्यां पौर्णमास्यां वोत्सर्गः ८

▼

⑤

>
▼ हरदत्तः

एवम् उपाकृत्य, अनध्याय-वर्जं
वेदं काण्डं वा ऽरण्ये ऽनुवाक्यानि परिहाप्य
अधीयानस्य **रोहिण्याम् उत्सर्गः** कर्तव्यः,
**पौर्णमास्यां वा** तैषी-पक्षस्यैव ।

तत्रास्मिन् कर्मणि होमोऽपि भवति ।
कथं भवति ? उपाकरणवत् समान-विधानाद्
उपाकरणवद् गृहे हुत्वैव
क्षम्यमाणं कर्म प्रतिपद्यते ।
हिरण्य-केशिनां तु तर्पणाद् ऊर्ध्वं उदकान्ते होमः ॥८॥
▼

**⑤**

>

तैषीपक्षस्य रोहिण्यां पौर्णमास्यां वोत्सर्गः ॥८॥

# ११उ ०९②

प्राचीमुदीचीं वा सगणो दिशम् **उपनिष्क्रम्य**
यत्रापः पुरस्तात् सुखाः सुखावगाहा अवकिन्यः *(=तीरतृणवत्यः)* शङ्खिन्यः, तासाम् **अन्तं गत्वा ऽभिषेकान् कृत्वा**
सुरभिमत्या ऽब्लिङ्गाभिर् वारुणीभिर् *(="अवते हेड, उदुत्तमम्, इमं मे वरुण, तत्वा यामी"त्य् एताभिः)* हिरण्यवर्णाभिः *(="हिरण्यवर्णाश् शुचयः पावका" इति चतसृभिः)* पावमनीभिर् *(="पवमानः सुवर्जन" इत्येतेनानुवाकेन)* इति **मार्जयित्वा**
ऽन्तर्-जल-गतो ऽघ-मर्षणेन *(=तृचेन "ऋतं च सत्यं च" इत्य् अघमर्षण-दृष्टेन)* त्रीन् **प्राणायामान् धारयित्वा**
**उत्तीर्याचम्योपोत्थाय**
**दर्भान्** अन्योन्यस्मै **सम्प्रदाय**
शुचौ देशे प्राक्-कूलैर् दर्भैर् **आसनानि कल्पयन्ति** ९

## मन्त्राः⑤

######### ०६ दधिक्राव्णो अकारिषं

*(pegasus-प्रोष्ठपदासु)* दधि-क्रा"व्णो **अकारिषं**
जिष्णो"र् अ"श्वस्य वाजि"नः ।
**सुरभि"** नो मु"खा **करत्**
प्र" ण **आ"यूँषि तारिषत्** ।

######### आपो हि ष्ठा

आ"पो हि" ष्ठा" मयो-भु"वस्
ता" न ऊर्जे" *(जाः)* दधातन ।
महे" र"णाय *(=रमणीयाय)* च"क्षसे *(=दर्शनाय)* ॥

यो" वः शिव"तमो र"सस्
त"स्य भाजयतेह" नः ।
उशती"र् *(=कामयमाना)* इव मात"रः ॥

*(रसाय)* त"स्मा अ"रं *(=शीघ्रम्)* **गमाम** वो
यस्य *(प्रभावेण)* **क्ष"याय** *(=निवासाय)* **जि"न्वथ** *(=प्रीणयथ)* ।
आ"पो *(प्रजा)* **जन"यथा** च नः ॥

*(चादिषु च इति न स्वर-निघातः। )*

######### वारुण्यः

अ᳚व ते **हे᳚ळो***(←हेड् अवज्ञायां)* वरुण न᳚मोभिर्
**अ᳚व** यज्ञे᳚भिर् **ईमहे***(→नयामः)* हवि᳚र्भिः ।
**क्ष᳚यन्न्***(=निवसन्)* अस्म᳚भ्यम् असुर प्रचेता
रा᳚जन्न् **ए᳚नांसि शिश्रथः***(=शिथिलीकुरु)* कृता᳚नि ॥

उ᳚द् उत्तमं᳚ वरुण पा᳚शम् अस्म᳚द्
अ᳚वाधमं᳚ वि᳚ मध्यमं᳚ श्रथाय
अ᳚था वय᳚म् आदितिय व्रते᳚ त᳚व
अ᳚नागसो अ᳚दितये सियाम

इमं᳚ मे वरुण श्रुधी *(=श्रुणु)*
ह᳚वम्*(=आह्वानम्)* अद्या᳚ च मृळय *(=सुखय)*।
त्वा᳚म् अवस्यु᳚र् आ᳚ चके *(=अवदन्)*॥

त᳚त् त्वा **यामि** ब्र᳚ह्मणा **व᳚न्दमानस्**
त᳚द् **आ᳚ शास्ते** य᳚जमानो हवि᳚र्भिः ।
अ᳚हेळमानो *(=अक्रुध्यन्)* वरुणेह᳚ **बोध्य्** उ᳚रुशंस
मा᳚ न आ᳚युः **प्र᳚ मोषीः** ॥

######### हिरण्यवर्णाश् शुचयः

हिर॑ण्यवर्णा॒श् शुच॑यᳶ पाव॒का,
यासु॑ **जा॒तᳵ** क॒श्यपो॒, यास्व् इन्द्र॑ः ।
अ॒ग्निय्ँ या गर्भ॑न् **दधि॒रे**, विरू॑पा॒स् -
ता न॒ आप॒श् शँ स्यो॒ना **भ॑वन्तु** ।

यासा॒ँ राजा॒ वरु॑णो॒ **याति॒** मध्ये॑,
सत्यानृ॒ते **अ॑व॒पश्य॒ञ्** जना॑नाम् ।
म॒धु॒श्-**चु॒त॒श्** शुच॑यो॒ याᳶ पा॑व॒कास् -
ता न॒ आप॒श् शँ स्यो॒ना **भ॑वन्तु** ।

यासा॑न् दे॒वा दि॒वि **कृ॒ण्वन्ति॑** भ॒क्षय्ँ -
या अ॒न्तरि॑क्षे ब॒हु॒धा **भव॑न्ति** ।
याᳶ पृ॑थि॒वीम् **पय॑सो॒न्दन्ति॑** शु॒क्रास् -
ता न॒ आप॒श् शँ स्यो॒ना **भ॑वन्तु** ।

शि॒वेन॑ मा॒ चक्षु॑षा **पश्यतापश्** -
शि॒वया॑ त॒नुवोप॑ **स्पृशत॒** त्वच॑म् मे ।
सर्वा॑ँ अ॒ग्नीँर् अ॑प्सु॒-षदो॑ **हुवे** वो॒,
मयि॒ वर्चो॒ बल॒म् ओजो॒ **नि ध॑त्त** ।

---

पव॑मान॒स् सुव॒र्-जनः॑ ।
प॒वित्रे॑ण॒ *(नाना-विषयेषु)* विच॑र्षणिः ।
यᳶ पोता॒ स **पु॑नातु** मा ।

**पु॒नन्तु॑** मा **देवज॒नाः** ।
पु॒न॒न्तु॒ **मन॑वो** धि॒या ।
पु॒न॒न्तु॒ **विश्व॑ आ॒यवः॑***(=मनुष्याः)* ।

जात॑वेदᳶ प॒वित्र॑वत् ।
प॒वित्रे॑ण **पुनाहि***(=पुनीहि)* मा ।
शु॒क्रेण॑ देव॒ **दीद्य॑त्** ।
**अग्ने॒** क्रत्वा॒*(=प्रज्ञया)* क्रतू॒ँर् अनु॑ ॥46॥

यत् ते॑ **प॒वित्र॑म् अ॒र्चिषि॑** ।
अग्ने॒ वित॑तम् अन्त॒रा ।
ब्रह्म॒ तेन॑ **पुनीमहे** ।

उ॒भाभ्या॑न् देव **सवितः** ।
प॒वित्रे॑ण स॒वेन॑ च ।
इ॒दम् ब्रह्म॑ **पुनीमहे** ।*(5)*

वै॒श्व॒दे॒वी **पु॑न॒ती** दे॒व्य् **आगा॑त्***(=आगच्छतु)* ।
यस्यै॑ ब॒ह्वीस् त॒नुवो॑ वी॒त-पृ॑ष्ठाः*(=कान्त-स्तुतयः)* ।
तया॒ **मद॑न्तस्** सध॒-माद्ये॑षु *(=सह माद्यन्ति येषु सवनेषु)* ।
व॒यँ **स्याम॒** पत॑यो रयी॒णाम् ॥47॥

**वै॒श्वा॒न॒रो** र॒श्मिभि॑र् मा **पुनातु** ।
**वात॑ꣳ** प्रा॒णेने॑षि॒रो*(←इष गतौ)* म॑यो॒भूः ।
**द्यावा॑पृथि॒वी** पय॑सा॒ पयो॑भिः *(इति क्रमशः)* ।
ऋ॒ताव॑री*(=ऋतवत्यौ)* य॒ज्ञिये॑ मा **पुनीताम्** ।

बृ॒हद्भि॑स् सवि॒तस् तृभिः॑*(=त्रिभिः [लोकगणनया]/ तृप्यतेः करणे क्विप्)* ।
वर्षि॑ष्ठैर्*(=प्रवृद्ध-धर्मैः)* देव॒ मन्म॑भिः॑*(=मननीयैः)* ।
अग्ने॒ दक्षै॑ꣳ **पुनाहि** मा ।

येन॑ दे॒वा **अपु॑नत** ।
येनापो॑ दि॒व्यङ् **कशः॑***(←कशेर् गतिकर्मणो ऽसुन्)* ।
तेन॑ दि॒व्येन॒ ब्रह्म॑णा ॥48॥
इ॒दम् ब्रह्म॑ **पुनीमहे** ।

यꣳ पा॑वमा॒नीर् **अ॒ध्येति॑** ।
**ऋषि॑भि॒स् सम्भृ॑त॒ँ** रस॑म् ।
सर्व॒ँ स पू॒तम् **अश्ञाति** ।
**स्व॒दि॒तम्***(=स्वादुकृतं)* मा॑त॒रिश्व॑ना*(=वायुना)* ।

पा॒व॒मा॒नीर् यो **अ॒ध्येति॑** ।
ऋषि॑भि॒स् **सम्भृ॑त॒ँ** रस॑म् ।
तस्मै॒ सर॑स्वती **दुहे** ।
क्षी॒रँ स॒र्पिर् मधू॑द॒कम् ।

पा॒व॒मा॒नीस् **स्व॒स्त्य्-अय॑नीः** ॥49॥
सु-दुघा॒ हि पय॑स्वतीः ।
ऋषि॑भि॒स् **सम्भृ॑तो॒** रसः॑ ।
ब्रा॒ह्म॒णेष्व् अ॒मृत॑ँ **हि॒तम्** ।

पा॒व॒मा॒नीर् **दि॑शन्तु** नः ।
इ॒मल्ँ लो॒कम् अथो॑ अ॒मुम् ।
काम॒न्त् **सम॑र्धयन्तु** नः ।
दे॒वीर् दे॒वैस् **स॒माभृ॑ताः** ।

पा॒व॒मा॒नीस् **स्व॒स्त्य्-अय॑नीः** ।
सु-दुघा॒ हि घृ॑त॒श्-**चुतः॑***(=क्षारयित्र्यः)* ।
ऋषि॑भि॒स् **सम्भृ॑तो॒** रसः॑ ॥50॥
ब्रा॒ह्म॒णेष्व् अ॒मृत॑ँ **हि॒तम्** ।

येन॑ दे॒वाꣳ प॒वित्रे॑ण ।
आ॒त्मान॑म् **पु॒नते॒** सदा॑ ।
तेन॑ स॒हस्र॑-धारेण ।
पा॒व॒मा॒न्यꣳ **पु॑नन्तु** मा ।

प्रा॒जा॒प॒त्यम् प॒वित्र॑म् ।
श॒तोद्या॑मँ हिर॒ण्मय॑म् ।
तेन॑ ब्रह्म॒-विदो॑ व॒यम् ।
**पू॒तम्** *(यथा तथा स्वीयम्)* ब्रह्म॑ **पुनीमहे** ।

**इन्द्र॑स्** सुनी॒ती*(त्या)* स॒ह मा॑ पुनातु ।
**सोम॑स्** स्व॒स्त्या **वरु॑णस्** स॒मीच्या॑*(=सम्यगञ्चनया)* ।
**य॒मो** राजा॑ प्रमृ॒णाभि॑॰ *(=प्रमारिकाभिः)* पुनातु मा ।
**जा॒तवे॑दा** मा+ऊ॒र्जय॑न्त्या पुनातु ॥51॥

---

▼ विस्तारः (द्रष्टुं नोद्यम्)

जले निमज्जने विनियोग आपस्तम्बगृह्यसूत्र उक्तः।

ऋ॒तं॑ च स॒त्यं॑ चाभी॒द्धात्
त॒पसो॑ ऽध्यजायत ।
त॒तो रा॒त्रिर् *(रात्र्य् इति शाकले)* अजायत
त॒तः समु॒द्रो॑ अर्ण॒वः॑ *(←अर्णः = जलम्)* ॥

समु॒द्रा॒द् अर्ण॒वा॒द॒ *(←अर्णः = जलम्)* अ॒धि
संवत्स॒रो॑ अजायत ।
अहो-रा॒त्रा॒णि वि॒द॒धद्
वि॒श्वस्य *(नेत्राभ्यां)* मि॒षतो॑ *(प्राणिजातस्य)* व॒शी॑ *(प्रजापतिर् demiurge)*॥

सू॒र्या-च॒न्द्र॒म॒सौ धा॒ता॑
य॒था-पू॒र्व॒म् अकल्पयत् ।
दि॒वं च पृथि॒वीं॑ चान्त॒रिक्ष॒म् अ॒थो स्वः॑ *(=लोक-विशेषम्)* ॥

▼

⑤

>
▼ हरदत्तः

**सगण** सशिष्यः **यत्रापः पुरस्तादिति** यत्र देशे पूर्वस्यां दिशि अपः पश्यतीत्यर्थः । **सुखाः** सुखस्पर्शाः । **सुखावगाहाः** सुतीर्थाः यास्व् अवका भवन्ति ताः **अवकिन्यः**, तथा **शंखिन्यः, तासाम् अन्तं** समीपं **गत्वा**
**अभिषेकान्** कुंभैः कृत्वा

ततः **सुरभिमत्या** = दधिक्राव्ण्ण **इत्येतया**
ऽब्लिङ्गाभिः "आपोहि ष्ठा मयो भुव" इति तिसृभिः
**वारुणीभिः** "अवते हेड, उदुत्तमम्, इमं मे वरुण, तत्वा यामी"त्य् एताभिः **हिरण्यवर्णीयाभिः** "हिरण्यवर्णाश्शुचयः पावका" इति चतसृभिः
**पावमानीभिः** "पवमानः सुवर्जन" इत्येतेनानुवाकेन
**मार्जयित्वा** अभ्युक्ष्य, प्रतिमन्त्रं क्रियाभ्यावृत्तिः - प्रतिपादम् इत्य् अन्ये ।

ततो **ऽन्तर्जल-गतः** जलस्यान्तर् निमग्नो
**ऽघमर्षणेन** तृचेन "ऋतं च सत्यं च" इत्य् अघमर्षण-दृष्टेन
**त्रीन् प्राणायामान्** धारयति ।

सर्वत्र सगण इत्येव ।

अप्सु निमज्यैतम् अनुवाकं सकृज् जपति - स एकः प्राणायामः ।
एवं त्रिर् धारयित्वोत्तीर्य
गृह्यान्तर-दर्शनात् प्रक्षालितोपदातान्य् आक्लिष्टानि वासांसि परिधाय +

**आचम्योत्थाय**
द्वौ संभूय **दर्भानन्योन्यस्मै संप्रदाय**

ततः शुचौ देशे उदकान्त एव स्थण्डिलानि पृथक्कृत्वा
दर्भैः प्रागग्रैः **आसनानि कल्पयन्ति** ॥९॥

केभ्यः? देवेभ्यः पितृभ्यः ऋषिभ्यश्च ।
▼

⑤

>

प्राचीमुदीचीं वा सगणो दिशमुपनिष्क्रम्य यत्रापः पुरस्तात् सुखाः सुखावगाहा अवकिन्यः शङ्खिन्यः तासामन्तं गत्वाभिषेकान् कृत्वा सुरभिमत्याब्लिङ्गाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिरिति मार्जयित्वाऽन्तर्जलगतोऽघमर्षणेन त्रीन् प्राणायामान् धारयित्वोत्तीर्याचम्योपोत्थाय दर्भानन्योन्यस्मै सम्प्रदाय शुचौ देशे प्राक्कूलैर्दर्भैरासनानि कल्पयन्ति ॥९॥

# ११उ १०②

ब्रह्मणे, प्रजा-पतये, बृहस्-पतये,
ऽग्नये, वायवे, सूर्याय,
चन्द्रमसे, नक्षत्रेभ्यः,
ऋतुभ्यस्, संवत्सराय,
इन्द्राय राज्ञे, सोमाय राज्ञे, यमाय राज्ञे, वरुणाय राज्ञे, वैश्रवणाय राज्ञे,
वसुभ्यो, रुद्रेभ्य, आदित्येभ्यो,
विश्वेभ्यो देवेभ्यस्, साध्येभ्यो,
मरुद्भ्य, ऋभुभ्यो,
भृगुभ्यो, ऽङ्गिरोभ्य, *(कल्पयामि)* इति *(२४)* देवगणानाम् *(स्थापन-क्रमेण +उदग्-अपवर्गाण्य् आसनानि दर्भैः प्रागग्रैः कल्पयति।)* १०

▼

⑤

>
▼ हरदत्तः

**देवगण इति** देवानां च तद्गणानां चेत्यर्थः । अत्र ब्रह्मादि दश देवताः । इन्द्रादयः पञ्च राजानः । वस्वादयः दश देवगणाः । सर्वान्ते कल्पयन्तीति वचनात् सर्वत्र कल्पयामीत्यस्य सम्बन्धः । ब्रह्मणे कल्पयामि प्रजापतये कल्पयामीति । एतानि पञ्चविंशतिरासनान्युदगपवर्गाणि । तर्पणं चैषां दैवेन तीर्थेन भवति ॥१०॥

▼

⑤

>

ब्रह्मणे प्रजापतये बृहस्पतयेऽग्नये वायवे सूर्याय चन्द्रमसे नक्षत्रेभ्यः ऋतुभ्यस्संवत्सराय इन्द्राय राज्ञे सोमाय राज्ञे यमाय राज्ञे वैश्रवणाय राज्ञे वसुभ्यो रुद्रेभ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यस्साध्येभ्यो मरुद्भ्य ऋभुभ्यो भृगुभ्योऽङ्गिरोभ्य इति देवगणानाम् ॥१०॥

# ११उ ११②

अथर्षयः -
विश्वामित्रो जमदग्निर् भरद्वाजो गौतमो ऽत्रिर् वसिष्ठः *(अरुन्धत्याः कल्पान्तर-दर्शनात्)* कश्यप इत्य् एते **सप्तर्षयः**।
सप्तर्षिभ्यः *(देवानाम् उत्तरत आसनानि दर्भैः)* कल्पयित्वा, दक्षिणतो *(प्राचीन-प्रवणे)* ऽगस्त्याय **कल्पयन्ति** ११

▼

⑤

>
▼ हरदत्तः

देवानाम् उत्तरतः सप्तर्षीणामासनानि, दक्षिणतोऽगस्त्याय, कश्यपाद् ऊर्ध्वम् अरुन्धत्याः*(5)*, (१)गृह्यान्तरदर्शनात् ॥११॥

▼

⑤

>

अथर्षयः — विश्वामित्रो जमदग्निर्भरद्वाजो गौतमोऽत्रिर्वसिष्ठः कश्यप इत्येते सप्तर्षयः सप्तर्षिभ्यः कल्पयित्वा दक्षिणतोऽगस्त्याय कल्पयन्ति ॥११॥

# ११उ १२②

*(निवीतिन उत्तरत उदीचीनप्रवण उदगग्रैर्दर्भैः प्राग्-अपवर्गाण्य् आसनानि)*
ततो यावद् *(सप्तर्षिभिः)* एक-वैद्य्-अन्तैः कल्पयन्ति १२

▼ विश्वास-टिप्पनी

हिरन्यकेश्यनुसारेण -

- कृष्ण-द्वैपायनाय जीतू-कर्ण्याय तरुक्षाय तृणी-बिन्दवे
- वर्मिणे वरूथिने वाजिने
- वाजश्रवसे सत्यश्रवसे सुश्रवसे सुतश्रवसे
- सोमशुष्मायणाय सत्ववते
- बृहदुक्थाय वामदेवाय वाजिरत्नाय हर्यज्वायनायोदमयाय
- गौतमाय ऋणञ्जयाय ऋतञ्जयाय कृतञ्जयाय धनञ्जयाय
- बभ्रवे त्र्यरुणाय त्रिवर्षाय त्रिधातवे शिबिन्ताय पराशराय
- विष्णवे रुद्राय स्कन्दाय काशीश्वराय श्वराय
- धर्मायार्थाय कामाय क्रोधाय
- वसिष्ठायेन्द्राय त्वष्ट्रे कर्त्रे धर्त्रे धात्रे मृत्यवे
- सवित्रे सावित्र्यै
- वेदेभ्यश्च पृथक्
- पृथग् ऋग्वेदाय यजुर्वेदाय सामवेदायाथर्ववेदायेतिहासपुराणायेति ६

▼

⑤

>
▼ हरदत्तः

**ततः** अनन्तरं, यावन्तः **एकवेद्यन्ताः** समान-वेद्य्-अन्ताः
कैः? सप्तर्षिभिः,
तेभ्यः **कल्पयन्ति** ।

के पुनस्ते? कृष्णद्वैपायनादय ऋषयः । एतदुक्तं भवति – कृष्ण-द्वैपायनाय जातूकर्ण्याय तरुक्षाय तृणबिन्दवे सोम-शुष्मिणे सोम-शुष्काय वर्मिणे सनद्-वाजाय बृहद्-उक्थाय वामदेवाय वाच*(ज?)*रत्नाय हरित-यज्वन उद-मयाय गौतमाय ऋणञ्-जयाय कृतञ्-जयाय बभ्रवे त्र्य्-अरुणाय त्रिधातवे त्रिवर्षाय शिबिन्ताय पराशराय कृतञ्-जयायन्द्राय मृत्यवे कर्त्रे त्वष्ट्रे धात्रे सवित्रे भृत-श्रवसे सावित्र्यै वेदेभ्यश् चेति पृथक् ।

एते कृष्णद्वैपायनादयश् चतुस्त्रिंशद् ऋषयः । वेदाश् चत्वार इत्य् अष्टात्रिंशद् एकवेद्यन्ताः सप्तर्षिभिः ।

केचिद् अथर्वाङ्गिरस इतिहास-पुराणानि सर्प-देवजनान् सर्व-भूतानीत्य् एतेषामपि वेदग्रहणेन ग्रहणमिच्छन्ति; कल्पान्तरे तथा दर्शनात् ॥१२॥
▼

⑤

>

ततो यावदेकवैद्यन्तैः कल्पयन्ति ॥१२॥

# ११उ १३②

प्राचीनावीतानि कृत्वा
*(देवानाम् अगस्त्यस्य च दक्षिणा-प्रवणदेशे दक्षिणाग्रैः प्रत्यग्-अपवर्गम्)* दक्षिणतो
वैशम्पायनाय, पैङ्गये, तित्तिरये, उखाय,
आत्रेयाय पदकाराय, कौण्डिन्याय वृत्तिकाराय,
बौधायनाय प्रवचनकाराय, आपस्तम्बाय सूत्रकाराय, भरद्वाजाय सूत्रकाराय, सत्याषाढाय हिरण्यकेशाय,
आचार्येभ्य ऊर्ध्व-रेतोभ्य, एकपत्नीभ्यो वानप्रस्थेभ्यः
कल्पयामीति *(दर्भैर् आसनानि कल्पयति)* ॥ १३

▼

⑤

>
▼ हरदत्तः

ततः सर्वे **प्राचीनावीतानि कृत्वा** वैशम्पायनादिभ्यो द्वादशभ्य आसानानि कल्पयन्ति **दक्षिणतो** देवानाम् अगस्त्यस्य च । तत्र दक्षिणा-प्रवणदेशे दक्षिणाग्रैः प्रत्यगपवर्गम्(स.गृ.२.१९-७.) इति कल्पान्तरम् ॥१३॥

▼

⑤

>

प्राचीनावीतानि कृत्वा दक्षिणतो वैशम्पायनाय पैङ्गये तित्तिरये उखायात्रेयाय पदकाराय, कौण्डिन्याय वृत्तिकाराय, बौधायनाय प्रवचनकाराय, आपस्तम्बाय सूत्रकाराय, भरद्वाजाय सूत्रकाराय, सत्याषाढाय हिरण्यकेशाय, आचार्येभ्य ऊर्ध्वरेतोभ्य, एकपत्नीभ्यो वानप्रस्थेभ्यः कल्पयामीति ॥ १३॥

# ११उ १४②

अथ यथास्वं *(=जीवपितृकत्वं परिगणय्य)* पितृभ्यः कल्पयन्ति
मातामहेभ्यश् च पृथक् १४

▼

⑤

>
▼ हरदत्तः

**यथास्वं** यस्य ये पितरः पितामहाः प्रपितामहा मातामहाश्च मातुर्ये पितृपितामहप्रपितामहाः सर्वेभ्य उभयेभ्यः कल्पयन्तीत्यर्थः । प्राचीनावीतानि कृत्वा दक्षिणत इति चानुवर्तते । तत्र यथास्वं पित्रादीनां नामभिः कल्पनं–रुद्रशर्मणे विष्णुशर्मण इति । अन्ये पितृभ्य इत्येव कल्पयन्ति । किमर्थं तर्हि यथास्वमिति? जीवपितृकाणामिहापि पिण्डदानवदुपायविशेषप्रतीत्यर्थः ॥१४॥

▼

⑤

>

अथ यथास्वं पितृभ्यः कल्पयन्ति मातामहेभ्यश्च पृथक् ॥१४॥

# ११उ १५②

यज्ञोपवीतानि कृत्वा
तेष्व् एव देशेषु, तथैवानुपूर्व्या, तैर् एव नामभिर्,
देवान् ऋषींश् च **तर्पयन्ति**।
वैशम्पायन-प्रभृतींस् तु मातुः प्रपितामह-पर्यन्तान् **प्राचीनावीतिनस् तर्पयन्ति**।
"अमुं तर्पयाम्य्, अमुं तर्पयाम्य्, अमुं तर्पयामी"ति १५

▼

⑤

>
▼ हरदत्तः

अथ कल्पान्तरे दृष्टो विशेषः–अमुष्मै नमोऽमुष्मै नम इति गन्धपुष्पधूपदीपैः, अमुष्मै स्वाहामुष्मै स्वाहेत्यन्नेन, अमुं तर्पयाम्यमुं तर्पयामीति फलोदकेनेति(भा.गृ.३-११) (स.गृ.२-२०-५,६,७) ॥१५॥

▼

⑤

>

यज्ञोपवीतानि कृत्वा तेष्वेव देशेषु तयैवानुपूर्व्या तैरेव नामाभिर्देवानृषींश्च तर्पयन्ति वैशम्पायनप्रभृतींस्तु मातुः प्रपितामहपर्यन्तान् प्राचीनावीतिनस्तर्पयन्ति – अमुं तर्पयाम्यमुं तर्पयाम्यमुं तर्पयामीति ॥१५॥

# ११उ १६②

▼

⑤

>

अभिप्यन्ते *(=प्रार्थयन्ते [स्नानादिकं सहैव कर्तुं])* वान्योन्यम् १६

▼

⑥

>
▼ हरदत्तः

आप्नोतेरेतद्रूपम् । अभिप्या प्रार्थना । इहोत्सर्जने कर्मणि शिष्याणामुपाध्यायस्य च स्नानादिषु कर्मसु सह प्रवृत्तिश्चोदिता । सर्वत्र वहुवचननिर्देशात् अभिषेकान् कृत्वाऽऽसनानि कल्पयन्तीति । तत्रायं विशेषो वैकल्पिक उपदिश्यते । अन्योन्यमभिप्यन्ते वा द्वौ द्वौ सम्भूयान्योऽन्यं प्रार्थयन्ते वासःप्रवृत्यर्थं न सर्वे सहेति । अधीत्सन्त इति पाठे ऋध्यतेरेतद्रूपम् । उपसर्गवशाच्च स एवार्थः । ये त्वधिशब्दात् परं तकारमेवाधीयते न ररेफमपि तेषां धातुर्मग्यार्थ एव ॥१६॥

▼

⑥

>

अभिप्यन्ते वान्योन्यम् ॥१६॥

# ११उ १७②

▼

⑤

>

यज्ञोपवीतानि कृत्वा त्रीनादितोऽनुवाकानधीयीरन् १७

▼

⑥

>
▼ हरदत्तः

अध्ययनप्रकार उपाकरणे व्याख्यातः ॥१७॥

▼

⑥

>

यज्ञोपर्वातानि कृत्वा त्रीनादितोऽनुवाकानधीयीरन् ॥१७॥

# ११उ १८②

▼

⑤

>

काण्डादीन्प्रथमोत्तमौ वा १८

▼

⑥

>
▼ हरदत्तः

अयमपि विकल्प उपाकरणे व्याख्यातः ॥१८॥

▼

⑥

>

काण्डादीन् प्रथमोत्तमौ वा ॥१८॥

# ११उ १९②

▼

⑤

>

"काण्डात् काण्डात् प्ररोहन्ती"ति द्वाभ्यामुपोदके दूर्वा रोपयन्ति ॥१९॥

काण्डा॑त्-काण्डात् **प्र॒रोह॑न्ती॒**
परु॑षᳶपरुष॒ᳶ *(=पर्वणः पर्वणः)* परि॑ ।
ए॒वा नो॑ दूर्वे॒ **प्र त॑नु**
स॒हस्रे॑ण श॒तेन॑ च ।
▼

⑥

>
▼ हरदत्तः

अथ समूलं दूर्वास्तम्बमाहृत्य तमुदकस्य समीपे **रोपयति** । यथा दूर्वा प्रोहति तथा निखनन्ति "काण्डात् काण्डात् प्ररोहन्ती"ति द्वाभ्यामृग्भ्याम् । तत्र दूर्वां इत्येकवचनश्रवणात् एक एव मुख्यो निखनति तमितरेऽन्वारभेरन् । अन्ये प्रतिपूरुषमिच्छन्ति ॥ १९ ॥

▼

⑥

>

"काण्डात् काण्डात् प्ररोहन्ती"ति द्वाभ्यामुपोदके दूर्वा रोपयन्ति ॥१९॥

# ११उ २०②

▼

⑤

>

अपः प्रगाह्योदधिं कुर्वन्ति *(=क्षोभयन्ति)* २०

▼

⑥

>
▼ हरदत्तः

**अथापः** प्रविश्य **तत्रोदधिं कुर्वन्ति ।** उदधिः समुद्रः तमिव क्षोभयन्तीत्यर्थः ॥२०॥ कथं तदित्याह–

▼

⑥

>

अपः प्रगाह्योदधिं कुर्वन्ति ॥२०॥

# ११उ २१②

▼

⑤

>

सर्वतः परिवार्योर्मिमन्तः कुर्वन्ति २१

▼

⑥

>

▼ हरदत्तः

बहुभिः **परिवार्य सर्वतस्** सन्निरुध्य यथोर्मयस्तत्रोत्पद्यन्ते तथा कुर्वन्तीत्यर्थः । एवं त्रिः कुर्वन्ति ॥२१॥

▼

⑥

>

सर्वतः परिवार्योर्मिमन्तः कुर्वन्ति ॥२१॥

# ११उ २२②

▼

⑤

>

उद्गाह्य +आतमितोर् *(=श्रमं यावत्)* आजिं *(प्राचीमुदीचीं वा)* धावन्ति २२

▼

⑥

>

▼ हरदत्तः

**उद्वाह्य** उत्तीर्य **आतमितोः** आश्रमजननात् **आजिं** धावन्ति । प्राचीमुदीचीं वा दिशमभिधावन्ति । तथापवर्गः ॥२२॥

▼

⑥

>

उद्वाह्याऽतमितोराजिं धावन्ति ॥२२॥

# ११उ २३②

▼

⑤

>

**प्रत्येत्य**
+अभिदानानि *(=??)* सक्तुभिर् ओदनेनेति
ब्राह्मणान् **भोजयित्वा वाचयति** २३

▼

⑥

>
▼ हरदत्तः

**प्रत्येत्य** गृहान् प्रविश्येत्यर्थः । आशिषः पुण्याहाद्याः पुण्याहं स्वस्त्यृध्यतामिति वाचयित्वेति ॥२३॥

▼

⑥

>

प्रत्येत्याभिदानादि सक्तुभिरोदनेनेति ब्राह्मणान् भोजयित्वा वाचयति ॥२३॥

# ११उ २४②

▼

⑤

>

एवं पारायण*(=यथारुच्यध्ययनमिति केचित्)*समाप्तौ च -
काण्डादि*(-अध्ययन)*-दूर्वारोपणोदधि-धावनवर्जम् २४

▼

⑥

>

▼ हरदत्तः

यथास्मिन् वार्षिके ऽप्य् अध्याये समाप्ते
उत्सर्गश् चोदितः
एवम् एव **पारायण-समाप्ताव्** अपि कर्तव्यम् । तत्र वर्ज्याणि–
काण्डादीनामध्ययनं, दूर्वारोपणमुधिकरणमाजिधावनं चेति ॥२४॥

काण्डादि-ग्रहणात् पारायणाध्ययने यथाकाण्डम् एवाध्ययनम्,
न तु सम्भिन्नस्य पाठस्येति केचित् । अन्ये तु काण्डादि-ग्रहणस्योपलक्षणत्वात्
सर्व-प्रकारस्यानुवाकाध्ययनस्य प्रतिषेधः । पारायणे च यथारुच्यध्ययनामित्याहुः ॥२५॥

▼

⑥

>

एवं पारायणसमाप्तौ च काण्डादि दूर्वारोपणोदधिधावनवर्जम् ॥२४॥

# ११उ २५②

*(पारायण-समाप्तौ)* प्रत्येत्य ब्राह्मण-भोजनादि कर्म प्रतिपद्यते २५

▼

⑤

>

▼ हरदत्तः

MISSING??

▼

⑤

>

प्रत्येत्य ब्राह्मणभोजनादि कर्म प्रतिपद्यते ॥२५॥

# ११उ २६②

एवम् एवाद्भिर् *(एवासनादिवर्जम्)* अहरहर् देवान् ऋषीन् पितॄंश् च **तर्पयेत्** ॥२६॥

▼

⑤

>

▼ हरदत्तः

अद्भिर् इति वचनात्
अहरहस् तर्पणम् अद्भिर् एव । तेनोत्सर्गकर्मणि पूर्वोक्तानां गन्धादीनामपि प्रवृत्तिः ।

अहरहस् तर्पणं ब्रह्मयज्ञानन्तरम्,
कल्पान्तरे दर्शनात् ॥२६॥

इति गृह्यसूत्रावृत्तावनाकुलायां उपाकर्मोत्सर्जनपटलः ॥

▼

⑤

>

एवम् एवाद्भिर् अहर्-अहर् देवान् ऋषीन् पितॄंश्च तर्पयेत् ॥२६॥

# ०९ समावर्तनम्①

# १२ ०१ वेदमधीत्य स्नास्यन्②

वेदमधीत्य स्नास्यन् प्राग् उदयाद् व्रजं प्रविश्यान्तर्लोम्ना चर्मणा द्वारम् अपिधायास्ते १

▼

### ⑤

>

▼ Oldenberg

1. Having studied the Veda, when going to take the bath (which signifies the end of his studentship), he enters a cow-shed before sunrise, hangs over its door a skin with the hair inside, and sits there.

▼ हरदत्त-प्रस्तावः

पूर्वत्रोपनयनं व्याख्यातम् । उपनीतस्य च धर्मशास्त्रे "अथ ब्रह्मचर्यविधिः" (आप.ध.१-२-१८.) इत्यारभ्य धर्मा उपदिष्टाः । अध्यायकाण्डव्रतानामुपाकरणसमापनयोर्विधिश्च "उपाकरणे समापने च ऋषिर्यः प्रज्ञायते" (आप.गृ. ८-१०.) इत्यत्र सम्पूर्णमेव व्याख्यातः । अथेदानीं, वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ॥ (याज्ञ.स्मृ.१-५१.) इत्यादिवचनार्थानुष्ठानेन कृतकृत्यस्य गुरुकुलात् समावृत्तस्यानुष्ठेयं समावर्तनापरपर्यायं स्नानाख्यं कर्म व्याख्यायते । केचित् "उपाकरणे समापने च" (आप.गृ.८-१) इत्यत्रैतयोः कल्पस्याप्रसिद्धत्वात्, अवश्यमन्यत्र प्रसिद्ध आश्रयितव्य इति वदन्तः "अथात उपाकरणोत्सर्जने व्याख्यास्यामः, इत्यादिकं व्रतपटलं नाम उपनयनानन्तरं व्याचक्षते । नैतत्; "उपाकरणे समापने च" (आप.गृ.८-१.) इत्यत्रैवानयोर्विध्योर्भाष्यकारेण सम्पूर्णमेव व्याख्यातत्वात्, व्रतपटलाध्ययनस्य च विप्रतिपन्नत्वात्, भाष्ये प्रसङ्गभावाच्च ॥

▼ हरदत्तः

एवमुपनीतश्चरितब्रह्मचर्योऽधीतवेदषडङ्गो यद्याचार्यकुलादन्यमाश्रमं प्रेप्सुर्भवति तस्य स्नानं नाम कर्मोपदिश्यते। यस्मिन् कर्मणि नियमेन विशिष्टं स्नानं विधिवत् भवति तदेतत् स्नानमित्युच्यते । स्नानं समावर्तनं तत् करिष्यन्नित्यर्थः । **प्रागुदयाद्** इत्यादित्योदयो गृह्यते । **नैनमेतदहरादित्य** इति दर्शनात् । **व्रजं गोष्ठम् । **अन्तः** अभ्यन्तरं **लोमानि** यस्य तेन **चर्मणा** यस्य कस्यचित् मृगस्य । आसनवचनं निष्क्रमणप्रतिषेधार्थम् । **वेदम्** इत्यविवक्षितमेकवचनम् । वेदं वेदौ वेदान् वा **अधीत्य** पाठतश्चार्थतश्चाधिगम्येत्यर्थः । स्नास्यन्निति वचनं नैष्ठिकस्य उत्तरं कर्म मा भूदिति ॥१॥

▼ सुदर्शनः

वेदं मन्त्रब्राह्मणलक्षणम् । एकवचनं जात्यभिप्रायम्; "वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्" ॥ (म.स्मृ.३-२) इति मनुवचनात् । **अधीत्य** पाठतश्चार्थतश्चाधिगम्य, सषडङ्गं समीमांसं वेदमधीत्येत्यर्थः । अधीत्येति च विधिः । "वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा । इत्यस्य प्रदर्शनार्थः । **स्नास्यन्** स्नानाख्यं कर्म करिष्यमाणः **प्रागुदयात्** प्रागादित्योदयात् । **व्रजं** गोशालां परिश्रितां **प्रविश्ये**त्यादि व्यक्तार्थम् ॥१॥

▼

### ⑤

>

वेदमधीत्य स्नास्यन् प्रगुदयाद्व्रजं प्रविश्यान्तर्लोम्ना चर्मणा द्वारमपरिधायास्ते ॥

# १२ ०२ नैनमेतदहरादित्योऽभितपेत्②

नैनमेतदहरादित्यो ऽभितपेत् २

▼

⑤

>
▼ Oldenberg

2. On that day the sun should not shine upon him.

▼ हरदत्तः

**एनं** एतत्कर्म कुर्वाणम् । **एतदहः**एतस्मिन्नहनि कदाचिदपि **नाभितपेदादित्यः** । तेन मूत्रपुरीषादिकमपि तत्रैव व्रजे छायायामपि कर्तव्यम् । आदित्यग्रहणादग्नितापस्य न प्रतिषेधः ॥२॥

▼ सुदर्शनः

अस्मिन्नहनि यावदस्तमयं मूत्रपुरीषोत्सर्जनार्थमप्यसौ मण्डपाद्बहिर्न निर्गच्छेतित्यर्थः ॥२॥
▼

⑤

>

नैनमेतदहरादित्योऽभितपेत्।

# १२ ०३ मध्यन्दिनेऽग्नेरुपसमाधानाद्याज्यभागान्ते②

मध्यन्दिने ऽग्नेरुपसमाधानाद्याज्यभागान्ते *(शम्याः परिधिः, सकृत्पात्राणि मानुषाणि, स्नातक एव कर्ता)*
पालाशीं समिधमुत्तरया *("इमं स्तोम"मित्येतया)* ऽऽधाय
अपरेणाग्निं कट एरकायां *(कटप्रकृतिभूते तृणे)* वोपविश्य
उत्तरया *("त्र्यायुष"मित्येतया)* क्षुरमभिमन्त्र्योत्तरेण यजुषा *("शिवो नामासी"त्यनेन)* वप्त्रे प्रदायापां संसर्जनाद्याकेशनिधानात् समानम् ३

▼

⑤

>
▼ Oldenberg

3. 1 At noon, after (the ceremonies) from the putting (of wood) on the fire down to the Ājyabhāga oblations (have been performed), he puts a piece of Palāśa wood on (the fire) with the next (verse; M. II, 7, 1), sits down to the west of the fire on a mat or on erakā grass, recites the next (verse, II, 7, 2) over a razor, and hands it over to the barber with the next Yajus (II, 7, 3). (The rites) beginning with the pouring together of (warm and cold) water down to the burying of the hair are the same as above (comp. M. II, 7, 4).

▼ हरदत्तः

अथ तस्मिन्नहनि मध्यन्दिने कर्म प्रतिपद्यते । अग्नेरुपसमाधानादि । शम्याः । सकृत्पात्राणि क्षुरादिभिस्सह । स्वयमेव कर्ता नाचार्यः । आज्यभागान्तवचनं समिदाधानादेरुत्तरस्य कर्मणः कालोपदेशार्थम् । अनेनैव तन्त्रप्राप्तावपि सिद्धायां अग्नेरुपसमाधानादिवचनं तन्त्रारम्भस्यैव मध्यन्दिननियमः, न कृत्स्नस्य कर्मणः । **उत्तरया** ऋचा "इमं स्तोमम्" इत्येतया । न स्वाहाकारः, जुहोतिचोदनाभावात् । **कटः** प्रसिद्धः **एरका** तत्प्रकृतिभूतं तृणम् । कशिष्वित्यन्ये । **उत्तरया** ऋचा "त्र्यायुषम्" इत्येतया । **क्षुरमभिमन्त्र्य । उत्तरेण यजुषा** "शिवो नामासि" इत्यनेन । **वप्ता** नापितः नाचार्यः । तस्मै क्षुरं प्रदाय ततः"उष्णाः शीतास्वानीये"त्यादि **यदपां संसर्जनादि** कर्म **केशनिधानान्तं** तदुपनयनेन **समानम्**। किं? कारयतीत्यध्याहारः । केन कारयति? आचार्येण । यद्यप्याचार्यकुलादयं निवृत्तः, तथापि स्नान काले विवाहकाले च समवैत्याचार्यः ।

समानवचनसामर्थ्यात् । योऽस्यापचितस्तमितरया (आप.गृ.३-९.) इति च दर्शनात् । स्पष्टं चाश्वलायनके– अथैतान्युपकल्पयति समावर्तमानर्ः (र्त्यमाने) (आश्व.गृ.३-७-१.) इत्यादि । अन्ये त्वाचार्यकुल एव समावर्तनमिच्छन्ति । तत्राचार्यस्संसर्जनोन्दने कृत्वा क्षुरं नापितादपादाय प्रतिदिशं प्रवाप्य पुनस्तस्मै प्रदाय तं च वपन्तमुत्तरयानुमन्त्रयते । एवमन्तमाचार्यकर्म ॥३॥

▼ सुदर्शनः

यथा मध्यन्दिने प्रधानहोमा भवन्ति तथा कर्म कुर्यात् । अत्र तु तन्त्रोपदेशोऽस्याज्यप्रधान हविष्ट्वात् । "आज्यभागान्ते" इति च क्रमार्थम् । आज्यभागान्ते कृते समिदाधानमेव, न पुनरर्थकृत्यमपीति । अत्र च पात्रप्रयोगे दर्व्यादीनि द्वन्द्वम्, क्षुरकटादीनि सकृदेव, शम्याश्च परिध्यर्थे । केचित् दर्व्यादीन्यपि सकृदेवेति । **पालाशीं** पलाशवृक्षावयवभूताम् **उत्तरया** "इमं स्तोमम्" इत्येतया । **कटः** प्रसिद्धस्तृणमयः । **एरका** कटप्रकृतिभूतं पङ्क्तिकटाख्यं तृणम् । केचित् कशिप्विति । **उत्तरया** त्रियायुषम्** इत्येतया **उत्तरेण यजुषा** "शिवो नामासि" इत्यनेन । वप्त्रे वपनकर्त्रे कस्मैचिन् मन्त्रविदे ब्राह्मणाय तत् क्षुरं प्रयच्छति । केचित्– इहाप्याचार्यो वपनं प्रारभते, नापितस्तु वप्ता अस्मै प्रयच्छतीति । तदयुक्तम्- इहाचार्यस्यैवाभावात्, नापितस्यामन्त्रज्ञत्वाच्च । "अथानुवाकस्य प्रथमेन यजुषा" इत्यारभ्य "तस्मिन् केशानुपयम्योत्तरयोदुम्बरमूले दर्भस्तम्बे वा निदधाति" (आप.गृ.१०-८) इत्येवमन्तमुपनयनेन **समानं**, भवतीति शेषः ॥३॥

▼

⑤

>

मध्यन्दिनेऽग्नेरुपसमाधानाद्याज्यभागान्ते पालाशीं समिधमुत्तरयाऽऽधायापरेणाग्निं कट एरकायां वोपविश्योत्तरया क्षुरमभिमन्त्र्योत्तरेण यजुषा वप्त्रे प्रदायापाँ सँसर्जनाद्या केशनिधानात् समानम् ॥

# १२ ०४ जघनार्धे व्रजस्योपविश्य②

जघनार्धे*(=पश्चार्धे)* व्रजस्योपविश्य विस्रस्य मेखलां ब्रह्मचारिणे प्रयच्छति ४

▼

⑤

>

▼ Oldenberg

4. He sits down behind the cow-shed, takes the girdle off, and hands it over to a Brahmacārin.

▼ हरदत्तः

अथोप्तकेशश्मश्रुनखो व्रजस्य **जघनार्धे** पश्चार्धे **उपविश्य** मेखलां **विस्रस्य** विमुच्य, कस्मैचित् **ब्रह्मचारिणे प्रयच्छति** ॥४॥

▼ सुदर्शनः

अथोप्तकेशादिको **व्रजस्य जघनार्धे** पश्चार्धे **उपविश्येत्यादि** करोति ॥४॥

▼

⑤

>

जघनार्धे व्रजस्योपविश्य विस्त्रस्य मेखलां ब्रह्मचारिणे प्रयच्छति ॥

# १२ ०५ तां स②

तां स उत्तरेण *("इदमहममुष्यामुष्ये"त्यादिना)* यजुषोदौम्बरमूले दर्भस्तम्बे वोपगूहति ५

▼

⑤

>

▼ Oldenberg

5. The (Brahmacārin) hides it with the next Yajus (II, 7, 5) at the root of an Udumbara tree or in a tuft of Darbha grass.

▼ हरदत्तः

**प्रच्छादयति । उत्तरेण यजुषा** "इदमहममुष्यामुष्ये"त्यादिना तत्रादश्शब्देषु नामग्रहणम्- इदमहं यज्ञशर्मणो गार्ग्यस्य पाप्मानमपगूहाम्युत्तरो यज्ञशर्मा द्विषद्भ्य इति । अथ यदि वा स्यात् यज्ञशर्मणो गार्ग्यायणेति । दण्डाजिनयोरप्यस्मिन् काले त्यागः ।

▼ सुदर्शनः

स तु ब्रह्मचारी **तां** मेखलां सूत्रोक्तदेशे उपगूहति अप्रकाशां करोति "इदमहं विष्णुशर्मणो गौतमस्य पाप्मानमुपगूहाम्युत्तरो विष्णुशर्मा द्विषद्भ्यः" इत्यनेन यजुषा । अत्र च स्नातुर्नामगोत्रे ग्राह्ये ॥५॥

▼

⑤

>

तां स उत्तरेण यजुषोदौम्बरमूले दर्भस्तम्बे वोपगूहति।

# १२ ०६ एवं②

एवं विहिताभिर्*(पूर्ववत्संसृष्टाभिः शीतोष्णाभिः)* एवाद्भिरुत्तराभिष् षड्भिस् *(आपोहिष्ठीयाभिः हिरण्यवर्णीयाभिश्च)* स्नात्वा उत्तरया*("अन्नाद्याय व्यूहध्वम्"इत्यनया)* उदुम्बरेण दतो*(दन्तान्)* धावते ६

▼

⑤

>

▼ Oldenberg

6. 2 With water of the description stated above he bathes with the six next (verses; II, 7, 6-11), and with the next (II, 7, 12) he cleanses his teeth with a stick of Udumbara wood.

▼ हरदत्तः

**एवंविहिताभिः** पूर्ववत्संसृष्टाभिः शीतोष्णाभिरित्यर्थः । तत्र संसर्जने मन्त्रस्य लोपः वपनलिङ्गविरोधात्। एवकारः पौनर्वाचनिकः। **उत्तराभिष्षड्भिः** ऋग्भिः आपोहिष्ठीयाभिः हिरण्यवर्णीयाभिश्च । तत्र "यासु जात" इत्यासां ग्रहणम् । प्रतिमन्त्रं चाभिषेकः । **दतो धावते** दन्तेभ्यो मलमपनयति । **उत्तरया** ऋचा "अन्नाद्याय व्यूहध्वम्" इत्येतया ॥६॥

▼ सुदर्शनः

**एवंविहिताभिस्** तूष्णीं मिश्रिताभिश्शीतोष्णाभिर् **अद्भिः** । "केशान् वपतु" इति मन्त्रलिङ्गविरोधात् एवकाराच्च न मिश्रणमन्त्रः । **उत्तराभिष्षड्भिः** "आपो हि ष्ठा" इति तिसृभिः, "हिरण्यवर्णाः" इति तिसृभिश्च । स्नाति अभिषिञ्चति । एतच्च षण्णामन्ते सकृदेव । केचित्– प्रत्यृचमिति । तन्न ; गुणार्थं प्रधानाभ्यासकल्पनमयुक्तमित्युक्त्वात् । **अथोदुम्बरेण** काष्ठेन दन्तेभ्यो मलं "अन्नाद्याय व्यूहध्वम्" इत्यनया अपनयति ॥६॥

▼

⑤

>

एवं विहिताभिरेवाद्भिरुत्तराभिष्षड्भिस्स्नात्वोत्तरयोदुम्बरेण दतो धावते।

# १२ ०७ स्नानीयोच्छादितस्स्नातः②

स्नानीयाच्छादितस् स्नातः ७

▼

⑤

>

▼ Oldenberg

7. Having bathed and shampooed his body with such ingredients as are used in bathing, (aromatic powder, &c.),

▼ हरदत्तः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम्)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम्)*

▼

⑤

>

स्नानीयोच्छादितस्स्नातः।

# १२ ०८ उत्तरेन यजुषाऽहतमन्तरम्②

उत्तरेण यजुषाऽहतमन्तरं वासः परिधाय
सार्वसुरभिणा चन्दनेनोत्तरैर् देशताभ्यः प्रदायोत्तरयानुलिप्य
मणिं सौवर्णं सोपधानं सूत्रोतम् उत्तरयोदपात्रे त्रिः प्रदक्षिणं परिप्लाव्य
+उत्तरया ग्रीवास्व् आबध्यैवम् एव बादरं मणिं मन्त्रवर्जं सव्ये पाणाव् आबध्य
+अहतम् उत्तरं वासो रेवतीस्त्वेति समानम् ८

▼

⑤

>

▼ Oldenberg

8. He puts on with the next Yajus (M. II, 7, 13) a fresh under garment, and anoints himself, after having given the salve in charge of the deities with the next (Mantras, II, 7, 14), with the next (verse, II, 7, 15) with sandal salve which is scented with all kinds of perfumes. With the next (verse, II, 7, 16) he moves about a gold pellet with its setting, which is strung on a string, three times from left to right in a water-pot; with the next (verse, II, 7, 17) he ties the (pellet) to his neck; in the same way, without Mantras, he ties a pellet of Bādara wood to his left hand, and repeats the rites stated above with a fresh upper garment, with the (verses), 'May the rich' (comp. above, IV, 10, 10; M. II, 7, 18).

▼ हरदत्तः

ततः **स्नानीयैः** स्नानार्हैः क्लीतकादिभिः **उच्छादितः** उद्वर्तितः अपकृष्टमलः पुनरपि ताभिरेवाद्भिः **स्नातः उत्तरेण यजुषा** "सोमस्य तनूरसि" इत्यनेन **अहतमन्तरं वासः** येन कटिः प्रच्छाद्यते तदन्तरमित्युच्यते । येन बहिर्नीवि प्रच्छादनं उपवीतं वा क्रियते तदुत्तरमिति । तयोरन्तरं वासः **परिधाय** चतुर्थ्यानुलेपनं करोति । केन? **चन्दनेन** । कीदृशेन ? । **सर्वसुरभिणा** सर्वाणि सुरभि द्रव्याणि यत्र भवन्ति तत् सर्वसुरभि । **सर्वसुरभिणा** इति पाठे रूपसिद्धिर्मृग्या । तत्र पूर्वमुत्तरैर्मन्त्रैस्त्रिभिर्देवताभ्यः प्रयच्छति "नमो ग्रहाय" चेत्येवमादिभिः । तत उत्तरया "अप्सरस्सु यो गन्धः" इत्येतया आत्मनोऽनुलेपनम् । "मुखमग्रे ब्राह्मणो ऽनुलिम्पेत् बाहू राजन्य, उदरं वैश्यः, (आश्व.गृ.३-७-१०-१२.) इत्याश्वलायनः । अथ मणिमाबध्नाति **ग्रीवासु** प्रतिमुञ्चति । स च मणिः सौवर्णो भवति । उपदानेन च वैडूर्यादिनोपहितः । **सूत्रोतः** सूत्रेणोतः । सपाश इत्यर्थः । तं **मणिं उत्तरय**र्चा "इयमोषधे"त्येतया **उदपात्रे** त्रिः परिप्लावयति । सकृदेव मन्त्रः । अथ तं उत्तरयर्चा "अपाशोऽस्युर" इत्येतया ग्रीवास्वाबध्नाति । ग्रीवाशब्दोऽयं धमनिवचनः बहुवचान्तः तद्योगात् कण्ठे प्रयुज्यते । अस्यामृचि पृथिवी स्तूयते । तस्मादियमोषधिस् त्रायमाणेति भवितव्यम् । सकारलोपच्छान्दसः । अथ **बादरं** बदुरीबीजेन कल्पितम् **एवमेव** सूत्रोतमुदपात्रे त्रिः प्रदक्षिणं परिप्लाव्य **सव्ये पाणाव्** आबध्नाति । तूष्णीमेव परिप्लावने च बन्धने च मन्त्रप्रतिषेधः । पुनर्मणिग्रहणादुपधानमस्य न भवति । सूत्रोतस्तु भवति । आबध्य मणिं तत **उत्तरं वासः** करोति **अहतम्** एव । तत्र रेवतीस्त्वेत्येवमादि कर्म समानमुपनयनेनैव प्रत्येतव्यम् । रेवतीस्त्वेत्येताभिरिति वा उत्तराभिरित्येव वा सिद्धे समानवचनमुपनयनवत् प्रयोगार्थम् । तेन उत्तराभ्यामभिमन्त्रयेत्यादि परिहितानुमन्त्रणान्तं गुरोः कर्म ॥७॥

▼ सुदर्शनः

स्नानोपकरणैः क्लीतकमधूकचूर्णादिभिः उद्वर्तितदेहः आमल कपिष्टादिभिः स्नानीयैस्स्नातश्च भवति ॥७॥ "सोमस्य तनूरसि" इत्यनेन **यजुषा अहतमन्तरं वासः** अन्तर्वासोऽन्तरीयमित्यर्थः । तत् परिदधाति । अनेन सूत्रेणात ऊर्ध्वं स्नातकस्य नित्यमन्तर्वासो विधीयते । यजुः पुनः कर्मार्थमेव, प्रकरणाम्नानात् । ततस् **सार्वसुरभिणा** सर्वैः कस्तूरिकादिभिर्गन्धद्रव्यैर्वासितेन **चन्दनेन** अनुलिम्पतीति व्यवहितेन सम्बन्धः । कथमनुलिम्पति ? इत्यत्राहौत्तरैरित्यादि । "नमो ग्रहाय च" इत्यादिभिस्त्रिभिर्मन्त्रैः **देवताभ्यश्** चन्दनं पूर्वं **प्रदाय,** पश्चात् "अप्सरस्सु यो गन्धः" इत्यनया आत्मानमनुलिम्पति । मुखस्य चाग्रेऽनुलेपः, "मुखमग्रे ब्राह्मणो लिम्पेत्" (आश्व.गृ.३-७-१०.) इत्याश्वलायनगृह्यात्। देवताभ्यः प्रदानं च नमश्शब्देन, न तु मन्त्रान्तेन; नमस्कारस्यापि प्रदानार्थत्वात् । **मणिं** कीदृशं? **सौवर्णं** सुवर्णविकारम् । **सोपधानं** वज्रवैडूर्यादिना उभयतः परिगृहीतम् । **सूत्रोतं** सूत्रप्रोतम् "इयमोषधे त्रायमाणा" इत्येतया सकृदुच्चरितया **उदपात्रे प्रदक्षिणम्** अविरतं **त्रिः परिप्लाव्य, उत्तरया** "अपाशोऽस्युरो मे" इत्यादिकया "पुण्याय" इत्यन्तया त्र्यवसानया तं मणिं **ग्रीवासु** कण्ठे **आबध्य,** बदरीबीजमयं **बादरं** सूत्रोतमेव **मणिम्** एवमेवो**दपात्रे त्रिः प्रदक्षिणं तूष्णीं परिप्लाव्य, तूष्णीमेव **सव्ये पाणावाबध्नाति । अहतमुत्तरं वासः** परिधानीयमेव, न तु उत्तरीयम् । तदुपनयनेन समानम् । स्वयं परिदधाति, इहाचार्याभावात् । ततश्च "रेवतीस्त्वा" इति द्वाभ्यां परिधानीयं वासोऽभिमन्त्र्य "या अकृन्तन्" इति तिसृभिः परिधाय "परीदं वासः" इत्यनुमन्त्रयते । "रेवतीस्त्वेति समानम्" इति वचनबलाच्च मन्त्रस्थयुष्मदर्थलिङ्गबाध एव । यद्वा अन्यो विद्वान् ब्राह्मणः रेवतीस्त्वेति समानं करोति । कुतः पुनः "अहतमुत्तरं वासः" इत्यनेनापि परिधानमेवोच्यते नोत्तरीयम्? उच्यते–रेवतीस्त्वेति समानमुपनयनेनेति वचनात् उपनयने च "तिसृभिः परिधाप्य परिहतमुत्तरया, (आप.गृ.१०-१०.) इति परिधानार्थवासोऽवगमात् । पूर्वस्य "अहतमन्तरं वासः" इति चोदितत्वाच्च । उत्तरीयं तु "नित्यमुत्तरं कार्यम् (आप.ध.२-४-२२.) इत्यादिधर्मशास्त्रवचनादत्रापि सिद्धमेव । केचित्– इहोत्तरीयं विधीयते नैव परिधानीयम्; उत्तरमिति वचनात् । तथा आचार्य एव "रेवतीस्त्वा इत्याद्युपनयनेन समानं करोतीति । तन्न; परिधाप्य,परिहितम्" इत्यनुपपत्तेरेव । तथा आचार्यकुलान्निवृत्तेनेदं स्नानं क्रियते । तत्राचार्यकर्तृकत्वाप्रसक्तिरेव ॥८॥

▼

⑤

>

उत्तरेन यजुषाऽहतमन्तरं वासः परिधाय सार्वसुरभिणा चन्दनेनोत्तरैर्देशताभ्यः प्रदायोत्तरयानुलिप्य मणिं सौवर्णं सोपधानं सूत्रोतमुत्तरयोदपात्रे त्रिः प्रदक्षिणं परिप्लाव्योत्तरया ग्रीवास्वाबध्यैवमेव बादरं मणिं मन्त्रवर्जं सव्ये पाणावाबध्याहतमुत्तरं वासो रेवतीस्त्वेति समानम्।

# १२ ०९ तस्य दशायाम्②

तस्य दशायां प्रवर्तौ*(=कर्णालङ्कारौ सौवर्णौ)* प्रबध्य
दर्व्याम् आधायाज्येनाभ्यानायन्न् उत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते ९

▼

**⑤**

>

▼ Oldenberg

9. To the skirt (of that garment) he ties two earrings, puts them into the (sacrificial spoon called) Darvi, offers the oblations (indicated by the) next (Mantras; M. II, 8, 1-8), pouring the Ājya over (the ear-rings), and enters upon (the performance of) the Jaya and following oblations.

▼ हरदत्तः

**तस्यो**त्तरस्य वाससो **दशायां प्रवर्तौ** कर्णालङ्कारौ सौवर्णौ **प्रबध्य दर्व्यामाधायाज्येन** उत्तरा अष्टौ प्रधानाहुतीर् जुहोति । **अभ्यानायन्** प्रवर्तयोरुपर्याज्येनानयनं कारयन्नित्यर्थः । अभ्यानयन् इति वा पाठः । अस्मिन् पक्षे सव्येन पाणिनाऽभ्यानयनम् । अभ्यानायमिति ण्मुलन्तस्य युक्तः । अभ्यानीयाभ्यानीयेत्यर्थः । सर्वथा प्रवर्तयोरुपर्यासिक्तेनाज्येन प्रधानहोमः । जयादिवचनं प्रवर्तावपनीय यथासिद्धं प्रतिपद्येतेत्येवमर्थम् ॥९॥

▼ सुदर्शनः

**तस्य अनन्तरप्रकृतस्य वाससो **दशायां प्रवर्तौ **कुण्डले सौवर्णे **प्रबध्य** तावुपायेन दर्व्या अग्रे स्थापयित्वा । **आज्येन** इति परिभाषाप्राप्तानुवादोभ्यानयनाविधानार्थः । अभ्यानायमिति णमुलन्तोऽर्थपाठः । ततश्च स्वयमेव सव्येन हस्तेन स्थापितयोः प्रवर्तयोरुपरि आज्यमानीय तेनैवाज्येन **उत्तराः ** "आयुष्यं वर्चस्यम्" इत्याद्या अष्टौ प्राधानाहुतीर्हुत्वा, ततो दर्व्या अग्रात्तावपनीय यथाप्रसिद्धं **जयादि प्रतिपद्यते** । सूचनात् सूत्रमिति निर्वचनाच्च सूत्रे सर्वत्रानेकार्थविधिनिबन्धनो । वाक्यभेदोऽपि नैव दोष इत्युक्तम् "अग्निमिध्वा" (आप.गृ.१-१२.) इत्यत्र । केचित् – सव्येन हस्तेन अभ्यानायन्नन्येन वाभ्यानायन्निति पाठेन भवितव्यमित्याचक्षते ॥९॥

▼

**⑤**

>

तस्य दशायां प्रवर्तौ प्रबध्य दर्व्यामाधायाज्येनाभ्यानायन्नुत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते।

# १२ १० परिषेचनान्तङ् कृत्वताभिरेव②

परिषेचनान्तं कृत्वा +एताभिर्*(→"आयुष्यं वर्चस्यम्")* एव दक्षिणे कर्ण आबध्नीतैताभिस् सव्ये १०

▼

**⑤**

>

▼ Oldenberg

10. Having performed (the ceremonies) down to the sprinkling (of water) round (the fire), he should tie (one of the ear-rings) with the same (verses) to his right ear, and with the same (verses one) to his left ear.

▼ हरदत्तः

परिषेचनान्तवचनमानन्तर्यार्थम् । तेनास्याहनि भोजनं न भवति । एताभिरेवाहुतिभिः आहुत्यर्थैर्मन्त्रैरित्यर्थः । वचनादेकं कर्म बहुमन्त्रं स्वाहाकारवांश्च मन्त्रः प्रयोज्यः । सव्ये चेत्युच्माने मन्त्राणां विभज्य विनियोगः स्यात् । तस्मात् पुनरेताभिरित्त्युक्तम् ॥१०॥

▼ सुदर्शनः

परिषेचनान्तरमेव **एताभिरेव** "आयुष्यं वर्चस्यम्" इत्यष्टाभिरेव **दक्षिणे कर्णे** प्रवर्तयोरेकं **आबध्नीत** प्रतिमुञ्चेत् । तथान्यम् **एताभिरेव सव्ये** कर्णे । अत्र च होममन्त्राणामेव आबन्धनकरणत्वेन सूत्रवाक्यसादृश्यानुमितया श्रुत्यैव चोदितत्वात्तैराबन्धनमपि गौण्या वृत्त्या प्रकाश्यम् ऐन्द्रीवत् । तथैताभिरिति स्त्रीलिङ्गनिर्देशो बहुत्वादृचां ब्राह्मणग्रामवत् । न चात्र होमार्थानामेव आबन्धतार्थत्वेनापि विनियोगे देवदत्तीयेयं गौर्यज्ञदत्तीयेतिवद्विरोध । "पुरोडाशकपालेन तुषानुपवपति" इत्यादिवदधिष्ठानलक्षणया विनियुक्ताकारमतिरोधायापि विनियोगोपपत्तेः, ऋङ्मन्त्रविषये त्वनेकार्थत्वमपि नायुक्तमित्याग्नेय्यधिकरणे उक्तत्वाच्च । केचित् – एताभिरित्यनेन प्रकृताहुतिपरामर्शादाहुत्यर्था मन्त्रा लक्ष्यन्ते "पितृणां याज्यानुवाक्याभिरुपतिष्ठते" इतिवदिति । मैवम्– यतः पूर्वत्रोत्तराहुतीरिति लक्षणया प्रकृतानां मन्त्राणामपि परामर्शो वरम्; नत्विहापि वाक्ये लक्षणा ॥१०॥

▼

⑤

>

परिषेचनान्तं कृत्वताभिरेव दक्षिणे कर्ण आबध्नीतैताभिस्सव्ये।

# १२ ११ एवमुत्तरैर्यथालिङ्गं②

एवमुत्तरैर् यथालिङ्गं - स्रजश् शिरस्य्
आञ्जनम्
आदर्शाविक्षणम्
उपानहौ
छत्रं
दण्डमिति ११

▼

⑤

>

▼ Oldenberg

11. In the same way he should with the following (formulas, M. II, 8, 9-9, 5), according to the characteristics (contained in them), (put) a wreath on his head, anoint (his eyes), look into a mirror, (put on) shoes, (and should take) a parasol and a staff.

▼ हरदत्तः

एवमुत्तरैरपि मन्त्रैर्यथालिङ्गं स्रगादीनि षट्द्रव्याण्युपयुञ्जीत यथार्हम् । तत्र "शुभिके शिर" इति द्वाभ्यां स्रजश्शिरसि बन्धनम् । यथालिङ्गवचनात् (द्वाभ्याम् "इमां तामपिनह्ये" इति) । स्रज इति षष्ठ्येकवचनम्, न प्रथमाया द्वितीयाया वा बहुवचनम् । इमां तामित्यकेवचनात् । शिरसीति वचनात् अंसयोर्न भवति । "न मालोक्ताम् । माले चेत् ब्रूयुः, स्रगित्यभिधापयीत" (आश्व.गृ.३८.१२.) इत्याश्वलायनः । अथ "यदाञ्जनं त्रैककुदम्" इति द्वाभ्यामञ्जनं अक्ष्णोरुपयुञ्जीत । तत्र द्वाभ्यामपि मन्त्राभ्यां पूर्व दक्षिणस्याञ्जनम् । अथ ताभ्यामेव सव्यस्य । यद्यपि "तेन वामाञ्जे" इति मन्त्रे द्विवचनं भवति । तथापि एवमित्यतिदेशसामर्थ्यात् प्रवर्तयोराबन्धनवत् क्रियाभ्यावृत्तिर् मन्त्राभ्यावृत्तिश्च भवति । तत्र सान्नाय्यकुमभीवत् द्विवचनं, यथा"अप्रस्नसंसाय यज्ञस्योखे उपदधाम्यह"मिति । अथादर्शस्यावेक्षणं "यन्मे वर्च" इत्येतया । अवेक्षणमित्यनुच्यमाने आदानमेव स्यादस्मिन् काले;

"इदं तत्पुनराददं" इतिलिङ्गात् तस्मादवेक्षणग्रहणम् । ततः उपानहावुपमुञ्चते "प्रतिष्टे स्थ" इति यजुषा । आञ्जनवत् क्रियावृत्तिर् मन्त्रस्यावृत्तिश्च भवति । ततश्छत्रमादायात्मानमाच्छादयति "प्रजापतेश्शरणमसी"ति **यजुषा** । देवस्य त्वेति यजुषा दण्डमादत्ते । वैणवमित्याश्वलायनः ॥ (आश्व.गृ.३-८-१५.) ॥११॥

▼ सुदर्शनः

यथा कर्ममध्ये समन्त्रकं प्रवर्त्तौ हि बद्धौ, **एवमुत्तरैर्मन्त्रैर्यथालिङ्गं** मन्त्रलिङ्गानुसारेण स्रगादिषट्कं आबध्नीत कर्तव्यमित्यादि यथार्हं वाक्यशेषः । तत्र "शुभिके शिरः" इत्यनयैकयैव शिरसि स्रजमाबध्नीत । "यामाहरत्" इत्येषा विकल्पार्था ; "एकमन्त्रणि कर्माणि" । "अवशिष्टा विकल्पार्थाः" (आप.प.१-४१; ४-१२) इति परिभाषावचनात् । स्रज इति द्वितीयैकवचनार्थे ; "शुभिके शिर आरोह" "यामाहरत्" इत्याद्येकवचनलिङ्गात् । षष्ठ्येकवचनं वा । तथा सति, स्रज आबन्धनं कर्तव्यमिति शेषः । तथा "यदाञ्जनं त्रैककुदम्" इत्येकयैव सकृदुच्चरितया त्रिककुत्पवर्तजाताञ्जनेन युगपदक्षणोरञ्जनं कर्तव्यम् । अत्रापि "मयि पर्वत" इत्यादीनि चत्वारि यजूंषि विकल्पार्थान्येव । न चाक्षणोः पर्यायेणाञ्जनम् ; "तेन वाम्" इति द्विवचनलिङ्गविरोधात् । तथैव "यन्मे वर्चः परागतम्" इत्येतया आदर्शावेक्षणं कर्तव्यम् । तथैव "प्रतिष्ठे स्थः" इत्यनेन यजुषोपानहौ युगपदुपमुञ्चते- "प्रतिष्ठे स्थः" इति द्विवचनलिङ्गात् । तथैव तूष्णीं छत्रमादाय "प्रजापतेः शरणमसि" इति यजुषा आत्मानमभिच्छादयति । तथैव दण्डं वैणवं "देवस्य त्वा" इत्यादियजुषा आदत्ते । **इति** एतानि षट्द्रव्याणीत्यर्थः । केचित्— "शुभिके शिर आरोह" "यामाहरत्" इति द्वाभ्यामपि स्रज आबन्धनम् । तथा "यदाञ्जनं" "मयि पर्वत पूरुषम्" इति द्वाभ्यामप्यावृत्ताभ्यां दक्षिणसव्ययोरक्षणोः क्रमेणाञ्जनम् ; "एवमुत्तरैर्यथालिङ्गम्" इति वचनबलात् । ततश्च "तेन वाम्" इति लिङ्गमपि विधिबलाद्बाध्यमेव । यथैकस्यां सान्नाय्यकुम्भ्यां "उखे उपधाम्यहम्" इति द्विवचनलिङ्गम् । उपानहोरुपमोचनेऽप्यञ्जनवदेव व्याख्येति । तदसत् ; "एकमन्त्राणि" (आप.प.१-४१) इत्यादिपरिभाषाविरुद्धत्वात् । "एवमुत्तरैर्यथालिङ्गम्" इत्यस्य च पूर्वव्याख्यानेऽप्युपपत्तेः । "मयि पर्वत पूरुषम्" इत्यत्र पाठे प्रश्लिष्टेऽपि विभागे निराकाङ्क्षत्वात्, वाक्यभेदावगतेश्च ॥११॥

▼

⑤

>

एवमुत्तरैर्यथालिङ्गं स्रजश्शिरस्याञ्जनमादर्शावेक्षणमुपानहौ छत्रं दण्डमिति ॥

# १२ १२ वाचं यच्छत्यानक्षत्रेभ्यः②

वाचं यच्छत्य् आनक्षत्रेभ्यः १२

▼

⑤

>

▼ Oldenberg

12. He keeps silence until the stars appear.

▼ हरदत्तः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼

⑤

>

वाचं यच्छत्यानक्षत्रेभ्यः।

# १२ १३ उदितेषु नक्षत्रेषु②

उदितेषु नक्षत्रेषु प्राचीम् उदीचीं वा दिशम् उपनिष्क्रम्योत्तरेणार्धर्चेन दिश उपस्थाय
+उत्तरेण नक्षत्राणि चन्द्रमसम् इति १३

▼

⑤

>

▼ Oldenberg

13. When the stars have appeared, he goes away towards the east or north, worships the quarters (of the horizon) with the next hemistich, and the stars and the moon with the next (M. II, 9, 6).

▼ हरदत्तः

ततः उत्तरेणार्धर्चेन "देवीष्षड्डुर्वीर्" इत्यनेन प्राङ्मुखः प्राञ्जलिः सर्वा दिशो मनसि कृत्वा मन्त्रान्तेन प्रदक्षिणमावृत्य समनुवीक्षते । षडेव दिशः। षड्डुर्वीरिति लिङ्गात् । प्राच्याद्याश्चतस्रः ऊर्ध्वा अधरा चेति । तत **डत्तरेणा**र्धचेन "मा हास्मही"त्यनेन **नक्षत्राणि चन्द्रमसं** च सहोपतिष्ठते ॥ १३॥

▼ सुदर्शनः

इदं च व्याख्यातम् ॥१२॥ **उत्तरेणार्धचेन** "देवाष्षड्डुर्वीः" इत्यनेन **दिशः** अवाचीषष्ठा **उपस्थाय, उत्तरेण** "मा हास्महि" इत्यर्र्धचेन **नक्षत्राणि चन्द्रमसं** चोपतिष्ठते । श्रुतिबलाच्च "मा हास्महि" इत्यत्र नक्षत्राणीत्यध्याहृत्य तानि प्रकाश्यान्येव ॥१३॥

▼

⑤

>

उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशमुपनिष्क्रम्योत्तरेणार्धर्चेन दिश उपस्थायोत्तरेण नक्षत्राणि चन्द्रमसमिति।

# १२ १४ रातिना सम्भाष्य②

रातिना सम्भाष्य यथार्थं गच्छति १४

▼

⑤

>

▼ Oldenberg

14. Having spoken with a friend he may go where he likes.

▼ हरदत्तः

**रातिना** बन्धुना **संभाष्य** किं मया कर्तव्यम्? क आश्रमः प्रतिपत्तव्यः? इति संभाषणं कृत्वा तेन रातिना सह **गच्छति** अवधृतमाश्रम प्रतिपद्यत इत्यर्थ । "बुद्ध्वा कर्माणि यत् कामयेत तदारभेत" (आप.ध.२-२१-५.) इत्यनेनैव सिद्धे पुनर्वचनं प्रव्रजतोऽपि संभाषणान्तं स्नानकर्म यथा स्यादिति ॥१४॥

▼ सुदर्शनः

**रातिः** मित्रं; रमयतीति व्युत्पत्या । तेन सह विस्रब्धस्सम्भाष्य आत्मशक्त्याद्यनुरूपं धर्मादिकं विचार्य निश्चित्य । यथार्थं गच्छति तेन रातिना सह योऽर्थो धर्मो मोक्षो वा साध्यत्वेनावधृत, तदनुरूपमाश्रमं गार्हस्थ्यं मौनं वा प्रतिपद्यते । एवं च ब्रह्मचर्यादेव प्रव्रजतोऽपि सम्भाषणान्तं स्नानं कृत्वैव प्रव्रज्यात् ॥१४॥ इति श्रीसुदर्शनाचार्यविरचिते गृह्यतात्पर्यदर्शने द्वादशः खण्डः समाप्तः ॥
▼

⑤

>

रातिना सम्भाष्य यथार्थं गच्छति।

---

1. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

2. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

# १० मधुपर्कः①

# १३ ०१ अथैतदपरन् तूष्णीमेव②

अथैतदपरं तूष्णीमेव तीर्थे स्नात्वा तूष्णीं समिधमादधाति ।

▼

### ⑤

>

▼ Oldenberg

1. Now this (is) another (way for performing the Samāvartana). He bathes silently at a bathing-place and puts silently a piece of wood on (the fire).

▼ हरदत्त-प्रस्तावः

एवं स्नानस्य मुख्यकल्पं विधायानुकल्पं विदधाति–

▼ हरदत्तः

व्याख्यातं स्नानकर्म गरीयश्च मुख्यं च । अथेदानीमेतदपरं स्नानविधानं लघीयश्च गौणं च व्याख्यायते । किं तत्? तूष्णीमेव तीर्थे भूमिष्ठे जले स्नाति । नोद्धृताभिश्शीताभिः । तूष्णीं च समिधमादधाति । न मन्त्रेण । पालाशी समित् । एतावदेव अस्मिन् विधौ कार्यम् । नान्यत् किञ्चित् "प्रागुदयात् व्रजम्" इत्यादिकम् । वपनादि तु लौकिकमधर्मकं भवति । तत्र प्रयोगः–केशश्मश्रुनखलोमानि वापयित्वा मेखलादण्डमजिनमित्यपनीय तूष्णीमेव तीर्थे स्नात्वा दन्तधावनमौदुम्बरेण काष्ठेन कृत्वा स्नानीयाच्छादितः पुनः स्नात्वा अहते वाससी परिधायाचम्याग्निमुपसमाधाय संपरिस्तीर्य पालाशीं समिधमग्निं मनसा ध्यायन्नाधाय मणिप्रभृतीन्यलङ्करणानि यथोपपादमुपादत्ते तूष्णीमेव सर्वम् ॥१॥

▼ सुदर्शनः

**अथापरमेतद्** विधानम् । उच्यते इति शेषः । **तीर्थे** पुण्यनद्यादौ । **समिधं** पालाशीं, अविरोधात् । एवकाराच्चास्मिन् विधौ नान्यत्किञ्चिदनुष्ठेयम् । ननु–पूर्वस्मिन्नेव विधौ स्नानसमिदाधानयोरन्यः प्रकारो वै कल्पिक इति किमिति नास्थीयते ? उच्यते— एवकारवैयर्थ्यप्रसङ्गात्, स्नानसमिदाधानयोरिह व्युत्क्रमेणाभिधानात्, अस्य सूत्रस्य बह्वक्षरत्वाच्च । यदि ह्ययं पूर्वस्मिन्नेव विधौ वैकल्पिकोऽभिप्रेतोऽभविष्यत्, तदा तत्रैव "पालाशीं" समिधमुत्तरयाधाय तूष्णीं वा" "एवंविहिताभिरेवाद्भिरुत्तराभिः षड्भिः स्नात्वा तीर्थे वा तूष्णीम्" इत्यल्पैरेवाक्षरैरसूत्रयिष्यत् । किञ्च सूत्रकाराणां नैवेयं शैली दृष्टचरी-यदुत साङ्गं प्रधानमुक्त्वा पश्चादथादिना सूत्रेण वैकल्पिकानां प्रकारभेदानामभिधानमिति । एवमेव "अथैतदपरं दध्न एवाञ्जलिना जुहोति (आप. गृ.२२-१०.) इत्यस्यापि व्याख्यानम् । प्रयोगस्तु—ब्रह्मचारिलिङ्गानि मेखलादीनि त्यक्त्वा तीर्थे तूष्णीं स्नात्वा, वासोऽन्तरपरिधानादि कृत्वा, श्रोत्रियागारादग्निमाहृत्य "यत्र क्व चाग्निम्" इति विधिनोपसमाधाय, तत्र प्रजापतिं मनसा ध्यायन् तूष्णीमेव समिधमादधाति । केचित्–केशश्मश्रु वपनादिकमन्यदप्यविरोधि तूष्णीमेव करोतीति ॥१॥

▼

### ⑤

>

अथैतदपरं तूष्णीमेव तीर्थे स्नात्वा तूष्णीं समिधमादधाति ।

# १३ ०२ यत्रास्मा अपचितिम्②

यत्रास्मा अपचितिं कुर्वन्ति तत्कूर्च उपविशति यथापुरस्तात्।

▼

⑤

>
▼ Oldenberg

2. 1 He sits down on a bunch of grass, as stated above (comp. M. II, 9, 7), at a place where they are going to honour him (with the Argha reception).

▼ हरदत्तः

उक्तयोरन्यतरेण स्नातको भवति । तस्यास्मिन् काले बन्धुभिरपचितिः कार्या; गोमधुपर्कार्हो वेदाध्याय इति वचनात् । आवेद्यार्घ्यं दद्याद् (बौ.गृ.१-२-१) इति कल्पान्तरम् । साधु व्रतस्नातमर्घयिष्यामो भवन्तमिति निगदेनावेदनं कौषीतकिनस्समामनन्ति । "विष्टरं पाद्यमर्घ्यमाचमनीयं मधुपर्को गौरित्येतेषां त्रिस्त्रिरेकैकं वेदयन्ते" (आश्व. गृ. १-२१-६.) इत्याश्वलायनः । तत्र **यत्र** देशे**ऽस्मै अपचितिं कुर्वन्ति** बान्धवाः, तत्र तैर्दत्ते **कूर्चे उपविशति यथापुरस्ताद् **उपनयने आचार्यः । कूर्च प्रत्तमुपादायोदगग्रं निधाय तस्मिन् "राष्ट्रभृदसी"त्यनेनोपविशतीत्यर्थः ॥२॥

▼ सुदर्शनः

**यत्र** यस्मिन् स्वधर्मयुक्तस्य कुटुम्बिनो गृहे आतिथ्यार्थमागताय **अस्मै** स्नातकाय **अपचितिं** पूजां मधुपर्काख्यां कुर्वते कुटुम्बिनः । बहुवचनं चानुपादेयगतत्वादविवक्षितम् । अत एवोत्तरत्र प्राहेत्येकवचनम् । तत् तत्र गृहे तैर्दत्ते कूर्चं उपविशति । **यथापुरस्तात्** उपनयने आचार्यः "राष्ट्रभृदसि" इति यजुषा उपविशति तथा उपविशेदित्यर्थः ॥२॥
▼

⑤

>

यत्रास्मा अपचितिं कुर्वन्ति तत्कूर्च उपविशति यथापुरस्तात्।

# १३ ०३ एवमुत्तराभ्यां यथालिङ्गम्②

एवमुत्तराभ्यां यथालिङ्गं राजा स्थपतिश्च ।

▼

⑤

>
▼ Oldenberg

3. A king and a chieftain (sit down) in the same way (as a Brāhmaṇa), with the next two (formulas, M. II, 9, 8. 9), according to the characteristics (contained in them).

▼ हरदत्तः

**एवं राजा स्थपतिश्** च यथा ब्राह्मणः स्नातकः कूर्चे उपविशति । यथालिङ्गमाचार्यासन्दीति । एवं राजा स्थपतिश्च पूज्यमानौ **उत्तराभ्यां** यजुर्भ्यां यथालिङ्गमुपविशतः । तत्र क्षत्रियो राष्ट्राधिपतिरभिषिक्तो राज्याय साम्राज्यं तस्य लिङ्गम् । स एव जनाधिपतिः । स्थापत्त्यायाभिषिक्तः **स्थपतिः** । आधिपत्यं तस्य लिङ्गम् । उत्तराभ्यां राजा स्थपतिश्चेत्येव सिद्धे "एवं" "यथालिङ्गम्" इत्युच्यते– यथा प्रथमस्य मन्त्रस्य लिङ्गात् विनियोगः एवमुत्तरयोरपि प्रज्ञापनार्थम् । तेन प्रथमो मन्त्रो ब्राह्मणस्यैव भवति । आचार्यासन्दीति लिङ्गात् । ब्राह्मण आचार्यः स्मर्यत इति चोक्तत्वात् । तेन क्षत्रियवैश्ययोः तूष्णीमुपवेशनम् । तत्र "आचार्यायर्त्विजे श्वशुराय राज्ञ"इति राज्ञोऽपचितिः । अधिपतेस्तु श्वशुरत्वेनापचितिः ॥३॥

▼ सुदर्शनः

यथा ब्राह्मणः पूज्यो मन्त्रेणोपविष्टः, एवं **राजा स्थपतिश्चोत्तराभ्यां** यथालिङ्गं "राष्ट्रभृदसि सम्राडासन्दी" इति राजा, "राष्ट्रभृदस्याधिपत्यासन्दी" इति स्थपतिश्चोपविशेदित्यर्थः । राजा च क्षत्रिय एव, न तु प्रजापालनकर्ता ऽन्यवर्णोऽपि । ननु क्षत्रिये राजशब्दप्रयोग आन्ध्राणां, आर्याणां तु

प्रजापालनादिकर्तर्येव, तत्कथं बलवदार्यप्रयोगबाधेन राजा क्षत्रिय एवेति? मैवम् । आर्यवरस्य भगवतः पाणिनेः गणपाठे "राजासे" इति विशेषस्मरणस्यान्ध्रप्रयोगमूलत्वमेव युक्तमिति अवेष्ट्यधिकरणे साधितत्वात् । स्थपतिश्च महदाधिपत्यं प्राप्तोऽन्यवर्णोऽपि । अन्ये–वैश्यः स्थपतिरिति । केचित्तु–क्षत्रिय एव राज्याभिषिक्त इति ॥३॥

▼

⑤

>

एवमुत्तराभ्यां यथालिङ्गं राजा स्थपतिश्च ।

# १३ ०४ आपः पाद्या②

आपः पाद्या इति प्राह ।

▼

⑤

>

▼ Oldenberg

4. (The host) announces (to the guest), 'The water for washing the feet!'

▼ हरदत्तः

अथ मधुपर्कप्रदाता पादप्रक्षालनार्थं अप उपसंगृह्य "आपः पाद्या" इति प्राह ॥४॥

▼ सुदर्शनः

अथ अपचेता पादप्रक्षालनार्था अप उपसङ्गृह्य "आपः पाद्याः" इति प्राह । एतच्च सम्वादवचनं अनन्तरं यत्कर्तव्यं तत्कुर्वित्येवमर्थम् । एवमेव प्रयोजनं "अर्हणीया आपः" इत्यादिष्वपि ॥४॥

▼

⑤

>

आपः पाद्या इति प्राह ।

# १३ ०५ उत्तरयाऽभिमन्त्र्य दक्षिणम्②

उत्तरयाऽभिमन्त्र्य दक्षिणं पादं पूर्वं ब्राह्मणाय प्रयच्छेत्सव्यँ शूद्राय।

▼

⑤

>

▼ Oldenberg

5. 2 (The guest) should recite the next (verse, II, 9, 10) over (that water) and should stretch out the right foot first to a Brāhmaṇa, the left to a Śūdra.

▼ हरदत्तः

अथ पूज्यमानस्ता अपः उत्तरयर्चा "आपः पादावनेजनी"रित्येतयाऽभिमन्त्र्य प्रक्षालयित्रे **"ब्राह्मणाय"** दक्षिणं पादं पूर्वं **प्रयच्छेत्** प्रसारयेत् । **सव्यं शूद्राय** क्षत्रियवैश्याभ्यामनियमः । पुंलिङ्गस्याविवक्षितत्वात् । स्त्रीष्वप्येवम् । "स्त्री प्रक्षालयति पुमानभिषिञ्चति । विपरीतमेके" (बौ. गृ.१-२.) इति कल्पान्तरम् । पत्नीयजमानौ जङ्घे धावत इति यज्ञे विशेषः । आपः पाद्या इति प्रकरणादेव सिद्धे पादग्रहणमुत्तरत्र पादप्रत्ययो माभूदित्येवमर्थम् । तेन प्रक्षालयित्रुपस्पर्शनं पादे न भवति ॥५॥

▼ सुदर्शनः

अथ पूज्यस्ता अपः "आपः पादावनेजनीः" इत्येतयाऽभिमन्त्र्य प्रथमं **दक्षिणं पादं ब्राह्मणाय** प्रक्षालयित्रे **प्रयच्छेत्** । शूद्राय तु पूर्वं सव्यम् । अत्र ब्राह्मणशूद्रावेव प्रक्षालयितारौ, न तु राजन्यवैश्यौ; तयोरनभिधानात् । अन्ये तु– क्षत्रियवैश्याभ्यां अनियमेन पूर्वं पादं प्रयच्छेदिति ॥५॥

▼

**⑤**

>

उत्तरयाऽभिमन्त्र्य दक्षिणं पादं पूर्वं ब्राह्मणाय प्रयच्छेत्सव्यँ शूद्राय।

# १३ ०६ प्रक्षालयितारमुपस्पृश्योत्तरेण②

प्रक्षालयितारमुपस्पृश्योत्तरेण यजुषाऽऽत्मानं प्रत्यभिमृशेत् ।

▼

**⑤**

>

▼ Oldenberg

6. Having touched the person who washes him, he should touch himself (i.e. his own heart) with the next (formula, M. II, 9, II).

▼ हरदत्तः

तथा स्वेन हस्तेनावनेक्तुः पाणी संस्पृशेद् (बौ.गृ.१-२.) इति कल्पान्तरम् । **उत्तरेण यजुषा** "मयि महः" इत्यनेन प्रतीचीनमभिमर्शनम् । तच्च हृदयदेशे भवति । आत्मनः स्थानं हि तत् ॥६॥

▼ सुदर्शनः

ततः प्रक्षालितपादस्तं प्रक्षालयितारं पाणावुपस्पृश्य "मयि महः" इति यजुषा आत्मानं हृदयदेशे प्रत्यभिमृशेत् प्रतिलोमेन पाणिना स्पृशेत् । ततोऽपामुपस्पर्शनम् ॥६॥

▼

**⑤**

>

प्रक्षालयितारमुपस्पृश्योत्तरेण यजुषाऽऽत्मानं प्रत्यभिमृशेत् ।

# १३ ०७ कूर्चाभ्याम् परिगृह्य②

कूर्चाभ्यां परिगृह्य मृन्मयेना'र्हणीया आप' इति प्राह ।

▼

### ⑤

>

▼ Oldenberg

7. (The host, taking the Argha water) in an earthen vessel which he holds with two bunches of grass, announces (to the guest), 'The Argha water!'

▼ हरदत्तः

ततः प्रदाता मृण्मये पात्रे उपनीता अपः **कूर्चाभ्याम्** अधस्तादुपरिष्टाच्च **परिगृह्य "अर्हणीया आप" इति प्राह** निवेदयति । पुष्पाक्षतैस्संयुक्ता इति कल्पान्तरम् ॥७॥

▼ सुदर्शनः

अथार्हयिता मृन्मये पात्र अर्हणार्थाः पुष्पाक्षतसंयुक्ताः अप आनीय, कूर्चाभ्यामधस्तादुपरिष्टाच्च **परिगृह्य** "अर्हणीया आपः" इति प्राह ॥७॥

▼

### ⑤

>

कूर्चाभ्यां परिगृह्य मृन्मयेना'र्हणीया आप' इति प्राह ।

# १३ ०८ उत्तरयाऽभिमन्त्र्याञ्जलावेकदेश②

उत्तरयाऽभिमन्त्र्याञ्जलावेकदेश आनीयमान उत्तरं यजुर्जपेत् ।

▼

### ⑤

>

▼ Oldenberg

8. (The guest) should recite the next (formula, II, 9, 12) over (that water) and should murmur the next Yajus (II, 9, 13), while a part (of the water) is poured over his joined hands.

▼ हरदत्तः

अर्हणीया अपः निवेदिता **उत्तरया** "आमाग"न्नित्येतया अभिमन्त्रयते । पूज्यमानस्ततोऽञ्जलिं कृत्वा हस्तेन ततस् **तस्याञ्जलौ** एतासामेकदेशमानयति प्रदाता । तस्मिन्न् **आनीयमाने उत्तरं यजुः** "विराजो दोहोऽसी"त्येतत् **जपेत्** पूज्यमानः ॥८॥

▼ सुदर्शनः

अथ पूज्यस्ता अपः "आमागन्" इत्येतया**ऽभिमन्त्र्य** तासामेकदेशे स्तोके स्वाञ्जलौ दात्रा **आनीयमाने** "विराजो दोहोऽसि" इति **यजुर्जपेत्** ॥८॥

▼

⑤

>

उत्तरयाऽभिमन्त्र्याञ्जलावेकदेश आनीयमान उत्तरं यजुर्जपेत् ।

# १३ ०९ शेषम्②

शेषं पुरस्तान्निनीयमानमुत्तरयाऽनुमन्त्रयते ।

▼

⑤

>

▼ Oldenberg

9. Over the rest (of the water) which is poured out towards the east, he recites the next (verse, M. II, 9, 14).

▼ हरदत्तः

अथ तासामपां शेषं पूर्वस्यां दिशि नयति प्रदाता । तत् निनीयमानं **उत्तरयर्चा** "समुद्रं व" इत्येतया**ऽभिमन्त्रयते** पूज्यमानः । एतस्मिन् काले वस्त्रयुगलं कुण्डलयुगं गां स्रजं यच्चान्यदलङ्करणार्थं तत्सर्वं दद्यात् । भोजनान्त इत्यन्ये । तत्सर्वमपचितिशब्देन चोदितं द्रष्टव्यम् ॥९॥

▼ सुदर्शनः

अथ तासां शेषं दात्रा नीयमानं पूज्यः "समुद्रं वः" इत्येतया अनुमन्त्रयते । केचित्— अस्मिन् काले भोजनान्ते वा पूज्याय वस्त्रकुण्डलयुगाद्यलङ्करणं दातव्यम् ; अन्यथाऽयं पूजित एव न भवति । एतच्चापचितिशब्देनास्माकमपि चोदितमेवेति ॥९॥

▼

⑤

>

शेषं पुरस्तान्निनीयमानमुत्तरयाऽनुमन्त्रयते ।

# १३ १० दधि मध्विति②

दधि मध्विति संसृज्य कांस्येन वर्षीयसा पिधाय कूर्चाभ्यां परिगृह्य "मधुपर्क" इति प्राह ।

▼

⑤

>

▼ Oldenberg

10. (The host) pours together curds and honey in a brass vessel, covers it with a larger (brass cover), takes hold of it with two bunches of grass, and announces (to the guest), 'The honey-mixture!'

▼ हरदत्तः

**वर्षीयसा** बृहता **कांस्येन** पात्रेण मधुपर्कं प्राह । कांस्येन वर्षीयसा पिधायेत्येवमपि सम्बन्धः । तेनोभयोः पात्रयोः कांस्यनियमः सिद्धो भवति । इतिशब्दः प्रकारे–दधि मध्विति वा पयो मध्विति वेति ॥१०॥

▼ सुदर्शनः

दधि मध्वित्येतद् द्वयं नियमविधानात् कस्मिंश्चित्पात्रे संसृज्य, ततो वर्षीयसा बृहता कांस्येन पात्रेण पिधाय । शेषं व्यक्तम् । अन्ये तु अपिधानं कांस्यं प्रदर्शनार्थम्, तेनेतरदपि कांस्यमेवेति ॥१०॥

▼

⑤

>

दधि मध्विति संसृज्य कांस्येन वर्षीयसा पिधाय कूर्चाभ्यां परिगृह्य "मधुपर्क" इति प्राह ।

# १३ ११ त्रिवृतमेके घृतम्②

त्रिवृतमेके घृतं च ।

▼

⑤

>

▼ Oldenberg

11. Some take three substances, (those stated before) and ghee.

▼ हरदत्तः

त्रयाणां द्रव्याणां समुदायः **त्रिवृत्** । पूर्वोक्ते द्वे दधि मध्विति वा पयो मध्विति वा, घृतञ्च तृतीयम् ॥११॥

▼ सुदर्शनः

त्रयाणां द्रव्याणां समाहारस्त्रिवृच्छब्देनोच्यते । तस्मिन् पक्षे पूर्वोक्ते दधिमधुनी घृतं च संसर्जनीयानि ॥११॥

▼

⑤

>

त्रिवृतमेके घृतं च ।

# १३ १२ पाङ्क्तमेके धानास्सक्तूंश्च②

पाङ्क्तमेके धानास्सक्तूंश्च।

▼

⑤

>
▼ Oldenberg

12. Some take five, (the three stated before), and grains, and flour.

▼ हरदत्तः

पञ्चानां द्रव्याणां समुदायः **पाङ्क्तम् ।** दधि मधु घृतं धानास्सक्तवः इति ॥१२॥

▼ सुदर्शनः

इहापि पञ्चानां समुदायः पाङ्क्तः । शेषं पूर्ववत् ॥१२॥
▼

⑤

>

पाङ्क्तमेके धानास्सक्तूंश्च।

# १३ १३ उत्तराभ्यामभिमन्त्र्य②

उत्तराभ्यामभिमन्त्र्य यजुर्भ्यामप आचामति पुरस्तादुपरिष्टाच्चोत्तरया त्रिः प्राश्यानुकम्प्याय प्रयच्छेत् ।

▼

⑤

>
▼ Oldenberg

13. The guest recites the next two (formulas, M. II, 10, 1. 2) over (the honey-mixture) and sips water with the two Yajus (II, 10, 3. 4) before (eating) and afterwards; with the next (verse, II, 10, 5) he should partake three times (of the food) and should give the remainder to a person towards whom he is kindly disposed.

▼ हरदत्तः

अथ तं मधुपर्कम् **उत्तराभ्याम्** ऋग्भ्यां "त्रय्यै विद्यायै, "आमागन्" इत्येताभ्यामभिमन्त्र्य पूज्यमानः प्रतिगृह्णाति । पाद्यादीनामभिमन्त्र्य प्रतिग्रहदर्शनात् मधुपर्कस्याभिमन्त्र्य प्रतिग्रहः, न प्रतिगृह्याभिमन्त्रणम् । ततस्तं "यन्मधुन" इत्येतया त्रिः प्राश्नाति । सकृन्मन्त्रेण द्विस्तूष्णीम् । ततः प्राशनस्य पुरस्तादुपरिष्टाच्च **यजुर्भ्याम्** अनन्तरपठिताभ्याम् "अमृतोपस्तरणमस्यमृतोपिधानमसी"त्येताभ्यां यथाक्रमं अप आचामति । तत्र प्रयोगः– अमृतोपस्तरणसीत्युपस्तरणीया अप आचम्य मधुपर्कं मन्त्रेण प्राश्याचम्य एवं द्विस्तूष्णीं प्राश्यापिधानीया अप आचामति । पश्चात् शौचार्थमाचमनम् । **शेषं** मधुपर्कप्राशनशेषं **अनुकम्प्याय** अनुग्राह्याय पुत्राय भ्रात्रे वा समावृत्तायैव प्रयच्छेत् । सोऽपि तं प्राश्नाति । सोमभक्षणे मधुपर्कप्राशने भोजने च मध्ये नोच्छिष्टतेति शिष्टाः स्मरन्ति ॥१३॥

▼ सुदर्शनः

अथ पूज्यस्तं मधुपर्कं प्रतिगृह्यापिधानपात्रमपनीय "त्रय्यै विद्यायै" "आमागन् यशसा" इति द्वाभ्यामभिमन्त्र्य । "अमृतोपस्तरणमसि" इति यजुषा **पुरस्तात्** प्राशनादपः पिबति । तत आचम्य "यन्मधुनो मधव्यम्" इत्यनया त्रिः प्राश्नाति । द्विस्तूष्णीम् । ततः "अमृतापिधानमसि" इति यजुषा **उपरिष्टाद्** अप्यपः पिबेत् । अथाचम्य शेषम् **अनुकम्प्याय** अनुग्राह्याय पुत्रशिष्यादये समावृत्तायैव प्राशितुं **प्रयच्छेत्;** न तु ब्रह्मचारिणे, "न चास्मै श्रुतिविप्रतिषिद्धमुच्छिष्टं दद्युः" (आप.ध.१-४-५.) इति निषेधात् । नन्विह मध्ये शुद्ध्यर्थमुपस्तरणानन्तरमाचमनं न कर्तव्यम्; अस्माकं वचनाभावात् । न्यायतोऽपि नैव ; भोजनवदपिधानान्तमेककर्मत्वात् । अपरथा भोजनेऽपि प्रतिग्रासमाचमनं प्रसज्येत । अथ

सर्वदेशकालकर्तृव्याप्ताचारबलात्तत्कर्तव्यमिति चेत्, न ; अयमाचार उक्तलक्षणो न वेत्यर्वाचीनानां दुर्निश्चेयत्वात् । अत्रोच्यते– नायमाक्षेपः, बोधायनादिगृह्येषूपस्तरणानन्तरमाचमनविधिदर्शनेनास्माकमप्याचारः सर्वदेशादिव्यापीति निश्चेतुं सुशकत्वात् । उक्तं चैतत् "अथ कर्माण्याचाराद्यानि" (आप. गृ.१-१.) इत्यत्र गार्ह्याणीति स्वशब्दं विहाय, आचारादित्युपलक्षणतो व्याख्येयगार्ह्यकर्मनिर्देशात्, गृह्यान्तराद्युपदिष्टविषयोऽप्यस्मदीयानामाचारो वेदमूल एवेति । भोजने तु न प्रतिग्रासमाचमनप्रसक्तिः ; क्वचिदपि वचनाभावात्, आचाराभावाच्च । सोमपाने पुनः "न सोमेनोच्छिष्टा भवन्ति" इति वचनादन्तेऽपि नैवाचमनम् । अपि चैतदाचमनम् शिखाबन्धनादिवत् कर्तुः संस्कारकम्, सन्निपाति च अनुक्तमप्यपेक्षितमन्यतो ग्राह्यमिति न्यायविदः । तस्मादिहोपस्तरणानन्तमाचमनं कार्यमेव । केचित्– बौधायनादिभिरुपस्तरणापिधानयोस्तदर्थानां चापां निवेदनस्य पृथगुपदेशात् उपस्तरणादूर्ध्वमाचमनविधानाच्च उपस्तरणादेः बहिरङ्गत्वेन कर्मान्तरत्वावगतेर्युक्तं तेषां प्राशनात्प्रागप्याचमनम् । अस्माकं तु तथाविधोपदेशाभावात्, अन्तरङ्गत्वेन उपस्तरणाद्यपिधानान्तं भोजनवदेकं कर्मेति मध्ये शुद्ध्यर्थमाचमनं न युक्तमिति । मैवम् ; यतोऽस्माकमपि "यजुर्भ्यामप आचामति" इति शब्दान्तरेणाचमनयोः पृथगेवोपदेशः । अस्मादेव पृथगुपदेशात्तदर्थानामपामावेदनं चाक्षेप्यम् । अतोऽस्माकं तेषां चोपदेशे वैषम्याभावात्तुल्ययोगक्षेममेवाचमनम् ॥१३॥

▼

⑤

>

उत्तराभ्यामभिमन्त्र्य यजुर्भ्यामप आचामति पुरस्तादुपरिष्टाच्चोत्तरया त्रिः प्राश्यानुकम्प्याय प्रयच्छेत् ।

# १३ १४ प्रतिगृह्यैव राजा②

प्रतिगृह्यैव राजा स्थपतिर्वा पुरोहिताय ।

▼

⑤

>

▼ Oldenberg

14. A king or a chieftain should only accept it and (give it) to his Purohita.

▼ हरदत्तः

एवकारात् प्राशनमकृत्वा पुरोहिताय प्रदानम् । स विधिवत् प्राश्नाति ॥१४॥

▼ सुदर्शनः

**राजा स्थपतिश्च** मधुपर्कं **प्रतिगृह्यैव पुरोहिताय** प्रयच्छेत् । एवकारादभिमन्त्रणमकृत्वा । अभिमन्त्रणादि तु प्रशनान्तं पुरोहितस्यैव । पुनश्चोत्तरं कर्म राजादेरेव ॥१४॥

▼

⑤

>

प्रतिगृह्यैव राजा स्थपतिर्वा पुरोहिताय ।

# १३ १५ गौरिति गाम्②

गौरिति गां प्राह ।

▼

⑤

>
▼ Oldenberg

15. (The host) announces the cow with (the word), 'The cow!'

▼ हरदत्तः

अथाचाम्योपविष्टाय **गां** निवेदयते गौरिति । स्त्री च गौर्भवति, गौर्धेनुभव्येति दर्शनात् । यद्वा पुमानपि भवति । श्रूयते हि— "तद्यथैवादो मनुष्यराज आगतेऽन्यस्मिन् वार्हति उक्षाणं वेहतं वा क्षदन्ते" इति । (ऐ. ब्रा. १-३-४.) एवमर्थमेवात्र गामित्युक्तं गोजातिमात्रस्य निवेदनं यथा स्यात् । अन्यथा गौरिति प्राहेत्येतावता सिद्धं यथा पाद्यदिषु ॥१५॥

▼ सुदर्शनः

प्राशने कृते दाता **"गौः" इति गां प्राह** कथयति । गौश्च स्त्री, "गौर्धेनुभव्या" इति स्त्रीलिङ्गनिर्देशात् । एतच्च कथनं, किमियं गौस्संज्ञप्यतामुत्सृज्यतां वा? इति पूज्याभिप्रायनिश्चयार्थम् । स च स्वाभिप्रायं दातुर्ब्रूयात् ॥१५॥
▼

⑤

>

गौरिति गां प्राह ।

# १३ १६ उत्तरयाभिमन्त्र्य तस्यै②

उत्तरयाभिमन्त्र्य तस्यै वपाँ श्रपयित्वोपस्तीर्णाभिघारितां मध्यमेनान्तमेन वा पलाशपर्णेनोत्तरया जुहोति ।

▼

⑤

>
▼ Oldenberg

16. After the guest has recited the next (formula, M. II, 10, 6) over (the cow, the host) cools its omentum, and having performed the 'spreading under' and the sprinkling over (of Ājya), he sacrifices it with the next (verse, M. II, 10, 7) with a Palāśa leaf from the middle or the end (of the stalk).

▼ हरदत्तः

अनुजानीयादित्यध्याहारः । कल्पान्तरे तथा दर्शनात् । ओं कुरुतेति कारयिष्यन् अनुजानीयादिति । प्रोक्तायां गवि तां **उत्तरया** "गौरस्यपहतपाप्मे"त्येतया पूज्यमानोऽभिमन्त्र्य । यद्यस्या आलम्भनमिच्छन् अनु**जानीयात् ।** यद्यप्येक एवार्धर्चस्समाम्नायते तथापि स्त्रीलिङ्गनिर्देशादृगेवैषा गायत्री । तत्रामुष्येत्यस्य स्थाने प्रदातुर्नामनिर्देशः– मम च यज्ञशर्मणश्चेति ॥१६॥ ततः प्रदाता तेनालम्भनेऽनुज्ञाते लौकिक्याऽऽवृता तस्या गोरालम्भं कृत्वा वपामुत्खिद्य वपाश्रपणीभ्यां परिगृह्य औपासने पचने वा **श्रपयित्वा तामुपस्तीर्णाभिघारितां मध्यमेनान्तमेन वा पलाशपर्णेनोत्तरयर्चा"** अग्निः प्राश्नात्वि"त्येतया तस्मिन्नेवाग्नौ **जुहोति । उपस्तीर्याभिघारितामिति** उपस्तरणाभिघारणे कृत्वेत्यर्थः । हुत्वा ततो मांसं संस्कृत्यान्नेन सह तस्मा उपहरन्ति । "अविकृतमातिथ्यम्" इति वचनात् उपस्तरणाभिघारणयोरप्रसङ्गे वचनम् । पलाशपर्णेनेत्येव सिद्धे मध्यमेनान्तमेनेति वचनं द्विपर्णस्य पलाशवृन्तस्य पर्णेन होमो मा भूदिति । अभावविकल्पार्थं वापूर्वं मध्यमेन तदभावे अन्तमेनेति ॥१७॥

▼ सुदर्शनः

यदि प्रतिगृहीता संज्ञपनमिच्छेत्, तदा "गौरस्यपहतपाप्मा" इत्येतयाऽनवसानया गामभिमन्त्रयते । अमुष्येत्यस्य स्थाने चार्हयितुर्नाम विष्णुशर्मण इति गृह्णाति । ततस्सुखमासीत् । दातुरेव वपाहोमान्तं कर्म । अभिमन्त्र्येति च क्त्वाप्रत्ययः क्रियाविधानमात्रार्थं एव, न तु समानकर्तृकत्वार्थः । **तस्यै** तस्याः संज्ञपनं कृत्वा, **वपाम्** उत्खिद्य, **श्रपयित्वा, मध्यमेनान्तमेन वा पलाशपर्णेन** लौकिकेनाज्येनोपस्तीर्य कृत्स्नां वपां सकृदेवावदायाभिघार्य "अग्निः प्राशनातु" इत्येतया तेन पर्णेन स्वाग्नौ **जुहोति ।** तत्र च मध्यमेनान्तमेन वेति वचनं द्विपर्णप्रतिषेधार्थमभावविकल्पार्थं वा । शिष्टैश्चावदानैस्संस्कृतैस्सहान्नं भोजयेत् । अयं च संज्ञपनपक्षः कलियुगानाचारेषु पठितत्वादिदानीं त्याज्य एव ॥१६॥

▼

⑤

>

उत्तरयाभिमन्त्र्य तस्यै वपाँ श्रपयित्वोपस्तीर्णाभिघारितां मध्यमेनान्तमेन वा पलाशपर्णेनोत्तरया जुहोति ।

# १३ १७ यद्युत्सृजेदुपांशूत्तराञ्②

यद्युत्सृजेदुपांशूत्तरां जपित्वोमुत्सृजतेत्युच्चैः ।

▼

⑤

>

▼ Oldenberg

17. If the guest chooses to let (the cow) loose, he murmurs the next (formulas, II, 10, 8-11) in a low voice (and says) loudly, 'Om! Let it loose!' (II, 10, 12).

▼ हरदत्तः

अथ यदि गामुत्सृजत्ययं पूज्यमानः स गौरिति प्रोक्ते मन्त्रानुत्तरांश्चतुरो "यज्ञो वर्धताम्" इत्युपांशु जपति । जपित्वा "ओमुत्सृजते" **त्युच्चैः** प्रसौति । प्रदाता च तामुत्त्सृज्यान्यत् मांसं कल्पयति, "नामांसो मधुपर्को भवति" (आश्व. गृ.१९-२८.) इति कल्पान्तरात् । तत्र पुङ्गवालम्भे गौर्धेनुभव्यामातारुद्राणामेतयोर्लोपः लिङ्गविरोधात्, नेत्यन्ये । जपत्वादेव सिद्धे उपांशुवचनं नियमार्थम्–उत्तरे चत्वार एव मन्त्राः उपांशु वक्तव्याः । न प्रणव इति । शास्त्रान्तरदर्शनात् प्रसङ्गः । प्रणवाद्युच्चैः, ऊर्ध्वं वा प्रणवात् इति । तेन ब्रह्मणः एवैष विकल्पः सिद्धो भवति । इह प्रसवविधेरभावेऽपि उच्चैरिति वचनादेव प्रसौतिर्द्रष्टव्यः ॥१८॥

▼ सुदर्शनः

यदि पूज्यो गामुत्सृज्यमानामिच्छेत् । अयं च कामप्रवेदने लिङ् । तदोत्तरान् त्रीन् मन्त्रान् "यज्ञो वर्धताम्" इत्यादिकान् **"उपांशु जपित्वा ओमुत्सृजत" इत्युच्चैः**, प्रब्रूयादिति शेषः । केचित्– यज्ञ इत्यादिकाश्चत्वारो मन्त्रा इति । इयं च गौरुत्सर्जनपक्षेऽपि भोक्तुरेव ॥१७॥

▼

⑤

>

यद्युत्सृजेदुपांशूत्तरां जपित्वोमुत्सृजतेत्युच्चैः ।

# १३ १८ अन्नम्②

अन्नं प्रोक्तमुपांशूत्तरैरभिमन्त्र्यों कल्पयतेत्युच्चैः ।

▼

⑤

>
▼ Oldenberg

18. (In this case) he recites the next (formulas, M. II, 10, 13-17) in a low voice over the food which is announced to him (instead of the cow), (and says) loudly, 'Om! Make it ready!' (II, 10, 18).

▼ हरदत्तः

अथान्नं सामिषं समाहृत्य तस्मे प्राह– भूतमिति । सिद्धेऽन्ने भूतमिति प्राह (बौ.गृ. १-२-५५.) इति कल्पान्तरम् । अस्माकं च वैश्वदेवे । तस्मात् भूतमित्येव निवेदनम् । तदन्नं प्रोक्तमुत्तरैः पञ्चभिर्मन्त्रैर्भूतमित्यादिभिः भोक्तोपांश्वभिमन्त्र्य ओंकल्पयतेत्युच्चैः प्रसौति । प्रसूताः परिवेष्टारः परिवेविषन्ति चतुरो नानागोत्रान् ब्राह्मणान् भोजयतेति ब्रूयात्तेषु भुक्तवत्स्वन्नमस्मा उपाहरन्तीति (बौ. गृ. १-२.) कल्पान्तरम् ॥१९॥

▼ सुदर्शनः

अथ दाता सिद्धमन्नं "भूतं" इति मन्त्रेण पूज्याय प्रब्रूयान्निवेदयेत् । कुत एतत्? "सिद्धेऽन्ने तिष्ठन् भूतमिति स्वामिने प्रब्रूयात्" (आप. ध.२-३-१०.) इति वैश्वदेवे दर्शनात् । मधुपर्कप्रकरण एव "सिद्धेन्ने तिष्ठन् भूतमिति प्राह" इति कल्पान्तराच्च । एवं प्रोक्तमन्नं भोक्ता उत्तरैर्मन्त्रैः "सुभूतम्" इत्यादिभिः पञ्चभिरभिमन्त्र्य, **ॐ कल्पयतेत्युच्चैः** । अत्राप्यनुजानीयादिति शेषः । ततो भोजनं ; अन्ननिवेदनस्य दृष्टार्थत्वात्, आचाराच्च ॥१८॥
▼

⑤

>

अन्नं प्रोक्तमुपांशूत्तरैरभिमन्त्र्यों कल्पयतेत्युच्चैः ।

# १३ १९ आचार्यायर्त्विजे श्वशुराय②

आचार्यायर्त्विजे श्वशुराय राज्ञ इति परिसंवत्सरादुपतिष्ठद्भ्य एतत्कार्यम् ।

▼

⑤

>
▼ Oldenberg

19. For his teacher, for a Ṛtvij, for his father-in-law, for a king he ought to perform this (Arghya ceremony) as often as they visit his house, if at least one year has elapsed (since they came last).

▼ हरदत्तः

आचार्यादयः प्रसिद्धाः । तेभ्यश्चतुर्भ्यः परिसंवत्सरं विप्रेष्योपतिष्ठद्भ्यः गृहमातिथ्येनागतेभ्यः एतदपचितिकर्म कूर्चादि भोजनान्तं कर्तव्यम् । केन? गृहस्थेन । निवेशे हि वृत्ते नैयमिकानि(?) श्रूयन्ते अग्निहोत्रमतिथयः इति वचनात् । अत्र केचिदाहुः– आचार्यायर्त्विजे श्वशुराय राज्ञ इत्येतत्कार्यम् । इत्येको योगः । अथ परिसंवत्सरादुपतिष्ठद्भ्यश्चायं कार्यः इति । तेन विवाहादनन्तरं आचार्यश्वशुराभ्यां निमन्त्र्यापचितिः कर्तव्या । ऋत्विजे च कर्मणि, राज्ञे चाभिषेकानन्तरम् । अथ तेभ्य एव संवत्सरं विप्रोष्योपगतेभ्यश्च कर्तव्यमिति ॥२०॥

▼ सुदर्शनः

यदेतदर्हणं कूर्चादि भोजनान्तं गृहस्थेन स्नातकाय स्नानदिवस एवागताय कर्तव्यमिति विहितं, तदाचार्यादिभ्यः परि**संवत्सरात्** संवत्सरादूर्ध्वं गृहमुपतिष्ठद्भ्यः उपागतेभ्यः पुनः पुनः कार्यं; न तु स्नातकवत्सकृत् । न चाप्यर्वाक्संवत्सरात् । अत्र चेतिशन्दश्चार्थः । ननु धर्मशास्त्रेऽगोमधुपर्करहो वेदाध्यायः । आचार्य ऋत्विक्स्नातको राजा वा धर्मयुक्तः । आचार्यायर्त्विजे श्वशुराय राज्ञ इति परिसंवत्सरादुपतिष्ठद्भ्यो गौर्मधुपाश्च । दधिमधुसंसृष्टं मधुपर्कः पयो वा मधुसंसृष्टम् । अभाव उदकम्, (आप.ध.२-८-५...९.) इति स्नातकायाचार्यायर्त्विजे उपाध्यायाय श्वशुराय राज्ञे च दक्षिणार्थगवा सह

मधुपर्को विहितः । किमर्थमिह पुनर्विधीयते? उत्यते इह विकल्पेन विहितस्य त्रिवृतः पाङ्क्तस्य च तस्मिन् गोमधुपर्के अवेदाध्यायाय श्वशुराय च दीयमाने च प्राप्त्यर्थम् । यत्तु तत्रैव "गौर्मधुपर्कश्च" इति पुनर्वचनं, तदाचार्यर्त्विदाध्यायश्वशुरराजभ्य एव परिसंवत्सरादुपतिष्ठद्भ्यः पुनः पुनः कार्यम्, स्नातकवेदाध्यायतिथिभ्यस्तु सकृदेवेत्येवमर्थम् ॥१९॥

▼

⑤

>

आचार्यायर्त्विजे श्वशुराय राज्ञ इति परिसंवत्सरादुपतिष्ठद्भ्य एतत्कार्यम् ।

# १३ २० सकृत्प्रवक्त्रे चित्राय②

सकृत्प्रवक्त्रे चित्राय।

▼

⑤

>

▼ Oldenberg

20. For a renowned teacher (of the Veda the ceremony should be performed) once.

▼ हरदत्तः

सकृत्न प्रतिवतसरं कलौ गोरालम्भ्स्य न्षेधाद्गौरित्युत्त्का यज्ञो वर्धतामित्यादि जपेत्मध्यमन्त्रलोपः)प्रवक्त्रे वेदस्य वेदार्थस्य च चित्राय प्रसिद्धाय भिन्नसंशयायेत्यर्थः । एवं भूतायोपस्थिताय सकृदेतदपचितिकर्म कर्तव्यं, न प्रतिसंवत्सरमिति ॥२१॥

▼ सुदर्शनः

प्रवक्ता यः पदवाक्यप्रमाणाभ्यां प्रकर्षेण वक्ति साधुशब्दानामुच्चारयिता, प्रमाणोपपन्नं व्याख्याता चेत्यर्थः । चित्रः प्रकाशः लोके प्रसिद्ध इत्यर्थः । इदं प्रवक्तुरेव विशेषणम् । तस्मै सकृदेवैतत् गार्ह्यगेरहितं कार्यम् । अयं च प्रवक्ता न वेदाध्यायः । स हि गोमधुपर्करहः । यस्सषडङ्गं वेदमधीते, अर्थाश्च जानाति स वेदाध्यायः । ननु सामयाचारिके गोमधुपर्के धर्मा नोपदिष्टाः, स कथं कर्तव्यः? उच्यते– नामधेयं धर्मग्राहकम् इति मीमांसकाः । तेन गृह्ये याज्ञिकप्रसिद्ध्या मधुपर्कसंशिके कर्मणि उपदिष्टा एव धर्माः "गोमधुपर्करहः" इत्यत्र मधुपर्कनाम्ना अतिदिश्यन्ते,"मासमग्निहोत्रं जुहोति" इतिवत् । "दधिमन्थो मधुमन्थः" (मधुपर्कः)(आप. श्रौ.६-३-२५.) इत्यत्र तु दक्षिणाद्रव्यस्य कर्मवद्धर्माकाङ्क्षा भावान्नातिदेशः । अत्र च वेदाध्यायातिथिपूजायामयं विशेषः, "दधिमधुसंसृष्टं मधुपर्कः" इति प्रत्यक्षविधानादतिदेशप्राप्तं त्रिवृत्त्वं पाङ्क्तत्वं च बाध्यत (आप.श्रौ.२-८-८.) इति । अयमत्र निश्चितोऽर्थः आचार्यायर्त्विजे वेदाध्यायाय श्वशुराय राज्ञे च दक्षिणार्थाधिकगवा विना गार्ह्यः सामयाचारिको वा मधिपर्कः कार्यः । परिसंवत्सरादिपागतेभ्यः पुनः पुनः कार्यः । अवेदाध्यायाय श्वशुरायाधिकगवा विना गार्ह्यः अतिथिवरापचितेभ्यो वेदाध्यायेभ्यः सह गवा धर्मोक्तः । अवेदाध्यायाभ्यां तु वरापचिताभ्यां स्नातकाय च स्नानदिन एवागताय गवा विना गृह्योक्तो धर्मोक्तो वा । प्रकाशाय च प्रवक्त्रे विना गवा गार्ह्यः । आचार्यादिभ्यश्चतुर्भ्योऽन्येषां सकृदेवेति । केचित् अत्र योगविभागमाहुः । आचार्यादिभ्य; चतुर्भ्य एतत्कार्यमित्येको योगः । तेन विवाहानन्तरमाचार्यश्वशुराभ्यां निमन्त्र्यापि पूजा कार्या । अन्यथा संवत्सरमपि प्रोषिताभ्यां सकृदपि न सिध्येत् । ऋत्विजे च कर्मणि कर्मणि पूजा कार्या । राज्ञे चाभिषिक्ताय नियमेनैव । तथा "परिसंवत्सरादुपतिष्ठद्भ्यः पुनः पुनः" इत्यन्यो योगः । स्पष्टश्चायं सामयाचारिकेषु विभागः, "गोमधुपर्करहः" इति पूर्व विधाय, पश्चात् "आचार्याय" इत्यादिना पुनर्विधानात् । पूर्वयोगे च श्वशुरशब्दो निपातयितव्यः । न चात्रान्यतरविध्यारम्भो व्यर्थः । सामयाचारिकेषु सर्वाचरणार्थेन विहितायां पूजायां, गार्ह्यस्यास्मदीयानां धर्मातिदेशार्थत्वात् । न च नाम्ना धर्मातिदेशः, गोमधुपर्कशब्दयोः "मधुमन्थो मधुपर्कः" इतिवत् द्रव्याभिधायकत्वात् । अतोऽर्थभेदात् गृह्ये धर्मे च विध्यारम्भोर्थवान् । तथा वेदस्य वेदार्थस्य च प्रवक्त्रे च एतत्सकृत्कार्यमिति । तच्चिन्त्यम् ॥२०॥ इति श्रीसुदर्शनाचार्यकृते गृह्यतात्पर्यदर्शने त्रयोदशः खण्डः ॥ पञ्चमश्च पटलस्समाप्तः ॥

▼

⑤

>

सकृत्प्रवक्त्रे चित्राय।

---

1. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

2. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

# ११ सीमन्तोन्नयनम्①

## १४ ०१ सीमन्तोन्नयनम् प्रथमे②

सीमन्तोन्नयनं प्रथमे गर्भे चतुर्थे मासि ॥ आपस्तम्बगृह्यसूत्र १४.१ ॥

▼

### ⑤

>

▼ Oldenberg

1. The Sīmantonnayana (or parting of the pregnant wife's hair, is performed) in her first pregnancy, in the fourth month.

▼ हरदत्त-प्रस्तावः

मन्त्राम्नानक्रमेण विवाहादयस् संस्कारा व्याख्याताः । अनन्तरं तत्-क्रमेणैव सीमन्तादयो व्याख्यायन्ते—

▼ हरदत्तः

सीमन्तो नाम केश-मध्ये रेखाविशेषः । स उन्नीयते यस्मिन् कर्मणि तत् **सामन्तोन्नयनन्नाम** कर्म गर्भसंस्कारः ।

तच् चतुर्थे मासि कर्तव्यम् । प्रथम-नियमाद् आधार-संस्कारो ऽयम् ।

आधारे च संस्कृते तत्राहिताः सर्व एव गर्भाः संस्कृता भवन्ति ॥१॥

▼ सुदर्शनः

**सीमन्तोन्नयनम्** इति कर्म-नाम-धेयम्।
यस्मिन् कर्मणि गर्भिण्यास् सीमन्त उन्नीयते तत् व्याख्यास्याम इति शेषः ।

तच् च **प्रथमे गर्भे;** न तु गर्भे गर्भे । गर्भार्थम् एवाधार-स्त्री-संस्कारः । स्त्रीसंस्कारत्वात् सकृद् एव कृतस् सीमन्तस् सर्वान् एव गर्भान् संस्करोति ।

**चतुर्थे मासि** चतुर्थे मासे । अल्लोपश्छान्दसः, "छन्दोवत्सूत्राणि भवन्ति" इति स्मृतेः ॥१॥

▼

### ⑤

>

सीमन्तोन्नयनं प्रथमे गर्भे चतुर्थे मासि ।

## १४ ०२ ब्राह्मणान् भोजयित्वाऽऽशिषो②

ब्राह्मणान् भोजयित्वा ऽशिषो वाचयित्वा,
अग्नेर् उपसमाधानाद्य्-आज्यभागान्ते
ऽन्वारब्धायाम् *(चौले - अन्वारब्धे)*
उत्तरा आहुतीर् हुत्वा *(= " धाता ददातु नो रयिम्" इति चतस्रो, "यस्त्वा हृदा कीरिणे"ति चतस्रः)*
जयादि प्रतिपद्यते ॥
परिषेचनान्तं कृत्वा

धा॒ता द॑दातु नो र॒यिम्
ईशा॑नो॒ जग॑त॒स्(!)पतिः॑ ।
स नः॑ पू॒र्णेन॑ वावनत् ।

धा॒ता प्र॒जाया॑ उ॒त रा॒य ईशे॑ (=ईष्टे)
धा॒तेदं विश्व॒म् भुव॑नं जजान ।
धा॒ता पु॒त्रं यज॑मानाय॒ दाता॑
तस्मा॑ उ ह॒व्यं घृ॒तव॑द् विधेम ।

धा॒ता द॑दातु नो र॒यिम्
प्राचीँ॑ जी॒वातु॒म् अक्षि॑ताम् ।
व॒यं दे॒वस्य॑ धीमहि
सुम॒तिँ स॒त्य-रा॑धसः(=धनस्य) ।

धा॒ता द॑दातु दा॒शुषे॒ वसू॑नि
प्र॒जाका॑माय मी॒ढुषे॑ (=सेक्त्रे) दुरो॒णे (=दारेषु) ।
तस्मै॑ दे॒वा अ॒मृता॒ः सं व्य॑यन्ता॒ं (=ददतु)
विश्वे॑ दे॒वासो॒ अदि॑तिः स॒जोषाः॑ ।

य″स् **त्वा** हृदा″ कीरि″णा (=स्तोत्रिणा) म″न्यमानो″
ऽमर्त्यं म″र्त्यो **जो″हवीमि** ।
जा″तवेदो **य″शो** अस्मा″सु **धेहि**
प्रजा″भिर् अग्ने **अमृतत्व″म् अश्याम्** ॥

य″स्मै त्वँ″ सुकृ″ते जातवेद उ″
लोक″म् अग्ने कृण″वः (=कुर्याः) स्योन″म् (सुखमयम्)।
अश्वि″नँ स″ पुत्रि″णं वीर″वन्तं
गो″मन्तँ रयिं″ नशते (=प्राप्नोति) स्वस्ति″ ॥

त्वे″ सु″ पुत्र (आमन्त्रिताङ्गत्वाद् अनुदात्तः←)शवसो″
ऽवृत्रन् (=अवर्तन्त) का″म-कातयः (=काम-कामनाः [सुतयः]) ।
न″ त्वा″म् इन्द्रा″ति रिच्यते ।।

उक्थ″उक्थे सो″म इ″न्द्रं ममाद
नीथे″नीथे (समाप्ते समाप्ते) मघ″वानँ सुता″सः ।
य″द् ईँ″ सबा″धः पित″रं न″ पुत्राः″
समान″-दक्षा (=समानबलाः) अ″वसे ह″वन्ते ।

▼

⑤

>

▼ Oldenberg

2. (The husband) serves food to Brāhmaṇas and causes them to pronounce auspicious wishes; then, after (the ceremonies) from the putting (of wood) on the fire down to the Ājyabhāga oblations (have been performed), he offers the oblations (indicated in the) next (Mantras, M. II, 11, 1-8), while (the wife) takes hold of him, and enters upon the (performance) of the Jaya and following oblations.

▼ हरदत्तः

तत्र पूर्वेद्युर् नान्दीश्राद्धम् । अथ तस्मिन्न् अहनि **ब्राह्मणान् भोजयित्वा** तैर् भुक्तवद्भिर् **आशिषो वाचयित्वा** अग्नेर् उपसमाधानादि प्रतिपद्यते सकृत्-पात्राणि शलल्य्-आदयश् च, सह शम्याः ॥२॥ अष्टौ प्रधानाहुतयो "धाता ददातु नो रयिम्" इति चतस्रो "यस्त्वाहृदा कीरिणे"ति चतस्रः ॥ ३॥

▼ सुदर्शनः

इह ब्राह्मण-भोजनाशीर्वचनयोर् विधानं उपनयनवत् क्रमार्थम् । पात्रासादन-काले तु यथार्थं शलल्यादीनि सकृद् एवासाद्यानि । शम्याश् च परिध्यर्थे । **उत्तराः** "धाता ददातु नो रयिम्" इति चतस्रो "यस्त्वा हृदा कीरिणा" इति चतस्र इत्यष्टौ । शेषं सुगमम् ॥२॥

▼

⑤

>

ब्राह्मणान् भोजयित्वाऽऽशिषो वाचयित्वाऽग्नेर् उपसमाधानाद्य्-आज्य-भागान्ते ऽन्वारब्धायाम् उत्तरा आहुतीर् हुत्वा जयादि प्रतिपद्यते ।

# १४ ०३ परिषेचनान्तङ् कृत्वा②

परिषेचनान्तं कृत्वा ऽपरेणाग्निं प्राचीम् उपवेश्य त्रेण्या शलल्या त्रिभिर् दर्भ-पुञ्जीलैश् शलालु-ग्लप्सेनेत्य् *(→उदुम्बर-फल-सङ्घातेन)* ऊर्ध्वं सीमन्तम् उन्नयति व्याहृतीभिर् उत्तराभ्यां च ।

▼

⑤

>

▼ Oldenberg

3. Having performed (the rites) down to the sprinkling (of water) round (the fire), he makes her sit down to the west of the fire, facing the east, and parts her hair upwards (i.e. beginning from the front) with a porcupine's quill that has three white spots, with three Darbha blades, and with a bunch of unripe Udumbara fruits, with the Vyāhṛtis or with the two next (verses, II, 11, 9. 10).

▼ हरदत्तः

**प्राचीं** प्राङ्-मुखीं स्वयं प्रत्यङ्-मुखः ।

त्रिषु प्रदेशेषु एनी श्वेता **त्रेणी** । इकार-लोपश् छान्दसः । णत्वं च । **शलली** शल्यकस्य रोम-सूची ।

सविशाखा नाडी **पुञ्जीलम्** इत्युच्यते । दर्भस्य पुञ्जीलानि त्रीणि भवन्ति ।

उदुम्बरस्य फल-सङ्घात-विशेषस् तरुणः **शलालु-ग्लप्स** इत्युच्यते । पिशाचोदुम्बरस्येत्यन्ये ।

एतानि द्रव्याणि युगपद्गृहीत्वा **तैस्सीमन्तमुन्नयति** ऊर्ध्वमुदूहति भूर्भुवस्सुवरित्येताभिः **उत्तराभ्यां च** "राकामहं, "यास्ते राक" इत्येताभ्याम् ।

त्रयाणाम् अन्ते सकृद् उन्नयनम् । इह मन्त्रसमाम्नाये व्याहृतीनां पाठो न कर्तव्यः । व्याहृतिभिरित्येतेनैव सिद्धस्सम्प्रत्ययः । यथा व्याहृतीश्च जपित्वा, व्याहृतीर्विहृताः, इत्यादौ । एवं सिद्धे व्याहृतीनां पाठः समाम्नायार्थम् । किञ्चासति पाठे व्याहृतिभिरुत्तराभ्याञ्चेत्युच्यमाने याजमानसमाम्नायात् ग्रहणं प्राप्नोति–व्याहृतिभिरुत्तराभ्याञ्च मन्त्राभ्यां "उच्छुष्मो अग्न" इत्येताभ्यामिति । तत्र पाठस्य प्रसिद्धत्वात् । "राकामहं" "यास्ते राके" इत्येतयोश्च प्रधानाहुतित्वं विज्ञायेत, विशेषाभावात् । तस्मादस्मादेव समाम्नायाद्ग्रहणं यथा स्यादिति व्याहृतीनामिह पाठः ॥३॥

▼ सुदर्शनः

**प्राचीं** प्राङ्मुखीम् । स्वयं तु प्रत्यङ्मुखः । **त्रेणी** त्रीण्येतानि शुक्लानि यस्यास्सा । यद्वा त्रिषु प्रदेशेषु एनी श्वेता । त्रेणीति च रूपं छान्दसम् । **शलली** सूच्याकारं शल्यलोम । त्रेणीति शलल्या विशेषणम् । **दर्भ-पुञ्जीलं** सविशाखा नाडी । **शलालुर्** गोष्ठोदुम्बरः, खरपत्रोदुम्बरः, पिशाचोदुम्बर इत्यनर्थान्तरम् । **ग्लप्सः** स्तबकः ; पिशाचोदुम्बरस्य तरुणफलसङ्घातविशेष इत्यर्थः । इत्येतैर्द्रव्यैर्युगपद्गृहीतैरूर्ध्वं **सीमन्तमुन्नयति** शिरसि मध्ये रेखामुदूहति । कैर्मन्त्रैः ? "भूर्भुवस्सुवः" "राकामहं सुहवाम्" "यास्ते राके सुमतयः" इत्येतैर्मन्त्रैः । चकारो बहुमन्त्रज्ञापनार्थः ॥३॥

▼

⑤

>

परिषेचनान्तं कृत्वा ऽपरेणाग्निं प्राचीम् उपवेश्य त्रेण्या शलल्या त्रिभिर् दर्भ-पुञ्जीलैश् शलालु-ग्लप्सेनेत्य् ऊर्ध्वं सीमन्तम् उन्नयति व्याहृतीभिर् उत्तराभ्यां च ।

# १४ ०४ 'गायतम्' इति②

गायतम् इति वीणा-गाथिनौ संशास्ति ॥

▼

⑤

>

▼ Oldenberg

4. He says to two lute-players, 'Sing!'

▼ हरदत्तः

वीणया यो गाथां गायति स **वीणगाथी** । तावुभौ प्रागेवानीतौ भवतः । तौ **संशास्ति** संप्रेष्येति– **गायतमिति** । तौ गायतः । तत्र ऋङ्नियमः ॥४॥

▼ सुदर्शनः

वीणया गाथां गायत इति **वीणागाथिनौ** । तौ **गायतमिति संशास्ति** संप्रेष्यति ॥४॥

▼

⑤

>

'गायतम्' इति वीणागाथिनौ सँशास्ति ॥

# १४ ०५ उत्तरयोः पूर्वा②

उत्तरयोः पूर्वा साल्वानां ब्राह्मणानामितरा ।

यौग॑न्धरिर् ए॒व नो॒ राजेति॒ साल्वी॑र् अवादिषुः ।
विवृ॑त्तचक्रा॒ आसी॑ना॒स् तीरे॑ण यमु॒ने तव॑ ।

▼

⑤

>

▼ Oldenberg

5. Of the next two (verses, II, 11, 11. 12) the first (is to be sung on this occasion) among the (people of the) Sālvas.

▼ हरदत्तः

**उत्तरयोः** ऋचोः या **पूर्वा** "यौगन्धरिर्" इत्येषा । सा **साल्वानां** सीमन्तकर्मणि गाथा साल्वदेशनिवासिनां अस्यामृचि गानं कर्तव्यमित्यर्थः । स देशो यमुनातीरे भवति । वैश्याश्च तत्र भूयिष्ठं भवन्ति । तेषामेव राजा यौगन्धरिः ॥६॥ **इतरा** "सोम एव नो राजा" इत्येषा । न सर्वेषां ब्राह्मणानामपि तु साल्वानाम् ॥५॥

▼ सुदर्शनः

**उत्तरयोः** ऋचोः वीणागाथिनौ गायेताम् । केषां कतरा गाथा? इत्यत आह **पूर्वेति** । **पूर्वा** "यौगन्धरिः"इत्येषा । साल्वदेशीयानां त्रयाणां वर्णानामपि गाथा ; "साल्वीः" इत्यविशेषलिङ्गात् । अन्यदेशवासिनां **ब्राह्मणानामितरा** "सोम एव नो राजा" इत्येषा । क्षत्रियवैश्यानां तु "सोमो नो राजाऽवतु मानुषीः प्रजाः" (आश्व. गृ. १-१२-७.) इत्याश्वलायनीये दृष्टायां सार्ववर्णीक्यामृचि गानं कर्तव्यम् । न तु गानाभावः । गायतमित्यविशेषेण संशासनविधानात् । केचित्—साल्वानामपि ब्राह्मणानामितरेति ॥५॥

▼

⑤

>

उत्तरयोः पूर्वा साल्वानां ब्राह्मणानामितरा ।

# १४ ०६ नदीनिर्देशश्च यस्याम्②

*(अन्येषाम् - "सोम एव नो राजा" इत्येषा।)* नदी-निर्देशश्च यस्यां वसन्ति ॥

सोम॑ ए॒व नो॒ राजेत्य्
आ॑हुर्ब्राह्म॒णीः प्र॒जाः ।
विवृ॑त्त-चक्रा॒ आसी॑ना॒स्
तीरे॑णासौ॒ *(→उपजीव्यनदीनाम)* तव॑ ।

▼

⑤

>

▼ Oldenberg

6. 1 The second (is to be used) for Brāhmaṇas; and the river near which they dwell is to be named.

▼ हरदत्तः

द्वितीये मन्त्रे असौ शब्दस्य स्थाने नद्या नाम संबुध्या निर्देष्टव्यम् । यस्यां वसन्ति यामुपजीवन्तीत्यर्थः । यथा–तीरेण कावेरि तवेति । क्षत्रियाणां तु सर्वेषां कल्पान्तरदृष्टायां सार्ववर्णिक्यामृचि गानं भवति । "सोम एव नो राजेत्याहुर्मानुषीः प्रजाः । विवृत्तचक्रा आसीना" इति । अत्रापि नदीनिर्देशस्सम्बुध्या ॥६॥

▼ सुदर्शनः

"सोम एव नो राजा" इत्यस्वां असावित्यस्य स्थाने "कावेरि" "वेगवति" इति सम्बुध्या **नदीनिर्देशश्च** भवति । कस्या नद्याः? इति चेत् **यस्यां वसन्ति"** समीपसप्तमी चेयम् । यस्यास्समीपे वसन्ति तस्या निर्देश इत्यर्थः ॥६॥

▼

⑤

>

नदीनिर्देशश्च यस्यां वसन्ति ।

# १४ ०७ यवान् विरूढानाबध्य②

*(पूर्वमेवैतदर्थम् उप्तान्)* यवान् विरूढान् *(शिरसि वध्वाः)* आबध्य,
*(वधूर्)* वाचं यच्छत्य् आनक्षत्रेभ्यः ॥

▼

⑤

>

▼ Oldenberg

7. 2 He ties barley-grains with young shoots (to the head of the wife); then she keeps silence until the stars appear.

▼ हरदत्तः

**विरूढान्** अङ्कुरितान् सूत्र-बद्धान् आबध्नाति शिरसि वध्वाः । सैव वाचं यच्छति । एवम् उपदेशो भोजनञ् चास्यास्मिन्न् अहनि नेच्छन्ति । यवाश् च प्रागेव वप्तव्याः यथास्मिन् काले विरूढा भवन्ति ॥७॥

▼ सुदर्शनः

अङ्कुरितान् सूत्र-ग्रथितान् **यवान्** वध्वाश् शिरस्याबध्नाति । शिरसीति कुतः? आचारात् ॥७॥

▼

⑤

>

यवान् विरूढानाबध्य वाचं यच्छत्यानक्षत्रेभ्यः ।

# १४ ०८ उदितेषु नक्षत्रेषु②

उदितेषु नक्षत्रेषु प्राचीम् उदीचीं वा दिशम् उपनिष्क्रम्य
वत्सम् अन्वारभ्य
व्याहृतीश् च जपित्वा
वाचं विसृजेत् ॥

▼

⑤

>

▼ Oldenberg

8. When the stars have appeared, he goes (with his wife) towards the east or north, touches a calf, and murmurs the Vyāhṛtis; then she breaks her silence.

▼ हरदत्तः

**वत्सः** पुमान् गौश्च भवति । व्याहृतयस्समस्ताः याजमानसमाम्नायात् प्रत्येतव्याः ॥८॥

▼ सुदर्शनः

विस्पष्टार्थम् । इह केचिद् अध्येतारो "यच्छतो" "विसृजत" इति द्विवचने पठन्ति । तस्मिन् पक्षे वाग्-यमनादि-पदार्थ-पञ्चकम् उभौ जायापती कुरुतः । केचित्– यवाबन्धनादि सर्वं वधूर् एव ; न पतिर् इति ॥८॥
▼

⑤

>

उदितेषु नक्षत्रेषु प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य वत्समन्वारभ्य व्याहृतीश्च जपित्वा वाचं विसृजेत् ।

---

1. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

2. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

# १२ पुंसुवनम्①

# १४ ०९ पुँसवनं व्यक्ते②

पुँसवनं व्यक्ते गर्भे तिष्येण ।

पुँ सुवनंम् असि ।

▼

### ⑤

>

▼ Oldenberg

9. The Puṃsavana (i.e. the ceremony to secure the birth of a male child) is performed when the pregnancy has become visible, under the constellation Tiṣya.

▼ हरदत्तः

पुमान् येन सूयते **तत्पुंसुवनं** नाम कर्म । उवङादेशश्छान्दसः । मन्त्रदर्शनात् पुंसुवनमसीति । आश्वलायनस्तु गुणमेव प्रायुङ्क्त । तत्, **व्यक्ते गर्भे** कर्तव्यम् । गर्भव्यक्तिश्च तृतीये चतुर्थे वा मासि । यदापि चतुर्थे तदा सीमन्तात् पूर्वमेव पुंसवनम् । निमित्तस्य पूर्वत्वात् । पश्चादुपदेशस्य तु प्रयोजनं वक्ष्यामः । **तिष्येण** तच्च तिष्ये कर्तव्यम् । "नक्षत्रे च लुपी"ति अधिकरणे तृतीया ॥९॥

▼ सुदर्शनः

**पुंसुवनम्** इत्यपि कर्मनामधेयम्। येन कर्मणा निमित्तेन गर्भिणी पुमांसम् एव सूते तत् **पुंसवनम्** ।
व्याख्यायत इति शेषः ।

अत्र चोवङादेशश्छान्दसः ।

आश्वलायनस् तु "**पुँसवनम्**" इति सगुणमेव प्रायुङ्क्त ।

**व्यक्ते गर्भे** - अस्ति गर्भ इति निश्चिते । व्यक्तिश् च तृतीये चतुर्थे वा मासे ; बह्वृचादिषु स्मृत्य्-अन्तरेषूभयथा दर्शनात् ।

यदि पुंसवनं चतुर्थे स्यात् - तदा पूर्वं सीमन्तं कृत्वैव ।
कुत एतत्? पुंसवने पश्चात् क्रियमाणे ऽपि चोदित-कालानतिक्रमात्, पश्चान् मन्त्राम्नान-सूत्रोपदेशयोर् एवं-क्रमार्थत्वाच् च ।

केचित्— तृतीयवच् चतुर्थेऽपि सीमन्तवत् प्रथम-गर्भ एव, न तु प्रतिगर्भम् ; पिष्ट-पेषण-न्यायाद् एव । एतच् च पुमांसं जनयतीत्य् अत्र विवेचयिष्यते ।

**तिष्येण** - तिष्य-नक्षत्रे पुंसवनं कर्तव्ययम् इति व्यवहितेन सम्बन्धः ; "प्रकरणात् प्रधानस्य" इति न्यायात् । शुङ्गाहरणे त्वनियमः ॥

▼

### ⑤

>

पुँसवनं व्यक्ते गर्भे तिष्येण ।

# १४ १० न्यग्रोधस्य या②

न्यग्रोधस्य या प्राच्युदीचीं वा शाखा ततस्सवृषणां शुङ्गामाहृत्य सीमन्तवदग्नेरुपसमाधानादि ॥

▼

⑤

>
▼ Oldenberg

10. From a branch of a Nyagrodha tree, which points eastward or northward, he takes a shoot with two (fruits that look like) testicles. The putting (of wood) on the fire, &c., is performed as at the Sīmantonnayana (Sūtra 2).

▼ हरदत्तः

**न्यग्रोधस्य** वृक्षस्य **या प्राची शाखोदीची वा** तस्याः **शुङ्गाम्** अग्राङ्कुरं **सवृषणां** फलं वृषणमिति व्यपदिश्यते सादृश्यादेव । तद्वतीं शुङ्गामाहृत्य सीमन्तवदग्नेरुपसमाधानादि परिषेचनान्तं कर्म प्रतिपद्यते । अग्नेरुपसमाधानादिवचनात्ततः पूर्वं ब्राह्मणभोजनमाशीर्वचनं च न भवति । अन्ते तु भवति "शुचीन्मन्त्रवतस्सर्वकृत्येषु भोजये"दिति । तथा यत् परिषेचनादूर्ध्वं संशासनादि तदपि न भवति । अपरेणाग्निं प्राचीमिति पुनरिहोपदेशात् । तत्रप्रयोगः–पूर्वेद्युर्नान्दीश्राद्धम् । अपरेद्युरग्नेरुपसमाधानादि सकृत्पात्रप्रयोगः । शुङ्गया सह परिधय एव, न शम्याः । आज्यभागान्ते ऽन्वारब्धायां "धाता ददातु नो रयिम्" इति चतस्रो यस्त्वा हृदा कीरिणेति चतस्रः । जयादि प्रतिपद्यते । परिषेचनान्ते ततो वक्ष्यमाणं कर्म ॥१०॥

▼ सुदर्शनः

**सवृषणां** वृषणाकृतिकेन फलद्वयेन संयुक्तां, **शुङ्गां** अग्राङ्कुरम् । व्यक्तमन्यत् । अत्र च सीमन्तवदग्नेरुपसमाधानादीत्यतिदेशात् ब्राह्मणभोजमाशीर्वचनं च तन्त्रात् पुरस्तान्निवर्तते । कर्मान्ते तु भवत एव । शुचीन् मन्त्रवतस्सर्वकृत्येषु भोजयेत् , (आप. ध. २-१५-११.) इति सामान्यवचनात्, "लोके च भूतिकर्मस्वेतदादीन्येव वाक्यानि स्युर्यथापुण्याहं स्वस्तिऋद्धिमिति वाचयित्वा" (आप. ध. १-१३-९.) इति वचनाच्च । पात्रप्रयोगे च शुङ्गादीनां कर्मोपयुक्तानां सकृदेव सादनम् । तथात्र परिधय एव, न तु शम्याः ; "शम्याः परिध्यर्थे" इति चौलगोदानग्रहणात् । तथैव "सीमन्तवदग्नेरुपसमाधानादि" इत्यादिना परिषेचनान्तकल्पातिदेशस्य विवक्षितत्वादिहापि त एवाष्टौ प्रधानहोमाः ॥१०॥

▼

⑤

>

न्यग्रोधस्य या प्राच्युदीची वा शाखा ततस्सवृषणां शुङ्गामाहृत्य सीमन्तवदग्नेरुपसमाधानादि ।

# १४ ११ अनवस्नातया कुमार्या②

अनवस्नातया कुमार्या दृषत्पुत्रे दृषत्पुत्रेण पेषयित्वा परिप्लाव्यापेरणाग्निं प्राचीमुत्तानां निपात्योत्तरेण यजुषाऽङ्गुष्ठेन दक्षिणे नासिकाच्छिद्रेऽपि नयति ।

▼

⑤

>
▼ Oldenberg

11. He causes a girl who has not yet attained maturity to pound (the Nyagrodha shoot) on an upper mill-stone with another upper mill-stone, and to pour water on it; then he makes his wife lie down on her back to the west of the fire, facing the east, and inserts (the pounded substance) with his thumb into her right nostril, with the next Yajus (II, 11, 13).

▼ हरदत्त-प्रस्तावः

अथ समाप्ते तन्त्रशेषे कर्तव्यमाह—

▼ हरदत्तः

यस्याः प्रादुर्भूतं रजः सा अवस्नाता । तद्विपरीता **अनवस्नाता** । एवंभूता कन्या कर्त्री पेषणस्य । प्रयोजकः पतिः । उपलो दृषत्पुत्रः । दृषदर्थेऽपि दृषत्पुत्र एव । तत्र शुङ्गां पेषयित्वा वस्त्रेण परिप्लाव्य अपरेणाग्निं **प्राचीं** प्राङ्मुखीं **उत्तानां** ऊर्ध्वमुखीं, निपात्य शाययित्वा **उत्तरेण यजुषा** "पुंसुवनमसी"त्यनेन तं रसं अङ्गुष्ठेन तस्या नासिकाच्छिद्रे दक्षिणे **अपिनयति** अपिगमयति । प्राङ्मुख एव । (पिधाय नयनं स्वयं च प्राङ्मुखः) ॥११॥

▼ सुदर्शनः

स्नाननिमित्तस्य रजसोऽनुत्पन्नत्वात् या न स्नाता तया **अनवस्नातया** कन्यया दृषदर्थापन्ने **दुषत्पुत्रे** शुङ्गां निधाप्य **दृषत्पुत्रान्तरेण** पेषयित्वा तद्रसं वस्त्रेण **प्लावयित्वा** ततो जायामपरेणाग्निं **प्राचीं** प्राक्छिरसं **उत्तानाम्** ऊर्ध्वमूखीं, **निपात्य** शाययित्वा । "पुंसुवनमसि" इति यजुषा **दक्षिण नासिकाछिद्रे अङ्गुष्ठेन** करणभूतेन तद्रसम् **अपिनयति** गर्भं प्रापयति । सा रसं न निष्ठीवेदित्यर्थः ॥११॥
▼

⑤

>

अनवस्नातया कुमार्या दृषत्पुत्रे दृषत्पुत्रेण पेषयित्वा परिप्लाव्यापेरणाग्निं प्राचीमुत्तानां निपात्योत्तरेण यजुषाऽङ्गुष्ठेन दक्षिणे नासिकाच्छिद्रेऽपि नयति ।

# १४ १२ पुमाँसञ् जनयति②

पुमाँसं जनयति ।

▼

⑤

>
▼ Oldenberg

12. Then she will give birth to a son.

▼ हरदत्तः

एवमनेन कर्मणा संस्कृता स्त्री **पुमासं जनयति ।**

केचिद् अर्थवादम् इदं मन्यन्ते । फलविधौ काम-संयोगेन क्रियाया अनित्यत्व-प्रसङ्गात् ।

यद्य् अर्थवादः प्रति-गर्भम् आवृत्ति-प्रसङ्गः ।

एवं तर्हि **प्रथमे गर्भे** इत्य् अनुवर्तते । एवम्-अर्थम् एव चास्य पश्चाद्-उपदेशः ।
व्यक्तं चैतच् छन्दोगानां– प्रथमे गर्भे तृतीये मासि पुंसवनम् इति ।

अन्ये फलविधिं मन्यन्ते । तत्र च "एष वा अनृणो यः पुत्री"ति (तै.सं-६-३-१४) वचनात् पुत्रस्य सकृद् उत्पादनं नित्यम् इति - यावद् एकः पुत्र उत्पद्येत, तावद् गर्भेषु भवति । ऊर्ध्वं तु पुत्रेच्छायां सत्यां भवति। दुहितुर् ईप्सायां न भवति ।

प्रथम-ग्रहणं च नानुवर्तते, पुनर्-गर्भ-ग्रहणात् । पुंसवनस्य तु पश्चाद् उपदेशो यथा चतुर्थे मासि तत्क्रियते तस्य पश्चात् प्रयोगार्थ इति ॥१२॥

▼ सुदर्शनः

कर्मणानेन संस्कृता अन्तर्वत्नी **पुमांसं जनयति** इत्य् अर्थवादः - नित्यत्वात् पुंसुवनस्य ।

अथवा फलम् - सूत्रकारेणोपदिष्टत्वात् ; यथा - "सहस्रं तेन काम-दुघो ऽवरुन्धे" इति ।

फलपक्षे ऽपि "एष वा अनृणो यः पुत्री" इत्य्-आदिवचनैस् सकृद् अपि पुत्रोत्पादनस्य अवश्य-कर्तव्यत्वात्, तद्-अङ्गं पुंसवनं प्रथमे गर्भे कर्तव्यम् एव ।
तत ऊर्ध्वं तु - यत्र यत्र गर्भे पुत्रेप्सा तत्र तत्र कर्तव्यं नाऽन्यत्र ।

यस् त्व् अतिक्रान्त-चोदनः स्त्रीर् एव जनयेयम् इति कामयते तस्य सकृद् अपि न भवति ।

अन्ये तु– पुमांसं जनयतीत्य् एतद्-वचनं गर्भे गर्भेऽस्य कर्तव्यता-परम् इति ॥१२॥
▼

**⑤**

>

पुमाँसं जनयति ।

# १४ १३ क्षिप्रँ सुवनम्②

क्षिप्रँ सुवनम् ।

▼

**⑤**

>
▼ Oldenberg

13. Here follows the ceremony to secure a quick deliverance.

▼ हरदत्तः

येन कर्मणा क्षिप्रं सूयते तत् **क्षिप्रंसुवनं** नाम कर्मोच्यते ॥१३॥

▼ सुदर्शनः

येन **क्षिप्रं** शीघ्रं सूतेऽन्तर्वत्नी न चिरं कालं पीड्यते तत् **क्षिप्रंसुवनं** नाम इति कर्मोपदिश्यते ॥१३॥

▼

**⑤**

>

क्षिप्रँ सुवनम् ।

# १४ १४ अनाप्रीतेन②

अनाप्रीतेन शरावेणानुस्रोतसम् उदकम् आहृत्य, पत्तस् *(=पादयोः)* तूर्यन्तीं *(=ओषधिविशेषं)* निधाय, मूर्धञ् +शोष्यन्तीम् उत्तरेण यजुषा*(आभिष्ट्वाहं दशभिरभिमृशामि)* ऽऽभिमृश्य+, एताभिर् अद्भिरुत्तराभिर्*(यथैव सोमः पवते)* अवोक्षेत् ॥

*(अङ्गुलीभिर्)* आ॒भिष् ट्वा॒ ऽहं द॒शभि॑र् अ॒भिमृ॑शामि॒ - दश॒मास्या॑य॒ सूत॑वे ।*(२४)*

**मन्त्रः⑥**

- यथै॒व सोम॑ः पव॑ते॒ यथा॑ समु॒द्र एज॑ति ।
  ए॒वन्ते गर्भ॒ एज॑तु स॒ह ज॒रायु॑णा नि॒ष्क्रम्य॒ प्रति॑तिष्ठतु ।
  आयु॑षि ब्रह्मवर्च॒सि य॒शसि॑ वी॒र्ये॑ऽन्नाद्ये॑ ।

यथै॒व सोम॑ः पव॑ते॒, यथा॑ समु॒द्र एज॑ति*(=कम्पते)*,
ए॒वन्ते गर्भ॒ एज॑तु।
स॒ह ज॒रायु॑णा*(=गर्भवेष्टनेन)* नि॒ष्क्रम्य॒ प्रति॑तिष्ठतु - आयु॑षि ब्रह्मवर्च॒सि य॒शसि॑ ।

दश॒ मासा॒ञ् छश॑यानो
धा॒त्रा हि तथा॑ कृ॒तम् ।
ऐतु॒ गर्भो॒ अक्षि॑तो
जी॒वो जीव॑न्त्याः ।

आ॒यम॑नीर् यमयत॒ गर्भ॒म्
आपो॑ देवी॒स् सर॑स्वतीः ।
ऐतु॒ गर्भो॒ अक्षि॑तो
जी॒वो जीव॑न्त्याः ।

▼

⑤

>
▼ Oldenberg

14. With a shallow cup that has not been used before, he draws water in the direction of the river's current; at his wife s feet he lays down a Tūryantī plant; he should then touch his wife, who is soon to be delivered, on the head, with the next Yajus (II, 11, 14), and should sprinkle her with the water, with the next (three) verses (II, 11, 15-17).

▼ हरदत्तः

**अनाप्रीतेना**स्पृष्टोदकेनानु**स्रोतसं** उदकस्य प्रस्रवतो न प्रतीपम् । **पत्तः** पादयोरधस्तात् यस्याः श्वेतोपमानि पत्राणि पीतोपमानि पुष्पाणि या च मध्याह्ने पुष्यति सा तूर्यन्ती वनेषु जायते । वेणुपत्रोपमानि च यस्याः पत्राणि रक्तोपमानि च पुष्पाणि यां चाग्निशिखेत्याहुः । सा शोष्यन्ती तत् ओषधिद्वयं समूलपत्रमादाय सुश्लिष्टं निदधाति । **मुर्धन्** मुर्धनीत्यर्थः । अपरे पिष्ट्वा आलिम्पन्ति । अथ **तामुत्तरेण यजुषा** "आभिष्ट्वाहं दशभिरभिमृशामि" इत्यनेनाभिमृशति । दशभिरिति लिङ्गादुभाभ्यां पाणिभ्यामभिमर्शनम् अनुलोमं मुखादारभ्य तत एताभिराहृताभिरेवाद्भिस्तामवोक्षेत् । उत्तराभिस्तिसृभिः ऋग्भिः "यथैव सोमः पर्वत" इत्येताभिः प्रतिमन्त्रमवोक्षणम् ॥१४॥

▼ सुदर्शनः

**अनाप्रीतेन** अनुदकलिप्तेन अस्पृष्टोदकेनेत्यर्थः । तथाभूतेन **शरावेण । अनुस्रोतसं** स्रोतोऽनुलोमं न प्रतीपं गृहीतमुदकमाहृत्य । **पत्तस्**तस्याः पादयोः **तूर्यन्तीं** अधःपुष्पिताख्यामोषधिं निधाय । **शोष्यन्तीं** प्रसवपीडया शुष्यमाणां स्त्रियं "आभिष्ट्वाहं दशभिरभिमृशामि" इति यजुषोभाभ्यां हस्ताभ्याम् । **मूर्धन्** मूर्धन्य्" अभिमृश्य । **एताभिर्** आहृताभिर् **अद्भिः उत्तराभिः** "यथैव सोमः पवते" इत्यादिभिस्तिसृभिस्तां **सकृदेवावोक्षेत् ।** केचित्—प्रतिमन्त्रम् ; दृष्टोपकारत्वादिति । तत्र प्रथमाया ऋचः "प्रतितिष्ठतु" इत्यवसानम् । द्वितीयायाः "तथा कृतम्" इति । तृतीयायाः "सरस्वतीः" इति । अन्ये तु–शोष्यन्तीति चौषधिः । तां मूर्ध्नि निधाय स्त्रियं यत्र क्वचाभिमृशेदिति । तन्न; शोष्यन्तीसंज्ञाया ओषधेरप्रसिद्धत्वात् । केचित्—शोष्यन्तीनामौषधिः या वनेषु जायते, वेणुपत्रोपमानि च यस्याः पत्राणि, पुष्पाणि च रक्तोपमानि, यां चाग्निशिखेत्याहुरिति । तन्न; यतो वाच्यवाचकभावो नोपदेशगम्यः, यथाहुर्वार्तिककारपादाः— "वाच्यवाचकभावो हि नाचार्यैरुपदिश्यते । अन्यथानुपपत्त्या तु व्यवहारात्स गम्यते ॥ (तं.वा.१-३-९.) इति । इह तु व्यवहाराभावादेव विप्रतिपत्तिः । सा भाष्यकारादप्याप्ततमप्रणीताभिधानकोशेषु शोष्यन्तीशब्दस्याग्निशिखापरपर्यायतया पाठाच्छाम्यति । न च तथा दृश्यते । तस्माद्वरं पूर्वोक्तमेव व्याख्यानमिति ॥१४॥

▼

⑤

>

अनाप्रीतेन शरावेणानुस्रोतसमुदकमाहृत्य पत्तस्तूर्यन्तीं निधाय मूर्धञ्छोष्यन्तीमुत्तरेण यजुषाऽभिमृश्यैताभिरद्भिरुत्तराभिरवोक्षेत् ।

# १४ १५ यदि जरायु②

यदि जरायु न पतेदेवंविहिताभिरेवाद्भिरुत्तराभ्यामवोक्षेत् ।

तिल॒दे *(जरायो!)* ऽव॑पद्यस्व॒*(=अवपत)*, न माँ॒सम् अ॑सि॒, नोदल॑*(र)*म् ।*(र४)*

स्थ॒वि॒त्र्य् अव॑पद्यस्व॒, न माँ॒सेषु॒, न स्नाव॑सु॒*(=tendon)* न ब॒द्धम॑सि म॒ज्जसु॑ ।
निरै॑तु॒ पृश्नि॒*(=स्वल्परूपं)* शेव॑*(=सुख)*लँ शु॒ने ज॒राय्व् अ॒त्तवे॑ ॥ (11)

▼

⑤

>
▼ Oldenberg

15. Yadi jarāyu na pated evaṃvihitābhir evādbhir uttarābhyām (II, 11, 18. 19) avokṣet.

▼ हरदत्तः

**जरायु** गर्भावेष्ठनं,** तद् **यदि न पतेत्,** तत उत्तरो विधिः कर्तव्यः । कः पुनरसौ? क्षिप्रंसुवने यो विधिश्चोदितः "अनाप्रीतेन शरावेणे"त्यादि ( **एवं विहिताभिरद्भिः उत्तराभ्यां** मन्त्राभ्यां "तिलदेव पद्यस्व, निरै तु पृश्नि शेवलम्" इत्येताभ्यां प्रतिमन्त्रम् **अवोक्षेत्** । एते च कर्मणी स्वभार्याविषयौ ) यक्ष्मगृहीतामन्यां वेति कर्मान्तरे यत्नकरणात् । अन्ये पुनरविशेषेणेच्छन्ति ॥१५॥

▼ सुदर्शनः

**यदि** प्रसूतायास्तस्या **जरायु** गर्भप्रावरणं **न पतेत्** तदा "अनाप्रीतेन शरावेण" इत्यादिविधिनाऽहृताभिर् **अद्भिः** "ऐतु गर्भो अक्षितः" इत्येताभ्यामृग्भ्यां ताम् **अवोक्षेत्** । केचित्–प्रतिमन्त्रम् । तथा पूर्वस्मिन्नवोक्षणे षडवसानास्तिस्र ऋचः । इह तु "तिलदेव पद्यदेव पद्यस्व" इत्येका ऋक्; "निरैतु पृश्नि" इत्यपरं यजुरिति ॥१५॥

इति श्रीसुदर्शनाचार्यविरचिते गृह्यतात्पर्यदर्शने चतुर्दशः खण्डः समाप्तः ॥

▼

⑤

>

यदि जरायु न पतेदेवंविहिताभिरेवाद्भिरुत्तराभ्यामवोक्षेत् ।

# १३ जातकर्म①

# १५ ०१ जातं वात्सप्रेणाभिमृश्योत्तरेण②

जातं *(=जातमात्रम्, "प्राङ्नाभिवर्धनात्पुंसो जातकर्म विधीयते")* वात्सप्रेण *(=दिवसस्परीत्येषः)* +अभिमृश्य,

दिव॑स् प॒रि प्रथमं॑ **जज्ञे** अ॒ग्नि॑र्
अ॒स्म॑द् द्वि॒ती॑यम् प॒रि जा॒त॑वेदाः ।
तृ॒ती॑यम् अ॒प्सु॑ नृ-म॑णा अ॑जस्रम्
इ॑न्धान एनं **जरते** *(=स्तौति)* स्वाधीः॑ *(=सुप्रज्ञाता)* ।

*(प्रतिज्ञा+ऋक्। अग्रिमायाम् उत्तरम्।)*
वि॒द्मा॑ ते अग्ने त्रे॒धा॑ *(रूपाणि अग्नि-विद्युत्-सूर्यास्)* त्र॒या॑णि
वि॒द्मा॑ ते स॑द्म *(नानाकुण्डेषु)* वि॑भृतम् पुरु॒त्रा॑ *(=बहुधा)*।
वि॒द्मा॑ ते ना॑म पर॒मं॑ गु॑हा य॑द्
वि॒द्मा॑ त॑म् उ॑त्सं *(=fount)* य॑त आज॒ग॑न्थ ।

*(प्राक्तनाया विस्तारः!)* स॒मु॒द्रे॑ त्वा नृ॒म॑णा अ॒प्सु॑ अ॒न्त॑र्
नृ॒च॑क्षा *(=नृद्रष्टा)* ईधे *(=दीपयते)* दि॒वो॑ अग्न ऊ॑धन् *(=उधस्स्थानीये मेघे)* ।
तृ॒ती॑ये त्वा॑ र॑जसि *(=लोके)* तस्थि॒वाँ॑सम्
ऋ॒त॑स्य यो॑नौ महि॒षा॑ अहिन्वन् *(=बुद्धवन्तः)* ।

**अ॑क्रन्दद्** अ॒ग्निः॑ स्त॒न॑यन्निव द्यौः॑
क्षा॑मा *(=पृथिवीं)* **रे॑रिहद्** *(=आस्वादयन्)* वी॒रु॑धः *(={वृक्ष}गुल्मान्)* **सम॒ञ्ज॑न्** ।
स॒द्यो॑ **जज्ञा॒नो॑** *(दावानलः)* वि॑ ही॑म् **इ॒द्धो॑**
**अ॑ख्यद्** आ॑ रो॑दसी भा॒नु॑ना **भात्य्** अ॒न्तः॑ ।

उ॒शि॑क् *(=कामयिता)* पा॒व॒को॑ अ॒र॒तिः॑ *(=गन्ता)* सु॒मे॒धा॑
म॑र्तेष्व् अ॒ग्नि॑र् अ॒मृ॑तो नि॑धायि ।
इ॑यर्ति *(=गमयति)* धू॒म॑म् अ॒रु॒ष॑म् *(=महत्)* भ॑रिभ्रद्
उ॑च् छु॒क्रे॑ण शो॒चि॑षा द्या॑म् इ॑नक्षत् *(=दीपयत्)*।

वि॑श्वस्य के॒तु॑र् भु॒व॑नस्य ग॑र्भ
आ॑ रो॑दसी अपृणाज् *(=अपूरयत्)* जा॑यमानः ।
वी॒ळुं॑ *(=दृढं)* चिद् अ॑द्रिम् अभिनत् प॒रा॒य॑ञ् *(=परागच्छन्)*
ज॑ना य॑द् अ॒ग्नि॑म् अ॑यजन्त प॑ञ्च ।

श्री॒णा॑म् उ॒दा॒रो॑ **ध॒रु॑णो** र॒यी॒णा॑म्
म॒नी॒षा॑णाम् **प्रा॑र्पणः** सो॑म-गो॒पाः ।
व॑सोः सू॒नुः॑ स॑हसो अ॒प्सु॑ **रा॑जा** *(=दीप्यमानः)*
वि॑ **भात्य्** अ॑ग्र उ॒ष॑साम् **इ॒धा॒नः॑** ।

य॑स् ते अ॒द्य॑ **कृ॒ण॑वद्** भद्रशोचे
ऽपू॒पं॑ देव घृ॒त॑वन्तम् अग्ने।
प्र॑ तं॑ **नय** प्र॒त॒रां॑ *(=नितरां)* व॑स्यो *(=वसीयः)*
अ॑च्छाभि॑ द्यु॒म्नं॑ *(=धनं)* दे॒व॑भक्तं यविष्ठ ।

आ॑ त॑म् **भज** सौश्रव॒से॑ष्व् *(स्वन्नेषु [यागेषु])* अग्न
उ॒क्थ॑-उक्थ आ॑ **भज** श॒स्य॑माने ।
प्रि॒यः॑ सू॑र्ये प्रि॒यो॑ अ॒ग्ना॑ **भवात्य्**
उ॑ज् जा॒ते॑न *(पुत्रादिना)* **भि॒न॑दद्** *(=उद्भिद्य प्रकाशताम्)* उ॑ज्ज॑नित्वैः *(=जनिष्यमाणैः)*।

त्वा"म् अग्ने य"जमाना अ"नु द्यू"न्
वि"श्वा व"सूनि **दधिरे** वा"र्याणि *(=वरणीयानि)* ।
त्व"या सह" द्र"विणम् **इच्छ"माना**
व्रजं" गो"मन्तम् उशि"जो *(=मेधाविनो)* वि" **वव्रुः** ।

**दृशानो**" रुक्म" *(=रोचमानः)* उर्व्या" *(=महत्या)* **व्य"द्यौद्,**
दुर्म"र्षम् आ"युः श्रिये" **रुचानः"** ।
अग्नि"र् अमृ"तो **अभवद्** व"योभिर्
य"द् एनं द्यौ"र् **अ"जनयत्** सुरे"ताः ॥

## उपस्थ आधानम्⑥

उत्तरेण यजुषोपस्थ आधाय *(="अस्मिन्नह"मित्यनेन),*

अ॒स्मिन्न॒हँस॒हस्रं॑ पुष्या॒म्येध॑मान॒स् स्वे वशे॑ ।

## अभिमन्त्रणम्⑥

उत्तराभ्याम् *("अङ्गादङ्गाद्" इति)* अभिमन्त्रणं ,

अङ्गा॑दङ्गा॒त्संभ॑वसि॒ हृद॑या॒दधि॑ जायसे ।
आ॒त्मा वै पु॒त्रनामा॑ऽसि॒ स जी॑व श॒रद॑श्श॒तम् ।

## मूर्धन्यवघ्राणम्⑥

*("अश्मा भवे"ति)* मूर्धन्यवघ्राणं,

अश्मा॑ भव प॒रशुर्भ॑व॒ हिर॑ण्य॒मस्तृ॑तं भव ।
प॒शू॒नान्त्वा॑ हिङ्का॒रेणा॒भि जिं॑घ्राम्य् असौ*(→नामनिर्देशः)*।

## दक्षिणकर्णे-जपः⑥

*("मेधां त" इति)* दक्षिणे कर्णे जापः १

मे॒धान् ते॑ दे॒वस् स॑वि॒ता
मे॒धान् दे॒वी सर॑स्वती ।
मे॒धान् ते॑ अ॒श्विनौ॑ दे॒वाव्
आध॑त्तां॒ पुष्क॑रस्रजा ।

▼

⑤

>

▼ Oldenberg

1. 1 After he has touched the new-born child with the Vātsapra hymn (Taitt. Saṃh. IV, 2, 2; M. II, 11, 20), and has taken him on his lap with the next Yajus (M. II, II, 21), with the next (three) (verses - II, 11, 22; 12, 1. 2 - one by one) he addresses the child, kisses him on his head, and murmurs (the third verse) into his right ear.

▼ हरदत्तः

जातमिति पुल्लिङ्गस्य विवक्षितत्वात् पुंस एवायं जातकर्माख्यः संस्कारः । न स्त्रियाः । वत्सप्रीर्नाम ऋषिः । तेन दृष्टं **वात्सप्रं** दिवस्परीत्येषोऽनुवाकः । प्रत्यृचमभिमर्शनम् । सर्वान्त इत्यन्ये । **उत्तरेण यजुषा** "अस्मिन्नहम्" इत्यनेन । उत्तरत्र मातुरिति विशेषणादिह स्व उपस्थ आदधाति । उत्तराभिरिति पाठः । उत्तराभिः तिसृभिः ऋग्भिः अभिमन्त्रणादीनि त्रीणि कर्तव्यानि । "अङ्गादङ्गाद्" इत्यभिमन्त्रणम् । "अश्मा भवे"ति मूर्धन्यवघ्राणम् । "मेधां त" इति दक्षिणे कर्णे जापः । जप इत्यर्थः । केचित्तु उत्तराभ्यामिति द्विवचनान्तपाठमाश्रित्य द्वयोर्मन्त्रयोः त्रिष्वपि कर्मसु विनियोगं मन्यन्ते । तेषामवघ्राणलिङ्गेनाभिमन्त्रणं कर्णयोर्जपश्च प्राप्नोति । आश्वलायनश्चाह– कर्णयोरुपनिधाय मेधाजननं जपति मेधां ते देवस्सवितेति (आश्व.श्रौ.१-१३-२.) ॥१॥

▼ सुदर्शनः

**जातं** जातमात्रम्, प्राङ्नाभिवर्धनात् पुंसो जातकर्म विधीयते ॥ (मनु.२-२९.) इति वचनात् । एतच्चोपरिशोध्यते । जातं कुमारं पिता वात्सप्रेण "दिवस्परि" (तै.सं.४-२-२.) इत्यनुवाकेन अन्ते सकृदभिमृश्य "अस्मिन्नहम्" इत्यनेन यजुषा स्वस्योपस्थे तम् **आधाय, उत्तराभ्यां** "अङ्गादङ्गात्" "अश्मा भव" इति द्वाभ्यां तस्या**भिमन्त्रणं** कर्तव्यम्, तथैव ताभ्यामेव मूर्धन्यवघ्राणम्, एतयोरेवर्चोः दक्षिणे कर्णे **जापो** जप इत्यर्थः । वचनबलाच्च जपाभिमन्त्रणयोरवघ्राणलिङ्गबाधः । अभिधानं तु जातसंस्कारक्रियासामान्यात् । एतच्च "तीर्थस्थाणुचतुष्पथव्यतिक्रमे" (आप.गृ.५-२६.) इत्यत्रोपपादितम् । केचित्— उत्तराभिरिति पाठो, नोत्तराभ्यामिति । तेन "अङ्गादङ्गात्" इत्यभिमन्त्रणम् । "अश्मा भव" इत्यवघ्राणम् । "मेधां ते देवः" इति जपः । अत एवाश्वलायनः— "कर्णयोरुपनिधाय मेधाजननं जपति "मेधां ते देवस्सविता" इति" । मधुघृतप्राशनं तु "त्वयि मेधाम्" इति यजुर्भिरेव त्रिभिरिति । तन्न; अनधीयमानपाठाङ्गीकारे अतिप्रसङ्गात् ॥१॥
▼

⑤

>

जातं वात्सप्रेणाभिमृश्योत्तरेण यजुषोपस्थ आधायोत्तराभ्यामभिमन्त्रणं मूर्धन्यवघ्राणं दक्षिणे कर्णे जापः ।

# १५ ०२ नक्षत्रनाम च②

*("अभिजिघ्राम्यसौ")* नक्षत्रनाम च निर्दिशति २

▼

⑤

>
▼ Oldenberg

2. And he gives him a Nakṣatra name.

▼ हरदत्तः

अभिजिघ्राम्यसौ इत्यत्रासौशब्दस्य स्थाने नक्षत्रनामनिर्देशः । तत्संबुध्या निर्दिशेत्–पशूनां त्वा हिंकारेणाभिजिघ्राम्याश्वयुजेत्यादि । तत्र नक्षत्रशब्देषु जातार्थे रूपनिर्णयार्थः श्लोकः—

▼ सुदर्शनः

कुमारस्व यन्नक्षत्रजननाद्यन्नाम तच्च रौहिण्येत्यादिसम्बुद्ध्या असौशब्दस्य स्थाने निर्दिशति । अत्र चायमशिक्षितव्याकरणशास्त्राणां रूपज्ञानाय सूत्रस्य श्लोकः— रोरेममृज्येचिषु वृद्धिरादौ ष्ठात्पे च वान्त्यश्रवशाश्वयुक्षु । शेषेषु नाम्वोः कपरस्स्वरोऽन्त्यः स्वाप्वोरदीर्घस्सविसर्ग इष्टः ॥

अस्यार्थः—रोहिणी रेवती मघा मृगशीर्षा ज्येष्ठा चित्रा—इत्येतेषु आद्यक्षरनिर्दिष्टेषु आदौ वृद्धिर्भवति, "नक्षत्रेभ्यो बहुलम्, (पा.सू.४-३-३७.)इति बहुलग्रहणाज्जातार्थप्रत्ययस्य च लुगभावः । रूपं च रौहिणः रैवतः मार्गशीर्षः ज्येष्ठः चैत्रः इति । ष्ठात्पे च, प्रोष्ठपदेत्यत्र ष्ठकारात्परे च वृद्धिः । "जे प्रोष्ठपदानाम्" (पा.सु.७-३-१८.) इत्युत्तरपदवृद्धिरित्यर्थः । पूर्ववच्च लुगभावः प्रोष्ठपादः । वान्त्यश्रवशाश्वयुक्षु । अन्त्यमाम्नानतः अपभरणीरित्यर्थः । श्रवः श्रवणं शतभिषक् अश्वयुक् इत्येतेषु चतुर्षु वा विकल्पेन वृद्धिः । अत्र च श्रवणापभरण्योः बहुलग्रहणादेव लुको विकल्पः । अश्वयुक्छतभिषजास्तु "वत्सशालाभिजिदश्वयुक्छतभिषजो वा" (पा.सू.४-३-३६.) इति सूत्रेण । अपभरणः आपभरणः । श्रवणः श्रावणः । शतभिषक् शातभिषजः । अश्वयुक् आश्वयुजः । शेषेषु न, उक्तादन्येषु नक्षत्रेषु न वृद्धिः । यतोऽत्र "श्रविष्ठाफल्गुन्यनूराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुलाल्लुक्" (पा.सू.४-३-३४.) इत्यनेन, "नक्षत्रेभ्यो बहुलम्" इत्यनेन च लुगेव भवति । "लुक्तद्धितलुकि" (पा.सू.१-२-४९.) इति स्त्रीप्रत्ययनिवृत्तिः । कृत्तिकः तिष्यः आश्रेषः फाल्गुनः हस्तः विशाखः अनूराधः आषाढः श्रविष्ठः । आम्वोः कपरः स्वरोऽन्त्यः, आर्द्रमूलयोरन्त्यः स्वरः कशब्दपरो भवति । पूर्वाह्णापराह्णार्द्रामूला" इत्यादिना उञ्प्रत्यय इत्यर्थः । आर्द्रकः मूलकः । स्वाप्वोरदीर्घस्सविसर्ग इष्टः, स्वाप्वोः स्वातीपुनर्वस्वोरन्त्यस्वरो दीर्घस्सविसर्गश्चेष्टः । "श्रविष्ठाफल्गुनी" इत्यादिना लुक् । सविसर्गत्वं च पूर्वस्य स्त्रीप्रत्ययस्यनिवृत्तौ हल्ङ्यादिलोपाभावात् । उत्तरस्य तनुवदुकारान्तत्वात् । स्वातिः पुनर्वसुः । एवं सर्वेषां नक्षत्रनाम्नां प्रथमया निर्देशः सूक्तवाके । जातकर्मणि पुनस्सम्बुद्ध्या ॥२॥

▼

⑤

>

नक्षत्रनाम च निर्दिशति ।

# १५ ०३ तद्रहस्यम् भवति②

तद्रहस्यं भवति *(सूक्तवाकाभिवादनादिष्वपि!)*[३]

▼

⑤

>

▼ Oldenberg

3. That is secret.

▼ हरदत्तः

नक्षत्रनाम **रहस्यं** भवति । यथा परे न जानन्ति तथा वक्तव्यमित्यर्थः । सूक्तवाकादिष्वप्येवमेव ॥३॥

▼ सुदर्शनः

नक्षत्रनाम च **रहस्यं** निर्देशेदिति सूत्रे प्रणेतव्ये सूत्रान्तरकरणात् यत् नामनक्षत्रनिबन्धनं, यच्च दशम्यां कृतं तदुभयं सूक्तवाकान्नप्राशनाभिवादनादिषु नित्यं रहस्यमेव निर्देश्यं भवति ॥३॥

▼

⑤

>

तद्रहस्यं भवति ।

# १५ ०४ मधु घृतमिति②

मधु घृतम् इति संसृज्य
तस्मिन् दर्भेण हिरण्यं निष्टर्क्य *(= शिखाबन्धनवत्सरन्ध्रेण ग्रन्थिना)*,
बध्वा
ऽवदाय
+उत्तरैर् मन्त्रैः *("त्वयि मेधाम्" इति)* कुमारं प्राशयित्वा,

त्वयि॑ मे॒धां त्वयि॑ प्र॒जां
त्वय्य् अ॒ग्निस् तेजो॑ दधातु ।
त्वयि॑ मे॒धां त्वयि॑ प्र॒जां
त्वयीन्द्र॑ इन्द्रि॒यं द॑धातु ।
त्वयि॑ मे॒धां त्वयि॑ प्र॒जां
त्वयि॒ सूर्यो॒ भ्राजो॑ दधातु ।

## स्नापनम्⑥

## प्रतिज्ञा⑥

उत्तराभिः पञ्चभिस् *(="ऽक्षेत्रियै त्वे"त्यादिभिः)* स्नापयित्वा,

क्षे॒त्रि॒यै *(=अचिकित्स्यव्याधेः)* त्वा॒ निर्ऋ॑त्यै त्वा..
द्रु॒हो मु॑ञ्चामि॒ वरु॑णस्य॒ पाशा॑त् ।
अ॒ना॒गसं॒ ब्रह्म॑णे त्वा करोमि
शि॒वे ते॒ द्यावा॑पृथि॒वी उ॒भे इ॒मे ।

## शान्तिवचनम्⑥

शन् ते॑ अ॒ग्निस् स॒हाद्भिर् अ॑स्तु॒
शं द्यावा॑पृथि॒वी स॒हौष॑धीभिः ।
शम् अ॒न्तरि॑क्षँ स॒ह वाते॑न ते॒
शन् ते॒ चत॑स्रः प्र॒दिशो॑ भवन्तु।

या दैवी॒श् चत॑स्रः प्र॒दिशो॒ वात॑-पत्नीर्,
अ॒भि सूर्यो॑ विच॒ष्टे *(=विपश्यति)* ।
तासा॑न् त्वा ऽऽज॒रस॒ आ द॑धामि॒।
प्र यक्ष्म॑ एतु॒ निर्ऋ॑तिं परा॒चैः *(=प्राङ्मुखः)* ।

## अवर्तिनिवारणम्⑥

अमो॑चि॒ यक्ष्मा॑द् दुरि॒ताद् अव॑र्त्यै *(=आपत्तः)*।
द्रु॒हः पाशा॒न् निर्ऋ॑त्यै॒ च+उद॑मोचि ।
अहा॒ *(=अहासीत्)* अव॑र्ति॒म् *(=दारिद्र्यम्)*, अवि॑दत् स्यो॒नम् *(=सुस्वम्)*।
अप्य॑भूद् भ॒द्रे सु॑कृ॒तस्य॑ लो॒के ।

## सूर्यग्रहणमोक्षनिदर्शनम्⑥

/devaH/lokAntaram/images/solar_eclipse_receeding.jpg

सूर्य॑म् ऋ॒तन् *(=प्राप्तम्)* तम॑सो॒ ग्राह्या॒<br>
यद् दे॒वा अमु॑ञ्च॒न्नसृ॑ज॒न् व्यें॑नसः *(=व्यसृजन् एनसः)* ।

*(प्रतिज्ञापूर्तिः- )*<br>
ए॒वम् अ॒हम् इ॒मं क्षें॑त्रि॒याज् *(=आनुवंशिकाद् [रोगात्])* जा॑मिशँ॒साद् *(=बन्धूक्ताद्)*<br>
द्रु॒हो मु॑ञ्चामि॒ वरु॑णस्य॒ पाशा॑त् ।

## दधि-घृत-प्राशनम्⑥

दधि घृतमिति संसृज्य कांस्येन पृषदाज्यं व्याहृतीभिरोङ्कारचतुर्थाभिः *("भूः स्वाहेत्यादिभिः प्रतिमन्त्रम्")* कुमारं प्राशयित्वा, अद्भिश् शेषं संसृज्य गोष्ठे निनयेत् ४

भूस्स्वाहा॒ भुव॒स्स्वाहा॒ सुव॒स्स्वाहा। ओँ स्वाहा॑ ॥

▼

### ⑤

>

▼ Oldenberg

4. He pours together honey and ghee; into this (mixture) he dips a piece of gold which he has tied with a noose to a Darbha blade. With the next (three) formulas (II, 12, 3-5) he gives the boy (by means of the piece of gold, some of the mixture) to eat. With the next five (verses, II, 12, 6-10) he bathes him. Then he pours curds and ghee together and gives him this (mixture which is called) 'sprinkled butter' (pṛṣadājya) to eat out of a brass vessel, with the Vyāhṛtis to which the syllable 'Om' is added as the fourth (II, 12, 11-14). The remainder he should mix with water and pour out in a cow-stable.

▼ हरदत्तः

मधुघृतमित्येतद्द्वयं विषमपरिमाणं कांस्यपात्रे संसृज्य तस्मिन् हिरण्यं दर्भेण, निष्टर्क्यं बध्वा ऽऽदधाति । निष्टर्क्यमिति बन्धनविशेषो लोकप्रसिद्धः । तथा बद्धेन हिरण्येन तद्रसद्वयमादाय तेनैव कुमारं प्राशयेत् । **उत्तरैस्त्रिभिः** "त्वयि मेधाम्" इत्यादिभिः प्रतिमन्त्रं प्राशनम् । तत **उत्तराभिः पञ्चभिः** ऋग्भिः "क्षेत्रियै त्वे"त्यादिभिः प्रतिमन्त्रं स्नापयति । ततो ऽन्यस्मिन् कांस्यपात्रे दधि घृतञ्च संसृज्य तत्पृषदाज्यं तेनैव कांस्येन प्राशयति । **व्याहृतीभिरोङ्कारचतुर्थाभिः** भूः स्वाहेत्यादिभिः प्रतिमन्त्रम् । ततश् **शेषद्वयमद्भिस्संसृज्य गोष्ठे निनयेत्** । कुमारग्रहणं असमर्थस्यापि कुमारस्यैव प्राशनमुपायेन यथा स्यादिति । तेन यत्नाभावे "धानाः कुमारान् प्राशयन्ति" "क्षैत्रपत्त्यं च प्राशयन्ति" इत्यादौ प्राशनमसमर्थानां न भवति ॥४॥

▼ सुदर्शनः

**निष्टकर्यं** शिखाबन्धनवत् सरन्ध्रेण ग्रन्थिना निष्टर्क्यं बध्नाति; "प्रजानां प्रजननाय" इति लिङ्गात् । **उत्तरैर्मन्त्रैः** "मेधां ते देवस्सविता" इत्यृचा, "त्वयि मेधान्" इति चतुर्भिर्यजुर्भिः । प्राशनं चतुर्णामन्ते सकृदेव हिरण्येन गृहीत्वा । "मन्त्रवत्प्राशनं चास्य हिरण्यमधुसर्पिषाम्" । (मनु.२-२९.) इति मनुवचनात् । **उत्तराभिः पञ्चभिः** "क्षेत्रियै त्वा निरृत्यै त्वा" इत्यादिभिः । स्नापनमपि पञ्चानामन्ते सकृदेव । **दधि घृतमिति** संसृष्टे पृषदाज्ये । तच्च यस्मिन् कांस्ये संसृज्यते तेनैव प्राशयेन्न हस्तेन । **व्याहृतीभिराङ्कारचतुर्थाभिः** "भूः स्वाहा" इत्यादिभिः । अत्राप्यन्ते सकृत्प्राशनम् । प्राशित**शेषमद्भिस्संसृज्य गोष्ठे** अधिकरणेऽन्यो **निनयेत् ।** केचित्—मधृघृतसंसर्गोऽपि कांस्ये नियतः । प्राशनद्वयं स्नापनं च प्रतिमन्त्रमिति ॥४॥

▼

⑤

>

मधु घृतमिति सँसृज्य तस्मिन् दर्भेण हिरण्यं निष्टर्क्यं बध्वावदायोत्तरैर्मन्त्रैः कुमारं प्राशयित्वोत्तराभिः पञ्चभिस्स्नापयित्वा दधि घृतमिति सँसृज्य काँस्येन पृषदाज्यं व्याहृतीभिरोङ्कारचतुर्थाभिः कुमारं प्राशयित्वाद्भिः शेषँ सँसृज्य गोष्ठे निनयेत् ।

# १५ ०५ उत्तरया मातुरुपस्थ②

उत्तरया *(="मा ते कुमारम्")* मातुरुपस्थ आधाय,

मा ते॑ कुमा॒रँ रक्षो॑वधी॒न्
मा धे॒नुर॑त्यासा॒रिणी॑ ।
प्रि॒या धन॑स्य भूया॒
एध॑माना॒ स्वे गृ॒हे ।

## दक्षिणे स्तने प्रतिधाप्य⑥

उत्तरया *(="अयं कुमारः")* दक्षिणं स्तनं प्रतिधाप्य,

अ॒यं कु॑मा॒रो ज॒रां ध॑यतु दी॒र्घमायुः॑ ।
यस्मै॒ त्वँ स्तन॒! प्रप्या॒य *(=प्रक्षर)*
+आयु॒र्वर्चो॒ यशो॒ बल॑म् ।

## पृथिव्या अभिमर्शः⑥

उत्तराभ्यां *(="यद्भूमेर्हृदयम्")* पृथिवीमभिमृश्य,

- यद्भू॒मे॒र्हृद॑यन्दि॒वि च॒न्द्रम॑सि श्रि॒तम् । तद॑ु॒र्वि पश्य॒ं *(=पश्येयम्)* माऽहं पौत्र॒मघँ रुदम् ।
- यत्ते॑ सुसी॒मे हृद॑य॒ं वेदा॒हं तत् प्र॒जाप॑तौ *(=चन्द्रमसि [छायारूपेण])* । वेदा॑म॒ तस्य॑ ते व॒यं माऽहं पौत्र॒मघँ रुदम् ।

## संविष्टस्याभिमर्शनम्⑥

उत्तरेण यजुषा *(="नामयति न रुदति")* संविष्टम् ॥

न +आम॑यति॒, न रु॑दति॒, यत्र॑ व॒यं व॑दामसि॒, यत्र॑ चा॒भिमृ॑शामसि ।

▼

⑤

>

▼ Oldenberg

5. With the next (verse, M. II, 13, 1) he places (the child) in the mother's lap; with the next (II, 13, 2) he causes her to give him her right breast; with the next two (verses, II, 13, 3. 4) he touches the earth, and after (the child) has been laid down, (he touches him) with the next (formula, II, 13, 5).

▼ हरदत्तः

अथ तं कुमारं "मा ते कुमारम्" इत्येतया **मातुरुपस्थ** आदधाति । एतावन्तं कालं स्वोपस्थे । तस्मात् शेषनिनयनमप्यन्येन कारयितव्यम् । तत **उत्तरयर्चा** "अयं कुमार" इत्येतया **दक्षिणं स्तनं प्रतिधाप्य** तत **उत्तराभ्यां ऋग्भ्यां** "यद्भूमेर्हृदयम्" इत्येताभ्यां प्रतिमन्त्रं पृथिवीमभिमृशति । ततः तं कुमारं अभिमृष्टायां भूमौ संवेशयति माता । तं संविष्टम् **उत्तरेण यजुषा** "नामयति न रुदती"त्यनेनाभिमृशति ॥५॥

▼ सुदर्शनः

**उत्तरया** "मा ते कुमारम्" इत्येतया कुमारं **मातुरुपस्थ** आदधाति । इह च मातृग्रहणादितः पूर्वं स्वोपस्थ एव । अत एव च शेषनिनयनमन्यकर्तृकम् । **उत्तरया** "अयं कुमारः" इत्येतया **दक्षिणं स्तनं प्रतिधापयति** पाययति । इदं च मन्त्रनियमयोर्विधानं प्रथमस्तनपानविषयम्, प्रथमातिक्रमे कारणाभावात् । ततश्च जातेष्टिः, "वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते यदष्टकपालो भवति गायत्र्यैवैनं ब्रह्मवर्चसेन पुनाति" (तै.सं.२-२-५.) इत्यादिना यद्यपि पुत्रजन्माख्यनिमित्तसंयोगेन श्रुता, तथापि क्षामवत्यादिवन्न निमित्तादनन्तरं कर्तव्या । कुत एतत्? रात्रिसत्रन्यायेन आर्थवादिकपुत्रगतब्रह्मवर्चसादिकामनासंवलितस्यैव जन्मनोऽधिकारहेतुत्वाभ्युपगमात् जातेष्टिप्रवृत्तेश्चोत्कटजीवत्पुत्रगतपूततादिफलरागाधीनत्वात् दीर्घकालसमाप्यायां चेष्टौ कृतायां पश्चाद्वैधस्तनपाने सति कुमार एव शेषी शुष्ककण्ठतया न जीवेत् । ततश्चेष्ट्यां रागाधीनायां प्रवृत्तिरेव न स्यात् । तस्मात् जननानन्तरमेव संशासनान्तं जातकर्मैव कर्तव्यम् । इष्टिस्तूक्तेन न्यायेन निमित्तस्वारस्यभङ्गस्य दुर्निवारत्वात् चोदकानुग्रहाच्चाशौचे ऽपगते पर्वण्येव कर्तव्या । **उत्तराभ्यां** "यद्भूमेर्हृदयं" इत्येताभ्यां **पृथिवीं** सकृद् **अभिमृशति**, यत्र कुमारश्शतयिष्यते । ततस्तं कुमारं अभिमृष्टायां भूमौ माता संवेशयति । अथ तं **संविष्टं** "नामयति न रुदति" इति **यजुषा** अभिमृशति ॥५॥
▼

### ⑤

>

उत्तरया मातुरुपस्थ आधायोत्तरया दक्षिणं स्तनं प्रतिधाप्योत्तराभ्यां पृथिवीमभिमृश्योत्तरेण यजुषा संविष्टम् ।

# १५ ०६ उत्तरेण यजुषा②

उत्तरेण यजुषा शिरस्य् उदकुम्भं निधाय,

आपं॑स्सु॒प्तेषु॑ जाग्रत॒ रक्षाँ॑सि॒ निरि॒तो नुं॑दद्ध्वम् ।

## सूतकहोमः⑤

सर्षपान् फलीकरणमिश्रानञ्जलिनोत्तरैस् त्रिस्त्रि प्रतिस्वाहाकारं हुत्वा

हरदत्तो ऽत्र।

- *(सर्षपान् फलीकरणमिश्रान् जुहोति।)*

अ॒यं क॒लिं प॒तयं॑न्तँ*(=प्रतिगच्छन्तम्)* श्वा॒नम् इ॒वोद्-वृं॑द्धम् ।
अ॒जां वाशिं॑ताम् इव मरुत॒: पर्यं॑द्ध्वँ*(=पर्यास्यध्वम्)* स्वाहा॑ ।

शण्डे॒रथ॒श्*(शण्डो रथे यस्य)* शण्डिं॑केर*(शण्डिकम् बलम् ईरयति)* उलूख॒लः ।
च्यवं॑नो॒ नश्यं॑ताद् इ॒तः स्वाहा॑ ।

अय॒श् शण्डो॒ मर्कं॑
उप॒वीरं॑*(यमवेक्ष्यान्ये वीरा न्यूनाः)* उलूख॒लः ।
च्यवं॑नो॒ नश्यं॑ताद् इ॒तः स्वाहा॑ ।

के॒शिनी॒श् श्वलो॒मिनी॒ः खजा॑पो॒*(=खञ्जा =पङ्ग्वयो भूत्वाप्लुवन्ति)*
ऽजोप॑काशिनीः*(=अजनिभाः)* ।
अपे॑त॒ नश्य॑ताद् इ॒तस् स्वाहा॑ ।

मि॒श्रवा॑ससः कौबेर॒का
र॑क्षोरा॒जेन॒ प्रेषि॑ताः ।
ग्राम॒ँ सजा॑नयो गच्छन्ती॒-
च्छन्तो॑ ऽपरि॒दाकृ॒तान्थ्*(अनुपनीतान् - "अग्नये त्वा परिददामीति" तत्र मन्त्रः)* स्वाहा॑ ।

ए॒तान् घ्नं॑तै॒तान् गृं॑ह्णी॒ते-
त्य् अ॒यं ब्रह्मा॑णस्पु॒त्रः ।
तान् अ॒ग्निः पर्य॑सर॒त्
तान् इन्द्र॒स् तान् बृह॒स्पतिः॑ ।
तान् अ॒हं वे॑द ब्राह्म॒णः
प्र॑मृश॒तः कू॑टद॒न्तान्,
वि॑के॒शान् लं॑बनस्त॒नान्त् स्वाहा॑ ॥ (13)

न॒क्त॒ञ्चा॒रिण॑ उरस्पे॒शाञ्*(=उरस्युज्ज्वलान्)*
छू॑ल-ह॒स्तान् क॑पाल॒पान् ।
पूर्व॑ एषां पि॒ता *("ए॒तान् घ्नं॑तै॒तान् गृं॑ह्णी॒त")*+इत्य्
उ॒च्चैश् श्रा॑व्य क॒र्णकः॑ ।
मा॒ता जं॑घ॒न्या॑ सर्पं॑ति॒
ग्रामे॑ विधु॒रम् इ॒च्छन्ती॒ स्वाहा॑ ।

नि॒शी॒थ॒चा॒रिणी॒ स्वसा॑
स॒न्धिना॒ प्रेक्षं॑ते॒ कुलं॑म् ।
या स्वपं॑न्तं बो॒धयं॑ति॒
यस्यै॒ विजा॑ताया॒ं मनः॑ ।
तासा॒ं त्वं कृं॑ष्ण॒वर्त्मं॑ने
क्लो॒मान॒ँ*(=श्वासकोशः)* हृद॑यं॒ यकृं॑त्*(=liver)* ।
अग्ने॒ अक्षीं॑णि नि॒र्दह॒ स्वाहा॑ ।

*(पिता)* संशास्ति- "प्रविष्टे प्रविष्ट एव तूष्णीमग्नावावपते"ति ६

▼

⑤

>

▼ Oldenberg

6. With the next Yajus (II, 13, 6) he places a water-pot at (the child's) head, sacrifices mustard seeds and rice-chaff with his joined hands three times with each of the next (formulas, II, 13, 7-14, 2), repeating each time the word Svāhā, and says (to the people who are accustomed to enter the room in which his wife lies), 'Whenever you enter, strew silently (mustard seeds with rice-chaff) on the fire.'

▼ हरदत्तः

ततस्तस्य शिरस्समीपे **उत्तरेण यजुषा** "आपस्सुप्तेष्वि"त्यनेन उदकुम्भं निदधाति । ततस् **सर्षपान् फलीकरणमिश्रान्** अञ्जलिना जुहोति **उत्तरैर्मन्त्रैः** अष्टाभिः "अयं कलिम्" इत्यादिभिः । तत्र च प्रतिस्वाहाकारं त्रिर्होमः । सकृन्मन्त्रेण द्विस्तूष्णीम् । द्रव्यं च पुनःपुनरादेयम् । केचित्तु सकृदुपात्तेनैव त्रिर्जुह्वति । उत्तरयोश्च होमयोः स्वाहाकारमात्रमावर्तयन्ति । होमश्चायमपूर्वः तन्त्रस्याविधानात् परिस्तरणं तु भवति । परिषेचनं समन्तमुभयतः । हुत्वा ततस्संशास्ति । कान् ! ये सूतिकागारं प्रविशन्ति । तत्र संशासने एवकारः एवमित्यस्यार्थे । एतदुक्तं भवति–अस्य सूतिकागारस्य यदा यदा प्रवेशो युष्माभिः क्रियते तदा तदा सर्षपान् फलीकरणमिश्रानस्मिन्नग्नावेवं तूष्णीमावपत यथा मयोप्ताः अञ्जलिना त्रिस्त्रिश्चेति । तत्र तूष्णीमित्यतिदेशप्राप्तस्य मन्त्रस्य प्रतिषेधः । यथासंप्रैषं ते कुर्वन्ति । होमश्चायं कुमारस्य रक्षार्थः संस्कारः, न मातुः, प्रकरणात् ।

तेन यद्यपि "यस्यै विजातायां मन" इति मातुरपि रक्षा प्रतीयते तथापि तदर्थो होमो न भवति । ततश्च स्त्रीप्रसवे दशाहमध्ये पुत्रमृतौ च न भवति ॥६॥

▼ सुदर्शनः

**उत्तरेण** "आपस्सुप्तेषु" इत्यनेन **यजुषा** कुमारस्य शिरस्समीपे उदकस्य पूर्णकुम्भं निधाय अथ "यत्र क्व ताग्निम्" (आप.ध.२-१-२३.) इत्यादिविधिना श्रोत्रियागारादग्निमाहृत्य तमुपनिधाय **फलीकरणमिश्रान् सर्षपान् उत्तरैः** "अयं कलिम्" इत्यादिभिरष्टभिर्मन्त्रैः अञ्जलिना प्रतिमन्त्रं **त्रिस्रिर्** जुहोति । तत्र तु द्विस्तूष्णीम् । तूष्णीकेष्वपि स्वाहाकारो भवति, प्रतिमन्त्रमिति सिद्धे प्रतिस्वाहाकारमित्यधिकाक्षरात् । अथ सूतिकागृहपालान् **संशास्ति–प्रविष्टे प्रविष्ट एव तूष्णीमग्नावावपतेति** । सम्प्रैषस्य चायं विवक्षितोऽर्थः– प्रतिप्रवेशं तदनन्तरमेव सर्षपान् फलीकरणमिश्रान् अञ्जलिना अस्मिन्नेवाग्नौ तूष्णीं वाग्यता एव आवपतेति । एवकाराच्च प्रवेशावापयोर्मध्ये त्रुटिमात्रस्यापि कालस्य न क्षेपः । सर्षपाणामेवाञ्जलिना आवापः ; प्रकृतत्वात् । केचित् एवकार एवमित्यर्थे । तूष्णीमिति चातिदेशप्राप्तमन्त्रप्रतिषेधार्थमिति ॥६॥

▼

⑤

>

उत्तरेण यजुषा शिरस्त उदकुम्भं निधाय सर्षपान् फलीकरणमिश्रानञ्जलिनोत्तरैस्त्रिस्त्रि प्रतिस्वाहाकारं हुत्वा संशास्ति–प्रविष्ट प्रविष्ट एव तूष्णीमग्नावावपतेति ।

# १५ ०७ एवमहरहरानिर्दशतायाः②

एवमहरहरानिर्दशतायाः *(="निर्दशा"निर्गता दशभ्योऽहोरात्रेभ्यो या रात्रिस्सा)*[७]

▼

⑤

>

▼ Oldenberg

7. This is to be done until the ten days (after the child's birth) have elapsed.

▼ हरदत्तः

विजननप्रभृति यावत् दशाहानि न निर्गच्छन्ति तावदेव होमः कर्तव्यः संशानञ्चेत्यर्थः । सकृच्चहोमाः, न सायम् । यद्यपि संशासनमनन्तरं तथापि तावन्मात्रस्यायमतिदेशो न भवति । तस्य होमशेषत्वात् । नापि वात्सप्रादेः । कृत्स्नस्य कल्पान्तरेषु सर्वेष्वप्रसिद्धत्वात् ॥७॥

▼ सुदर्शनः

यथैतदनन्करोक्तं तूष्णीमापवनं **एवमहरहः आनिर्दशतायास्** सूतिकागृहपालैः कर्तव्यम् । आङ् मर्यादायाम् । **निर्दशा** निर्गता दशभ्योऽहोरात्रेभ्यो या रात्रिस्सा । आदशम्या रात्रेरित्यर्थः ॥७॥

▼

⑤

>

एवमहरहरानिर्दशतायाः।

---

1. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

# १४ नामकरणम्①

# १५ ०८ दशम्यामुत्थितायां स्नातायाम्②

दशम्यामुत्थितायां स्नातायां पुत्रस्य नाम दधाति पिता मातेति ८

▼

### ⑤

>

▼ Oldenberg

8. On the tenth day, after (the mother) has risen and taken a bath, he gives a name to the son. The father and the mother (should pronounce that name first).

▼ हरदत्त-प्रस्तावः

एवं जातकर्मोक्त्वा क्रमप्राप्तं नामकरणमाह—

▼ हरदत्तः

उत्थानं नाम सूतिकालिङ्गानामग्न्युदकुम्भादीनामपनयनम् । भर्तुश्च नापितकर्म । यच्चान्यत् स्त्रियो विदुः तच्च सर्ववर्णानां दशमेऽहनि भवति । दशमीशब्देन न रात्रिरुच्यते किं तर्हि ? अहोरात्रसमुदायः यथा "तस्मात् सदृशीनां रात्रीणाम्" इति । तत्र परिभाषावशादहन्येव कर्म स्नानं च सति सम्भवे तस्मिन्नेवाहनि नियमेन भवति । प्रकारणादेव सिद्धे पुत्रस्येति वचनं वक्ष्यमाणो "नाम्नो लक्षणविशेषः" तस्यैव यथा स्यात् । तेन कुमार्याः "अयुजाक्षरं कुमार्याः" (आप.गृ.१५-११.) इत्येतावदेव भवति । न "नामपूर्वमाख्यातोत्तरम्" इत्यादि । **पिता मातेति** वचनं तौ नामाग्रेऽभिव्याहरेतामित्येवमर्थम् । विज्ञायते च "पिता माता च दधतुर्यदग्रे" ( तै. सं.१-५-१०.) इति । तत्र प्रयोगः– शुचीन् मन्त्रवतस्सर्वकृत्येषु भोजयेद् (आप.ध.२-१४-९.) इति ब्राह्मणान् भोजयित्वा पिता माता च नामाग्रेऽभिव्याहृत्याशीर्वचनं ब्राह्मणैरभिव्याहारयेताम् । अमुष्मै स्वस्तीति कल्पान्तरे दर्शनात् । केचित् नाम करिष्याव सङ्कल्पमिच्छन्ति ॥८॥

▼ सुदर्शनः

**दशम्यां** रात्रौ दशमेऽहनि । **उत्थितायां** सूतिकागृहान्निष्क्रान्तायां प्रसूतिकायां स्नातायां च सत्याम् । एवं वदता दशमेऽहनि निष्क्रम्य स्नातव्यमित्युक्तं भवति । **पुत्रस्य पिता नाम दधाति** व्यवस्थापयति ; न तु करोति; शब्दार्थयोस्सम्बन्धस्य नित्यत्वात् । **माता च** । इतिशब्दश्चार्थे, मातापितरौ सहितौ नाम धत्त इति । इममर्थं मन्त्रवर्णोऽप्याह "मम नाम प्रथमं जातवेदः पिता माता च दधतुर्यदग्रे" (तै.सं.१-५-१०) इति ॥८॥

▼

### ⑤

>

दशम्यामुत्थितायां स्नातायां पुत्रस्य नाम दधाति पिता मातेति ।

# १५ ०९ द्व्यक्षरञ् चतुरक्षरम्②

द्व्यक्षरं चतुरक्षरं वा नामपूर्वमाख्यातोत्तरं *(=क्विबन्तोत्तरम्)* दीर्घाभिनिष्ठानान्तं *(=दीर्घात्परोऽभिनिष्ठानो विसर्जनीयोऽन्ते यस्य तत्)* घोषवदाद्यन्तरन्तस्थम् *(यरलवा अन्तस्थाः।)*
+++(हरदत्तोदाहरणानि - गाः श्रयते इति गोश्रिः । गां प्रीणतीति गोप्रीः । हिरण्यः ददातीति हिरण्यदाः भूरिदाः हरदत्त इत्यादीन्युदाहरणानि । सुदर्शनसूर्युदाहरणानि - द्व्यक्षरस्योदाहरणं - वाः उदकं ददातीति वार्दाः, गिरं ददातीति गीर्दाः इत्यादि । चतुरक्षरस्य तु भाष्योक्तं "द्रविणोदाः वरिवोदाः" इति । एतद्द्वयमपि छान्दसम् । अन्यदपि हिरण्यदा युवतिदाइत्यादि ॥)+++ ९

▼

⑤

>

▼ Oldenberg

9. (It should be a name) of two syllables or of four syllables; the first part should be a noun; the second a verb; it should have a long vowel (or) the Visarga at the end, should begin with a sonant, and contain a semi-vowel.

▼ हरदत्तः

अथ नाम्नो लक्षणविशेषः । सव्यञ्जनो निर्व्यञ्जनो वा स्वरो ऽक्षरं **ऽक्षरं नाम** द्रव्यप्रधानं, तत्पूर्वपदं यत्र तत् **नामपूर्वं** क्रियानिमित्तमाख्यातं, तदुत्तरपदं यत्र तत् **आख्यातोत्तरं** दीर्घात्परोऽभिनिष्ठानो विसर्जनीयोऽन्ते यस्य तत् **दीर्घाभिनिष्ठानान्तम्** तथा घोषवद्व्यञ्जनमादिभूतं यस्य तत् **घोषवदादि** अन्तर्मध्ये अन्तस्था यस्य तत् **अन्तरन्तस्थम्** वर्गाणां तृतीयचतुर्थौ हकारश्च घोषवन्तः । यरलवा अन्तस्थाः । दिवं नयतीति द्युतिः । गाः श्रयते इति गोश्रिः । गां प्रीणातीति गोप्रीः । हिरण्यं ददातीति हिरण्यदाः भूरिदाः हरदत्त इत्यादीन्युदाहरणानि । "ऋष्यणूकं देवाताणूकं वा यथा वैषां पूर्वपुरुषाणां नामानि स्यु"रिति (बौ.गृ. २.२.२८,२९.) बौधायनः । **ऋष्यणूकं** ऋष्यभिधायि–वसिष्ठो जमदग्निरिति । **देवताणूकं** देवताभिधायि रुद्रो विष्णुरिति । **पूर्वपुरुषाः** पित्रादयः ॥९॥

▼ सुदर्शनः

अथ व्यवस्थापनीयस्य नाम्नो लक्षणमुच्यते– **द्व्यक्षरं चतुरक्षरं** वेति समासेऽभिप्रेतः, न तु रूढिः "नामपूर्वमाख्यातोत्तरम्" इति पूर्वोत्तरखण्डव्यवस्थापनात् । नापि वाक्यम् ; तस्य द्रव्यवाचकत्वाभावात् । कुतः पुनर्वाक्यसमासयोरर्थवत्समुदायत्वाविशेषेऽपि समास एव द्रव्यवाचको न वाक्यम्? इति चेत् ; "कृत्तद्धितसमासाश्च" (पा.सू.१-२-४६.) इति समासग्रहणस्य नियमार्थत्वात् । **नामपूर्वं**, द्रव्यवाचकं सुबन्तं पदं नाम, तत्पूर्वं यस्य तन्नामपूर्वम् । तथा आख्यातमुत्तरं पदं यस्य नाम्नस्तदाख्यातोत्तरम् ।

ननु– "सुप्सुपा" इति समासनियमात् आख्यातेन तिङन्तेन नैव समासः? सत्यम् ; अत एवात्र आख्यातशब्देन आख्यातसदृशं क्विबन्तं सुबन्तमेव विवक्षितम् । सादृश्यं च क्रियाप्राधान्याभावेऽपि क्रियावाचित्वमात्रात्, "क्विबन्तो धातुत्वं न जहाति" इति धातुसंज्ञत्वाच्च । **दीर्घाभिनिष्ठानान्तं** दीर्घश्चाभिनिष्ठानश्चान्ते यस्य नाम्नस्तत्तथोक्तम् । अभिनिष्ठान इति विसर्जनीयस्य पूर्वाचार्याणां संज्ञा । घोषवान् वर्ण आदिर्यस्य नाम्नस्तत् **घोषवदादि ।** घेषवर्णाश्च प्रातिशाख्यसूत्रे प्रसिद्धाः, "ऊष्मविसर्जनीयप्रथमद्वितीया अघोषाः न हकारः । व्यञ्जनशेषो घोषवान् "इति । **अन्तरन्तस्थं** अन्तः मध्ये यस्य नाम्नोऽन्तस्थाः यरलवास्तत्तथोक्तम् । द्व्यक्षरस्योदाहरणं–वार्दाः, वाः उदकं ददातीति वार्दाः, गिरं ददातीति गीर्दाः इत्यादि । चतुरक्षरस्य तु भाष्योक्तं "द्रविणोदाः वरिवोदाः" इति । एतद्द्वयमपि छान्दसम् । अन्यदपि हिरण्यदा युवतिदा इत्यादि ॥९॥
▼

⑤

>

द्व्यक्षरं चतुरक्षरं वा नामपूर्वमाख्यातोत्तरं दीर्घाभिनिष्ठानान्तं घोषवदाद्यन्तरन्तस्थम् ।

# १५ १० अपि वा②

अपि वा यस्मिन्स्वित्युपसर्गस्स्यात् तद्धि प्रतिष्ठितमिति हि ब्राह्मणम् *(सुभद्रस्सुमुख इत्याद्युदाहरणम् । सुजातः सुदर्शन इत्यादि ।)* १०

▼

⑤

>

▼ Oldenberg

10. Or it should contain the particle su, for such a name has a firm foundation; thus it is said in a Brāhmaṇa.

▼ हरदत्तः

अपि वा अयमपि पक्षः– यस्मिन्नाम्नि "सु" इत्ययमुपसर्गः स्यात् तदेव तत्र लक्षणम् । नान्यद्व्यक्षरत्वादि । तद्धि प्रतिष्ठितम् । हि शब्दोऽतिशये । पूर्वस्मादप्यतिशयेन प्रतिष्ठितं, तेन पूर्वमपि द्व्यक्षरादि प्रतिष्ठितम् । तथा च पूर्वस्मिन्नेव लक्षणे स्थित्वा भरद्वाज आह–द्व्यक्षरं चतुरक्षरं वा घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानान्तं तद्धि प्रसिद्धमिति विज्ञायते इति । **प्रतिष्ठितमिति** । ध्रुवमविनाश्यायुष्यमित्यर्थः । सुभद्रस्सुमुख इत्याद्युदाहरणम् । उपसर्ग इति वचनात्सोमसुदित्यादि प्रतिष्ठितं न भवति ॥१०॥

▼ सुदर्शनः

अपि वा यस्मिन्नाम्नि "सु" इत्ययुमुपसर्गस्स्यात् तन्नाम **प्रतिष्ठितं** आयुष्मद्यज्ञादिक्रियावच्च भवति ; यथा– सुजातः सुदर्शन इत्यादि । इह ब्राह्मणग्रहणात् द्व्यक्षरादिविशेषणैः स्विति विशेषणं विकल्प्यते । हि शब्दोऽनर्थको निपातः, "अनर्थको मिताक्षरेषु" इति वचनात् । उपसर्गग्रहणमुपसर्गप्रतिरूपकाणां सुतसोमेत्यादीनां व्युदासार्थम् । अत्र बोधायनो विकल्पान्तराण्याह— "ऋष्यणूकं देवताणूकं वा यथा वैषां पूर्वपुरुषाणां नामानि स्युः" इति । अणूकमभिधायकं, प्रकरणात् । ऋष्यणूकं वसिष्ठः नारदः इत्यादि । देवताणूकं विष्णुः शिवः इति । पूर्वपुरुषाणां पितृपितामहादीनां वा नामानि यज्ञशर्मा, सोमशर्मा इत्यादिनि ॥१०॥

▼

⑤

>

अपि वा यस्मिन् स्वित्युपसर्गस्स्यात् तद्धि प्रतिष्ठितमिति हि ब्राह्मणम् ।

# १५ ११ अयुजाक्षरङ् कुमार्याः②

अयुजाक्षरं कुमार्याः ११

▼

⑤

>

▼ Oldenberg

11. A girl's name should have an odd number of syllables.

▼ हरदत्तः

या संख्या अर्थविमितुं न शक्यते सा अयुक् संख्या । अयुञ्जि अक्षराणि यत्र तत् अयुजाक्षरम्–एकाक्षरं त्र्यक्षरमित्यादि । एतावदेव कुमार्या नामलणम्–गौः, वाक्, पृथिवि, पार्वतीति ॥११॥

▼ सुदर्शनः

**अयुगक्षरं** विषमाक्षरं **कुमार्या** नाम भवति । अयुजाक्षरमिति छान्दसः । अयुगक्षरत्वमेकमेवात्र विशेषणम्, द्व्यक्षरादीनामनेन निवर्तितत्वात् । तद्यथा– श्रीः, गौः, भारती, कमला, पतिवल्लभा, कमलेक्षणा, इत्यादि । कुमार्या अपि जातकादयश्चौलान्ताः देहसंस्कारार्थाः क्रियास्तूष्णीं कर्तव्या एव । "अमन्त्रिका तु कार्येयं स्त्रीणामावृदशेषतः ॥ संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम्" ॥ (म.स्मृ.२-६६.) इति मनुवचनात् । इह च द्रव्यनिष्ठा भावार्थाः प्राशनवपनादय एव निष्कृष्य कर्तव्याः, न तु होमाः ; एवमेव शिष्टाचारात्, स्मृत्यर्थसारे दृष्टत्वाच्च ॥११॥

▼

⑤

>

अयुजाक्षरं कुमार्याः ।

# १५ १२ प्रवासादेत्य②

प्रवासादेत्य पुत्रस्योत्तराभ्यामभिमन्त्रणं *(=अङ्गादङ्गात्)*

अङ्गा॑दङ्गा॒त् सं॑भ॑वसि॒ हृद॑या॒दधि॑ जायसे । वे॒दो वै पु॒त्रनामा॑ऽसि॒ स जी॑व श॒रद॑श्श॒तम् ।

मूर्धन्यवघ्राणं *(=अश्मा भव)* दक्षिणे कर्ण

मूर्धन्यवघ्राणम् -

अश्मा॑ भव पर॒शुर्भ॑व॒ हिर॑ण्य॒मस्तृ॑तं भव ।
प॒शूनान्त्वा॑ हिङ्का॒रेणा॒भि जि॑घ्राम्य् असौ*(→नामनिर्देशः)*।

## कर्णे जपः⑥

उत्तरान्मन्त्रान् *(=अग्निरायुष्मान् स वनस्पतिभिः)* जपेत् १२

▼ विश्वास-प्रस्तुतिः

*(हे यजमान)*
अ॒ग्निर् आयु॑ष्मा॒न् ,
स वन॒स्-पति॑भि॒र् आयु॑ष्मा॒न् ,
तेन॒ त्वा ऽऽयु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।

सोम॒ आयु॑ष्मा॒न् स ओष॑धीभिर् [आयु॑ष्मा॒न् तेन॒ त्वा ऽऽयु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।]

*(हे यजमान)* य॒ज्ञ [आयु॑ष्मा॒न्], स दक्षि॑णाभि॒र् आयु॑ष्मा॒न्, [तेन॒ त्वा ऽऽयु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।]

*(हे यजमान)* ब्रह्मायु॑ष्म॒त्, तद्ब्रा॑ह्म॒णैरायु॑ष्मत् , [तेन॒ त्वा ऽऽयु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।]

*(हे यजमान)* दे॒वा आयु॑ष्मन्तः।
ते॒ऽमृते॑न [+आयु॑ष्मन्तः] [तेन॒ त्वा ऽऽयु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।]

पि॒तर॒ आयु॑ष्मन्त॒स् ते स्व॒धयाऽऽयु॑ष्मन्त॒स्, तेन॒ त्वा ऽऽयु॒षा ऽऽयु॑ष्मन्तङ् करोमि ।

▼ भट्टभास्कर-टीका

अग्निरायुष्मान् दीर्घायुः । स वनस्पतिभिरायुष्मान् तैर्हेतुभिस्तैर्वासह । तेनायुषा उभयेनायुषा त्वामायुष्मन्तं करोमि दीर्घायुषं करोमि । हे यजमान सोमादिषु 'आयुष्मान्तेन' इत्याद्यनुषज्यते । सोम ओषधीभिः, यज्ञो दक्षिणाभिः ब्रह्म ब्राह्मणैः, देवा अमृतेन, पितरस्स्वधया ॥

इति द्वितीये तृतीये दशमोनुवाकः ॥

▼

## ⑤

>
▼ Oldenberg

12. 1 When (the father) returns from a journey, he should address the child and kiss him on his head with the next two (verses, M. II, 14, 3. 4), and should murmur the next Mantras (II, 14, 5) into his right ear.

▼ हरदत्तः

**प्रवासाद्** आगत्य तु **उत्तराभ्यामभिमन्त्रणमवघ्राणं च** क्रमेण कर्तव्यम् । अङ्गादङ्गादित्यभिमन्त्रणं, "अश्मा भव" इत्यवघ्राणम् । नामनिर्देशश्च "अभिजिघ्रामि यज्ञशर्म"न्निति । मन्त्रलिङ्गात् कुमार्या अभिमन्त्रणान्तरोपदेशाच्च सिद्धे पुत्रग्रहणं मूर्धन्यवघ्राणं दक्षिणे कर्णे जापश्च कुमार्या मा भूत् । अन्यथा लिङ्गविरोधाभावात् उभयं कुमार्या अपि स्यात् । तस्या अपि प्रकृतत्वात् । कुमारीमुत्तरेणेत्ययं च अभिमन्त्रणस्यैव प्रत्याम्नायः स्यात्, नेतरयोः । उत्तरे मन्त्राः "अग्निरायुष्मानिति पञ्चे"त्यादिष्टाः । तान् पुत्रस्य **दक्षिणे कर्णे जपेत्** । मन्त्रग्रहणं क्रियते "अग्निरायुष्मानिति पञ्चे"त्यस्य पञ्चशब्दस्य मन्त्रेषु वृत्तिरिति प्रज्ञापनार्थम् ॥१२॥

▼ सुदर्शनः

**प्रवासादागत्योत्तराभ्यां** "अङ्गादङ्गात्" "अश्मा भव" इत्येताभ्यां **पुत्रस्याभिमन्त्रणं** कर्तव्यम् । तथैताभ्यामेव **मूर्धन्यवघ्राणम्** । असावित्यस्य स्थाने दशम्यां कृतं नाम सम्बुद्ध्या गृह्णाति । केचित् "अङ्गादङ्गादित्यभिमन्त्रणम् ।" "अश्मा भवे"त्यवघ्राणमिति । तथा सति एवं विभज्यैव विनियुञ्जीत, क्रमेणेति वा ब्रूयात् । ततः पुत्रस्य **दक्षिणे कर्णे उत्तरान्** "अग्निरायुष्मान् स वनस्पतिभिः" इत्यादिकान् सानुषङ्गान् पञ्च **मन्त्रान् जपेत्** । एतच्च त्रयं प्रतिपुत्रमावर्तते ॥१२॥

▼

⑤

>

प्रवासादेत्य पुत्रस्योत्तराभ्यामभिमन्त्रणं मूर्धन्यवघ्राणं दक्षिणे कर्ण उत्तरान् मन्त्रान् जपेत्।

# १५ १३ कुमारीमुत्तरेण②

कुमारीमुत्तरेण यजुषा *("सर्व॑स्मादा॒त्मन॒स्सं॑भू॑ताऽसि॒ सा जी॑व श॒रद॑श्श॒तम् । ")* ऽभिमन्त्रयते १३

सर्व॑स्माद् आ॒त्मन॒स् संभू॑ताऽसि॒, सा जी॑व श॒रद॑श् श॒तम् ।

▼

⑤

>

▼ Oldenberg

13. With the next Yajus (II, 14, 6) he addresses a daughter (when returning from a journey).

▼ हरदत्तः

प्रवासादेत्य **कुमारीं** स्त्रीप्रजां **उत्तरेण यजुषा** "सर्वस्मादात्मनः सम्भूतासी"त्यनेन **अभिमन्त्रयते** । दुहितरमिति कर्तव्ये कुमारीमिति वचनं प्रदानादूर्ध्वं माभूदिति । पुत्रस्य तु यावज्जीवं भवति पुत्रेऽपि प्रोषितागते अभिमन्त्रणादित्रयं भवति न्यायस्य तुल्यत्वात् ॥१३॥

▼ सुदर्शनः

प्रवासादेत्येत्यनुवर्तते । **उत्तरेण** "सर्वस्मादात्मनः" इत्यनेन **यजुषा** कुमारीं कन्यामप्रत्ता**मभिमन्त्रयते** । कुमार्यास्त्वेतावदेव, न त्ववघ्राणजपौ; अवचनात्, तत्र पुत्रस्येति ग्रहणान्मन्त्रस्थपुल्लिङ्गविरोधाच्च ॥१३॥

इति श्रीसुदर्षनार्यविरचिते गृह्यतात्पर्यपदर्शने पञ्चदशः खण्डः ॥

▼

⑤

>

कुमारीमुत्तरेण यजुषाऽभिमन्त्रयते।

1. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

# १५ अन्नप्राशनम्①

# १६ ०१ जन्मनोऽधि षष्ठे②

जन्मनोऽधि षष्ठे मासि ब्राह्मणान् भोजयित्वाऽऽशिषो वाचयित्वा दधि मधु घृतमोदनमिति सँसृज्योत्तरैर्मन्त्रैः कुमारं प्राशयेत् ।

भूर् अ॒पां त्वौष॑धीना॒ँ रस॒ं प्राश॑यामि।
शि॒वास्त॒ आप॒ ओष॑धयस् सन्त्व्,
अनमी॒वास्त॒ आप॒ ओष॑धयस् सन्त्व् असौ*(→नामनिर्देशः)* ।

भुवो॒ऽपाँ ...।
सुव॑र॒पां ...।
भूर्भुव॒स्सुव॑र॒पां ...।

तैत्तिरेण माँसेनेत्य् एके २

▼

**⑤**

>

▼ Oldenberg

1. In the sixth month after the child's birth he serves food to Brāhmaṇas and causes them to pronounce auspicious wishes; then he should pour together curds, honey, ghee, and boiled rice, and should give (the mixture) to the boy to eat, with the next (four) Mantras (II, 14, 7-10);

▼ हरदत्त-प्रस्तावः

अथान्नप्राशनमुपदिश्यते—

▼ हरदत्तः

[अथ कुमारस्यान्नप्राशनम् । तत् **जन्मनोऽधि** जननदिवसादारभ्य षष्ठे मासि कर्तव्यम् ।] मासाश्च सौरचान्द्रमासादयः । तत्करिष्यन् ब्राह्मणान् भोजयित्वा युग्मान् तैराशिषो वाचयति–पुण्याहं स्वस्ति ऋद्धिमिति । नात्र पूर्वेद्युरभ्युदयश्राद्धं, देवेज्याभावात् । यत्रापरेद्युः देवेज्या तत्र पूर्वेद्युः पितृभ्यः क्रियते । "तस्मात् पितृभ्यः पूर्वेद्युः क्रियते । उत्तरमहर्देवान् यजते, इति वचनात् । वाचयित्वाऽऽशिषः दध्यादि चतुष्टयं संसृज्य तेन कुमारं प्राशयेत् । **उत्तरैर्मन्त्रैश्** चतुर्भिः "भूरपांत्वे"त्यादिभिः । त्वौषधीनामिति मध्यमयोरनुषजति । अपामित्यस्य तु पाठो मन्त्रचतुष्टयप्रज्ञापनार्थः । असावित्यत्र नामग्रहणं सम्बुध्या—"ओषधयस्सन्तु यज्ञशर्मन्न्" इति । प्रतिमन्त्रं प्राशनम् । सर्वान्त इत्यन्ये । कुमारं इति वचनात् कुमार्या विधिवदन्नप्राशनं न भवति—आवृतैव कुमार्या (आश्व.गृ.१-१४-७.) इत्याश्वलायनवचनात् ॥१॥

▼ सुदर्शनः

**जन्मनोऽधि** जन्मन आरभ्य, दिवसगणनया **षष्ठे मासि** । तेन मार्गशीर्षशुक्ले द्वितीयायां जातस्य न मार्गशीर्षो मासः पूर्णो गण्यते । अत एव ज्योतिषे बृहस्पतिः— "पञ्चाशद्दिवसात् त्रिघ्नात्पश्चात्त्रिहतषष्टिकात् ॥ अर्वागेवोत्तमा भुक्तिः"...... इति । **ब्राह्मणान् भोजयित्वेत्य्** उक्तार्थम् । आशीर्वचनानन्तरं दध्यादिचतुष्टयं संसृज्य **उत्तरैर्मन्त्रैः** "भूरपां त्वौषधीनां" इत्यादिभिश्चतुर्भिः कुमारं सकृदेव प्राशयेत् । सम्बुद्ध्या च नामग्रहणम् । द्वितीयतृतीययोरपि "त्वौषधीनाम्" इत्यादेरनुषङ्गः ॥१॥

▼

**⑤**

>

जन्मनोऽधि षष्ठे मासि ब्राह्मणान् भोजयित्वाऽऽशिषो वाचयित्वा दधि मधु घृतमोदनमिति सँसृज्योत्तरैर्मन्त्रैः कुमारं प्राशयेत् ।

# १६ ०२ तैत्तिरेण माँसेनेत्येके②

तैत्तिरेण माँसेनेत्येके।

▼

⑤

>

▼ Oldenberg

2. (He should feed him) with partridge, according to some (teachers).

▼ हरदत्तः

तित्तिरेः पक्षिणः **मांसेन** तदन्नप्राशनं कर्तव्यम् **इत्येके** आचार्या मन्यन्ते । मांसं व्यञ्जनमोदस्य । अन्ये तु मांसमेव मन्त्रवत् प्राश्यं मन्यन्ते । मांसग्रहणं शोणितादेः प्रतिषेधार्थम् ॥२॥

▼ सुदर्शनः

व्यक्तार्थमेतत् ॥२॥

▼

⑤

>

तैत्तिरेण माँसेनेत्येके।

# १६ चौलम्①

## १६ ०३ जन्मनोऽधि तृतीये②

जन्मनोऽधि तृतीये वर्षे चौलं पुनर्वस्वोः ॥ १६.३ ॥

▼

### ⑤

>

▼ Oldenberg

3. In the third year after his birth the Caula (or tonsure is performed) under (the Nakṣatra of) the two Punarvasus.

▼ हरदत्तः

अथ चौलविधिः— यस्मिन् कर्मणि केशाः प्रथमं खण्ड्यते तत् चौलम् । चूडा प्रयोजनमस्येति । डलयोरविशेषः । तत् जन्मनः प्रभृति तृतीये वर्षे पुनर्वस्वोर्नक्षत्रे कर्तव्यम् । कुमारं प्राशयेदिति विहितत्वात् पुंस एवेदं विधिवच्चौलम् । कुमार्यास्त्वावृतैव । एवञ् चेत् कृत्वा अपरेणाग्निं प्राञ्चमिति पुंलिङ्गमुपपद्यते । जन्मग्रहणं गर्भादारभ्य तृतीये वर्षे मा भूदिति ॥३॥

▼ सुदर्शनः

**जन्मनोऽधी**ति पूर्ववत् । ततश्च "गर्भादिस्सङ्ख्या वर्षाणां" इति गर्भवर्षं न गण्यते । **चौळम्**इति कर्मनामधेयम् । यस्मिन् कर्मणि चूडासन्निधानं तच्चौळं; ळडयोरभेदात् । **पुनर्वस्वोः;** कर्तव्यमिति शेषः ॥३॥

▼

### ⑤

>

जन्मनोऽधि तृतीये वर्षे चौलं पुनर्वस्वोः।

## १६ ०४ ब्राह्मणानाम् भोजनम्②

ब्राह्मणानां भोजनम् *(इत्यादिकम्)* उपायनवत्॥
+++(ब्राह्मणान् भोजयित्वा
ऽशिषो वाचयित्वा
कुमारं भोजयित्वेत्य् एतावद् इह द्रष्टव्यम् ।)+++

▼

### ⑤

>

▼ Oldenberg

4. 1 Brāhmaṇas are entertained with food as at the initiation (Upanayana).

▼ हरदत्तः

उपनयने ब्राह्मण-भोजने विशेषाऽभावात् आदि-पद-लोपोऽत्र द्रष्टव्यः । ब्राह्मण-भोजनादीति ब्राह्मणान् भोजयित्वाऽऽशिषो वाचयित्वा कुमारं भोजयित्व् एत्य् एतावद् इह द्रष्टव्यम् । अनुवाकस्य प्रथमेनेत्य्-आदि-परस्ताद् अति-देक्ष्यते ॥४॥

▼ सुदर्शनः

अत्र च **"ब्राह्मणानां भोजनम्"** इति ग्रहणम् आशीर्वचन-कुमार-भोजनयोर् अपि प्रदर्शनार्थम् । भोजनादीत्य् आदि-शब्दो वा द्रष्टव्यः; उपायनवद् इति वचनात् । उपनयनम् एवोपायनम् ॥४॥
▼

**⑤**

>

ब्राह्मणानां भोजनम् उपायनवत्।

# १६ ०५ सीमन्तवद् अग्नेर्②

सीमन्तवद् अग्नेर् उपसमाधानादि ॥

▼

**⑤**

>
▼ Oldenberg

5. 2 The putting (of wood) on the fire, &c. (is performed) as at the Sīmantonnayana.

▼ हरदत्तः

अग्नेर् उपसमाधानादि-परिषेचनान्तं सीमन्त-वत् कर्तव्यम् । पूर्वेद्युर् नान्दी-श्राद्धं, सकृत्-पात्राणि, शलल्य्-आदिभिस् सह शम्याः ।

अन्वारब्धायां इत्य् अत्र च कुमारस्यान्वारम्भः ।

परिषेचनान्तस्य चातिदेशः । यत्तु "गायतम् इति वीणाथिनौ" इत्यादि न तस्यात्रातिदेशः - अपरेणाग्निं प्राञ्चम् इति विधानात् पुनर् उपवेशस्य ॥५॥

▼ सुदर्शनः

**अग्नेर् उपसमाधानादि** तन्त्रं सप्रधान-होमं परिषेचनान्तम् इह **सीमन्तवद्** इति। ततश् चान्वारब्धे कुमारे प्रधान-होमाः । पात्र-प्रयोग-काले शललल्य्-आदीनां सकृदेव सादनम् ॥५॥

▼

**⑤**

>

सीमन्तवद् अग्नेर् उपसमाधानादि।

# १६ ०६ अपरेणाग्निम् प्राञ्चमुपवेश्य②

अपरेणाग्निं प्राञ्चम् उपवेश्य
त्रेण्या शलल्या*(=शल्यक-सूचयः)*, त्रिभिर् दर्भ-पुञ्जीलैः*(=सविशाखा नाडीभिः)*, शलालु*(=अपक्वोदुम्बर)*-ग्लप्सेन*(=गुच्छेन)* +इति
तूष्णीं केशान् विनीय यथर्षि शिखा निदधाति।

▼

⑤

>

▼ Oldenberg

6. 3 He makes (the boy) sit down to the west of the fire, facing the east, combs his hair silently with a porcupine's quill that has three white spots, with three Darbha blades, and with a bunch of unripe Udumbara fruits; and he arranges the locks in the fashion of his ancestral Ṛṣis,

▼ हरदत्तः

**विनयनं** पृथक्करणं वप्तव्यानां शिखार्थानाञ्च । **तूष्णीमिति** वाग्यमनार्थं न मन्त्रप्रतिषेधार्थम्, प्राप्त्यभावात् । **यथर्षि** यावन्त ऋषयो यस्य प्रवरे तावतीश्शिखाः करोति-त्र्यार्षेयस्य तिस्रः पञ्चार्षेयस्य पञ्चेति ॥६॥

▼ सुदर्शनः

**प्राञ्चं** प्राङ्मुखम् । तूष्णीं वाग्यतः । **केशान् विनीय** विविधं नीत्वा; वप्तव्यान् शिखार्थांश्च पृथक्पृथक्कृत्वेत्यर्थः ॥ **यथर्षि** यावन्त ऋषयस् स्वप्रवरे तावती**श्शिखा निदधाति** । एकार्षेयस्यैका शिखा द्व्यार्षेयस्य द्वे इत्यादि ॥६॥

▼

⑤

>

अपरेणाग्निं प्राञ्चमुपवेश्य त्रेण्या शलल्या त्रिभिर्दर्भपुञ्जीलैः शलालुग्लप्सेनेति तूष्णीं केशान् विनीय यथर्षि शिखा निदधाति।

# १६ ०७ यथा वैषाम्②

यथा वैषां कुल-धर्मः स्यात् ॥

▼

⑤

>

▼ Oldenberg

7. Or according to their family custom.

▼ हरदत्तः

अथवा **यथा** येन प्रकारेण **एषां** कुमारस्य कुलजानां **कुलधर्मः** प्रवर्तते तथा शिखां करोति । एषाम् इति वचनं कर्तुः कुलधर्मो मा भूदिति । तेनास्मिन् कर्मणि पितैव कर्तेति नियमो नास्ति । अन्यत्र तु सति सम्भवे कुमारकर्मसु तस्यैव नियमः ॥७॥

▼ सुदर्शनः

अथवा– **यथा** येन प्रकारेण **एषां** कुलजानां **कुलधर्मः** प्रवर्तते, तथा शिखा कर्तव्या । केचित्–एषामिति वचनात् पितुरन्योऽपि चौलकर्तेति ॥७॥

▼

⑤

>

यथा वैषां कुलधर्मः स्यात्।

# १६ ०८ अपाँ②

उपनयनवद् दिग्-वपनाद्य् अपां संसर्जनाद्य्-आ-केश-निधानात् समानम् ॥ १६.८ ॥

▼

⑤

>

▼ Oldenberg

8. 4 The ceremonies beginning with the pouring together of (warm and cold) water and ending with the putting down of the hair are the same (as above; comp. M. II, 14, 11).

▼ हरदत्तः

"उष्णाश्शीतास्वानीये"त्यादि "दर्भस्तम्बे वा निदधाती"त्येवमन्तं उपनयनवत् कर्तव्यमित्यर्थः ॥८॥

▼ सुदर्शनः

व्याख्यातमेवैतत्समावर्तने ॥८॥

▼

⑤

>

अपाँ संसर्जनाद्याकेशनिधानात्समानम्।

# १६ ०९ क्षुरँ प्रक्षाल्य②

क्षुरं प्रक्षाल्य निदधाति ॥

▼

⑤

>

▼ Oldenberg

9. He puts down the razor after having washed it off.

▼ हरदत्तः

क्षुरस्य प्रक्षालनं विधीयते । निधानमर्थप्राप्तम् । यदा निदधाति तदा प्रक्षाल्येति ॥९॥
▼ सुदर्शनः

अत्र प्रक्षालनमेव विधीयते; निधानं त्वर्थप्राप्तम् ॥९॥
▼

⑤

>

क्षुरँ प्रक्षाल्य निदधाति।

# १६ १० तेन त्र्यहम्②

तेन त्र्य्-अहं कर्म-निवृत्तिः ॥

▼

⑤

>
▼ Oldenberg

10. 5 The ceremony is (repeated) three days with the (same razor). (Then) the rite is finished.

▼ हरदत्तः

तेन क्षुरेण त्रिष्वहोरात्रेषु नापितकर्म न कर्तव्यम् ॥१०॥

▼ सुदर्शनः

**तेन** क्षुरेण **त्र्यहं** नापित**कर्मनिवृत्तिस्** स्यात् ॥१०॥

▼

⑤

>

तेन त्र्यहं कर्मनिवृत्तिः।

# १६ ११ वरन् ददाति②

वरं ददाति ॥

▼

⑤

>
▼ Oldenberg

11. (The father) gives an optional gift (to the Brāhmaṇa who has assisted).

▼ हरदत्तः

अस्मिन् कर्मणि समाप्ते कुमारस्य पिता ब्रह्मणे वरं ददाति । "गौर् वै वर" इत्त्युक्तम् ॥११॥

▼ सुदर्शनः

**वरं** गां पिता **ददाति** दक्षिणत असीनाय ब्राह्मणाय । यद्य् अन्यश् चौलकर्ता - तदा तस्मै ॥११॥

▼

⑤

>

वरं ददाति।

# १६ १२ एवङ् गोदानम्②

एवं *(=चौलवत्)* गोदानम् अन्यस्मिन्न् अपि नक्षत्रे षोडशे वर्षे ॥

▼

⑤

>

▼ Oldenberg

12. The Godāna (or the ceremony of shaving the beard, is performed) in the sixteenth year, in exactly the same way or optionally under another constellation.

▼ हरदत्तः

यथा चौलं **एवम्** अस्य **गोदाना**ख्यम् अपि कर्म कर्तव्यम् । तत्र तृतीयस्य वर्षस्यापवादः **षोडशे वर्षे** इति । **अन्यस्मिन्नपि नक्षत्रे** पुण्याह एव । पुनर्वसु नियमस्यापवादः ॥१२॥

▼ सुदर्शनः

**गोदानम्** इति कर्मनामधेयम् ; यस्मिन्कर्मण्यङ्गभूतं गोदानयोश् शिरःप्रदेशविशेषयोर्वपनम् । यत्रापि पक्षे शिखावर्जितसर्वकेशवपनं, यथर्षि च शिखाः; तत्रापि गोदानयोर्वपनं कर्मनामधेयप्रवृत्तिनिमित्तं विद्यत एव । तद्गोदानाख्यं कर्म । **एवं** यथाचौलं ब्राह्मणभोजनादि वरदानान्तं कर्तव्यम् । तच्चा**न्यस्मिन्नपि नक्षत्रे** रोहिण्यादौ, **वर्षे** च **षोडशे** भवति ॥१२॥ अत्र पक्षान्तरमाह—

▼

⑤

>

एवं गोदानम् अन्यस्मिन्न् अपि नक्षत्रे षोडशे वर्षे।

# १६ १३ अग्निगोदानो वा②

अग्नि-गोदानो *(ब्रह्मचारी)* वा स्यात् ॥

▼

⑤

>

▼ Oldenberg

13. 6 Or he may perform the Godāna sacred to Agni.

▼ हरदत्तः

अग्निर्देवता यत्र गोदाने तदग्निगोदानं यस्य सोऽ**ग्निगोदानः** । (अग्निशब्देन तद्दैवत्यं गोदानं लक्ष्यते । अग्निर्गोदानमस्येति विग्रहः ।) एकस्य गोदानशब्दस्य लोपः, उष्ट्रमुखवत् । तत्र बौधायनः– षोडशे वर्षे गोदानम् । तस्य चौलवत् तूष्णीं प्रतिपत्तिरवसानं च । .....अग्नि-गोदानो वा भवति । तस्य काण्डोपाकरणकाण्डसमापनाभ्यां प्रतिपत्तिरवसानं च । (बौ. गृ.३-२-५२-५८) इति । किमुक्तं भवति? आग्नेयानां काण्डानाम् उपाकरणसमापनयोर्यः कल्पः तत्र चौलधर्माः प्रवर्तन्त इति । षोडशे वर्षे भवति । सकृत् पात्राणि न शम्याः । अस्यास्मिन् गृह्येऽनुपदिष्टत्वात् यत् गोदानमुपदिष्टं तत्रैव शम्याविधिः ।

तत्र प्रयोगः–
ब्राह्मणान् भोजयित्वा
ऽऽशिषो वाचयित्वा
तूष्णीं केशश्मश्रु वापयित्वा
ऽग्नेर् उपसमाधानादि-परिषेचनान्तानि आग्नेय-काण्डोपाकरणवत् कृत्वा
शुक्रियवद् देवतोपस्थानं
"अग्ने व्रतपते व्रतं चरिष्यामि" इति ।
अन्ये संवत्सरे व्रतचर्या ।

अन्ते विसर्गः -
एवम् एवाचारिषम् इत्यादि विकारः, शुक्रियवत् दैवतम् । केशश्मश्रुवपनम् । अन्ते ब्राह्मणभोजनम् ।

उभयत्र नान्दी-मुख-श्राद्धं केचित् कुर्वन्ति ।
अपरे न ॥ १३ ॥

▼ सुदर्शनः

अग्नये गोदानं यस्य सोऽ**ग्निगोदानो** ब्रह्मचारी । पुल्लिङ्गनिर्देशाच्चैवं विग्रहः । अस्मिन् पक्षे आज्यभागान्ते कृते "अग्नये काण्डर्षये स्वाहा" इत्याज्येनैवैका प्रधानाहुतिः । ततो जयादि(१) क्षुरप्रक्षालनान्तम् ॥१३॥

▼

⑤

>

अग्निगोदानो वा स्यात्।

# १६ १४ संवत्सरङ् गोदानव्रत(२)मेक②

संवत्सरं गोदानव्रतमे*(मित्ये)*क उपदिशन्ति ॥ १६.१४ ॥

▼

⑤

>
▼ Oldenberg

14. 7 Some prescribe the keeping of a vow through one year in connection with the Godāna.

▼ हरदत्तः

कृतगोदानस्यापि तच्छेषतया **संवत्सरं** व्रतचरण**मेक** आचार्या **उपदिशन्ति** । चौलगोदानेऽयं विकल्पः । अग्निगोदाने तु काण्डोपाकरणातिदेशात् नित्यमेव यदा व्रतचर्या तदा वरदानादूर्ध्वं देवतोपस्थानं पूर्ववदन्ते, विसर्गश्च पूर्ववदेव ॥१४॥

▼ सुदर्शनः

अधीतेऽपि वेदे, अवश्यं **संवत्सरं गोदानव्रतं** ब्रह्मचर्यं चरितव्यमि**त्येक उपदिशन्ति;** वैकल्पिकमित्यर्थः ॥१४॥
▼

⑤

>

संवत्सरं गोदानव्रत(२)मेक उपदिशन्ति।

# १६ १५ एतावन्नाना सर्वान्②

एतावन् नाना*(=भेदः)* - सर्वान् केशान् *(शिखाम् अपीति केचित्)* वापयते *(आचार्येण, वरदानञ् चाचार्यायैव ।)* ॥

▼

⑤

>
▼ Oldenberg

15. The difference (between the Kaula and the Godāna) is that (at the Godāna) the whole hair is shaven (without leaving the locks).

▼ हरदत्त-प्रस्तावः

उभयोरपि गोदानयोश्चौलाद्विशेषमाह—

▼ हरदत्तः

अस्मिन् चौलगोदाने तु **एतावन्नाना** पृथग्भावश्चौलात् । अत्र **सर्वान् केशान् वापयते** सशिखान् । चौले तु यथर्षि शिखा निदधाति । अन्ये श्मश्र्वादीनां प्राप्त्यर्थं सर्वग्रहणं वर्णयन्ति । तेषां केशशब्द उपलक्षणार्थः । तथा चाश्वलायनः–केशश्मश्रुलोमनखान्युदक् संस्थानि संप्रेष्यति । (आश्व.गृ.१-१८-६) इति ॥१५॥

▼ सुदर्शनः

**एतावन्नाना** एतावान् भेदः । यदपिधानार्थयापि शिखया सह **सर्वान् केशान् वापयत** इति । ततश्चेह विनयनाभावाच्छलल्यादीनां निवृत्तिः । अत्र च वापयत इति णिजन्तनिर्देशादाचार्य एव गोदानकर्मणः कर्ता । वरदानञ्चाचार्यायैव । तथात्र शिखाया अपि वपनं "एतावन्नाना सर्वान् केशान्वापयते" इत्यस्मादेव वचनात्; (१)सत्रवत् । अन्य आहुः— रिक्तो वा एषोऽनपिहितो यन्मुडस्तस्यैतदपिधानं यच्छिखेति । "सत्रेषु तु वचनात् वपनँ शिखायाः"(आप.ध. १-१०-८,९) इति सत्रेभ्योऽन्यत्र शिखाया वपनप्रतिषेधात् इहापि नैव शिखाया वपनमिति ॥१५॥

▼

⑤

>

एतावन्नाना सर्वान् केशान् वापयते।

# १६ १६ उदकोपस्पर्शनमिति छन्दोगाः②

*(अहरहर्)* उदकोपस्पर्शनम् इति छन्दोगाः १६

▼

⑤

>

▼ Oldenberg

16. 8 According to the followers of the Sāma-veda he should 'touch water.'

▼ हरदत्तः

अस्मिन् गोदानव्रते अहर**हरुदकोपस्पर्शनं** (२)कर्तव्यमिति **छन्दोगा** उपदिशन्ति । त्रिषवणमिति केचित् ॥ १६ ॥ इति श्रीहरदत्तविरचितायामनाकुलायां गृह्यसूत्रवृत्तौ षोडशः खण्डः ॥

▼ सुदर्शनः

सांवत्सरिकगोदानव्रतपक्षे अहर**हरुदकोपस्पर्शनं छन्दोगा** उपदिशन्ति; विकल्प इत्यर्थः ॥१६॥ इति श्रीसुदर्शनाचार्यविरचिते गृह्यतात्पर्यदर्शने षोडशः खण्डः ॥ षष्ठः पटलस्समाप्तः ॥

▼

⑤

>

उदकोपस्पर्शनमिति छन्दोगाः।

---

1. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

2. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

3. 12 seq. Description of the regular form of a Pākayajña.↩

4. Comp. Śrauta-sūtra I, 11, 6 seqq.↩

5. This is the Praṇītā water.↩

6. The Brahman.↩

7. Comp. Taitt. Brāhmaṇa II, 1, 4, 5; Śatapatha Brāhmaṇa II, 3, 1, 18. 21. - At the Agnihotra the sacrificer, having wiped off the Sruc with his hand, wipes off the hand on the Barhis or on the earth (Āpast.-Śraut. VI, 10, 11; 11, 4; Kātyāyana IV, 14, 20). As to the following acts alluded to in this Sūtra, comp. Āpastamba VI, 11, 4. 5; 12, 2.↩

8. On the Nakṣatra Invakās, comp. Section 3, Sūtra 4. This Sūtra forms a Śloka-hemistich, on which Haradatta observes, 'This verse has not been made by the Sūtrakāra.'↩

# १७ गृह्यनिर्मणम्①

## १७ ०१ दक्षिणाप्रत्यक्प्रवणमगारावकाशमुद्धृत्य②

दक्षिणा-प्रत्यक्*(=पश्चिम)*-प्रवणम्*(=निम्नम्)* अगरावकाशम् *(खनित्रेण)* उद्धृत्य, पालाशेन शमीमयेन वोदूहेनैतामेव दिशम् उत्तरया*(="यद्भूमेः क्रूर"मित्येतया)* +उदूहति ॥

यद् भूमेः क्रूरं तद् इतो हरामि,
पराचीन् निर्ऋतिं निर्वाहयामि ।
इदँ श्रेयो ऽवसानम्*(=स्थानम्)* आगन्म*(=आगतवन्तो)* देवा,
गोमद् अश्वावद् इदम् अस्तु प्र भूमं ।

▼

⑤

>

▼ Oldenberg

1. The ground for building a house should be inclined towards the south-west. He elevates the surface and sweeps (the earth) with a broom of Palāśa wood or of Sami wood, with the next (verse, M. II, 15, 1), in the same (south-west) direction;

▼ हरदत्त-प्रस्तावः

यज्ञेष्वधिकरिष्यमाणस्य पुरुषस्य देहसंस्कारा व्याख्याताः । ते च "शालीनस्योदवसाय" इति वचनाभावे गृह एव कर्तव्याः । विधिवच्च निर्मिते गृहे । विधिवत् प्रवेशादपेक्षितायुर्यज्ञधनादिफलसिद्धिः । अतो मन्त्राम्नानक्रमप्राप्तो गृहनिर्माणप्रवेशयोर्विधिर्व्याख्यायते

▼ हरदत्तः

अथ गृहसम्मानविधिः । गृहसम्मानं च न सर्वयज्ञादिवन्नित्यम् । नाप्यद्भुतकर्मप्रायश्चित्तादिवन्नैमित्तिकम् । किं तर्हि? काम्यम् । अतोऽक्रियायां न दोषः । क्रियायां चोदगयनादिनियमः । तत्र यस्मिन् प्रदेशेऽगारं चिकीर्षितं सोऽगारावकाशः स **दक्षिणाप्रत्यक्प्रवणो** भवति । दक्षिणा-प्रतीच्योरन्तराले निम्ना भवति । एवंविधे देशे अगारं कर्तव्यमित्यर्थः । **तमगारावकाशं उद्धन्ति** खनित्रेण खनति यथा पांसव उत्पद्यन्ते । उद्धृत्य तान् पांसून् पालाशेन शमीयेन वो**दूहेन** एतामेव दिशं प्रति उत्तरयर्चा "यद्भूमेः क्रूरम्"इत्येतया **उदूहति** उन्नतात् प्रदेशात् अवनते प्रापयति । उदूह्यतेऽनेनेत्युदूहः ॥१॥

▼ सुदर्शनः

योऽगारार्थत्वेनाभिप्रेतोऽवकाशो भूमिभागो **दक्षिणाप्रत्यक्प्रवणः** दक्षिणाप्रतीच्यां नैर्ऋत्यां दिशि निम्नस्त**मुद्धृत्य** खनित्रादिना पांसू(१)नुत्खाद्य **पालाशेन शमीमयेन वोदूहेन,** उदूह्यन्ते देशान्तरं प्राप्यन्ते पांसवोऽनेनेत्युदूहः; वादुलूक इत्यर्थः। तेनैतामेव कोणदिशं **उत्तरया** "यद्भूमेः क्रूरम्" इत्येतयो**दूहति** ॥१॥

▼

⑤

>

दक्षिणाप्रत्यक्प्रवणमगारावकाशमुद्धृत्य पलाशेन शमीमयेन वोदूहेनैतामेव दिशमुत्तरयोदूहति ॥

## १७ ०२ एवन् त्रिः②

एवं त्रिः ॥

▼

⑤

>

▼ Oldenberg

2. In the same way three times.

▼ हरदत्तः

एवं त्रिरुद्धृत्य उधूहति ॥२॥

▼ सुदर्शनः

उदूहतीति सम्बन्धः । अत्र द्वितीयतृतीययोरप्युदूहयोः मन्त्रावृत्तिः, एवमिति वचनात् । अन्यथा उत्तरया त्रिरुदूहतीत्येव ब्रूयात्, "एवं त्रिः" इति सूत्रान्तरं नारभेत ॥२॥

▼

⑤

>

एवं त्रिः।

# १७ ०३ क्लृप्तमुत्तरयाभिमृश्य②

*(समं यथा तथा)* क्लृप्तम् उत्तरय*("स्योना पृथिवी")* +अभिमृश्य
प्रदक्षिणं स्थूणागर्तान् खानयित्वा*(नकारस्छान्दसः)*
ऽभ्यन्तरं*(=बहिरारभ्य मध्ये यथा समाप्यत इति हरदत्तः, विपरीतम् इति सुदर्शनसूरिः)* पाँसून् उदुप्य *(=उद्धृत्य)*

## ०२ स्योना पृथिवि⑥

स्योना॑ *(=सुखरूपा)* पृथिवि भव+
अनृक्षरा॑ *(=कण्टकादिरहिता)* निवे॑शनी ।
य॑च्छा नश् श॑र्म सप्र॑थाः*(=सकीर्तिः)* ।

## मन्त्रः - द्वारस्थूणामन्त्रणम्⑥

उत्तराभ्यां*(=इहैव तिष्ठे)* दक्षिणं द्वारस्थूणाम् अवदधाति ३

---

इ॒हैव तिं॑ष्ठ निमिं॑ता॒*(=निखाता)*
*(तक्षकृत-)*तिल्वं॑ला*(=तिलकवती)* स्या॒द् इरां॑*(=अन्न)*वती ।

मध्ये॒ ताल्प्यं॑स्य *(=गृह्यस्य [द्वारस्य])* तिष्ठा॒न् *(त्)*
मा त्वा॒ प्राप॑न्न् अघा॒यवः॑ ।

आ त्वा॑ कुमा॒रस् तरु॑ण॒
आ व॒त्सो जग॑ता स॒ह ।
आ त्वा॑ परि॒स्रुतः॑ *(=सुरायाः → घृतस्य)* कु॒म्भा
आ द॒ध्नः कल॑शीर् *(मन्थनार्थम्)* अयन् ।

▼

⑤

>
▼ Oldenberg

3. He touches the ground, which has thus been prepared, with the next (verse, II, 15, 2). Then he has the pits for the posts dug from left to right, throws the earth (from the pits) towards the inside (of the building-ground), and erects the right doorpost with the next two (verses, M. II, 15, 3. 4)

▼ हरदत्तः

एवमुदूह्य ततस्तं भूमिभागं कल्पयन्ति यथा सर्वतस्समं सम्पद्यते । ततः तं क्लृप्तं उत्तरयर्चा "स्योना पृथिवी"त्येतयाभिमृशति । ततः **प्रदक्षिणं स्थूणागर्तान्** खानयति नकारश्छान्दसः । **अभ्यन्तरं च** बहिरारभ्य मध्ये यथा समाप्यते तथेत्यर्थः । तत्र मध्यस्थूणासु वंशधारणार्थासु प्रदक्षिणमिति चाभ्यन्तरमिति च विशेषणस्यासम्भवात् पर्यन्तास्वेव भवति । तत्र प्राग्द्वारेऽगारे दक्षिणद्वारस्थूणागर्तमारभ्य प्रदक्षिणमोत्तरस्मात् द्वारस्थूणागर्तात् खानयित्वा ततो यावत्यो मध्यमस्थूणाः तावतीनां दक्षिणादारभ्योदगपवर्गः । एवमन्यथाद्वारेऽप्यगारे यथासम्भवं प्रदक्षिणमभ्यन्तरत्वं च सम्पाद्यम् । एवं **खानयित्वा** गर्तेभ्यः पासूनुदूप्य उद्धत्य तत **उत्तराभ्यां** ऋग्भ्यां "इहैव तिष्ठ" इत्येताभ्यां दक्षिणाद्वारस्थूणां गर्ते **अवदधाति** ॥३॥

▼ सुदर्शनः

क्लृप्तमुदूहेन प्रागुदक्प्रवणं कृतं **उत्तरया** "स्योना पृथिवि" इत्यनया** अभिमृश्य स्थूणागर्तान्** स्थूणानां (१)विभागार्थान् गर्तान् कर्मकरैः प्रदक्षिणं **खानयित्वा**भ्यन्तरमारभ्य, न बहिः, **पांसूनुदुप्य उत्तराभ्यां** "इहैव तिष्ठ" इत्येताभ्यां **दक्षिणां** निष्क्रामत एव, न प्रविशतः, द्वारस्थूणामवटे **अवदधाति ।** अत्र प्रादक्षिण्यस्य चाभ्यन्तरत्वस्य च विधानं पर्यन्तीयास्वेव स्थूणासु; न तु मध्यमासु ॥३॥

▼

⑤

>

क्लृप्तमुत्तरयाभिमृश्य प्रदक्षिणं स्थूणागर्तान् खानयित्वाभ्यन्तरं पाँसूनुदूप्योत्तराभ्यां दक्षिणा द्वारस्थूणामवदधाति ॥

# १७ ०४ एवमितराम् एताभ्यामेव②

एवमितराम् *(सव्य-द्वारस्थूणाम्)*४

▼

⑤

>
▼ Oldenberg

4. In the same way the other (door-post).

▼ हरदत्तः

एताभ्यामेव द्वाभ्यामृग्भ्यां **इतरां** उत्तराञ्च द्वारस्थूणां अवदधातीत्यर्थः। इह दक्षिणामितरामिति निष्क्रमतः सव्यदक्षिणे प्रत्येतव्ये; न प्रविशतः ॥४॥

▼ सुदर्शनः

**इतरां** सव्यां द्वारस्थूणां **एवं** "इहैव तिष्ठ" इत्येताभ्यामेवावदधाति ॥४॥

▼

⑤

>

एवमितराम्।

# १७ ०५ यथाखातमितरा अन्ववधाय②

यथाखातम् इतरा *(वंशस्तम्भान्)* अन्ववधाय
वँशम् आधीयमानम् उत्तरेण यजुषा *(="ऋतेन स्थूणौ")* ऽभिमन्त्रयते ५

ऋ॒तेन॒ स्थूणा॑व*(=स्तम्भम्)* अ॒धिरो॑ह व॒ँशो
ऽग्रो वि॒राज॒न्न् अप॑सेध शत्रू॑न् ।

▼

⑤

>

▼ Oldenberg

5. Having erected after (the door-posts) the other (posts) in the same order in which (the pits) have been dug, he recites the next Yajus (II, 15, 5) over the ridge-pole when it is placed (on the posts),

▼ हरदत्तः

द्वारस्थूणयोः यथाखातं अवधानं मन्त्रवच्च । इतरासां तु **यथाखातं** येन क्रमेण गर्ताः खाताः तेनावधानं तूष्णीम् । एवं सर्वास्ववहितासु मध्यमस्थूणासु वंश(१)मादधति कर्मकर्तारः । **तैराधीयमानं वंशमुत्तरेण यजुषा** "ऋतेन स्थूणा"वित्यनेना**भिमन्त्रयते ।** वंशग्रहणेन च पृष्ठवंशो गृह्यते, मुख्यत्वात् । व्यक्तञ्चैतत् भारद्वाजके "ऋतेन स्थूणे"ति पृष्ठवंशमधिरोपयती"ति । तत्र मन्त्रे स्थूणाविति छान्दसो लिङ्गव्यत्ययः । द्विवचनञ्च यथासम्भवं द्रष्टव्यम् ॥५॥

▼ सुदर्शनः

**यथाखातं** खननक्रमेण **इतराः** स्थूणाः तूष्णी**मन्ववधाय** वंशं स्तूपं स्थूणास्वाधीयमानं **उत्तरेण यजुषा** "ऋतेन स्थूणावधिरोह" इत्यनेनाभिमन्त्रयते ॥५॥

▼

⑤

>

यथाखातमितरा अन्ववधाय वँशमाधीयमानमुत्तरेण यजुषाऽभिमन्त्रयते।

# १७ ०६ सम्मितमुत्तरैर्यथालिङ्गम्②

*(अगारम्)* सम्मितम् *(=संक्लृप्तं)* उत्तरैर् *(="ब्रह्म च ते क्षत्रम्")* यथालिङ्गम् *(अभिमन्त्रयते)*६

ब्रह्म॑ च ते क्ष॒त्रञ् च॒ पूर्वे॒ स्थूणे॑ अ॒भिर॑क्षतु ।
य॒ज्ञश् च॒ दक्षि॑णाश् च॒ दक्षि॑णे [स्थूणे॑ अ॒भिर॑क्षतु]।
इ॒षश् चो॒र्जश् *(शारदौ मासौ)* चाप॑रे [स्थूणे॑ अ॒भिर॑क्षतु]।
मि॒त्रश् च॒ वरु॑ण॒श् चोत्त॑रे [स्थूणे॑ अ॒भिर॑क्षतु]।
ध॒र्मस् ते॒ स्थूणा॑राजः॒
श्रीस् ते॒ स्तूपः॑ *(=पृष्ठवंशः)* ।*(५)*

▼

⑤

>
▼ Oldenberg

6. The next (six) (Yajus formulas, II, 15, 6-11) over the (house when it is) finished, according to the characteristics contained in the single formulas.

▼ हरदत्तः

ततस्तदगारं **सम्मितं** संक्लृप्तं **उत्तरैर्मन्त्रैः** "ब्रह्म च ते क्षत्र"मित्यादिभिष्षड्भिः । किम्? अभिमन्त्रयते इत्येव । **यथालिङ्ग**मिति यस्यागाराङ्गस्य लिङ्गं यस्मिन्मन्त्रे दृश्यते तेन तदभिमुखो ऽगारमभिमन्त्रयत इत्यर्थः । यदापि पूर्वस्थूणा बद्धा तदापि द्वे एवाभिसन्धायाभिमन्त्रणम् । अगारस्य द्विवचनसंयोगात् । एवं सर्वत्र अगारमध्ये यः स्थूणाराजः स्तूपः । पृष्ठवंशः। अत्रैके स्थूणालिङ्गेषु चतुर्षु मन्त्रेषु "स्थूणे अभिरक्षतु" इत्येवमनुषङ्गमिच्छन्ति । यज्ञश्च दक्षिणाश्च दक्षिणे स्थूणे अभिरक्षतु इति । अन्ये "ते" शब्दस्यापि-यज्ञश्च ते दक्षिणाश्चेति । (२)साकांक्षत्वान्मन्त्राणाम्, नेति वयम् । दक्षिणा इषश्चोर्जश्चेतिबहुवचनान्तैः अभिरक्षत्वित्येकवचनान्तस्य सम्बन्धानुपपत्तेः, ऊहस्य चाविधानात् अभ्यातानवत् पाठाभावाच्च सर्वानुषङ्गेषु दृष्टस्यान्ते पुनः पाठस्याभावाच्च । यत्तु साकांक्षत्वमुक्तं तदपि नानुषङ्गहेतुः सन्निधिमात्रेणाकाङ्क्षाया निवर्तनात् । यदि वा धर्मस्ते स्थूणाराज श्रीस्ते इत्यत्राभिरक्षत्वित्यस्य नापेक्षा, द्वयोरपि प्रथमान्तत्वात् । एवं दक्षिणा इत्यादिकं प्रथमान्तं द्रष्टव्यम् । तस्मादाकाङ्क्षैव नास्ति । सन्निधानाच्च स्थूणाप्रतिपत्तिः ॥६॥

▼ सुदर्शनः

**सम्मितं** निर्मितमगारं **उत्तरैः** "ब्रह्म च ते क्षत्रं च" इत्यादिभिः पञ्चभिर्मन्त्रैः **यथालिङ्गं** मन्त्रलिङ्गावगतदिङ्मुखोऽभिमन्त्रयते । तत्र पञ्चमेन मध्यमाभिमुखः, अनन्वितत्वात् । केचित्—षड्भिः । तत्र "धर्मस्ते स्थूणाराजः" इति मध्यमश्च "श्रीस्ते स्तूपः" इति पृष्ठवंशमिति । अत्र यद्यपि मन्त्रैरगारावयवास्स्थूणाः स्तूयन्ते; तथाप्येभिः स्थूणावदगारमेव स्तूयते, यथा पादवन्दनेन पादवानेव वन्द्यते । अत्र केचित्–द्वितीयादिषु त्रिषु मन्त्रेषु वाक्यसमाप्त्यर्थं "स्थूणे अभिरक्षतु" इत्याद्यनुषङ्गं मन्यन्ते । अन्ये "ते" शब्दस्यापि । तथा "धर्मस्ते" इत्यादौ अभिरक्षत्वित्यस्य च । अपरे तु–नैवेह कस्यचिद् क्वचिदप्यनुषङ्गः; अनुषज्यमानस्य वैरूप्यात्, अन्तेऽपि च पाठाभावाच्च । वाक्यसमाप्तिस्तु प्रकृततया बुद्धिस्थपदार्थान्वयात्सिध्यति, यथा(२)"इषे त्वा" (तै.सं.१-१-१.) इति मन्त्रस्य बुद्धिस्थच्छेदनान्वयात् छिनद्मीति वाक्यसमाप्तिरिति ॥६॥

▼

⑤

>

सम्मितमुत्तरैर्यथालिङ्गम्।

# १८ गृहप्रवेशविधिः①

# १७ ०७ पालाशं शमीमयम्②

पालाशं शमीमयं वेध्मम् *(पाकाग्वाव्)* आदीप्योत्तरयर्चा *("उद्ध्रियमाण"इत्येतया पञ्चपादया)* ऽग्निम् उद्धृत्य

उ॒द्ध्रि॒यमा॑ण॒ उद्ध॑र पा॒प्मनो॑ मा॒
यद् अवि॑द्वा॒न् यच् च॑ वि॒द्वाँश् च॒कार॑ ।
*(रात्रौ प्रवेशे)* अह्ना॒ यद् एनः॑ कृ॒तम् अ॑स्ति पा॒पँ
*(अहनि प्रवेशे)* रात्र्या॒ यद् एनः॑ कृ॒तम् अ॑स्ति पा॒पँ
सर्व॑स्मा॒न् मोद्धृ॒तो *(त्वम्)* मु॑ञ्च॒ तस्मा॑त् ।

---

## अगारप्रतिपादनम्⑥

उत्तरेण यजुषा *("इन्द्र स्य गृहा वसुमन्तो वरूथिनः")* ऽगारं प्रपाद्य

इन्द्र॑स्य *(मम)* गृहा वसु॑मन्तो वरू॒थिन॒स्*(=गृह[+अवयवा])* -
तान् अ॒हँ सु॒मन॑सः॒ प्रप॑द्ये ।

---

## प्रतिष्ठापनम्⑥

उत्तरपूर्वदेशे ऽगारस्योत्तरया *("अमृताहुति"मित्यनया)* ऽग्निं प्रतिष्ठापयति ७

अ॒मृ॒ता॒हु॒तिम् अ॒मृता॑याञ् जुहोम्य्*(→स्थापयामि)*
अ॒ग्निं पृ॑थि॒व्याम् अ॒मृत॑स्य॒ जित्यै॑ ।
तया॑ ऽन॒न्तं काम॑म् अ॒हञ् ज॑यानि
प्र॒जाप॑ति॒र् यं प्र॑थ॒मो जि॒गाय॑
+अ॒ग्निम् अ॑ग्नौ॒*(→पृथिव्यां)* स्वाहा॑ ।
*(इयं वा अग्निर्वैश्वानरः इति श्रुतेः।)*

▼

⑤

>
▼ Oldenberg

7. He sets a piece of Palāśa wood or of Śamī wood on fire, takes the fire up (in a dish) with the next verse (II, 15, 12), carries it to the house with the next Yajus (II, 15, 13), and places the fire in the north-eastern part of the house with the next (II, 15, 14).

▼ हरदत्तः

अथ प्रवेशनविधिः । अन्यथा सम्मितस्याप्यगारस्य प्रवेशे विधिर् अयं भवति । उदग्-अयनाद्य् अपेक्षितम् इति केचित् । नेत्यन्ये ।

बीजवतो गृहान् प्रतिपद्यते (आश्व.गृ.२-१०-२) इत्याश्वलायनः । बीज-ग्रहणं सर्वेषाम् एव गृहोपकरणानाम् उपलक्षणम् ।
▼ सुदर्शनः

**पालाशं शमीमयं वेध्मं**काष्ठम् *औपासने* ऽग्नाव् आदीपयति । इध्मम् इति च "अग्निषु महत इध्मान् आदधाति" इतिवद् अनियतं संख्यादिकं विवक्षितम् ।

**उत्तरया** "उद्ध्रियमाणः" इत्येतया । ततस् तम् अग्निम् उद्धरति । अत्र च सानुषङ्गे चतुष्पदे त्रिष्टुभौ द्वे ऋचौ पञ्चभिः पादैर् आम्नाते । तयोर् एकैवोद्धरणार्था । अन्या तु विकल्पार्था । उत्तरया इत्य् एकवचनेन विनियोगात् ।

व्यवस्थितश् चायं विकल्पो ऽभिप्रेतः, अग्निहोत्रवत् । यद्य् अहनि प्रवेशस् तदा रात्रिलिङ्गया, रात्रौ चेद् अहर् लिङ्गया ।

रात्रौ च प्रवेशश् शिष्टाचार-प्रसिद्ध इति पूर्वमेवोक्तः ।

## इध्मादीपनम्⑥

तत्र प्रवेक्ष्यन् **पालाशं शमीमयं वा इध्मं** अग्नाव् **आदीपयति** । इध्मश् चात्रार्थलक्षणो न नियत-परिमाणः । आदीप्य तम् अग्निपात्रं उद्धरत्य् **उत्तरयर्चा** "उद्ध्रियमाण" इत्येतया पञ्चपादया ।

यद्य् अहनि प्रवेशो रात्रिलिङ्गोऽविवादः प्रयोक्तव्यः । तथा रात्राव् अहर्लिङ्गो निर्विवादः प्रयोक्तव्यः । विभज्यविनियोगाभावात् ।

येषां तूदग्-अयनापेक्षा ते रात्रौ प्रवेशं नेच्छन्ति । अहःकृतस्य रात्रिकृतस्य च पाप्मनो विनियोगः प्रपाद्यत इत्यर्थः । विरोधोऽपि नास्ति । यथा "यद् आपो नक्तं दुरितं चरामे"ति ।

## अग्नि-स्थापनम्⑥

तम् उद्धृतम् अग्निं **उत्तरेण यजुषा** "इन्द्रस्य गृहा वसुमन्तो वरूथिनः" इत्यनेन **अगारं** प्रपादयति । **प्रपाद्य** अगारस्य **उत्तरपूर्वे देशे** तम् **अग्निं प्रतिष्ठापयति उत्तरयर्चा** "अमृताहुतिम्" इत्यनया ।

## अग्निविवेकः⑥

"अत्रागारस्ये"ति न वक्तव्यं, "अग्निम्" इति च । कस्मात्? उभयोरप्यत्रैव वाक्ये श्रुतत्वात् । एवं तर्हि नायम् अगारशब्दो देशविशेषणार्थः । किं तर्हि? अग्निविशेषणार्थः - अगारस्याग्निं प्रतिष्ठापयतीति ।

कः पुनरगारस्याग्निः? यः *पचनाग्निः* । तस्माद् औपासनाद् उद्धरणम् अस्याग्नेर् न भवति । लौकिकादेव भवतीति केचित् ।

अपरे तु होम-संयोगाद् औपासन एवायम् अग्निर् इति स्थिताः । तेषाम् "अगारस्ये"त्य् "अग्निम्" इति च पदद्वयं व्यर्थम् । होमाश् च पचनेऽपि दृष्टा वैश्वदेवे । तस्मात् पचनाग्निरेवायम् ।

यद्य् अप्य् एवं - तथापि देश-संस्कारो भवत्य् एव । होम-संयोगात्।

## औपासनादि-प्रवेशः⑥

अथौपासनस्य वैहारिकाणां च तदैव प्रवेशनं प्रतिष्ठापनं च स्वे स्थाने । भार्यादीनां च तदैव प्रवेशः ॥७॥

---

## प्रतिष्ठापनम्⑥

**उत्तरेण** "इन्द्रस्य गृहाः" इति **यजुषा** । उद्धृतम् अग्निम् **अगारं** प्रपाद्य, अनन्तरं विधिवत् संस्कृते उत्तर-पूर्वदेशे ऽगारस्य **तम् अग्निम् उत्तरया** अमृताहुतिम्" इत्य् एतया **प्रतिष्ठापयति** ।

तथा श्रौताग्नीन् अपि विधिवद् आनीतान् अस्मिन्न् एव काले अगारं प्रपाद्याग्न्य्-अगारे यथाविधि प्रतिष्ठापयति ।

### अग्निविवेकः⑥

केचित् - इहाग्निम् उद्धृत्य अगारं प्रपाद्येति प्रकृतेऽपि पुनर् उक्तयोर् एतयोर् अर्थवत्त्वाय अगारस्याग्निम् इत्य् अन्वयाद् आदीपनादि-प्रतिष्ठापनान्तं पचनार्थस्य लौकिकाग्नेर् एव, नौपासनस्येति ।

तेषाम् एतत् तुल्यसूत्रे विवाहाङ्गे प्रविश्य होमे पचनाग्नेर् एवोपसमाधानादि स्यात् । अथागारशब्दस्य शयनस्थानवाचित्वात् गृहशब्दस्य चातथात्वात् न तत्र तुल्यसूत्रतेति चेत् – न; गृहागार-शब्दयोर् एकार्थत्वे विवादाभावात् । इह च "इन्द्रस्य गृहा वसुमन्तः" इति मन्त्रस्थ-गृह-शब्देनागाराभिधानात्, प्रत्युत धर्मशास्त्रे "मध्येऽगारस्य दशमैकादशाभ्यां प्रागपवर्गम् । उत्तरपूर्वदेशेऽगारस्योत्तरैश्चतुर्भिः । शय्यादेशे कामलिङ्गेन"(आप.ध. २-३-२२, २३;२-४-१. ) इति शयनस्थानस्यागाराद् अन्यत्वाभिधानाच् च ।

पुनरुक्तिः स्फुटार्थतयापि निर्वाह्या । किञ्चागारस्याग्निम् इत्य् अन्वयेऽपि अगाराग्निः शालाग्निः, गृह्याग्निर् औपासनाग्निर् इत्येकार्थतया याज्ञिकानां प्रयोगाद् औपासन एव प्रतिष्ठाप्यः, न पचनाग्निः ॥७॥

▼

⑤

>

पालाशं शमीमयं वेध्ममादीप्योत्तरयर्चाऽग्निम् उद्धृत्योत्तरेण यजुषाऽगारं प्रपाद्योत्तर-पूर्वदेशे ऽगारस्योत्तरयाऽग्निं प्रतिष्ठापयति।

# १७ ०८ तस्माद्दक्षिणमुदधानायतनम् भवति②

तस्माद् दक्षिणम् उदधानायतनं भवति ८

▼

⑤

>

▼ Oldenberg

8. The place for the water-barrel is to the south of that spot.

▼ हरदत्तः

एवं प्रतिष्ठितस्याग्नेः **दक्षिणमुदधानायतनं** कर्तव्यम् । उदकं धीयते यत्र तत् उदधानं मणिकाख्यम् ।

---

▼ सुदर्शनः

**तस्मात्** प्रतिष्ठिताग्नेर्दक्षिण**मुदधानस्य** मणिकस्या**यतनं** भवति ॥८॥

▼

⑤

>

तस्माद्दक्षिणमुदधानायतनं भवति।

# १७ ०९ तस्मिन्विषूचीनाग्रान् दर्भान्②

तस्मिन् विषूचीन् आग्रान्*(=सर्वतो-दिक्कान्)* दर्भान् संस्तीर्य तेषूत्तरया *("अन्नपत"इत्येतया)* व्रीहियवान् न्युप्य तत्रोदधानं प्रतिष्ठापयति ९

अन्न॑पु॒ते ऽन्न॑स्य नो देहि।
अ॒न॒मी॒वस्य॑*(=आरोग्यकरस्य)* शु॒ष्मिणः॑*(=बलिनः)* ।
प्रप्र॑ दा॒तार॑न् तारिषः।
ऊर्जं॑न्*(=अन्नं बलं वा)* नो धेहि द्वि॒पदे॒ चतु॑ष्पदे ।

▼

⑤

>
▼ Oldenberg

9. He strews there Darbha grass, so that its points are turned in every direction, pours rice and barley-grains over the (grass) with the next (verse, II, 15, 15), and thereon he places the water-barrel.

▼ हरदत्तः

**तस्मिन्न्** आयतने (१)**विषूचीनाग्रान्** सर्वतोदिक्कान् **दर्भान् संस्तीर्य तेषु** दर्भेषु **व्रीहीन् यवांश्च** संयुक्तान् **निवपति उत्तरयर्चा** "अन्नपत" इत्येतया (२)ततस् तस्मिन्नायतने **उदधानं प्रतिष्ठापयति** यथा निश्चलं भवति तथा स्थापयति ॥९॥

---

▼ सुदर्शनः

**तस्मिन्** उदधानस्थाने **विषूचीनाग्रान्** नानादिगग्रान् **दर्भान् संस्तीर्य, तेषु** दर्भेषु **उत्तरया** "अन्नपतेऽन्नस्य" इत्येतया **व्रीहियवांश्च** संयुक्तान् **न्युप्य** तेषू**दधानं प्रतिष्ठापयति** ॥९॥

▼

⑤

>

तस्मिन्विषूचीनाग्रान् दर्भान् संस्तीर्य तेषूत्तरया व्रीहियवान् न्युप्य तत्रोदधानं प्रतिष्ठापयति।

# १७ १० तस्मिन्नुत्तरेण यजुषा②

तस्मिन्न् उत्तरेण यजुषा*("अरिष्टा अस्माक"मित्यनेन)* चतुर उद-कुम्भान् आनयति १०

अरिं॑ष्टा अ॒स्माकं॑ वी॒रास् स॑न्तु॒
मा परा॑ सेचि मे॒ धनं॑म् ।*(२४)*

▼

⑤

>

▼ Oldenberg

10. With the next (Yajus, II, 15, 16) he pours four potfuls of water into it.

▼ हरदत्तः

**उत्तरेण यजुषा**"अरिष्टा अस्माकम्" इत्यनेन । प्रतिकुम्भं मन्त्रावृत्तिः । तत्र चतुर्भिर्वा कुम्भैः पृथगानयनमेकेनैव वाऽथ पुनः पूरयित्वा, यथा–"तिस्रः स्रु च उत्सिच्ये"ति ॥१०॥

---

▼ सुदर्शनः

**तस्मिन्** उदधाने **उत्तरेण** "अरिष्टा अस्माकं" इत्यनेन **यजुषा चतुर उदकुम्भानानयति ।** प्रतिकुम्भं मन्त्रावृत्तिः, द्रव्यभेदेन प्रकाश्यक्रियाभेदात् । यत्र पुनर्मधुपर्कप्राशनादौ आवृत्तिविधिस्तस्या एव क्रियायाः, तत्र सकृदेव मन्त्रः ॥१०॥

▼

⑤

>

तस्मिन्नुत्तरेण यजुषा चतुर उदकुम्भानानयति।

# १७ ११ दीर्घमुत्तरयाऽनुमन्त्रयते अथ②

*(यदि उदधानं दीर्णम्,)* दीर्णम् उत्तरया *("भूमिर्भूमिम् अगात्"इत्येतया)* ऽनुमन्त्रयते ११

भूमि॒र् भूमिं॑म् अगान्
मा॒ता मा॒त॒रम् अप्य् अ॑गात् ।
भू॒यास्म॑ पु॒त्रैः प॒शुभि॒र्
यो नो॒ द्वेष्टि॒ स भि॑द्यताम् ।*(२५)*

▼

⑤

>

▼ Oldenberg

11. If (the barrel) breaks, he recites the next (verse, II, 15, 17) over it.

▼ हरदत्तः

अथ यदि तदुदधानं भिद्यते तत् **उत्तरयर्चा** "भूमिर्भूमि"मित्येतया **अनुमन्त्रयते** । कालान्तरे दीर्ण एतद्भवति उदधानान्तरेऽपि तत्स्थानापन्ने ॥११॥

---

▼ सुदर्शनः

यदि **दीर्ण** मणिकं स्यात्तदा **उत्तरया** "भूमिर्भूमिमगात्" इत्येतया**नुमन्त्रयते** । एतच्च प्रकरणात्कर्माङ्गमेव ॥११॥

▼

⑤

>

दीर्घमुत्तरयाऽनुमन्त्रयते।

# १७ १२ अग्नेरुपसमाधानाद्याज्यभागान्ते②

अग्नेर् उपसमाधानाद्य्-आज्यभागान्ते उत्तरा आहुतीर् *("वास्तोष्पते प्रतिजानीहि, वास्तोष्पते शग्मया, वास्तोष्पते प्रतरणो न एधि, अमीवहा वास्तोष्पत")* हुत्वा जयादि प्रतिपद्यते १२

वा॑स्तोष्पते प्र॑ति जानीह्य् अस्मा॑न्त्
स्व्-आवेशो॑ *(=सुगमो)* अनमीवो॑ *(=आरोग्यकरः)* भवा नः ।
य॑त् त्वे॑महे प्र॑ति त॑न् नो जुषस्व
शं॑ न एधि द्विप॑दे शं॑ च॑तुष्पदे ।

वा॑स्तोष्पते शग्म॑या *(=सुखया)* सँस॑दा ते
सक्षीम॑हि *(←सच समवाये)* रण्व॑या *(=रममाणया)* गातुम॑त्या *(=गामिन्या)*) ।
आ॑वः क्षे॑म *(यू=लब्धस्य रक्षणे)* उत॑ यो॑गे *(=अलब्धस्य लाभे)* व॑रं नो
*(हे विश्वेदेवाः)* यूय॑म् पात स्वस्ति॑भिः स॑दा नः ।

वा॑स्तोष्पते प्रत॑रणो न एधि
गो॑भिर् अ॑श्वेभिर् इन्दो *(←इन्दिर् ऐश्वर्यकर्मा/ उदिर्वा क्लेदकर्मा)* ।
अज॑रासस् ते सख्ये॑ स्याम
पिते॑व पुत्रा॑न् प्र॑ति नो जुषस्व ।

### २१ अमीवहा वास्तोष्पते⑥

अमीवहा॑ *(=व्याधिहा)* वास्तोष्पते
वि॑श्वा रूपा॑ण्य् आ **विश॑न्** ।
स॑खा सुशे॑व *(फ)* **एधि** नः ।

▼

### ⑤

>
▼ Oldenberg

12. After the ceremonies from the putting of wood on the fire down to the Ājyabhāga oblations have been performed, he offers the (four) oblations (indicated by the) next (Mantras; II, 15, 18-21); then he enters upon the performance of the Jaya and following oblations.

▼ हरदत्तः

चतस्रः **उत्तराः** प्रधानाहुतयः"वास्तोष्पते प्रतिजानीहि, वास्तोष्पते शग्मया, वास्तोष्पते प्रतरणो न एधि, अमीवहा वास्तोष्पत"इति । तत्राज्यभागान्तवचनेनैव तन्त्रप्राप्तिस्सिद्धा, यथा"पार्वणवदाज्यभागान्ते" इत्यत्र । किमग्नेरुपसमाधानादिवचनेन? अग्निनियमार्थं तु– योऽगारे पचनार्थं प्रतिष्ठापितोऽग्निः तस्यैव होमार्थमुपसमाधानं यथा स्यादिति । अन्यथा सर्वपाकयज्ञार्थे औपासन एव होमः स्यात् । जयादिवचनं स्थालीपाकप्रतिषेधार्थम् । का पुनः प्राप्तिः स्थालीपाकस्य? कल्पान्तरे दर्शनात् । कथं पुनः जयादिवचनेन स्थालीपाकस्य प्रतिषेधः? उच्यते– स्विष्टकृत्प्रतिषेधस्तावत् गम्यते–उत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते न स्विष्टकृतमिति । स च स्थालीपाकेषु भवति । अतस् तत् प्रतिषेधद्वारेण स्थालीपाकप्रतिषेध एवायं सम्पद्यते ॥१२॥

---

▼ सुदर्शनः

**उत्तरा आहुती**श्चतस्रः प्रधानाहुतीः ताश्च "वास्तोष्पते प्रतिजानीहि" (तै.सं. ३-४-१०) इति द्वे, "वास्तोष्पते प्रतरणो नः" इति द्वे । आज्यहविष्ट्वाच्च तन्त्रविधानम् । आज्यभागान्त इति वचनं त्वाज्यभागानन्तरमेव प्रधानहोमाः, नान्यदर्थकृत्यमपीति क्रमार्थम् । केचित्— "पार्वणवदाज्यभागान्ते" (आप.गृ. १८-६) इतिवदाज्यभागान्त इत्यनेनैव तन्त्रप्राप्तौ सिद्धायां" अग्नेरुपसमाधानादि" इति वचनं स्वमतेन प्रतिष्ठितः पचनाग्निरेवेह होमार्थ इत्येवमर्थमिति । तदयुक्तम्, "कर्मस्मार्त विवाहाग्नौ कुर्वीत प्रत्यहं गृही" । (या.स्मृ. १-९७) इति सर्वस्मार्तहोमानामविशेषेण औपासनविधानात्, अस्य सूत्रस्योक्तविधयान्यार्थत्वात्, अस्मदीयानां गृह्यान्तरीयाणां चौपासन एव वास्तुहोमाचाराच् च ॥१२॥

▼

⑤

>

अग्नेरुपसमाधानाद्याज्यभागान्ते उत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते।

# १७ १३ परिषेचनान्तङ् कृत्वोत्तरेण②

परिषेचनान्तं कृत्वोत्तरेण *("शिवं शिव"मित्यनेन)* यजुषोदकुम्भेन *(न हस्तेन)* त्रिः प्रदक्षिणम् अन्तरतो*(=न बहिः)* ऽगारं निवेशनं*(=शयनदेशः)* वा परिषिच्य

शि॒वँ॒ शि॒वम् ॥

## अग्न्यन्तरानयनम्⑤

*(ततो ऽग्न्यन्तराण्य् अप्य् औपासनादीन्य् आनयति।)*

## ब्राह्मणभोजनम्⑤

ब्राह्मणान् भोजयेद् अपूपैस् सक्तुभिर् ओदनेनेति १३

▼

⑤

>

▼ Oldenberg

13. Having performed (the rites) down to the sprinkling (of water) round (the fire), he should sprinkle (water) with a water-pot around the house or the resting-place on the inside, with the next Yajus (II, 15, 22) three times from left to right; then he should serve cakes, flour, and boiled rice to the Brāhmaṇas.

▼ हरदत्तः

परिषेचनान्तवचनं आनन्तर्यार्थम् । तन्त्रशेषं समाप्यागारस्य परिषेचनमेव कर्तव्यम् । नान्यद् वैश्वदेवादिकमिति । **उत्तरेण यजुषा**"शिवं शिवम्" इत्यनेन । **उदकुम्भेन**न हस्तेन । परिभाषयैव सिद्धे प्रदक्षिणमिति वचनात् परिषेचनमिदमेकमेव प्रदक्षिणं त्रिगुणीभूतं सकृदुपात्तेनैवोदकुम्भेन संततमविच्छिन्नं कर्तव्यम् । मेखलया परिव्याणवत् त्रीणि परिषेचनानीति सिद्धं भवति । **अन्तरंत**इति वचनमगारात् बहिः परिषेचनं मा भूत् । अभ्यन्तरमेव यथा स्यादिति । **अगारं** गृहं, **निवेशनं** शयनदेशः । **ब्राह्मणान्** युग्मान् **भोजये**दपूपादिभिः । इतिशब्दः समुच्चयार्थः ॥१३॥ इति हरदत्तविरचितायां गृह्यसूत्रवृत्तावनाकुलायां सप्तदशः खण्डः ॥

▼ सुदर्शनः

परिषेचनान्त**मुत्तरेण** "शिवँ शिवम्" इत्यनेन **यजुषा** उदकुम्भेन सकृदुपात्तेन **अगारं निवेशनं वान्तरतो** न बहिः **त्रिः प्रदक्षिणं परिषिच्य ब्राह्मणान् भोजयेदपूपादिभिः** । इतिशब्दस्समुच्चयार्थः । सक्तूनां तु भोजनात् प्रागेव उपयोगः, न मध्ये लोक प्रसिद्ध्यभावात् । "शुचीन् मन्त्रवतः सर्वकृत्येषु भोजयेत्" (आप. ध. २-१५-११.) इति सिद्धस्य भोजनस्य पुनर्वचनमपूपादिगुणविद्ध्यर्थम् ॥१३॥ इति श्रीसुदर्शनाचार्यविरचिते गृह्यतात्पर्यदर्शने सप्तदशः खण्डः ।
▼

⑤

>

परिषेचनान्तं कृत्वोत्तरेण यजुषोदकुम्भेन त्रिः प्रदक्षिणमन्तरतोऽगारं निवेशनं वा परिषिच्य ब्राह्मणान् भोजयेदपूपैस्सक्तुभिरोदनेनेति।

# १९ बालग्रहगृहीतस्य कुमारस्य तन्निवर्तकं कर्म①

# १८ ०१ श्वग्रहगृहीतङ् कुमारम्②

श्वग्रह*(=श्वेव नदति, श्ववद्वा चेष्टते)*गृहीतं कुमारं
तपोयुक्तो*(=यावन्मनस्तोषमनशनादियुक्तः)* जालेन प्रच्छाद्य कंसं किङ्किणिं*(=लोहघण्टां)* वा ह्रादयन्न्*(=पुरुषान्तरेण ध्वानयन्)*
अद्वारेण *(=भित्यादिकमपसार्य मार्गं कृत्वा)* सभां प्रपाद्य
सभाया मध्ये ऽधिदेवनम्*(=दीवनं यत्र कुर्वन्ति कितवः)* उद्धत्य+अवोक्ष्य
+अक्षान्*(=विभीतकफलानि, केचित्शारा इति)* न्युप्य
अक्षेषूत्तानं *(=शयानम्)* निपात्य
दध्ना लवणमिश्रेणाञ्जलिनोत्तरैर् *("कूर्कुरस्सुकूर्कुर"इत्यादिभिः"श्वानमिच्छवादन्न पुरुषं छत्"इत्यन्तैः)* अवोक्षेत् प्रातर्मध्यन्दिने सायम् १

▼

### ⑤

>

▼ Oldenberg

1. 1 When a boy is attacked by the dog-demon (i.e. epilepsy), (the father or another performer of the ceremony), having devoted himself to austerities (such as fasting), covers him with a net. Then he causes a gong to be beaten or a bell to be rung, takes (the boy) by another way than the door into the gambling-hall, raises (the earth in the middle of the hall) at the place in which they gamble, sprinkles it (with water), casts the dice, lays (the boy) on his back on the dice, and besprinkles him with his joined hands with curds and salt, with the next (eleven) (formulas, II, 16, 1-11), in the morning, at noon, and at night.

▼ हरदत्त-प्रस्तावः

अथोत्तरेषां मन्त्राणां विनियोगमाह—

▼ हरदत्तः

बहवो बालग्रहाः दिवसमाससमादिकाः । तत्र येन गृहीतः श्ववच्चेष्टते स **श्वग्रहः** । तेन **गृहीतं कुमारं**, पुल्लिङ्गनिर्देशात् कुमार्या न भवतीत्येके । **तपोयुक्तः** कर्ता पितेत्येके । यः कश्चिदित्यन्ये । तपो ब्रह्मचर्यादि । यावता तपसा सिद्धिं मन्यते तावत् कृत्वेत्यर्थः । **जालं** मत्स्यग्रहणं तेन **प्रच्छाद्य** । **कंसं** प्रसिद्धम् । **किङ्किणिः** घण्टाविशेषः । तयोरन्यतरं **ह्रादयन्** अन्यतरस्य ध्वनिं कारयन् केनचिदन्येन । स्वयं कुमारं गृहीत्वा **समां प्रपादयति अद्वारेण** छदीरपोह्य मार्गं कृत्वा तेनेत्यर्थः । किं तत् स्थानम्? सभा, तस्या मध्ये **ऽधिदेवनं स्थानं** यत्र कितवा दीव्यन्ति तं प्रदेशं **उद्धत्याद्भिरवोक्ष्य** तत्राक्षान्निवपति । अक्षाश्शाराः । विभीतका इत्यन्ये । तान् पृथु प्रथयित्वाप्वेनमुत्तानं **निपातयति ।** शाययति । ततो **दध्ना लवणमिश्रेणावोक्षेदञ्जलिना उत्तरैर्** मन्त्रैः "कूर्कुरस्सुकूर्कुर" इत्यादिभिः "श्वानमिच्छवादन्न पुरुषं छत्" इत्यन्तैः । प्रतिमन्त्रमवोक्षणम् । तत्रादितस्तिस्र ऋचः, ततो यजुषी द्वे "तत्सत्यं, विगृह्य बाहू" इति ततः पञ्चर्चो "विभ्रन्निष्कञ्चे"त्याद्याः, ततो यजुरेकं "श्वानम्" इति, एवमेकादशैते मन्त्राः । यावत् कर्म समाप्यते तावत् संसकिङ्कण्योरन्यतरस्य ह्रादनम् । एवमेतत्कर्म जालप्रच्छादनादवोक्षणान्तं त्रिसन्ध्यं कर्तव्यम् ॥१॥

▼ सुदर्शनः

येन गृहीतः कुमारः श्वेव नदति, श्ववद्वा चेष्टते स श्वग्रहः । तेन गृहीतः **श्वग्रहगृहीतः** , पिशाचिशुना वा दष्टः । **तपोयुक्तः** यावन्मनस्तोषमनशनादियुक्तः पित्रादिः कर्ता । **जालं** मत्स्यग्रहणसाधनम् । **कंसं किङ्किणिम् ।** लोहघण्टां **ह्रादयन्** पुरुषान्तरेण ध्वानयन् **अद्वारेण** कुड्याद्यपोह्य मार्गं कृत्वा । अधिदेवनं यत्र दीव्यन्ति कितवाः । अक्षान् विभीतकफलानि । केचित्—शारा इति । **उत्तरैर्मन्त्रैः** "कूर्कुरस्सुकूर्कुरः" इत्यादिभिर्यजुर्दशमैः । यद्वैकादशभिः । तस्मिन् पक्षे आदितस्तिस्र ऋचः ततः "तत्सत्यं यत्त्वेन्द्रः" विगृह्य बाहू इति द्वे ततो "बिभ्रन्निष्कम्" इति पञ्चर्चः । ततः "श्वानम्" इत्येकादशं यजुरेवेति विभागः । अवोक्षणं च सर्वेषां मन्त्राणामन्ते सकृदेव । केचित्—द्वष्टोपकारकत्वात् प्रतिमन्त्रमिति । एवमेतज्जालप्रच्छादनाद्यवोक्षणान्तं प्रातरादिषु त्रिषु पुण्याहविशेषेषु कर्तव्यम् । अवोक्षणपर्यन्तं च ह्रादनम् ॥१॥

▼

⑤

>

श्वग्रहगृहीतं कुमारं तपोयुक्तो जालेन प्रच्छाद्य कँसं किङ्किणिं वा ह्लादयन्नद्वारेण सभां प्रपाद्य सभाया मध्येऽधिदेवनमुद्धत्यावोक्ष्याक्षान्न्युप्याक्षेषूत्तानं निपात्य दध्ना लवणमिश्रेणाञ्जलिनोत्तरैरवोक्षेत्प्रातर्मध्यन्दिने सायम् ।

# १८ ०२ अगदो भवति②

अगदो*(=अरोगो)* भवति २

▼

⑤

>

▼ Oldenberg

2. Then he will get well.

▼ हरदत्तः

**अगदः** अरोगः, रोगनिवृत्तिरस्य प्रयोजनमित्यर्थः । किं सिद्धं भवति? यदि भैषज्येन कुमारोऽगदः स्यात् न तत्रेदं कर्तव्यमिति । अन्यथा कुमार स्यास्मिन् रोगे पितुर्नैमित्तिकमिदमवश्यं कर्तव्यं विज्ञायेत गृहदाहेष्ट्यादिवत् । एवं ब्रुवतां दोषः यक्ष्मगृहीतामन्यां वेत्येतत्प्रकारान्तरेण रोगशान्तावपि कर्तव्यं स्यात् । तस्मादिदमन्यत् प्रयोजनम् । एवमेतस्मिन् कर्मणि त्रिषु कालेषु कृते कुमारोऽगदो भवति । यदि न भवति पुनरपि तपोयुक्तेन कर्तव्यमिति ॥२॥

▼ सुदर्शनः

इह च "शङ्खिनम्" इत्यत्र फलवचनं, सर्वत्र श्रुतितोऽर्थतो वावगतस्य कामिनः कर्मोपदेशः सामर्थ्यात् फलसिद्ध्यवगमपर्यन्त इति प्रदर्शयितुम् । तेन "यक्ष्मगृहीताम्" (आप.गृ.९-१०.) इत्यादौ फलवचनाभावेऽप्युपदेशः काम्यसिद्धिपर्यन्त एव । केचित्— एवमेतस्मिन् कर्मणि त्रिसन्ध्यं कृते, अगदो भवति । यदि न भवति तदा पुनरप्येतत्कर्म कर्तव्यं, यावदगदो भवति । नैतत्, स्वाभिमताभ्यासबोधकशब्दाभावात् ॥२॥

▼

⑤

>

अगदो भवति।

# १८ ०३ शङ्खिनङ् कुमारम्②

शङ्खिनं*(=शङ्खवन्नदतं)* कुमारं तपोयुक्त*(=यावन्मनस्तोषमनशनादियुक्तः)*
उत्तराभ्याम् *("एते ते प्रतिदृश्येते"इत्येताभ्यां)* अभिमन्त्र्य
*("ऋषिर्बोधः प्रबोधः"इत्येतया)* उत्तरयोदकुम्भेन शिरस्तो ऽवनयेत्
प्रातर् मध्यन्दिने सायम् ३

▼

⑤

>

▼ Oldenberg

3. 2 Over a boy who suffers from the 'Śaṅkha' disease, (the father, &c.) having devoted himself to austerities, should recite the next two (verses, II, 16, 12. 13), and should pour (water) on his head with a water-pot with the next (verse, II, 16, 14), in the morning, at noon, and at night.

▼ हरदत्तः

शङ्खो नाम ग्रहः कुमाराणां भयङ्करः, येन गृहीतः शङ्खवन्नदतीति । तेन गृहीतं **शङ्खिनमुत्तराभ्यां** एते ते प्रतिदृश्येते इत्येताभ्यामृग्भ्यां **अभिमन्त्र्य** तत उदकुंभेन **शिरस्तोऽवनयेत**, अभिषिञ्चेद् **उत्तरयर्चा** "ऋषिर्बोधः प्रबोध" इत्येतया एवमेतदभिमन्त्रणादि त्रिषु कालेषु कर्तव्यम् ॥ ३॥

▼ सुदर्शनः

शङ्खोऽपि ग्रहः; येन गृहीतः शङ्खवन्नदति तद्गृहीतश् **शङ्खी** । **उत्तराभ्यां** "एते ते प्रतिदृश्येते" इत्येताभ्यां **उत्तरया** "ऋषिर्बोधः प्रबोधः" इत्येतया **शिरस्तोऽवनयेत्** शिरस्यभिषिञ्चेत्, **उदकुम्भेन** त्रिसन्ध्यम् ॥३॥

▼

⑤

>

शङ्खिनं कुमारं तपोयुक्त उत्तराभ्यामभिमन्त्र्योत्तरयोदकुम्भेन शिरस्तोऽवनयेत्प्रातर्मध्यन्दिने सायम् ।

# १८ ०४ अगदो भवति②

अगदो*(=अरोगो)* भवति ४

▼

⑤

>

▼ Oldenberg

4. Then he will get well.

▼ हरदत्तः

पूर्ववदस्य प्रयोजनम् ॥४॥

▼ सुदर्शनः

उक्तार्थम् ॥४॥

▼

⑤

>

अगदो भवति।

1. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

2. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

# २० सर्पबलिः①

# १८ ०५ श्रावण्याम्②

श्रावण्यां पौर्णमास्याम् अस्तमिते स्थालीपाकः ५

▼

### ⑤

>
▼ Oldenberg

5. 1 On the day of the full moon of (the month) Śrāvaṇa after sunset a Sthālīpāka (is offered).

▼ हरदत्त-प्रस्तावः

अथ सर्पबलेर्यस्मिन् काले येन विधिनोपक्रमस्तमाह—

▼ हरदत्तः

अथ सर्पबलिर् नाम कर्म नित्यं संवत्सरे संवत्सरे कर्तव्यम् उपदिश्यते। तस्य श्रावण्यां पौर्णमास्याम् आरम्भः मार्गशीर्ष्याम् उत्सर्गः । तस्योपक्रमे - **श्रावण्यां पौर्णमास्यां अस्तमिते** आदित्ये **स्थालीपाको** भवति ।

असत्य् अपि नक्षत्रयोगे श्रावणस्य मासस्य पौर्णमासी श्रावणीत्य् उच्यते लक्षणया । तत्र श्लोकौ—

> मेषादिस्थे सवितरि यो यो दर्शः प्रवर्तते ।
> चान्द्रमासास् तद् अन्ताश् च चैत्राद् या द्वादश स्मृताः ॥
> तेषु या या पौर्णमासी सा सा चैत्र्यादिका स्मृता ।
> कादाचित्केन योगेन नक्षत्रस्येति निर्णयः ॥

इति ॥

तत्र सायम् आहुतिं हुत्वा स्थाली-पाक-कर्म प्रतिपद्यते - पार्वणेनातोऽन्यानीत्युक्तं, पौर्णमास्यां पौर्णमासीति च । श्रावण्यै पौर्णमास्यै सङ्कल्पितान् व्रीहिन् यवान् वा निरुप्य प्रतिष्ठिताभिधारणान्तं कृत्वाग्नेरुपसमाधानादि द्वन्द्वं न्यञ्चि पात्राणि किंशुक-पुष्पैर् आरग्वध-मय-समिद्भिश् च सह ॥५॥

▼ सुदर्शनः

श्रवणेन नक्षत्रेण युक्ता पौर्णमासी **श्रावणी** । *(श्रवणेन नक्षत्रेण)* अयुक्तापीह *(पौर्णमासी)* विवक्षिता, नित्यत्वात् सर्पबलेः । श्रावणमासस्य पौर्णमासीत्यर्थः । न तु श्रावणमासस्य श्रवणनक्षत्रम्, श्रवणस्य पौर्णमासी-विशेषणार्थत्वात्, "पौर्णमास्यां" (आप.प.२-२०.) इति वचनाच् च । अथ चान्द्रमसमासानां चैत्रादीनां, पौर्णमासीनां च चैत्र्यादीनां निर्णयार्थौ श्लोकौ—

> "मेषादिस्थे सवितरि ये ये दर्शः प्रवर्तते ।
> चान्द्रा मासास्तत्तदन्ताश्चैत्राद्या द्वादश स्मृताः ॥
> तेषु या या पौर्णमासी सा सा चैत्र्यादिका स्मता ।
> कादाचित्केन योगेन नक्षत्रस्येति निर्णयः" ॥

> इति ।

तस्यां **श्रावण्यां** पौर्णमास्यां, **अस्तमिते** आदित्ये, सायं होमान्ते "पत्न्यवहन्ति" (आप.गृ.७-२.) इति विधिना प्रतिष्ठिताभिघारणान्तस् **स्थालीपाकः** कर्तव्यः ॥५॥

▼

### ⑤

>

श्रावण्यां पौर्णमास्यामस्तमिते स्थालीपाकः ।

# १८ ०६ पार्वणवदाज्यभागान्ते②

पार्वणवद् आज्यभागान्ते स्थालीपाकाद् +धुत्वा
ऽञ्जलिनोत्तरैः प्रतिमन्त्रं *(३)* किंशुकानि जुहोति ६

ज॒ग्धो मश॑को, ज॒ग्धा वि॒तृ॑ष्टिर्, ज॒ग्धो व्यं॑द्ध्व॒रः स्वाहा॑ ।
ज॒ग्धो व्यं॑द्ध्व॒रो, ज॒ग्धो मश॑को, ज॒ग्धा वि॒तृ॑ष्टि॒स् स्वाहा॑ ।
ज॒ग्धा वि॒तृ॑ष्टिर्, ज॒ग्धो व्यं॑द्ध्व॒रो, ज॒ग्धो मश॑कु॒स् स्वाहा॑ ॥ *(२५ विन्यासे ऽत्र सर्पाकृतिः)*

▼

**⑤**

>

▼ Oldenberg

6. 2 After the ceremonies down to the Ājyabhāga oblations have been performed in the same way as at the fortnightly sacrifices, he sacrifices of the Sthālīpāka, and with each of the next (formulas, II, 16, 15-17) he offers with his joined hands Kiṃśuka flowers.

▼ हरदत्तः

सर्वं पार्वणवदित्त्युच्यते– स्थालीपाकादेव पार्वणवज् जुहोति, न किंशुकानीति । तेन तेष्व् अवदानकल्पो न भवति । स्विष्टकृतश् चावदानं तेभ्यो न भवति ।

किंशुकैः समिधो व्याख्याताः ।

आज्यभागान्तवचनं तन्त्रप्राप्त्यर्थम् ।

श्रावण्यै पौर्णमास्यै स्वाहेति स्थालीपाकाद्धोमः ।

**उत्तरैर्मन्त्रैः** "जग्धो मशक" इत्यादिभिस्त्रिभिः । **किंशुकानि** । पलाशपुष्पाणि । पलाशानां कण्टकिनां पुष्पाणीत्यन्ये ।

प्रतिमन्त्रम् इत्त्य् उच्यते प्रतिमन्त्रं किंशुकानां बहुत्वं यथा स्याद् इति । अन्यथा एकैकस्य किंशुकस्य होमः प्राप्नोति, यथा समिधाम् ॥६॥

▼ सुदर्शनः

ततः **पार्वण**वद् अग्नेर् उपसमाधानाद्य्**-आज्यभागान्ते** अग्निम्-ुखान्त इत्यर्थः ; सर्वेष्व् औषध-हविष्केषु तन्त्रवत्सु कर्मसु अग्नि-मुखस्य विहितत्वात् ।

**स्थालीपाकाद्** विधिवद् अवदाय "श्रावण्यै पौणमास्यै स्वाहा" इति हुत्वा "जग्धो मशकः" इत्य्-आदिभिस् त्रिभिः **उत्तरैः प्रतिमन्त्रं किंशुकानि** पलाशस्य पुष्पाणि जुहोति । केचित्— पलाशसदृशस्य कण्टकिनः पुष्पाणीति ॥ एतानि च वसन्त एव सङ्गृहीतव्यानि ।

अत्र चाञ्जलेस् संस्कारः उपस्तरणादिर् अवदानधर्मः, किंशुक-शेषादपि स्विष्टकृते समवदानम् । अञ्जलेरपि दर्व्या सह लेपाञ्जनं च भवत्य् एव; मुख्येन धर्मप्रवृत्तेर् उक्तत्वात् । विप्रतिषिद्धं त्व् अन्यः कुर्यात् ।

केचित्— अञ्जलिहोमा लाजहोमवद् यावद्-उक्त-धर्माण एवेति ॥६॥

▼

**⑤**

>

पार्वणवदाज्यभागान्ते स्थालीपाकाद्धुत्वाञ्जलिनोत्तरैः प्रतिमन्त्रं किंशुकानि जुहोति ।

# १८ ०७ उत्तराभिस्तिसृभिरारग्वधमय्यस्समिधः②

उत्तराभिस् तिसृभिर् आरग्वध-मय्यस् समिधः ७

इन्द्र॑ जहि दन्द॒शूक॑
प॒क्षिणं॒ यस् स॑रीसृपः ।
दं॒क्ष्यन्तं॑ञ् च द॒शन्तं॑ञ् च॒
सर्वा॒ँस् तान् इ॑न्द्र जंभय॒ *(=स्तम्भय)* स्वाहा॑ ।

अ॒प्सु जा॑त॒ सरे॑ वृद्ध
दे॒वाना॒म् अपि॑ हस्त्य ।
त्वम् अ॑ग्न इन्द्र॒-प्रेषि॑त॒स्
स नो॒ मा हिँ॑सीः॒ स्वाहा॑ ।

त्राणं॑म् असि।
प॒रि॒त्राणं॑म् असि।
प॒रि॒धिर् अ॑सि ।
अन्ने॑न मनु॒ष्या॑ँस् त्रायसे॒, तृणैः॑ प॒शून्, ग॒र्तेन॑ स॒र्पान्, य॒ज्ञेन॑ दे॒वान्त् स्व॒धया॑ पि॒तॄन्त् स्वाहा॑ ।

▼

⑤

>

▼ Oldenberg

7. With the next (three) verses (II, 17, 1-3) (he offers) pieces of Āragvadha wood (Cathartocarpus fistula);

▼ हरदत्तः

**आरग्वधो** राजवृक्षः । यस्य सुवर्णवर्णानि पुष्पाणि अरत्निमात्राणि फलानि । उत्तराभिस्तिसृभिः ऋग्भिः "इन्द्र जहि दन्दशूकम्" इत्यादिभिः । समिध आदधाति जुहोति वा । सर्वथा स्वाहाकारान्ता मन्त्राः ॥७॥

▼ सुदर्शनः

अथो**त्तराभिस्तिसृभिः** "इन्द्र जहि दन्दशूकं "इत्यादिभिः प्रत्यृचम् । **आरग्वधमय्यस्समिधः**, आरग्वधविकारास्समिधः । किम् ? जुहोतीति सम्बन्धः । तेनात्र समिधां मान्त्रवर्णिकदेवतोद्देशेन त्यागः कर्तव्य एव ॥७॥

▼

⑤

>

उत्तराभिस्तिसृभिरारग्वधमय्यस्समिधः ।

# १८ ०८ आज्याहुतीरुत्तराः②

आज्याहुतीर् उत्तराः ८

*(सर्पाधिपते!)* तत् स॒त्यं यत् तेऽमावा॒स्यां॑याञ् च पौर्णमा॒स्याञ् च॒ विष॑ब॒लिँ हर॑न्ति॒।
सर्वं॑ उदर-स॒र्पिणः॑ तत् *(बलिं)* ते॒ प्रेर॑ते॒*(=प्राप्नुवन्ति)*, त्वयि॒ संवि॑शन्ति।
त्वयिं॑ नस् स॒तस्*(=आश्रितान्)*, त्वयिं॑ स॒द्भ्यो *(सर्पेभ्यो)*, व॒र्षाभ्यो॑ न॒ः परि॑देहि ।

*(वर्षर्तौ सर्पबाहुल्यम्।)*

नमो॑ अस्तु स॒र्पेभ्यो॑
ये के च॑ पृथि॒वीम् अनु॑।
ये अ॒न्तरि॑क्षे दि॒वि
तेभ्यं॑स् स॒र्पेभ्यो॒ नमः॑॥

ये॒ ऽदो, रो॑च॒ने दि॒वो,
ये वा॒ सूर्य॑स्य र॒श्मिषु॑ ।
येषा॑म् अ॒प्सु सद॑ः कृ॒तं
तेभ्यः॑ स॒र्पेभ्यो॒ नमः॑ ॥

या इष॑वो यातु॒धाना॑ना॒ं
ये वा॒ वन॒स्पती॒ँर् अनु॑ ।
ये वा॑ऽव॒टेषु॒*(→बिलेषु)* शेर॑ते॒
तेभ्यः॑ स॒र्पेभ्यो॒ नमः॑ ॥

▼

⑤

>
▼ Oldenberg

8. Then the Ājya oblations (indicated by the) next (Mantras, II, 17, 4-7).

▼ हरदत्तः

**उत्तराश्** चतस्र **आज्याहुतीर्** जुहोति तत्सत्यं यत्तेऽमावास्यायां, "नमो अस्तु सर्पेभ्य" इति तिस्रः ॥८॥

▼ सुदर्शनः

**उत्तराश्** चतस्रः "तत्सत्यं यत्तेऽमावास्यायाम्" इत्येका, "नमो अस्तु सर्पेभ्यः" इति तिस्रश्च ॥८॥

▼

⑤

>

आज्याहुतीरुत्तराः ।

# १८ ०९ जयादि प्रतिपद्यते②

जयादि प्रतिपद्यते ९

▼

⑤

>

▼ Oldenberg

9. Then he enters upon the performance of the Jaya and following oblations.

▼ हरदत्तः

एवमेता एकादश प्रधानाहुतीर्हुत्वा सौविष्टकृतं च स्थालीपाकादेव हुत्वा ततो जयादि प्रतिपद्यते किंशुकप्रभृतीनामप्याहुतीनां प्राधान्यज्ञापनार्थमिदं वचनम् । अन्यथा पौर्णमास्यामस्तमिते स्थालीपाक इति विहितत्वात् पौर्ममास्यां पौर्णमासीति च तस्य देवताभिधानादर्शकर्मकत्वाच्च किंशुकानां प्रधानत्वं न गम्येत । ततश्च पार्वणवदुपहोमान्तं कृत्वा ततः किंशुकादीनां हेमः प्राप्नोति ॥९॥

▼ सुदर्शनः

एतच्च वचनं जयादिप्राप्यर्थम्, स्थालीपाककिंशुकसमिदाज्याहुतीनामेकदशानां प्राधान्यज्ञापनार्थं च । जयाद्यनन्तरं स्विष्टकृदित्युक्तमेव ॥९॥
▼

⑤

>

जयादि प्रतिपद्यते।

# १८ १० परिषेचनान्तङ् कृत्वा②

परिषेचनान्तं कृत्वा

### बलिनिर्वापः⑤

### बलिहरण-सङ्कल्पः⑥

वाग्यतस् संभारान् आदाय प्राचीम् उदीचीं वा दिशम् उपनिष्क्रम्य
स्थण्डिलं कल्पयित्वा
तत्र प्राचीर् उदीचीश् च तिस्रस् तिस्रो लेखा लिखित्वा
*(तासां समीपे )* ऽद्भिर् उपनिनीय *(- सर्वदेवजनेभ्यो ददाति यथापितृभ्यः पिण्डदाने ।)*
तासूत्तरया सक्तून्*(=भृष्ठयवादिचूर्णानि)* निवपति *(ताः सर्वा लेखाः यथा बलिर्व्याप्नुयात्)* १०

नमो॑ **अस्तु** स॒र्पेभ्यो॒
ये पार्थि॑वा॒ य आ॑न्तरि॒क्ष्या॑ ये दि॒व्या॑ ये दि॒श्याः᳚ ।
*(उपक्रमे)* तेभ्य॑ इ॒मं ब॒लिँ॑ **ह॑रिष्यामि** ।
*(मार्गशीर्ष्यां तु)* तेभ्य॑ इ॒मं ब॒लिम् अ॑हार्षम् ।

▼

⑤

>

▼ Oldenberg

10. Having performed (the rites) down to the sprinkling (of water) round (the fire), he silently takes the objects required (for the rites which he is going to perform), goes out in an easterly or

northerly direction, prepares a raised surface, draws on it three lines directed towards the east and three towards the north, pours water on the (lines), and lays (an offering of) flour (for the serpents) on them, with the next (formula, II, 17, 8).

▼ हरदत्तः

परिषेचनान्तवचनमानन्तर्यार्थम् । परिषेचनान्ते उपनिष्क्रमणमेव नान्यदिति किं सिद्धं भवति ? तेन सर्पिष्मता ब्राह्मणं भोजयेत्" इत्यादेरुत्कर्षस्सिद्धो भवति । **वाग्यतः** शब्दमकुर्वन् **धानाः लाजाः अञ्जनाभ्यञ्जने स्थगरोशीरम्** उदपात्रमिति संभाराः । उपलिप्तो भूमिभागः स्थण्डिलम् । कल्पयित्वेति वचनात् स्वयमेव कल्पनं नान्यैः कल्पितस्य परिग्रहः । तत्रेति वचनात् स्थण्डिलस्य मध्ये बलेरायतनं भवति । श्लोकश्च भवति— प्राचीः पूर्वमुदक्संस्थं दक्षिणारम्भमालिखेत् । अथोदीचीः पुरस्संस्थं पश्चिमारंभमालिखेत् ॥ अपरे तु प्राचीनानां दक्षिणत आरम्भमिच्छन्ति । ( **प्राचीः** प्रागायतः एवम**उदीचीः** उदगायताः क्रमस्य विवक्षितत्वात् । ) प्रथमं प्राचीस्तत उदीचीः । एकं चेदं लेखाकरणं नाम कर्म "पुरस्तादुदग्वोपक्रमस्तथापवर्गः" इत्युक्तम् । तत्रेह प्रागुपक्रमस्यासंभवात् उदगुपक्रमः प्रागपवर्गः । एतेन "यत्र क्वचाग्निम्" इति एतल्लेखारणं व्याख्यातम् । एवं लेखा लिखित्वाऽद्भिरुपनिनयति तासां समीपे अपो निनयति सर्वदेवजनेभ्यो ददाति यथा पितृभ्यः पिण्डदाने । ततस्तासु लेखासु **उत्तरयर्चा** "नमोऽस्तु सर्पेभ्यो ये पार्थिवा" इत्येतया सक्तून्निवपति हस्तेन दर्व्या वा, आश्वलायनके दर्शनात् । तास्विति वचनं ताः सर्वा लेखाः यथा बलिर्व्याप्नुयादित्येवमर्थम् ॥१०॥

▼ सुदर्शनः

अथ तन्त्रशेषं समाप्य, **सम्भारान्** उत्तरत्रोपयोक्ष्यमाणान् सक्त्वादीनादाय, **वाग्यतः प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य, स्थणडिलं** पीठं **कल्पयित्वा तत्र** पीठे दक्षिणस्या आरभ्य **प्राचीस्तिस्रः**, प्रतीच्या आरभ्य **उदीचीस्तिस्रश्च रेखा लिखित्वाद्भिरुपनिनीय तासु** षट्सु लेखासु लेखनक्रमेणो**त्तरया** "नमो अस्तु सर्पेभ्यो ये पार्थिवाः" इत्यादिकया "बलिं हरिष्यामि" इत्यन्तया **सक्तून्निन्निवपति** । सकृदेव मन्त्रः । न च स्वाहाकारः ; अजुहोति चेदितत्वात्, नमस्कारस्यापि प्रदानार्थतत्वादित्युक्तत्वाच्च । केचित्— सर्वासु रेखासु यथा युगपत्प्राप्नुयाद्बलिः तथा निवपति ॥१०॥

▼

⑤

>

परिषेचनान्तं कृत्वा वाग्यतस्सम्भारानादाय प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य स्थण्डिलं कल्पयित्वा तत्र प्राचीरुदीचीश्च तिस्रस्तिस्रो लेखा लिखित्वाऽद्भिरुपनिनीय तासूत्तरया सक्तून्निवपति ।

# १८ ११ तूष्णीं सम्पुष्का②

तूष्णीं सम्पुष्का*(=अक्षता)* धाना, लाजान्, आञ्जनाभ्यञ्जने, स्थगर*(=गन्धविशेषः - betel?)* +उशीरम् *(=Vettiver grass)* इति *(६ द्रव्याणि)*११

▼

⑤

>

▼ Oldenberg

11. Silently (he lays down) unground (?) grain, roasted grain, collyrium, ointment, (the fragrant substance called) Sthagara, and Uśīra root.

▼ हरदत्तः

**संपुष्का** अक्षता अखण्डितैस् तण्डुलैः कृताः
स्थगरञ् चोशीरञ् च गन्धद्रव्ये
एतानि षड् द्रव्याणि तासु निवपति । इति शब्दः समुच्चयार्थः ।

तेन सर्वत्र पूर्वेण मन्त्रेणैव निवपने प्राप्ते तूष्णीमिति मन्त्रप्रतिषेधः ॥११॥

▼ सुदर्शनः

**सम्पुष्काः** सम्पुष्टा इति धानाविशेषणं अखण्डिततण्डुलैः कृता **धाना** इत्यर्थः । **स्थगरम्** आपणस्थं गन्धगद्रव्यम् । अन्यानि प्रसिद्धानि । **इति**शब्दस् समुच्चयार्थः ।

एतानि षट् द्रव्याणि **तूष्णीं** रेखास्व् एव निवपति ॥११॥
▼

**⑤**

>

तूष्णीं सम्पुष्का धाना लाजानाञ्जनाभ्यञ्जने स्थगरोशीरमिति ।

# १८ १२ उत्तरैरुपस्थायापः②

उत्तरैर् उपस्थायापः परिषिच्याप्रतीक्षस् *(→ पृष्ठतो ऽप्रतीक्षमाणस्)* तूष्णीम् एत्य
"अपश्वेत पदेत्याभ्याम्" उद-कुम्भेन त्रिः प्रदक्षिणम् अन्तरतोऽगारं निवेशनं वा परिषिच्य

## प्रत्येत्य गृहपरिषेचनमन्त्रौ⑥

## उपस्थानमन्त्राः⑥

तक्ष॑क॒, वैशा॑लेय- धृ॒तरा॑ष्ट्रैरावतस् ते जीं॑वा॒स्,
त्वयिं नस् स॒तस्, त्वयिं स॒द्भ्यो *(सर्पेभ्यो)*, व॒र्षाभ्यों न॒ः परिं॑देहि ।
धृ॒तरा॑ष्ट्रैरावत॒ तक्ष॑कस् ते वैं॑शाले॒यो जीं॑वा॒स् ...।
*(स्वरः शोधितः।)*

अहिं॑ँसातिब॒लस्ते जीं॑वा॒स् ...।
अतिं॑बलाहि॒ँसस्ते जीं॑वा॒स् ...।
*(व्यस्तप्रयोगे सम्बोधन इह स्वरव्यत्ययः।)*

ये दं॑न्द॒शूका॒ः पार्थिं॑वा॒स्- ताँस् त्वम् इ॒तः प॒रो गव्यूं॑तिं॒ निवें॑शय ।
सन्ति॒ वै नं॑श् श॒फिन॒स्, सन्तिं॑ द॒ण्डिन॒स्, ते वो॒ नेद् +धि॒नसा॒न्, न्येद् यू॒यम् अ॒स्मान् हि॒नसा॑त ।

*(प्रतिदिशम् मन्त्राः।)*

स॒मीची॒ नामा॑सि॒ प्राची॒ दिक्। तस्या॑स् ते॒ ऽग्निर् अधिं॑पतिर्, असि॒तो रं॑क्षि॒ता।

यश् चाधिं॑पति॒र्, यश् चं॑ गो॒प्ता - ताभ्यां॒ नम॒स्, तौ नों॑ मृडयताम्।
ते यं द्वि॒ष्मो, यश् चं॑ नो॒ द्वेष्टि॒ - तं वां॒ जंभें॑ दधामि ।

## मन्त्रः⑥

ओ॒ज॒स्विनी॒ नामा॑सि दक्षि॒णा दिक्।
तस्या॑स् त॒ इन्द्रोऽधिं॑पतिः, पृदा॑कू रं॑क्षि॒ता

यश् चाधिं॑पति॒र्, यश् चं॑ गो॒प्ता - ताभ्यां॒ नम॒स्, तौ नों॑ मृडयताम्।
ते यं द्वि॒ष्मो, यश् चं॑ नो॒ द्वेष्टि॒ - तं वां॒ जंभें॑ दधामि ।

प्रा॒ची नामा॑सि प्र॒तीची॒ दिक्।
तस्या॑स् ते॒ सोमोऽधि॑पतिः स्व॒जो र॑क्षि॒ता

यश् चाधि॑पति॒र्, यश् च॑ गो॒प्ता - ताभ्यां॒ नम॒स्, तौ नो॑ मृडयताम्।
ते यं द्वि॒ष्मो, यश् च॑ नो॒ द्वेष्टि॒ - तं वां॒ जंभे॑ दधामि ।

अ॒व॒स्थावा॒ नाम॒स्युदी॑ची॒ दिक्।
तस्या॑स् ते॒ वरु॑णोऽधि॑पतिस् ति॒रश्चि॑राजी र॑क्षि॒ता

यश् चाधि॑पति॒र्, यश् च॑ गो॒प्ता - ताभ्यां॒ नम॒स्, तौ नो॑ मृडयताम्।
ते यं द्वि॒ष्मो, यश् च॑ नो॒ द्वेष्टि॒ - तं वां॒ जंभे॑ दधामि ।

अधि॑पत्नी॒ नामा॑सि बृह॒ती दिक्।
तस्या॑स् ते॒ बृह॒स्पति॒र् अधि॑पतिः श्वि॒त्रो र॑क्षि॒ता

यश् चाधि॑पति॒र्, यश् च॑ गो॒प्ता - ताभ्यां॒ नम॒स्, तौ नो॑ मृडयताम्।
ते यं द्वि॒ष्मो, यश् च॑ नो॒ द्वेष्टि॒ - तं वां॒ जंभे॑ दधामि ।

व॒शिनी॒ नामा॑सी॒यं दिक्।
तस्या॑स् ते॒ य॒मो ऽधि॑पतिः क॒ल्माष॑-ग्रीवो र॑क्षि॒ता

यश् चाधि॑पति॒र्, यश् च॑ गो॒प्ता - ताभ्यां॒ नम॒स्, तौ नो॑ मृडयताम्।
ते यं द्वि॒ष्मो, यश् च॑ नो॒ द्वेष्टि॒ - तं वां॒ जंभे॑ दधामि ।

हे॒तयो॒ नाम॑ स्थ॒, तेषां॑ वः पु॒रो गृ॒हा, अ॒ग्निर् व॒ इष॑वः, सलि॒लो वा॑त-ना॒मम्।
*(वाताशिनो हि सर्पाः। तस्य वातस्य नमयिता = उपस्थापयिता। नपुंसकलिङ्गं सामान्यविवक्षायाः।)*

तेभ्यो॑ वो॒ नम॒स्, ते नो॑ मृडयत।

▼ विश्वास-प्रस्तुतिः

ते यन् **द्वि॒ष्मो**
यश्च॑ नो॒ **द्वेष्टि॒**
तवँ॑ वो॒ **जम्भे॑ दधामि** ॥

▼ Keith

him whom we hate and him who hateth us, I place him within your jaws.

▼ सायण-टीका

ते च वयं नगस्कृतरुद्राः सन्तो यं वैरिणं तूष्णीमवस्थितमपि द्विष्मः, यश्च वैरी नोऽस्मांस्तुष्णीमवस्थितानपि द्वेष्टि तमुभयविधं वैरिणं हे रुद्रा वो युष्माकं जम्भे विदारितास्ये दधामि स्थापयामि।

नि॒लि॒म्पा नाम॑ स्थ॒, तेषां॑ वो दक्षि॒णा गृ॒हा, पि॒तरो॑ व॒ इष॑व॒ः, सग॑रो वात-ना॒मम्।

तेभ्यो॑ वो॒ नम॒स्, ते नो॑ मृडयत।

▼ विश्वास-प्रस्तुतिः

ते यन् **द्वि॒ष्मो**
यश्च॑ नो॒ **द्वेष्टि॒**
तवँ॑ वो॒ **जम्भे॑ दधामि** ॥

▼ Keith

him whom we hate and him who hateth us, I place him within your jaws.

▼ सायण-टीका

ते च वयं नगस्कृतरुद्राः सन्तो यं वैरिणं तूष्णीमवस्थितमपि द्विष्मः, यश्च वैरी नोऽस्मांस्तुष्णीमवस्थितानपि द्वेष्टि तमुभयविधं वैरिणं हे रुद्रा वो युष्माकं जम्भे विदारितास्ये दधामि स्थापयामि।

व॒ज्रिणो॒ नाम॑ स्थ॒, तेषां॑ वः प॒श्चाद् गृ॒हा, स्वप्नो॑ व॒ इष॑वो॒, गह्व॑रो वात-ना॒मम्।

तेभ्यो॑ वो॒ नम॒स्, ते नो॑ मृडयत।

▼ विश्वास-प्रस्तुतिः

ते यन् **द्वि॒ष्मो**
यश्च॑ नो॒ **द्वेष्टि**
तवँ॑ वो॒ **जम्भे॑ दधामि** ॥

▼ Keith

him whom we hate and him who hateth us, I place him within your jaws.

▼ सायण-टीका

ते च वयं नगस्कृतरुद्राः सन्तो यं वैरिणं तूष्णीमवस्थितमपि द्विष्मः, यश्च वैरी नोऽस्मांस्तुष्णीमवस्थितानपि द्वेष्टि तमुभयविधं वैरिणं हे रुद्रा वो युष्माकं जम्भे विदारितास्ये दधामि स्थापयामि।

अ॒व॒स्थावा॑नो॒ नाम॑ स्थ॒, तेषां॑ व उत्त॒रद् गृ॒हा, आपो॑ व॒ इष॑व॒:, समु॒द्रो वा॑तना॒मम्।

तेभ्यो॑ वो॒ नम॒स्, ते नो॑ मृडयत।

▼ विश्वास-प्रस्तुतिः

ते यन् **द्वि॒ष्मो**
यश्च॑ नो॒ **द्वेष्टि**
तवँ॑ वो॒ **जम्भे॑ दधामि** ॥

▼ Keith

him whom we hate and him who hateth us, I place him within your jaws.

▼ सायण-टीका

ते च वयं नगस्कृतरुद्राः सन्तो यं वैरिणं तूष्णीमवस्थितमपि द्विष्मः, यश्च वैरी नोऽस्मांस्तुष्णीमवस्थितानपि द्वेष्टि तमुभयविधं वैरिणं हे रुद्रा वो युष्माकं जम्भे विदारितास्ये दधामि स्थापयामि।

अधि॑पतयो॒ नाम॑ स्थ॒, तेषां॑ व उ॒परि॑ गृ॒हा, व॒र्षं॑ व॒ इष॒वो, ऽव॑स्वान् वात-ना॒मम्।

तेभ्यो॑ वो॒ नम॒स्, ते नो॑ मृडयत।

▼ विश्वास-प्रस्तुतिः

ते यन् **द्वि॒ष्मो**
यश्च॑ नो॒ **द्वेष्टि**
तवँ॑ वो॒ **जम्भे॑ दधामि** ॥

▼ Keith

him whom we hate and him who hateth us, I place him within your jaws.

▼ सायण-टीका

ते च वयं नगस्कृतरुद्राः सन्तो यं वैरिणं तूष्णीमवस्थितमपि द्विष्मः, यश्च वैरी नोऽस्मांस्तुष्णीमवस्थितानपि द्वेष्टि तमुभयविधं वैरिणं हे रुद्रा वो युष्माकं जम्भे विदारितास्ये दधामि स्थापयामि।

क्र॒व्या नाम॑ स्थ॒ पार्थि॑वास्, तेषां॑ व इ॒ह गृ॒हा, अन्नं॑ व॒ इष॑वो, निमि॒षो वा॑तना॒मम्।

तेभ्यों वो̱ नम̱स्, ते नों मृडयत।

▼ विश्वास-प्रस्तुतिः

ते यन् **द्वि̱ष्मो**
यश्चं नो̱ **द्वे̱ष्टि**
तवँ वो̱ **जम्भें दधामि** ॥

▼ Keith

him whom we hate and him who hateth us, I place him within your jaws.

▼ सायण-टीका

ते च वयं नगस्कृतरुद्राः सन्तो यं वैरिणं तूष्णीमवस्थितमपि द्विष्मः, यश्च वैरी नोऽस्मांस्तुष्णीमवस्थितानपि द्वेष्टि तमुभयविधं वैरिणं हे रुद्रा वो युष्माकं जम्मे विदारितास्ये दधामि स्थापयामि।

अप॑ श्वेत *(सर्पाधिपते)* प̱दा*(वि३)* ज॑हि̱*(→हन)*
पूर्वे॑ण̱ चाप॑रेण च ।
स̱प्त च̱ मानु॑षीर् इ̱मास् *(सर्पजातीः- ब्राह्मणानां तिस्रः वैश्यानां द्वे, शूद्राणां च द्वे)*
ति̱स्रश्च॑ रा̱जब॑न्धवीः ।

न वै श्वे̱तस्या॑ऽध्याचा̱रे*(=आधिपत्ये)*
ऽहि॑र् ज̱घान̱ कञ्च̱न ।
श्वे̱ताय॑ वैद̱र्वाय̱*(=विदर्बपुत्राय)* नमो̱
नमः॑ श्वे̱ताय॑ वैद̱र्वाय॑ ॥ (17)

*(युग्मान्)* ब्राह्मणान् भोजयेत् *(स्थालीपाक-शेषादिभिः सर्पिष्मद्भिः। उपनयनवद् भुक्तवद्भिर् आशीर्-वचनम्।)* १२

▼

⑤

>
▼ Oldenberg

With the next (formulas, II, 17, 9-26) he should worship (the serpents), should sprinkle water round (the oblations), should return (to his house) silently without looking back, should sprinkle (water) with a water-pot from left to right, thrice around the house or the resting-place on the inside, with the two verses, 'Beat away O white one, with thy foot' (II, 17, 27. 28), and should offer food to the Brāhmaṇas.

▼ हरदत्तः

एवमेवैतं बलिं सप्तभिर्द्रव्यैर्दत्वा ततस्तां बलिदेवतामुपतिष्ठते । **उत्तरैर्**मन्त्रैः "तक्षक वेशालेये"त्यादिभिः अष्टादशभिः । तेभ्य इमं बलिमहार्षमिति पूर्वस्या एवोत्तरस्य पादस्य सन्नामः न मन्त्रान्तरम् । वक्ष्यति च "बलिमन्त्रस्य सन्नामः" इति । एवमुपस्थाय अपः **परिषिञ्चति** सर्वतस्सिञ्चति । न्युप्तस्य बलेः प्रकृतत्वात् । ततो**ऽप्रतीक्षः** पृष्ठतः अप्रतीक्षमाणस्तूष्णीं वाग्यतः **प्रत्येति** । प्रत्येत्य "अपश्वेत पदा" इत्येताभ्यां ऋग्भ्यां उदकुंभेन **अन्तरतोऽगारं** निवेशनं वा परिषिच्य **ब्रह्मणान् युग्मान् भोजयेत्** स्थालीपाकशेषादिभिः ॥१२॥

इति श्रीहरदत्तविरचितायां गृह्यवृत्तावनाकुलायामष्टादशः खण्डः ॥१७॥

▼ सुदर्शनः

अथ **उत्तरैर्** मन्त्रैः "तक्षक वेशालेय" इत्यादिभिरष्टादशभिः मान्त्रवर्णिकीं बलिदेवतामुपतिष्ठते । तत्र च "ओजस्विनी नामासि" इत्यादिषु चतुर्षु पर्यायेषु दशभ्यः पदेभ्य ऊर्ध्वं "रक्षिता यश्चाधिपतिः" इत्यादेरनुषङ्गः । तथा "हेतयो नाम स्थ" इत्यादिष्वपि पञ्चस्वेकादशभ्य उर्ध्वं" वातनामं तेभ्यो वो नमः" इति तत्पूर्वस्या एव बलिहरणार्थाया ऋचः उत्तरभागस्योत्सर्जनार्थः सन्नामः । वक्ष्यति हि तत्र "अहार्षमिति बलिमन्त्रस्य सन्नामः" (आप.गृ.१८-४.) इति । अथ न्युप्तं बलिमद्भिः परिषिच्य तमप्रतीक्षमाणः तूष्णीं वाग्यतो गृहान्प्रत्येत्य "अप श्वेत पदा" इत्येताभ्यामित्यादि यथासूत्रं करोति । तत्रापि ब्राह्मणभोजनवचनं क्रमार्थम् । उपनयनवद्भुक्तवद्भिराशीर्वचनम् ॥१२॥

इति श्रीसुदर्शनाचार्यविरचिते गृह्यतात्पर्यदर्शने अष्टादशः खण्डः ॥
▼

⑤

>

उत्तरैरुपस्थायापः परिषिच्याप्रतीक्षस्तूष्णीमेत्या "पश्चेत पदे"त्येताभ्यामुदकुम्भेन त्रिःप्रदक्षिणमन्तरतोऽगारं निवेशनं वा परिषिच्य ब्राह्मणान् भोजयेत् ।

# १९ ०१ धानाः कुमारान्②

धानाः कुमारान् प्राशयन्ति १

▼

⑤

>
▼ Oldenberg

1. The unground grain (which is left over, see above, VII, 18, 11) they give to the boys to eat.

▼ हरदत्तः

बलिहरणशिष्टाः **धानाः कुमारान् प्राशयन्ति** ये प्राशने समर्थाः । कुमारीणाम् अपि प्राशनमेकशेषनिर्देशात् ॥ १ ॥

▼ सुदर्शनः

**धानाः** या बलिहरणशिष्टाः **कुमारान् प्राशयन्ति** । के? शिष्टास् सामर्थ्यात् ॥१॥

▼

⑤

>

धानाः कुमारान् प्राशयन्ति।

# १९ ०२ एवम् अत②

एवम् अत ऊर्ध्वं यद् अशनीयस्य सक्तूनां वैतं बलिं हरेद् आमार्गशीर्ष्याः २

▼

⑤

>
▼ Oldenberg

2. Let him repeat in the same way this Bali-offering of whatever food he has got or of flour, from that day to full moon of (the month) Mārgaśīrṣa.

▼ हरदत्तः

यद् इदं बलिहरणं वाग्यतस् संभारान् आदायेत्याद्य् अप्रतीक्षमाणस् तूष्णीम् इत्येतदन्तं (आप.गृ.१८-१०-१२.) तद् अस्मात् कर्मण **ऊर्ध्वम् आमार्गशीर्ष्याः पर्वणश् चतुर्षु मासेषु यद् अशनीयस्या**न्न-विशेषस्य **सक्तूनां वा** ऽहरहः कर्तव्यम् । यद् यद् अन्नम् अशनार्थं गृहे क्रियते तदशनीयम् ।

अगार-परिष्टनादिस्तु स्थालीपाकस्यैव शेषः, न बलेः ।

तेनैतदिह विधीयते । यद्यप्याञ्जनादीन्यलङ्करणार्थनि नाभ्यवहार्याणि तथापि "तासूत्तरया सक्तून् निवपति । तूष्णीं संपुष्काः धाना" इत्यादि सर्वेषां तुल्या चोदना । मन्त्रे च तुल्यवदभिधानं तेभ्य इमं बलिं हरिष्यामि इति । तस्मात् सप्तापि बलिद्रव्याणि । तेषां सर्वेषामयं प्रत्याम्नायो नादितस्त्रयाणामेव । अपां तु न भवति, चोदनाभेदात् । उपनिनीय परिषिच्येति । एवंशब्दः कालविधानार्थः । यथात्रास्तमिते बलिहरणं, एवमत ऊर्ध्वमप्यस्तमिते कर्तव्यमिति । एतंशब्दस्तु धर्मविधानार्थः । **एतं** बलिम् **एवं**धर्मकमिति । नचान्यतरेणैवोभयसिद्धिः । यदि ह्येवंशब्द उभयार्थस्स्यात् रात्रौ पार्वणः प्राप्नोति । कथम्? रात्रावाग्नेयस्थालीपाक उत्पन्नः एवमत ऊर्ध्वमिति पार्वणः । तथा यद्येतच्छब्द उभयार्थस्स्यात् "परिसंवत्सरादुपतिष्ठद्भ्यः एतत्कार्यम्"इति रात्रावपचितिः प्राप्नोति; समावर्तने रात्रावुत्पन्नत्वादपचितेः । तस्मादुभयार्थमुभयं वक्तयम् । एवं तावत् रात्रौ सकृद्बलिहरणमिति । अपर आह– उभयोः कालयोः बलिहरणमिति । कथम्? यदशनीयस्येति वचनात् यद्यदशनार्थं यदा क्रियते तस्य तस्य तदा कर्तव्यमिति हि तस्यार्थः । द्वयोश्च कालयोरशनम्; कालयोर्भोजनमिति वचनात् । ततश्च यदा गृहमेधिनो यदशनीयस्य होमा बलयश्चेत्त्युत्पन्नस्य वैश्वदेवस्य द्वयोः कालयोः प्रवृत्तिः एवमस्यापि । स्पष्टञ्चैतदाश्वलायनके– "सर्पदेवजेनभ्यस्स्वाहेति सायं प्रातर्बलिं हरेदा प्रत्यवरोहणात् (आश्व.२-१-१४.) इति । अस्मिन् पक्ष एवंशब्द उत्तरार्थः । **अत ऊर्ध्वमिति**वचनमस्मिन् प्रथमे बलिहरणे द्रव्यविकल्पो मा विज्ञायीति । आमार्गशीर्ष्या इति बलिहरणस्यावसानकालोपदेशः । यद्येवं नार्थ एतेन । अत्रैनमुत्सृजतीति (आप.गृ.१९-५.) वक्ष्यति । प्रयोजनमस्य तत्रैव वक्ष्यामः ॥२॥

▼ सुदर्शनः

**अत ऊर्ध्वं** अस्माच् छ्रावण्यां कृतात् कर्मण ऊर्ध्वम् । **आमार्गशीर्ष्याः** यावन् मार्गशीर्षी यावद् उत्सर्जनं तावद् इत्यर्थः । एतम् अनन्तर-चोदितं सक्तूनां सम्बन्धिनं **बलिम्** । **एवं** "सम्भारानादाय वाग्यतः प्राचीमुदीचीं वा" इत्यादि "अप्रतीक्षस्तूष्णीमेत्य" (आप.गृ.१८-१०...१२) इत्येवमन्तेतिकर्तव्यताकम् अहर् अहः सायङ्काले बलिं हरेत् । **यदशनीयस्य वा** सम्बन्धिनमिति वाशब्दस्य व्यवहितेन सम्बन्धः, यदशनीयस्येत्यस्य पदस्य धानादीनां निवृत्त्यर्थत्वात् । अगारपरिषेचनादिकं तु स्थालीपाकस्यैव शेषो न बलिहरणस्य, भिन्नदेशत्वात् ।

केचित्— उभयोः कालयोर्बलिहरणम्, यदशनीयस्येति वचनात्, वैश्वदेववत् अशनस्य च "कालयोर्भोजनम्" (आप.ध.२-१-२) इति वचनेनोभयकालिकत्वात्, "सायं प्रातर्बलिं हरेदा प्रत्यवरोहणात्" (आश्व.२-१-१४.) इत्याश्वलायनवचनाच्च । तथा एतमितिशब्दस्यैव अपेक्षितकृत्स्नधर्मप्रापकत्वात् एवमिति शब्द उत्तरसूत्रार्थ इति । तन्न; समभिव्याहृतसकलपदानां सम्भूयैकार्थप्रत्ययविरोधात् ॥२॥

▼

⑤

>

एवम् अत ऊर्ध्वं यदशनीयस्य सक्तूनां वैतं बलिं हरेदामार्गशीर्ष्याः।

# १९ ०३ मार्गशीर्ष्याम्②

मार्गशीर्ष्यां पौर्णमास्याम् अस्तमिते स्थालीपाकः *(उपक्रमवत्)* ३

▼

⑤

>

▼ Oldenberg

3. On the day of the full moon of Mārgaśīrṣa after sunset a Sthālīpāka (is offered as above, VII, 18, 5).

▼ हरदत्तः

श्रावण्यां पौर्णमास्याम् इत्यनेनैतत् व्याख्यातम् । एवं शब्दश् चात्रानुवर्तते । यथेदं श्रावण्यां कर्म कृतम् एवं मार्गशीर्ष्याम् अपीति । तेन "पार्वणवद् आज्यभागान्त" इत्यादेः धानाः कुमारान् प्राशयन्ती"त्यन्तस्य कृत्स्नस्य कल्पस्यात्र प्रवृत्तिः । एतावन्नाना "मार्गशीर्ष्यै पौर्णमास्यै स्वाहेति स्थालीपाकस्य होमः ।

श्रावण्यां पौर्णमास्याम् इति प्रकृते पुनः पौर्णमास्याम् इत्युच्यते ज्ञापनार्थम् तत् पौर्णमासीग्रहणम् अस्मिन् प्रकरणे नानुवर्तते इति । तेन पूर्वसूत्रे आमार्गशीर्ष्या इति कर्मावधित्वेन न गृह्यते । यत् तत्र चोदितम् अनेन सूत्रेण न कालः । तेन मार्गशीर्ष्यां पौर्णमास्याम् अहनि यद् अशनीयस्य बलिहरणं भवति ।

कालवाचित्वे तु न प्राप्नोति यदि च मर्यादायाम् आकारः । अथ त्वभिविधौ, अस्तमिते ऽपि यद् अशनीयं तस्यैव प्राप्नोति । इष्यते चास्तमिते स्थालीपाककर्मणि सप्तभिर् द्रव्यैर् बलिहरणम् अहनि च यदशनीयस्य । तस्मात् पूर्वत्र कर्मव्यपदेशो यथा स्यात्, कालस्य व्यपदेशो मा भूदिति पौर्णमास्यामिति विशेषणम् । एवञ्च यदशनीयवचनेनोभयोः कालयोर्बलिहरणमिति यदुक्तं तदेव स्थितं भवति । अस्तमित इत्त्युच्यते– अहनि मा भूदिति । एवमित्यस्य धर्मप्रापणे कालविधौ चोभयत्र शक्तिर्नास्तीत्युक्तम् ॥३॥

▼ सुदर्शनः

साकाङ्क्षत्वाद् **एवं**-शब्दोऽनुवर्तते । यथा श्रावण्यां **स्थालीपाकः** कृतः, एवं **मार्गशीर्ष्याम् अप्य् अस्तमिते** कर्तव्यः । "पत्न्य् अवहन्तीत्य्" आदि धाना-प्रशनान्तं कृत्स्नं कर्मानुष्ठेयम् इत्य् अर्थः। स्थालीपाकहोमे तु "मार्गशीर्ष्यै पौर्णमास्यै स्वाहे"ति विशेषः ॥३॥
▼

⑤

>

मार्गशीर्ष्यां पौर्णमास्यामस्तमिते स्थालीपाकः।

# १९ ०४ अहार्षमिति बलिमन्त्रस्य②

"अहार्षम्" इति बलिमन्त्रस्य सन्नामः *(किंशुकहोमादिकम् अपि कृवा)*।

▼

⑤

>
▼ Oldenberg

4. In the Mantra for the Bali-offering he changes (the word 'I shall offer' into) 'I have offered.'

▼ हरदत्तः

**सन्नामः** ऊहः—हरिष्यामीत्यस्य स्थाने अहार्षमिति । यद्यप्ययं सन्नामस्तस्मिन्नेव मन्त्रे पठितः तथाप्यसत्यस्मिन् वचने बलिहरणमन्त्रे चतुर्थपादस्य पृथग्विनियोगाभावात् चतुष्पादा सा विज्ञायेत । तस्मात् सन्नामविधिरारभ्यते । त्रिपदैव सा तस्या एव तृतीयस्य पादस्य सन्नामोऽयमुत्तमः पठितः तस्यैव विनियोगकालो न प्रागिति । किञ्च कृत्स्नमेवैतत् कर्म धानाप्राशनान्तं स्थालीपाकशब्देन गृह्यते एतच्च दर्शितं भवति । बलिहरणस्योत्तरसूत्रे प्रयोजनम् ॥४॥

▼ सुदर्शनः

उक्तार्थमेतत् ॥४॥

▼

⑤

>

अहार्षमिति बलिमन्त्रस्य सन्नामः ।

# १९ ०५ अत्रैनमुत्सृजति②

अत्रैनमुत्सृजति ५

▼

### ⑤

>

▼ Oldenberg

5. Then he does not offer (the Bali) any longer.

▼ हरदत्तः

**अत्र** मार्गशीर्ष-संज्ञके कर्मण्य् **एनं** बलिम् उत्सृजति । *("एवम् अत" इति सूत्रय्)* **एवम्** इत्य् अनेन वचनेन श्रावणी-विधानस्य कृत्स्नस्यातिदिष्टत्वाद् अस्यापि स्थालीपाकस्य शेषत्वेन बलि-हरण-प्राप्तिः । तत्र श्रावण्याम्-इत्य्-अवधिः कल्पेत । तस्मात् मार्गशीर्ष-शेषस्य **अहार्षम्** इत्येव विधिः । शिष्टस्य बलेः प्रतिषेधार्थम् इदम् । आमार्गशीर्ष्या इत्य् एतत्तु श्रावण-शेषस्य बलेर् अवसान-विधानार्थम् ॥५॥

▼ सुदर्शनः

**अत्र** अस्मिन्न् उत्सर्जने कृते, **एनम्** अहर् अहः क्रियमाणं बलिम् **उत्सृजति** । न चायम् आत्यन्तिक उत्सर्गः - नित्यत्वेन सर्प-बलेस् संवत्सरे सम्वत्सरे कर्तव्यत्वात् ॥५॥

▼

### ⑤

>

अत्रैनमुत्सृजति ।

---

1. 12 seq. Description of the regular form of a Pākayajña.↩

2. Comp. Śrauta-sūtra I, 11, 6 seqq.↩

# २१ आग्रयणस्थालीपाकः①

# १९ ०६ अनाहिताग्नेराग्रयणम्②

अनाहिताग्नेर्*(←कर्मधारयो ऽस्तु, सशेषाहिताग्नेश् चापि विवक्षया)* आग्रयणम् *(यथार्तु पर्वणि)*।

▼

**⑤**

>

▼ Oldenberg

6. (Now follows) the Āgrayaṇa sacrifice (or partaking of the first-fruits) of one who has not set up the (Śrauta) fires.

▼ हरदत्तः

*(आग्रयण-शब्दय्)* **एतिर्** अत्र प्राशनार्थः । अग्रे प्रथमं अयनं यत्र तद् **आग्रयणम्** । अग्रायणम् इति प्राप्ते छान्दसो दीर्घ-व्यत्ययः ।

तत्-कर्म वक्ष्यते—
तत्र **अनाहिताग्नि**-ग्रहणम् *(अर्धाधान-क्रमेण)* आहिताग्नेर् औपासनवतः श्रौतेनाऽऽग्रयणेन सह समुच्चय-प्रतिषेधार्थम् ।*(5)*
तेन पार्वणादिषु समुच्चयो भवति ।*(5)* तत्र स्मार्तस्य करणे ऽभ्युदयः । अकरणे न प्रत्यवायः ।

**आग्रयणम्** इति नाम्ना श्रौताग्रयणस्य धर्माः प्राप्यन्ते ।*(5)*
नानिष्ट्वाग्रयणेनाऽऽहिताग्निर् नवस्याश्नीयाद् इति । (आप.श्रौ.६-२९-२.)

वर्षासु श्यामाकैर् यजेत, शरदि व्रीहिभिः, वसन्ते यवैः, यथुर्तु वेणु-यवैर् इति च ॥६॥

▼ सुदर्शनः

उपदिश्यत इति शेषः ।

अत्राऽनाहिताग्नेर् ग्रहणं "सशेषाधानिनो ऽप्याऽऽहिताग्नेर् नेदं स्मार्तम् आग्रयणं श्रौतेन समुच्चेतव्यम्" इत्य्-अर्थम् । औपासन-होमादेस् तु अग्नि-होत्र-होमादिना समुच्चय एव ।

पिण्डपितृयज्ञो मासिश्राद्धं च आहिताग्न्य्-अनाहिताग्न्योर् उभयोर् अपि समुच्चेतव्ये -

"सोऽयम् एवं-विहित एवानाहिताग्नेर् औपासने" (आप.श्रौ.६-२८.) इति वचनात्,

> पितृयज्ञं तु निर्वर्त्य
> विप्रश् चन्द्र-क्षयेऽग्निमान् ।
> पिण्डान्वाहार्यकं श्राद्धं
> कुर्यान् मासानु-मासिकम् ॥ (म.स्मृ.३-१२२)

इति मनुवचनाच् च ।
सर्वाधानिनोऽपि मासि-श्राद्धं होम-वर्जं कर्तव्यम् एव ।

उपदेश-मतं तु—
सशेषाधानिनश् चाहिताग्नेः । पार्वणयोर् औपासन-होमस्य च निवृत्तिः ; दर्श-पूर्ण-मासाभ्याम् अग्निहोत्रेण च कृतार्थत्वात्, कालैक्येन विरोधाच् चेति ।

आग्रयणम् इति कर्मनामधेयम्, येन कर्मणा अग्रे नवद्रव्यं देवान् प्रापयतीति । यत्-कर्म कृत्वैव वाग्रयणं प्रथमायनं नवान्न-प्राशन-प्राप्तिर् भवतीति ॥६॥

▼

⑤

>

अनाहिताग्नेराग्रयणम् ।

# १९ ०७ नवानाँ स्थालीपाकँ②

नवानां *(धान्यानां)* स्थालीपाकं श्रपयित्वाग्रयणदेवताभ्यः *(→ इन्द्राग्निभ्यां, विश्वेभ्यो देवेभ्यः, द्यावापृथिवीभ्याम्)* स्विष्टकृच्चतुर्थाभ्यो हुत्वा *(साधारणस्थालीपाकतन्त्रं वर्तते।)*
तण्डुलानां*(→पुलाकानां)* मुखं पूरयित्वा
गीर्त्वा *(जलम् पीत्वा)* ऽऽचम्य
+ओदन-पिण्डं संवृत्त्य *(यथा+उत्क्षेपे न विशीर्येत)*
+उत्तरेण यजुषा*(प॒र॒मे॒ष्ठ्य् असिं प॒र॒मां माँ॒ श्रियँ गमय ।)* ऽऽगार-स्तूप उद्विद्ध्येत्*(=उद्-विध्येत्)* ७

*(अगारस्तूपे स्थितः)* प॒र॒मे॒ष्ठ्य् असिं।
प॒र॒मां माँ॒ श्रियँ गमय ।

▼

⑤

>
▼ Oldenberg

7. He prepares a Sthālīpāka of the fresh fruits, sacrifices to the deities of the (Śrauta) Āgrayaṇa sacrifice with (Agni) Sviṣṭakṛt as the fourth, fills his mouth with grains, swallows them, sips water, forms a lump of the boiled (sacrificial) food, and throws it up with the next Yajus (II, 18, 1) to the summit of the house.

▼ हरदत्तः

- **नवानां** व्रीहीणां यवानां वा औपासने श्रपयित्वा
- प्रतिष्ठितम् अभिघार्याग्निम् उपसमाधाय
- संपरिस्तीय
- तूष्णीं समन्तं परिषिच्य
- दर्वीं संमृज्य
- स्थालीपाकाद् उपघातं चतस्र आहुतीर् जुहोत्य् **आग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थाभ्यः** —
    - इन्द्राग्निभ्यां स्वाहा । अग्नीन्द्राभ्यामिति वा ।
    - ततो विश्वेभ्यो देवेभ्यः, ततो द्यावापृथिवीभ्यां, अग्नये स्विष्टकृत इति ।
- पूर्ववत् परिषेचनम् ।

एतावद् एव कर्म नान्यत् किञ्चित्, प्रापकाभावात् ।
केचित् सर्वं कुर्वन्ति ।*(5)*

ततः **तण्डुलानां मुखं** पूरयति ।
अत्र तण्डुलशब्दः ओदनावयवेषु पुलाकेषु वर्तते ।*(5)*
यथा "मेक्षणे तण्डुला" इत्यत्र ।
तेन हविषश् शेषाद् अवदाय पूरणम् ।
अन्ये शुद्धान् एव तण्डुलानिच्छन्ति ।

तान् **गीर्त्वा** भक्षयित्वाऽऽचम्य तत ओदनपिण्डं संवर्तयति प्रयत्नेन सम्पादयति । यथा स्तूपे उद्विध्यमानो न संशीर्यति तथा संवर्त्य तमगारस्तूपे उद्विध्येत् — **उत्तरेण यजुषा** "परमेष्ठ्य् असी"त्यनेन *ऊर्ध्वं विध्येत्,* यथा **स्तूपे** निपततति । स्तूपः पृष्ठवंशः । **विद्धेद्** इत्यपपाठः, छान्दसो वा ।

आग्रयण-वचनाद् एव सिद्धे **नवानाम्** इति वचनम् अनाहिताग्नेर् नवानां स्थालीपाक एव यथा स्यात् - अन्ये कल्पा श्रौतदृष्टा मा भूवन्निति । स्विष्टकृच्-चतुर्थ-वचनं सोम-निवृत्य्-अर्थम् ।

तेन*(←केन??)* श्यामाकानां वेणुयवानां चाग्रयणं अनाहिताग्नेर् भवति ॥७॥
▼ सुदर्शनः

**नवानां** व्रीहीणां यवानां वा सम्बन्धिनां पत्न्य् अवहन्तीत्यादि-विधिना **स्थालीपाकम्** एव श्रपयित्वा
ऽग्नेर् उपसमाधानाद्य्-अग्नि-मुखान्ते कृते
**आग्रयण**प्रधान **देवताभ्यः** श्रौते चोदिताभ्यः **स्विष्टकृच्-चतुर्थाभ्यः** = स्विष्टकृच्चतुर्थो यासां, ताभ्यो जुहोति ।
तत्र प्रथमम् इन्द्राग्निभ्यां अग्नीन्द्राभ्यां वा स्वाहेति जुहोति ।
ततो विश्वेभ्यो देवेभ्यस् स्वाहेति ।
ततश् च द्यावा-पृथिवीभ्यां स्वाहेति ।
सर्वत्र च स्वेनैवावदानधर्मेण ।
अथ लेपयोर् इत्यादि-तन्त्र-शेष-समाप्तिः ।

ननु— श्रौते "आग्नेयम् अष्टाकपालं निर्वपति पुराणानां व्रीहीणां" इत्य् अग्निः प्रथम- देवता । तत् कथम् इन्द्राग्निभ्याम् अग्नीन्द्राभ्यां वा प्रथमाहुतिः ?
सत्यं; स तु तत्राग्निर् अङ्ग-देवता, न प्रधान-देवता; आग्रयण-देवताभ्य इति च प्रधान-देवतानाम् एव सम्प्रत्ययः ; अन्यथा अतिप्रसङ्गात् ।
अप्रधान्यं चाग्नेः "आग्रयणं भवति हुताद्याय" इत्य् अत्रेन्द्राग्न्य्-आदीनाम् एवोपदेशात्, ऐन्द्राग्नस्य मुख्य-प्रधानत्वे चामावास्या-तन्त्रम् इति तन्त्र-नियमस्योपपत्तेः, "दश हविषां द्वे स्विष्टकृतः" इत्यत्राग्नेययोर् याज्यानुवाक्ययोर् अभावाच्च ।

अत्र च **स्विष्टकृच्चतुर्थाभ्य** इति वचनं श्रौतवद् इह व्रीह्याग्रयणेन श्यामाकाग्रयणस्य पाक्षिकी समानतन्त्रता मा भूद् इत्य्-एवम्-अर्थम् ।
तेनानाहितग्नीनां नाना-तन्त्रम् एव ।*(4)*

वर्षासु पर्वणि सोमाय श्यामाकाग्रयणं कर्तव्यम्,
द्रव्य-देवता-कालानाम् अनुक्तानाम् अप्याग्रयण-नाम-धेयाद् अवगतानां आकाङ्क्षितानां स्वीकारे विरोधाभावात् ।*(4)*

अत एव न्यायाच् छरदि व्रीहीणाम् आग्रयणं, वसन्ते च यवानां पर्वण्य् एव ।

केचित्— स्विष्टकृच्-चतुर्थ-वचनाद् आहिताग्नेः श्यामाकादीनां वेणुयवानां चाग्रयणम् एव न भवतीति । तन्न ; अकृताग्रयणस्य नव-श्यामाकाद्य्-अशनाभ्युपगमे ऽतिप्रसङ्गात्, स्विष्टकृच्-चतुर्थ-वचनस्योक्तार्थत्वाच् च ॥

ततस् तन्त्रशेषे समाप्ते **तण्डुलानां मुखम्** आस्यं पूरयति ।
तण्डुलाश् चाश्रृताः, प्रसिद्धत्वात् । श्रृता इत्यपरे - "ये मेक्षणे तण्डुला" इति दर्शनात् ।
श्रृत-पक्षे हुतशेषात् प्रतिपत्त्य्-अपेक्षाद् उपादाय मुख-पूरणम् ।

ततो **निगीर्य** तण्डुलान् **आचामति** - अपस् सकृत् पिबतीत्यर्थः । कर्माङ्गतया चेदम् आचमन-विधानं, प्रकरणात् ।
शुद्ध्य्-अर्थाचमनम् अपि "आसीनस् त्रिर् आचामेत्" (आप.ध.१-१६-२.) इत्याद्य्-अनेकपदार्थान्वितं शास्त्रान्तर-प्राप्तं कर्तव्यम् एव ।

तत ओदनेन हुत-शेषेण **पिण्डं संवर्तयति** - यथा उद्विध्यमानो न शीर्यति तथा सुदृढं करोति । ततस्तं पिण्डमुत्तरेण यजुषा "परमेष्ठ्यसि" इत्यनेन **उद्विद्धेत्** ऊर्ध्वं विक्षिपेत् ।
यथागारस्तूपे पृष्ठवंशे पतति तथा विद्धेत् । यकार-लोपश् छान्दसः ॥७॥
▼

⑤

>

नवानाँ स्थालीपाकँ श्रपयित्वाऽऽग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थाभ्यो हुत्वा तण्डुलानां मुखं पूरयित्वा गीर्त्वाचम्यौदनपिण्डँ संवृत्त्योत्तरेण यजुषागारस्तूप उद्विद्धेत् ।

# २२ हेमन्तप्रत्यवरोहणम्①

# १९ ०८ हेमन्तप्रत्यवरोहणम्②

हेमन्तप्रत्यवरोहणम् *(खट्वायाः)*८

▼

### ⑤

>

▼ Oldenberg

8. 1 (Now follows) the 'redescent' in the winter.

▼ हरदत्तः

*(सम्पादकटिप्पनी - सूत्रमिदमग्रिमे व्याख्यातम् ।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी - सूत्रमिदमग्रिमे व्याख्यातम् ।)*

▼

### ⑤

>

हेमन्तप्रत्यवरोहणम्।

# १९ ०९ उत्तरेण यजुषा②

उत्तरेण यजुषा *("प्रत्यवरूढो नो हेमन्तः"इत्यनेन)* प्रत्यवरुह्य

प्र॒त्यव॑रूढो नो हेम॒न्तः ।

### संवेशनमन्त्राः⑤

उत्तरैर् *("प्रतिक्षत्र"इत्यादिभिः पञ्चभिः)* दक्षिणैः पार्श्वैः नवस्वस्तरे*(=तृणशय्यायाम्)* संविशन्ति ९

*(नवस्वस्तरे संविशन् )*

प्रति॑ क्ष॒त्रे, प्रति॑तिष्ठामि रा॒ष्ट्रे ।
प्रत्य् अश्वे॑षु, प्रति॑तिष्ठामि॒ गोषु॑ ।
प्रति॑ प्र॒जाया॒ं, प्रति॑तिष्ठामि॒ भव्ये॑*(=मङ्गले)* ।
इ॒ह *(स्वस्तरे)* धृति॑र्, इ॒ह विधृ॑तिः ।
इ॒ह रन्ति॑र्, इ॒ह रम॑तिः ।

▼

⑤

>

▼ Oldenberg

9. With the next Yajus (II, 18, 2) they 'redescend' (or take as their sleeping-place a layer of straw instead of the high bedsteads which they have used before). With the next Yajus formulas (II, 18, 3-7) they lie down on a new layer (of straw) on their right sides,

▼ हरदत्तः

हेमन्तप्रत्यवरोहणं नाम कर्म नित्यं संवत्सरे संवत्सरे कर्तव्यम्, तदुपदिश्यते—हेमन्ते प्राप्ते खट्वां विहाय पलालस्वस्तरे शेते । हेमन्तं ऋतुं प्रति खट्वाया अवरोहणं **हेमन्तप्रत्यवरोहणं, तदुत्तरेण यजुषा** कर्तव्यं "प्रत्यवरूढो नो हेमन्त" इत्यनेन । कः पुनरस्य कालः? यस्यां व्युष्टायां हेमन्तः प्रवर्तते शरन्निवर्तते, सा रात्रिरस्य कालः । (अपर आह–मार्गशीर्ष्यां पौर्णमास्यामस्तमिते स्थालीपाकान्ते प्रत्यवरोहणं सर्वेषां प्रसिद्धत्वादिति । अन्ये—मार्गशीर्ष्यां पौर्णमास्यामित्यनुवर्तयन्ति । ) तत्र प्रत्यवरुह्य तत **उत्तरैर्** मन्त्रैः "प्रतिक्षत्र" इत्यादिभिः पञ्चभिः **नवस्वस्तरे** नवैः पलाशैः कस्पिते शयनीये **दक्षिणैः पार्श्वैः** दक्षिणानि पार्श्वान्यधः कृत्वा **संविशन्ति** शेरते । गृहमेधिनः अमात्याश्च पुत्रादयः कुमार्यश्चाप्रत्ताः । नित्यस्यैव संवेशनस्य नियमविधिरयम्—निशायां यत्संवेशनं संवप्रार्थं तदस्यां निशायामेव कर्तव्यमिति । प्रत्यवरोहणमन्त्रोऽपि तस्मिन्नेव काले वक्तव्यः ॥८॥

▼ सुदर्शनः

यस्मिन् कर्माणि हेमन्ते खष्ट्वातः प्रत्यवरोहणं तद्धे**मन्तप्रत्यवरोहणं** नाम कर्मोपदिश्यत इति शेषः । अस्मादेव च योगिकान्नामधेयात् "प्रत्यवरूढो नो हेमन्तः" इति मन्त्रलिङ्गाच्चेदं कर्म हेमन्ते प्रथमायां रात्रौ कर्तव्यमिति विधिः कल्प्यते । केचित्–"मार्गशीर्ष्यां पौर्णमास्यामस्तमिते" (आप.गृ.१९-३.) इत्यनुवर्तनात्तत्रेदं कर्तव्यमिति ॥८॥ **उत्तरेण यजुषा** "प्रत्यवरूढो नो हेमन्तः" इत्यनेन गृहस्थः पत्न्यादयश्च **नवस्वस्तरे** आरुह्य खष्ट्वातो हेमन्ते प्रत्यवरोहन्ति यावद्धेमन्तस्तावत्खष्ट्वां शय्यां विमुच्य नवस्वस्तर एव शयीमहीति बुद्धिं कुर्वन्तीत्यर्थः । न पुनः पूर्वमदृष्टार्थं खष्ट्वामारुह्य मन्त्रेण स्वस्तरं प्रत्यवरोहन्तीति । अनन्तरम् **उत्तरैर्**मन्त्रैः "प्रतिक्षत्रे" इत्यादिभिः प्रथमैः पञ्चभिः । **नवस्वस्तरे** नवैः पलाशैः कल्पिते शयनीये **दक्षिणैः पार्श्वैः** दक्षिणानि पार्श्वान्यधः कृत्वा प्रक्छिरसस् **संविशन्ति** ॥९॥

▼

⑤

>

उत्तरेण यजुषा प्रत्यवरुह्योत्तरैर्दक्षिणैः पार्श्वैर्नवस्वस्तरे संविशन्ति ।

# १९ १० दक्षिणतः पितोत्तरा②

दक्षिणतः पितोत्तरा मातैवम् अवशिष्टानां ज्येष्ठो ज्येष्ठो ऽनन्तरः १०

▼

⑤

>

▼ Oldenberg

10. The father to the south, the mother to the north (of him), and so the others, one after the other from the eldest to the youngest.

▼ हरदत्त-प्रस्तावः

पुनरपि सूत्रद्वयेन संवेशनमेव विशिनष्टि—

▼ हरदत्तः

तेषां संविशतां यः **पिता** स **दक्षिणश्**शेते या माता सो**त्तरा** । तयोरन्योन्यापेक्ष दक्षिणोत्तरत्वं "सामात्यः प्राक्शिरा उदङ्मुखः" (आश्व.गृ.२-३-६) इत्याश्वलायनः । "मन्त्रविदो मन्त्रान् जपेयुः" (अश्व.गृ.२-३-९.) इति च ॥९॥ **अवशिष्टा** अमात्यास्तेषां यो यो **ज्येष्ठः** कुमारः कुमारी वा स पितुर्दक्षिणतः तदनन्तरो मातुरुत्तरतः । तृतीयः प्रथमस्य दक्षिणतः । चतुर्थो द्वितीयस्योत्तरत इत्यादि । अन्ये मातुरेवोत्तरतोऽनुज्येष्ठं संवेशनमिच्छन्ति । सर्वे प्राक्शिरसः उदङ्मुखाः मन्त्रविदश्च मन्त्रान् जपेयुः । अनन्तरवचनं संश्लेषार्थम् ॥१०॥
▼ सुदर्शनः

**दक्षिणतः पितोत्तरा मातेति** दक्षिणोत्तरत्वमन्योन्यापेक्षम् । **अवशिष्टानां** पुत्रादीनां मध्ये यो यो **ज्येष्ठः** पुत्रो दुहिता वा स स दक्षिणोऽनन्तरश्च, यो यः कनीयान् स स उत्तरोऽनन्तरश्च ; एवमित्यतिदेशात् । एतदुक्तं भवति– यस्सर्वज्येष्ठस्स मातुरुत्तरोऽनन्तरः, यो द्वितीयो ज्येष्ठस्स सर्वज्येष्ठस्य उत्तरोऽनन्तर इत्यादि । केचित्—सर्वज्येष्ठः पितुर्दक्षिणस्तदनन्तरज्येष्ठो मातुरुत्तर इत्यादीति ॥१०॥
▼

⑤

>

दक्षिणतः पितोत्तरा मातैवमवशिष्टानां ज्येष्ठो ज्येष्ठोऽनन्तरः ।

# १९ ११ सँहायोत्तराभ्याम्②

*(किञ्चित्सुप्त्वा)* सं-हाय
उत्तराभ्यां *("स्योना पृथिवि" "बडित्थे"त्येताभ्यां)* पृथिवीमभिमृशन्ति ११

## ०८ स्योना पृथिवि⑥

स्योना॑ *(=सुखरूपा)* पृथिवि भव+
अनृक्षरा॑ *(=कण्टकादिरहिता)* निवे॑शनी ।
य॑च्छा नश् श॑र्म सप्र॑थाः *(=सकीर्तिः)* ।

बड् इ॒त्था *(त्थं)* पर्व॑तानाङ् *(→मेघानाम्)*
खि॒द्रम् *(=छिद्रं →छेदनम्)* बिं॑भर्षि पृथिवि ।
प्र या भूमि प्रवत्वति *(=प्रवणवति)*
म॒ह्ना *(=महिम्ना) (देवादीन्)* जि॒नोषि॑ *(=तर्पयसि)* म॒हि॒नि॒ *(=महति)* ।*(२४)*
*(अत्र देवप्रीत्या वृष्टिरिति चक्रम् उच्यते।)*

▼

⑤

>
▼ Oldenberg

11. After he has arisen, he touches the earth with the next two (verses, II, 18, 8. 9).

▼ हरदत्तः

एवं संविश्य किञ्चित् सुप्त्वा **संहाय** सम्पूर्वो जहातिः शयनादुत्थायासने दृष्टः, "कलिश्शयानो भवति संजिहानस्तु द्वापर" इति । (ऐतरेय ब्रा.पं.७)उत्त्थायाचम्यो**त्तराभ्यां** ऋग्भ्यां "स्योना पृथिवि" "बडित्थे"त्येताभ्यां पृथिवीमभिमृशेयुः ॥११॥

▼ सुदर्शनः

**संहाय** सङ्गता एव शयित्वा, न पुनः पृथक्पृथक् । ततस्स्वस्तरादवरुह्य **उत्तराभ्याम्** ऋग्भ्यां **पृथिवीमभिमृशन्ति**। अत्र च मन्त्रोच्चारणयोग्यानामेव, न त्वमन्त्रवतामपि वाचनम् ॥११॥
▼

⑤

>

सँहायोत्तराभ्यां पृथिवीमभिमृशन्ति ।

# १९ १२ एवं संवेशनादि②

एवं संवेशनादि त्रिः १२

▼

⑤

>
▼ Oldenberg

12. In the same way the lying down, &c., is repeated thrice.

▼ हरदत्तः

**एवं** संवेशनं संहायाभिमर्शनं च मन्त्रवत् त्रिरावर्तनीयमित्यर्थः । प्रत्यवरोहणं तु सकृदेव । "उदित आदित्ये सौर्याणि स्वस्त्ययनानि च जपित्वाऽन्नं संस्कृत्य ब्राह्मणान् भोजयित्वा स्वस्त्ययनं वाचयित्वा"(आश्व.गृ.४-६-१८.) इत्याश्वलायनः ॥१२॥

▼ सुदर्शनः

**एवमेतत्संवेशनादि** समन्त्रकमेव **त्रिर्** आवर्तनीयम् । कथं पुनः उदगयनपूर्वपक्षाहःपुण्याहेषु कार्याणि (आप.गृ.१-२.) इत्यहः पुण्याहविधाने सति, तद्विरुद्धरात्राविदं कर्तव्यमित्युपदिश्यते ? उच्यते–नैवात्र संवेशनं विधीयते, येनेदमह्नि पुण्याहे स्यात् । किं तर्हि ? यदेव रागप्राप्तं रात्रौ संवेशनं तदादृत्य मन्त्रा नियमाश्च विधीयन्ते ; यथा रागप्राप्तं भोजनमाश्रित्य उपस्तरणप्राणाग्निहोत्रादयः । यथा वा "पयस्वतीरोषधयः इति पुरा बर्हिष आहर्तोर्जायापती अश्नीतः" (आप.श्रौ.४-२-३.) इत्यादि । तेन रात्रावेवेदं कर्मेत्युपपन्नम् । अन्ते च ब्राह्मणभोजनम्– "शुचीन् मन्त्रवतस्सर्वकृत्येषु भोजयेत्" (आप.ध.२-१५-११) इति वचनात् ॥१२॥ अथेशानबलिर्नाम नित्यः पाकयज्ञो मन्त्राम्नानक्रमप्राप्तो व्याख्यायते तस्य च सामान्यविधिसिद्धोदगयनादिरेव कालः, इह सर्पबलिवत्कालविशेषस्यानुपदेशात् । ततश्च प्रतिसंवत्सरमिदं कर्म नावर्तनीयम् ; सकृत्कृते कृतश्शास्त्रार्थः इति न्यायात् । केचित्— शास्त्रान्तरात् प्रतिसंवत्सरमावृत्तिः सकृत्प्रयोगश्च विकल्प्यते । तथा शास्त्रान्तरादेव गवां शान्त्यर्थः पुत्रादिकामार्थश्च प्रयोगः प्रत्येतव्य इति ।

▼

⑤

>

एवं संवेशनादि त्रिः ।

---

1. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

# २३ ईशानबलिः①

# १९ १३ ईशानाय स्थालीपाकम्②

ईशानाय स्थालीपाकं श्रपयित्वा, क्षैत्रपत्यं च,
प्राचीमुदीचीं वा दिशम् उपतिष्क्रम्य *(ग्रामात्)*
स्थण्डिलं कल्पयित्वा
ऽग्नेर् उपसमाधानादि १३

▼

### ⑤

>

▼ Oldenberg

13. 1 Having prepared a Sthālīpāka for Lana and one for Kṣetrapati, he goes out in an easterly or northerly direction, prepares a raised surface, (and then follow the ceremonies) beginning with the putting of wood on the fire.

▼ हरदत्तः

अथ ईशानबलिर्नाम पाकयज्ञो वक्ष्यते शूलगव इति यस्य प्रसिद्धिः । गवालम्भनं च तत्र शास्त्रान्तरे चोदितमस्माकं तु स्थालीपाक एव । एतावत् गोरालम्भस्थानमिति नियमात् । नित्यश्चायं पुरुषसंस्कारः न काम्यो नैमित्तिको वा । कामनिमित्तयोरश्रुतत्वात् । सकृच्च कर्तव्यः । कालसंयोगाभावात् । कालसंयोगे ह्यभ्यावृत्तिर्भवति । तस्य कालस्य पुनःपुनस्सम्बन्धात् । कः पुनरस्य कालः? शरदि वसन्ते वेति शास्त्रान्तरम् । आर्द्रया कर्तव्यमिति च । उदगयनादिनियमश्चास्माकम् । तत्र फाल्गुने मासि पूर्वपक्षे अष्टम्यार्द्रया सम्पद्यते सोऽस्य मुख्यः कालः । तेन यक्ष्यमाणो गृहे स्थालीपाकं श्रपयति औपासने **ईशानाय** देवाय सङ्कल्पितमेकं, **क्षेत्रपतये** चापरम् । तैस्सह **प्राचीमुदीचीं वा दिशं** ग्रामात् बहिर् **उपनिष्क्रम्य** यत्र यक्ष्यमाणो भवति तत्र देवयजनाय देवगृहयोश्च पर्याप्तमेकं **स्थण्डिलं कल्पयित्वा** तस्य पूर्वार्धे अगन्यायतनमुल्लिख्याग्निं प्रतिष्ठाप्योपसमाधानादि तन्त्रं प्रतिपद्यते । द्वन्द्व पात्राणि, परिधयः ॥१३॥

▼ सुदर्शनः

"ईश ऐश्वर्ये" इति धात्वर्थस्मृतेः निरतिशयमैश्वर्यं यस्य स **ईशानः** प्रणवोपासनादिभिरुपास्यो महेश्वर इत्यर्थः । तस्मै **ईशानाय स्थालीपाकं** होमादिभ्यः पर्याप्तं पार्वणवदौपासने **श्रपयित्वा**, प्रतिष्ठिताभिघारणान्तं करोति । केचित्—त्रीनोदनान् कल्पयित्वाग्निमभ्यानीय ततो बहिः प्रतिष्ठाप्य त्रयाणामभिघारणमिति । तेन **क्षैत्रपत्यं** च स्थालीपाकं लौकिकाग्नौ श्रपयति, तस्यानग्नौ प्रदेयत्वात् । अथ यथार्थं सम्भारानादाय ग्रामात् **प्राचीमुदीचीं वा दिशमुपनिष्क्रम्या** ग्निकुट्यादिभ्योऽलं **स्थण्डिलादि कल्पयित्वा**, तस्मिन् "यत्र क्वचाग्निम्" (आ.ध.३-१३.) इति विधिनाग्निं प्रतिष्ठाप्य, **अग्नेरुपसमाधानादि** तन्त्रं प्रतिपद्यते । तन्त्रविधानं च क्रमार्थमित्युक्तमेव ॥१३॥

▼

### ⑤

>

ईशानाय स्थालीपाकं श्रपयित्वा क्षैत्रपत्यं च प्राचीमुदीचीं वा दिशमुपनिष्क्रम्य स्थण्डिलं कल्पयित्वाऽग्नेरुपसमाधानादि ।

# १९ १४ अपरेणाग्निन् द्वे②

अपरेणाग्निं द्वे कुटी कृत्वा १४

▼

⑤

>
▼ Oldenberg

14. To the west of the fire he builds two huts.

▼ हरदत्तः

तत अग्नेः पश्चात् **द्वे कुटी** करोति देवाय देव्यै च । प्रत्यग्द्वारे प्राग्द्वारे वा । दक्षिणोत्तरे उदगपवर्गः । तयोर्देवस्य देव्याश्च प्रतिकृती कृत्वा ॥१४॥

इति श्रीहरदत्तमिश्रविरचितायां गृह्यसूत्रवृत्तावनाकुलायां एकोनविंशः खण्डः ॥

▼ सुदर्शनः

अग्निमुखान्ते कृते अपरेणाग्निं द्वे कुटी प्राग्द्वारे उदगपर्गे कृत्वा ॥१४॥ इति श्रीसुदर्शनाचार्यविरचिते गृह्यतात्पर्यदर्शने एकोनविंशः खण्डस्समाप्तः ॥
▼

⑤

>

अपरेणाग्निं द्वे कुटी कृत्वा।

# २० ०१ उत्तरया②

उत्तरया दक्षिणस्याम् ईशानम् आवाहयति १

आ त्वा॑ वहन्तु हर॑य॒स्*(=हरितवर्णाश्वाः)* सचे॑तसश्
श्वे॒तैर् अश्वै॑स् स॒ह के॑तु॒मद्भिः॑ ।
वाता॑जिरै॒र्*(=वातगतिभिः)* मम॑ ह॒व्याय॑ शर्व*(←शॄ हिंसायाम्)* ।

▼

⑤

>
▼ Oldenberg

1. 2 With the next (verse, II, 18, 10) he has the Īśāna led to the southern (hut),

▼ हरदत्तः

मध्ये जयंतस्य प्रतिकृतिमाकाश एव कृत्वा दक्षिमस्याम् **ईशानमावाहयति उत्तरयर्चा** "आ त्वा वहन्त्व्" इत्येतया । अग्नेरुपसमाधानादीत्त्युक्तत्वात् प्रधानाहुतीनां च वक्ष्यमाणत्वात् आज्यभागान्ते कुटीकरणमेव भवति ॥१॥

▼ सुदर्शनः

अथो**त्तरया** "आ त्वा वहन्तु" इत्येतया **दक्षिणस्यां** कुट्या **मीशानमावाहयति** । मूर्तिमानिहागच्छेति ध्यायेत् ॥१॥

▼

⑤

>

उत्तरया दक्षिणस्यामीशानमावाहयति ।

# २० ०२ लौकिक्या वाचोत्तरस्याम्②

लौकिक्या वाचोत्तरस्यां मीढुषीम् २

▼

⑤

>
▼ Oldenberg

2. With worldly words the 'bountiful goddess' to the northern (hut),

▼ हरदत्तः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼ सुदर्शनः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम् ।)*

▼

⑤

>

लौकिक्या वाचोत्तरस्यां मीढुषीम्।

# २० ०३ मध्ये जयन्तम्②

मध्ये जयन्तम्*(=स्कन्दः, इन्द्रसूनुर् वा)* ३

▼

⑤

>
▼ Oldenberg

3. To the middle (between the two huts) the 'conqueror.'

▼ हरदत्तः

**उत्तरस्यां लौकिक्या वाचा मीढुषीं** देवीं आवाहयति । **मध्ये जयन्तम्** आवाहयति । लौकिक्या वाचा-आयाहि जयन्त, जयन्तमावाहयामीति वा । जयन्तः स्कन्दः । लौकिक्येत्यनुच्यमाने पूर्वेण मन्त्रेणावाहनं प्राप्नोति ॥२॥

▼ सुदर्शनः

तथो**त्तरस्यां** कुट्यां **लौकिक्या वाचा** "आयाहि मीढुषि" इति **मीढुषीम्** ईशानस्य पत्नीं आवाहयतीत्येव ॥२॥ कुट्योर्**मध्ये** आकाशे **जयन्तम्** इन्द्रसूनुं स्कन्दं वा "आयाहि जयन्त" इत्यावाहयति । अत्र सूत्रे अनुक्तमप्यौचित्यादावाहितेभ्य आसनानि ददाति ॥३॥
▼

⑤

>

मध्ये जयन्तम् ।

# २० ०४ यथोढमुदकानि प्रदाय②

यथोढम् उदकानि प्रदाय
त्रीन् ओदनान्*(→ओदनभागान्)* कल्पयित्वा
ऽग्निम् अभ्यानीयोत्तरैर् उपस्पर्शयित्वा
उत्तरैर् यथास्वम् ओदनेभ्यो हुत्वा
सर्वतस् समवदायोत्तरेण यजुषाग्निं स्विष्टकृतम् ।

उप॑स्पृशतु मी॒ढ्वान्, मी॒ढुषे॒ स्वाहा।
उप॑स्पृशतु मी॒ढुषी॑ मी॒ढुष्यै॒ स्वाहा॑ ।
ज॒य॒न्तोप॑स्पृश जय॒न्ताय॒*(=स्कन्दाय)* स्वाहा॑ ।

## हवनम्⑥

भ॒वाय॑ दे॒वाय॒ स्वाहा॑।
श॒र्वाय॑ दे॒वाय॒ स्वाहा।
ईशा॑नाय दे॒वाय॒ स्वाहा॑।
पशु॒पत॑ये दे॒वाय॒ स्वाहा॑।
रु॒द्राय॑*(=रोदयित्रे)* दे॒वाय॒ स्वाहा।
उग्राय॑ दे॒वाय॒ स्वाहा॑।
भी॒माय॑ दे॒वाय॒ स्वाहा॑।
मह॒ते दे॒वाय॒ स्वाहा॑ ।

भ॒वस्य॑ दे॒वस्य॒ पत्न्यै॒ स्वाहा॑।
श॒र्वस्य॑ दे॒वस्य॒ पत्न्यै॒ स्वाहा।
ईशा॑नस्य दे॒वस्य॒ पत्न्यै॒ स्वाहा॑।
पशु॒पते॑र्दे॒वस्य॒ पत्न्यै॒ स्वाहा॑।
रु॒द्रस्य॑ दे॒वस्य॒ पत्न्यै॒ स्वाहा॑।
उ॒ग्रस्य॑ दे॒वस्य॒ पत्न्यै॒ स्वाहा॑।
भी॒मस्य॑ दे॒वस्य॒ पत्न्यै॒ स्वाहा॑।
मह॒तो दे॒वस्य॒ पत्न्यै॒ स्वाहा॑ ।

ज॒य॒न्ताय॒ स्वाहा॑ ।

अ॒ग्नये॑ स्विष्ट॒कृते॒ सुहु॑तहु॒त आहु॑तीना॒ं कामा॑नाँ समर्द्धयि॒त्रे स्वाहा॑ ।

▼

⑤

>

▼ Oldenberg

4. He gives them water to drink in the same order in which they have been led (to their places), takes three portions of boiled rice (from the Sthālīpāka prepared for Īśāna), takes (these portions of rice) to the fire, makes (the three gods) touch them with the next (formulas, II, 18, II-13), sacrifices of these portions, to each god of the portion which belongs to him, with the next (formulas, II, 18, 14-30), cuts off (Avadānas) from all (portions), and sacrifices with the next Yajus (II, 18, 31) to Agni Sviṣṭakṛt.

▼ हरदत्तः

(येन शब्देन येषु स्थानेषु येन क्रमेणावाहनं चोदितं तद्देवताकान्यर्घ्याणि प्रयच्छति) । पृथक्पात्रैः कल्पितानि अर्घ्यत्वात् पुष्पाक्षतैस्संयुक्तानि । ईशानेदं ते अर्घ्यम्, जयन्तेदं ते अर्घ्यमिति । ततो गन्धपुष्पधूपदीपैरभ्यर्च्य ततः स्थालीपाकादुद्धृत्य त्रीनोदनान् कल्पयति त्रिषु पात्रेषु देव्यै स्कन्दाय च देवाय होमार्थं उपहारार्थं च । स्थाल्यां च भूयांसमोदनमवशिनष्टि ब्राह्मणभोजनार्थम् । ततस्तानोदनानग्निसमीपमानीय्यापरेणाग्निं बर्हिषि प्रतिष्ठापयति दक्षिणत उत्तरतो मध्ये च । अत्र प्रतिष्ठिताभिघारणम् । तत उत्तरैर्मन्त्रैस्त्रिभिर्यथोढं त्रीनोदनानुपस्पर्शयति । स्वस्वामिसम्बन्धं कारयति । **उत्तरैर्** मन्त्रैः "उपस्पृशतु मीढ्वान्" इत्यादिभिः । यथादेवतमभिमृशति "इदमग्नेरित्याग्नेयम्" इतिवत् । एवमुपस्पर्शयित्वा तत **उत्तरैर्**मन्त्रैस्सप्तदशभिः प्रधानाहुतीर्जुहोति **यथास्वमोदनेभ्यः** येनौदनेन यस्यै देवतायै स्वत्वसम्बन्ध उपस्पर्शनेनोपलक्षितः तस्मात् तस्य जुहोतीत्यर्थः । तत्र "भवाय देवाये"त्यादिभिरष्टाभिः देवस्यौदनात् । "भवस्य देवस्य पत्न्यै स्वाहे"त्यष्टाभिः मीढुष्याः । "जयन्ताय स्वाहे"ति जयन्तस्य । एवं प्रधानाहुतीर्हुत्वा ततस् **सर्वतः समवादायोत्तरेण यजुषा** "अग्नये स्विष्टकृते सुहुत" इत्यनेना**ग्निं स्विष्टकृतं** यजति । **सर्वतस्समवदाये**त्त्युच्यते यथा स्वमोदनेभ्यः पृथक्पृथक् स्विष्टकृन्मा भूदिति । यद्यपि स्विष्टकृतोऽनन्तरमिदमुक्तमुपस्थानादि, तथापि "जयादीनुपजुहोति" इत्यत्रोपशब्दश्रवणात् प्रधानहोमानन्तरं जयादयः । परिषेचनान्ते उपस्थानादि ॥३॥

▼ सुदर्शनः

अथ **यथोढं** येन क्रमेणोढा आवाहितास्तेन क्रमेण । **उदकानि** पाद्यादीनि प्रत्येकं स्वैस्स्वैर्नामभिर्नमोन्तैः **प्रददाति** प्रकर्षेण भक्तिपुरस्सरं ददाति । उदकग्रहणस्य प्रदर्शनार्थत्वात् दीपान्तं प्रददातीत्युपदेशः । अथेशानस्थालीपाकादुद्धृत्य **त्रीनोदनान्** त्रिषु पात्रेषु **कल्पयति** ईशानमीढुषीजयन्तेभ्यो होमार्थम् बल्यर्थञ्च । स्थाल्यां च ब्राह्मणानां भोजनानार्थं भूयांसमोदनमवशिनष्टि । ततस्तानोदनानग्नेस्समीपमानीय अपरेणाग्निं प्रतिष्ठापयति । अथैतान् **उत्तरैस्** त्रिभिर्मन्त्रैः "उपस्पृशतु मीढ्वान्" इत्यादिभिर्यथासङ्ख्यं यथादेवतम् **उपस्पर्शयति** । अस्य चोपस्पर्शनविधेर्द्वितीयतृतीययोरोदनयोरपनीतेशानदेवताकयोर्मीढुषीजयन्ताख्यदेवतान्तरसम्बन्धविज्ञाने तात्पर्यम्, अभ्युदयेष्ट्यादिवत् । प्रथमे त्वीशानसम्बन्धस्थापने मीढ्वच्छब्दस्येशानवाचकत्वात् । अथो**त्तरैर्**मन्त्रैः "भवाय देवाय" इत्यादिभिस्सप्तदशभिः **यथास्वमोदनेभ्यः** यो य ओदनो यस्या यस्या देवतायास्स्वभूतस्तस्मात्तस्माद्यथालिङ्गं पार्वणवदानधर्मेणावदाय प्रधानाहुतीर्जुहोति । तत्र "भवाये"त्यष्टभिरीशानस्यौदनात् । युक्तं चैतत् भवशर्वादिशब्दानां ईशानवाचकत्वादिति । "भवस्य देवस्ये"त्यष्टाभिस्तु मीढुष्यास्स्वात् । "जयन्ताये"ति जयन्तस्य स्वात् । ततस्**सर्वतस्**सर्वेभ्यस्त्रिभ्य ओदनेभ्यः स्विष्टकृतोऽवदानधर्मेण **समवदाय** सहावदाय **उत्तरेण यजुषा** "अग्नये स्विष्टकृते सुहुत हुत" इत्यनेना**ग्निं स्विष्टकृतं** जुहोति । अतः **सर्वतस्समवदायेति** वचनं आग्रयणमासिश्राद्धादिवत् सकृदेवावदाय स्विष्टकृदिति शङ्कानिरासार्थम् ॥४॥
▼

### ⑤

>

यथोढमुदकानि प्रदाय त्रीनोदनान् कल्पयित्वाऽग्निमभ्यानीयोत्तरैरुपस्पर्शयित्वा उत्तरैर्यथास्वमोदनेभ्यो हुत्वा सर्वतस्समवदायोत्तरेण यजुषाग्निं स्विष्टकृतम् ।

## २० ०५ उत्तरेण②

उत्तरेण यजुषोपस्थाय

स्व॒स्ति नः॑ पू॒र्ण॒मु॑ख॒ः परि॑क्रामतु ।

उत्तरैस् सहोदनानि पर्णान्य् एकैकेन द्वे द्वे दत्त्वा
देवसेनाभ्यो दशोत्तराभ्यः ५

- उत्तरस्याम्
  - गृ॒हपोप॑स्पृश। गृ॒हपा॑य॒ स्वाहा॑ ।
  - गृ॒ह॒प्युप॑स्पृश। गृ॒ह॒प्यै स्वाहा॑ ।

- मध्ये ।
    - घो॒षिण॒ उप॑स्पृशत। घो॒षिभ्यः॒ स्वाहा॑ ।
- दक्षिणस्याम् ।
    - श्वा॒सिन॒ उप॑स्पृशत। श्वा॒सिभ्यः॒ स्वाहा॑ ।
- उत्तरस्याम्
    - वि॒चि॒न्वन्त॒ उप॑स्पृशत। विचि॒न्वद्भ्यः॒ स्वाहा॑ ।
- मध्ये ।
    - प्र॒पु॒न्वन्त॒ उप॑स्पृशत। प्रपु॒न्वद्भ्यः॒ स्वाहा॑ ।
- दक्षिणस्याम् ।
    - स॒म॒श्नन्त॒ उप॑स्पृशत। सम॒श्नद्भ्यः॒ स्वाहा॑ ।
- दश देवसेनाभ्यः दश
    - दे॒व॒से॒ना उप॑स्पृशत। देवसे॒नाभ्यः॒ स्वाहा॑ ।
    - या आख्या॑ता॒ याश् चाना॑ख्याता देवसे॒ना उप॑स्पृशत। देवसे॒नाभ्यः॒ स्वाहा॑ ।

▼

⑤

>

▼ Oldenberg

5. Having worshipped (the god Īśāna) with the next Yajus (II, 18, 32), he distributes with the next (formulas, II, 18, 33-39) leaves together with portions of boiled rice, two (leaves) with each (Yajus), then ten to the divine hosts (II, 18, 40), and ten to the (divine hosts) that follow (and are referred to in the next Yajus, II, 18, 41).

▼ हरदत्तः

**उत्तरेण यजुषा** "स्वस्तिनः पूर्णमुख" इत्यनेन उपस्थानं च महादेवस्य, तत्प्रधानत्वात् कर्मणः । "पूर्णमुख" इत्यपि तस्यैव निर्देशः । पूर्णाहुतिभिः पूर्णमुखः । **उपस्थाय** तत उत्तरैर्मन्त्रैः "गृहपोपस्पृशेत्यादिभिः अष्टादशभिः **सहौदनानि** पर्णानि मन्त्रप्रतीताभ्यो देवताभ्यो ददाति । तत्र चादितस्सप्तभिः प्रतिमन्त्रं **द्वे द्वे** पर्णेददाति । अष्टमेन दशदेवसेनाभ्य इति वदन् मन्त्रप्रतीता देवता दर्शयति । तत्र गृहप इति महादेवाभिधानं मन्यते गृहान् पातीति । "नमो रुद्राय वास्तोष्पतय" इति च मन्त्रान्तरम् । तस्मादनेन देवाय पर्णद्वयं तस्यैवौदनात् । गृहपी देवी, तस्मादनेन मन्त्रेण देव्यै दातव्यं तस्या एवौदनात् । **घोषिणी** इत्यादयः, सर्वगणा देवस्यानुचराः । तेभ्योऽपि देवकुटीसमीपे तस्यावोदनात् पर्णद्वयानि । **देवसेना** भूतगणाः । तेभ्योऽपि सर्पगणवत् । **दशोत्तराभ्यः** "या आख्याता" इत्यस्मिन्नुत्तरे मन्त्रे प्रतीता उत्तरा देवताः । ताभ्यो दश पर्णानि तेनैव मन्त्रेण देवस्यैवौदनात् ॥ ५॥

▼ सुदर्शनः

**उत्तरेण यजुषा** "स्वस्ति नः पूर्णमुख" इत्यनेन अग्निमीशानं वोपतिष्ठते । इदं च यथापाठं स्विष्टकृतोऽनन्तरम् । ततो लेपयोरित्यादितन्त्रशेषसमाप्तिः, "परिषेचनान्तं कृत्वा पर्णदानम्" इति भाष्यकारवचनात् । केचित्—उपस्थानादि तन्त्रशेषसमाप्तिरिति । ततो यथास्वमोदनेभ्य एव यज्ञियेषु पर्णेष्वदाय तानि **सहौदनानि** ओदनसहितानि **पर्णान्युत्तरैः** "गृहपोपस्पृश" इत्यादिभिस्सप्तभिर्ददातीति सामान्येन विधाय विशिनष्टि **एकैकेन** मन्त्रेण **द्वे द्वे** पर्णे इति । अथ द्वे द्वे इत्येतदपवदति—दशेत्यादिना । देवस्येशानस्य सेनाः **देवसेनाः**, ताभ्यो **दश** पर्णानि दक्षिणस्यां कुट्यां देवस्यैवौदनादवदाय ददाति । तथा **दशैव** पर्णान्य् **उत्तराभ्यो** देवसेनाभ्यः । उत्तरस्मिन् मन्त्रे "या आख्याता याश्चानाख्याता" इति गुणद्वयवत्यस्ता उत्तरा देवसेनाः ॥५॥

▼

⑤

>

उत्तरेण यजुषोपस्थायोत्तरैस्सहौदनानि पर्णान्येकैकेन द्वे द्वे दत्वा दश देवसेनाभ्यो दशोत्तराभ्यः ॥

# २० ०६ पूर्ववदुत्तरैः②

पूर्ववद् उत्तरैः ६

- द्वा॒रा॒पोप॑स्पृश। द्वा॒रा॒पाय॒ स्वाहा॑ ।
- द्वा॒रा॒प्युप॑स्पृश द्वा॒रा॒प्यै स्वाहा॑ ।
- *(देव्या)* अ॒न्वा॒सा॒रि॒ण॒ उप॑स्पृशत। अन्वासा॒रिभ्य॒स् स्वाहा॑ *(→मध्ये द्वे)*।
- नि॒षि॒ङ्गि॒न्न् *(जयन्त!)* उप॑स्पृश। निष॒ङ्गिणे॒ स्वाहा॑ *(→दक्षिणस्यां द्वे)*।

▼

⑤

>

▼ Oldenberg

6. With the next (formulas, II, 18, 42-45) he does the same as before (i.e. he distributes two leaves with each Mantra).

▼ हरदत्तः

पूर्ववद्**उत्तरैर्**मन्त्रैः "द्वारापोस्पृशे"त्यादिभिः चतुर्भिः पर्णानि देयानि **पूर्ववद्** एकैकेन द्वे द्वे इत्यर्थः । अत्र **द्वारापो** देवः द्वारपालः । **द्वारापी** देवी च द्वारापाला । **अभ्यासारिणो**ऽपि देव्या अनुचराः । **निषिङ्गिन्न्** इति जयन्तस्याभिधानम् । तेभ्यो यथा स्वमोदनैस्तत्र तत्र दानम् ॥६॥

▼ सुदर्शनः

**पूर्वं** यथा "गृहपोपस्पृश" इत्यादिभिर्दक्षिणोत्तरकुट्योर्मध्ये च स्वेभ्य एवौदनेभ्यो द्वे द्वे पर्णे प्रतिमन्त्रं दत्ते, एवं **उत्तरैः** "द्वारापोपस्पृश" इत्यादिभिश्चतुर्भिर्दद्यात् ॥ अथ प्रयोगः—परिषेचनान्ते कृते "गृहपोपस्पृश" इति दक्षिणस्याम् । "गृहप्युपस्पृशे"त्युत्तरस्याम् । "घोषिणः" इति मध्ये । ततश्च "श्वासिनः" इति दक्षिणस्याम् । "विचिन्वन्तः" इत्युत्तरस्याम् । "प्रपुन्वन्तः" इति मध्ये । ततः "समश्नन्तः" इति दक्षिणस्याम् । एतदन्तं द्वे द्वे पर्णे । ततो दक्षिणस्यामेव "देवसेनाः" इति दश पर्णानि । तथैव "या आख्याताः" इति दश पर्णानि । तस्यामेव ततः पुनरपि तत्रैव "द्वारापोपस्पृश" इति द्वे पर्णे । "द्वारापि" इत्युत्तरस्याम् । "अन्वासारिणः" इति मध्ये द्वे । "निषङ्गिन्" इति दक्षिणस्यां द्वे इति । अत्र यद्यपि केचन मन्त्रा अव्यक्तलिङ्गका बहुवचनलिङ्गकाश्च, तथापीशानमीढुषीजयन्ता एव देवताः । प्रमाणं च "गृहपि""द्वारपि" "निषङ्गिन्" इति मन्त्रलिङ्गदर्शनम् । "दश देवसेनाभ्यो दशोत्तराभ्य, इत्यत्र तु सूत्रकारवचनाद्देवस्येशानस्य सेना देवसेना एव देवताः । ममकारास्पदीभूतस्य च पुत्रभृत्यादेः पूजापि पितृस्वाम्यादिपूजैव, पुत्रादिपूजायां सत्यां पित्रादेरहमेव पूजित इति मानसप्रत्यक्षोदयात् । अत एव च जातेष्टेस्संवलिताधिकारत्वम् । तस्मादिह देवस्यौदनाद्देवसेनाभ्यो दानं न विरुध्यते । केचित्—मान्त्रवर्णिक्य एव देवताः । तेन गृहपेति देवाय; "रुद्रः खलु वै वास्तोष्पतिः" (तै.सं.३-४-१०.) इति श्रुतेः । "गृहपी"ति देव्यै । "घोषिण" इति तु पञ्चभिर्देवस्यानुचरेभ्यः सर्पगणेभ्यः । आश्वलायनीये स्पष्टत्वात् । ततो "देवसेनाः" इति द्वाभ्यां देवसेनाभ्यः । "द्वारापे"ति देवस्य द्वारपालाय । "द्वारपी"ति देव्यै द्वारपालायै । "अन्वासारिण" इति देव्या एवानुचरेभ्यः । "निषङ्गिन्" इति जयन्ताय, तस्याप्यावाहितस्य बलिना भाव्यत्वादिति ॥६॥

▼

⑤

>

पूर्ववदुत्तरैः ।

# २० ०७ ओदनपिण्डं संवृत्य②

*(होमबलिशेषेभ्यः त्रिभ्यः ओदनेभ्य उपादाय - केचित्जयन्तस्योदनादिति)*
ओदनपिण्डं संवृत्य
पर्ण-पुटे ऽवधायोत्तरेण यजुषा वृक्ष आसजति*(=अवलम्बयति)* ७

नमो॑ निष॒ङ्गिणे*(→ इषुव्यतिरिक्तानां शस्त्राणाम् आवासस्थानवते ।)*

▼

⑤

>

▼ Oldenberg

7. Having formed a lump of boiled rice, he puts it into a basket of leaves, and with the next Yajus (II, 18, 46) hangs it up on a tree.

▼ हरदत्तः

अथ तस्यैवोदनात् **पिण्डं* उभाभ्यां हस्ताभ्यां **संवृत्य** दृढं कृत्वा पर्णैस्स्यूतैः कृते **पुटेऽवधाय** तं शिक्ये कृत्वोत्तरेण यजुषा "नमो निषङ्गिण इषुधिमते", इत्यनेन वृक्ष **आसजति** अवसम्बयति ॥७॥

▼ सुदर्शनः

अथ होमबलिशेषेभ्यः त्रिभ्य ओदनेभ्य उपादाय **पिण्डं** संवर्तयति सुदृढं करोति । शेषाणां प्रतिपत्त्यपेक्षत्वात् । केचित्—जयन्तस्योदनादिति । ततस्तं पिण्डं पर्मपुटेऽवधायो**त्तरेण यजुषा** "नमो निषङ्गिण इषुधिमते" इत्येतावतैव मन्त्रसमाम्नायगतेन वृक्षे कस्मिंश्चिद् **आसजति** शिक्ये कृत्वावलम्बयति ॥७॥

▼

⑤

>

ओदनपिण्डं संवृत्य पर्णपुटेऽवधायोत्तरेण यजुषा वृक्ष आसजति ।

# २० ०८ अत्र रुद्रान्②

अत्र रुद्रान् जपेत् ८

▼

⑤

>

▼ Oldenberg

8. Here he should murmur the Rudra texts (Taitt. Saṃh. IV, 5),

▼ हरदत्तः

**अत्र** अस्मिन्काले **रुद्रान्** "नमस्ते रुद्र मन्यव" इत्यादीनेकादशानुवाकान् जपेत् । एतैरेव देवमुपतिष्ठेतेत्यर्थः । (तत्रोत्तमस्यानुवाकस्यादितो दशस्वृक्षु" तेषाँ सहस्रयोजन" इत्यनुषङ्गः । अन्ततस्त्रयो मन्त्राः "नमोरुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवः" "नमो रुद्रेभ्यो येऽन्तरिक्षे येषां वातः" "नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यः" इत्यादि सर्वत्रानुषङ्गः ॥८॥ )

▼ सुदर्शनः

**अत्रा**स्मिन्काले । अन्ये तु— अत्र वृक्षसमीप इति । **रुद्रान्** "नमस्ते रुद्र मन्यवे" (तै.सं.४-५-१.) इत्येकादशानुवाकान् **जपेत्** चातुस्स्वर्येण तत्रोत्तमानुवाके "अस्मिन् महति" इत्यादिष्वष्टसु "तेषां सहस्रयोजने" (तै.सं.८-५-११.) इत्याद्यनुषङ्गः । तथा "नमो रुद्रेभ्यो ये पृथिव्यां येषामन्नमिषवस्तेभ्यः" "नमो रुद्रेभ्यो ये ऽन्तरिक्षे येषां वात इषवस्तेभ्यः" "नमो रुद्रेभ्यो ये दिवि येषां वर्षमिषवस्तेभ्यो दश प्राचीर्दश दक्षिणा" इत्याद्यनुषङ्गः ॥८॥

▼

⑤

>

अत्र रुद्रान् जपेत्।

# २० ०९ प्रथमोत्तमौ वा②

प्रथमोत्तमौ वा ९

▼

⑤

>
▼ Oldenberg

9. Or the first and last (Anuvāka).

▼ हरदत्तः

अथ वा प्रथमोत्तमाभ्यामेवानुवाकाभ्यामुपस्थानं कर्तव्यम् ॥९॥

▼ सुदर्शनः

अथ वा रुद्राणां **प्रथमोत्तमाव्** एवानुवाकौ जपेत् ॥९॥

▼

⑤

>

प्रथमोत्तमौ वा ।

# २० १० अभित एतमग्निम्②

अभित एतमग्निं गास् स्थापयति
यथैता धूमः प्राप्नुयात् १०

▼

⑤

>
▼ Oldenberg

10. He places his cows around the fire so that the smoke (of the sacrifice) may reach them.

▼ हरदत्त-प्रस्तावः

अथ प्रधानहोमकाल एव यत्कर्तव्यं तदाह—

▼ हरदत्तः

**एतं** हूयमानमग्निमभितो **गाः** आत्मीयाः यथा **स्थापयति** स्थापने **एना गाः धूमः प्राप्नुयात्** । अनुवातं समीप इत्यर्थः । प्रधानहोमकाले च... तदर्थमेवैतमित्युक्तं एतं हूयमानमग्निमिति ॥१०॥

▼ सुदर्शनः

**एतं ** होमार्थम्**अग्निमभितः** होमाग्नेस्समीप इत्यर्थः । **गाः** स्वकीयास् **स्थापयत्य्** अनुवातं, **यथैना** गा होमधूमः **प्राप्नुयात्** । केचित्— गोशान्त्यर्थमपीदं कर्मेत्यत्रैतत् ज्ञापकमिति ॥१०॥
▼

⑤

>

अभित एतमग्निं गास्स्थापयति यथैना धूमः प्राप्नुयात् ।

# २० ११ ता②

ता गन्धैर् दर्भ-ग्रु*(=गुरु)*-मुष्टिनावोक्षति
वृषाणम्*(=वृषभं)* एवाग्रे ११

▼

⑤

>
▼ Oldenberg

11. 3 With his firmly shut fist full of Darbha grass he besprinkles (them) with scents; the bull first.

▼ हरदत्तः

**ता गन्धैस्** सुरभिचन्दनादिभिर् **अवोक्षति दर्भग्रुमुष्टिना**, न हस्तेन । गुरुमुष्टिः ग्रुमुष्टिः छान्दस उकारलोपः । सन्नखेन दर्भमुष्टिनेत्यर्थः । तत्र होम कालवचनं प्रोक्षणं तस्मिन् काले ॥१०॥ **वृषाणं** वृषभं तमेवाग्रे प्रोक्षति । यद्यप्यसावुपक्रमे न तिष्ठेत् तथापि अङ्गत्वात् तस्यैवावोक्षणम् । अग्रे तदर्थ एव कालः ॥११॥

▼ सुदर्शनः

**ता गन्धैश्** चन्दनादिना युक्तैः । **दर्भग्रुमुष्टिना** दर्भाणां गुरुमुष्टिर्दर्भग्रुमुष्टिः । उकारलोपश्छान्दसः । सन्नखो दृढमुष्टिरित्यर्थः । तेनावोक्षति । तत्र विशेषः— **वृषाणं**, वृषभम् **एवाग्रेऽवोक्षति** । **एवकारात्तस्मिन्नवोक्ष्यमाणेऽन्या काचिद्गौर्नावोक्ष्यते । ततो गोचराय गाः प्रस्थापयति ॥११॥

▼

⑤

>

ता गन्धैर्दर्भग्रुमुष्टिनाऽवोक्षति वृषाणमेवाग्रे ।

# २० १२ गवाम् मर्गेऽनग्नौ②

गवां मर्गेऽनग्नौ क्षेत्रस्य पतिं जयते १२

▼

⑤

>
▼ Oldenberg

12. He should perform a sacrifice to Kṣetrapati, without a fire, in the path used by his cows.

▼ हरदत्तः

अथ क्षेत्रपत्यस्थालीपाकस्य विधिः– **मर्गे** मार्गे छान्दसो ह्रस्वः । **अनग्नौ** भूमावेव । गवामपगच्छन्तीनां कस्याश्चित् गोः पथि यागविधानात् अग्नौ प्राप्ते प्रतिषेधः ॥१२॥

▼ सुदर्शनः

ततः प्रस्थितानां **गवां मर्गे** मार्गे । छान्दसो हस्वः । **अनग्नौ** भूमावेव **क्षेत्रस्य पतिं यजते** ॥१२॥

▼

⑤

>

गवां मर्गेऽनग्नौ क्षेत्रस्य पतिं यजते ।

# २० १३ ईशानवदावाहनम्②

ईशानवद् आवाहनम् १३

आ त्वा॑ वहन्तु॒ हर॑य॒स्*(=हरितवर्णाश्वाः)* सचे॑तसश्
श्वे॒तैर् अश्वै॑स् स॒ह के॑तु॒मद्भिः॑ ।
वाता॑जिरै॒र्*(=वातगतिभिः)* मम॑ ह॒व्याय॑ शर्व*(←शॄ हिंसायाम्)* ।

▼

⑤

>
▼ Oldenberg

13. He has (the Kṣetrapati) led to his place in the same way as the Īśāna (see above, Sūtra 1).

▼ हरदत्तः

तस्य क्षेत्रपतेर् **आवाहनं ईशानवत्** कर्तव्यम् । "आ त्वा वहन्त्वि"त्यनयर्चेत्यर्थः । शर्वशब्दोऽपि तस्य पर्यायनाम द्रष्टव्यम् ॥१३॥

▼ सुदर्शनः

क्षेत्रस्य पतेर् **आवाहनमीशानवत्,** "आ त्वा वहन्तु" इत्येतयेत्यर्थः ॥१३॥

▼

⑤

>

ईशानवदावाहनम् ।

# २० १४ चतुर्षु सप्तसु②

चतुर्षु सप्तसु वा पर्णेषु *(स)*नामादेशं *("क्षेत्रस्य पतये त्वां ददामि" इति)* दधाति १४

▼

⑤

>

▼ Oldenberg

14. He puts (portions of boiled rice) into four or seven leaves, naming (the god).

▼ हरदत्तः

आवाह्यार्घ्यं दत्वा गन्धादिभिरभ्यर्च्य स्थालीपाकमासाद्याभिघार्य चत्वारि सप्त वा पर्णानि देवस्य समीपे कृत्वा तेषु **नामादेशं** नामादिश्यौदनपिण्डं दधाति स्थालीपाकात् । तत्र पूर्वेषु पर्णदानमन्त्रेषु स्वाहाकारान्तत्वनियमात् इहापि क्षेत्रस्य पतये स्वाहेति पर्णदानम् । एष एवास्य यागः ॥१४॥

▼ सुदर्शनः

चत्वारि सप्त वा पर्मानि भूमौ स्थापयित्वा तेषु क्षैत्रपत्यात् स्थालीपाकादोदनमादाय **नामादेशं** नाम चतुर्थ्यन्तमादिश्य "क्षेत्रस्य पतये त्वां ददामि, इति **दधाति** । "डुधाञ्‌ धारणपोषणयोः" इति स्मरणात् । केचित्—क्षेत्रस्य पतये स्वाहेति ददाति । पूर्वत्र बलिमन्त्रेषु स्वाहाकारस्य दृष्टत्वादिति । अत्र तु न सहौदनानि पर्णानि देयानि ; पर्णेष्विति सप्तमीनिर्देशात् ॥१४॥

▼

⑤

>

चतुर्षु सप्तसु वा पर्णेषु नामादेशं दधाति ।

# २० १५ क्षिप्रं यजेत②

क्षिप्रं यजेत पाको देवः १५

▼

⑤

>

▼ Oldenberg

15. 4 Let him sacrifice quickly; the god has a strong digestion (?).

▼ हरदत्तः

**पाको** बालस्तद्वत् गमनशीलोऽयं **देवः** तस्माच्छीघ्रं यजेतेत्यर्थः ॥१५॥
▼ सुदर्शनः

अयं चौदनदानात्मको यागः **क्षिप्रम्** आवाहनानन्तरमुदकमेव प्रदाय कर्तव्यः । गन्धादिप्रदानं तु यागोत्तरकालमेव ; यतः **पाक** अल्पो **देवः** । एतदुक्तं भवति— अनित्यदर्शनत्वात् क्षेत्रस्य पतेः शीघ्रमेव बलिर्देय इति । केचित्—पाकः बालः बालवद्गमनशीलः । तथा गन्धादि दत्वैवात्रापि बलिरिति ॥ १५॥
▼

⑤

>

क्षिप्रं यजेत पाको देवः ।

# २० १६ उत्तराभ्यामुपतिष्ठते②

उत्तराभ्याम् उपतिष्ठते १६

क्षेत्र॑स्य॒ पति॑ना व॒यँ हि॒तेने॑व जयामसि ।
गाम् अश्व॑म् पोषयि॒त्न्व् *(=पोषयिताता)* आ स नः॑ मृ॒डा॒ *(=सुखय)* ती॒दृशे॑ *(कर्मणि)*।
क्षेत्र॑स्य पत॒े मधु॑मन्तम् *(गोयूथ-)* ऊ॒र्मिन् - धे॒नुर् इ॑व॒ पयो॑ अ॒स्मासु॑ धुक्ष्व - म॒धु॒श्-चुत॑ङ्, घृ॒तम् इ॑व॒ सुपू॑तम्।
ऋ॒तस्य॑ न॒ᳩ पत॑यो मृडयन्तु *(=सुखयन्तु)* ।

▼

⑤

>
▼ Oldenberg

16. With the next two (verses, II, 18, 47. 48) he does worship (to Kṣetrapati).

▼ हरदत्तः

**उत्तराभ्यां** "क्षेत्रस्य पतिना वयम्" इति द्वाभ्याम् ॥१६॥

▼ सुदर्शनः

"क्षेत्रस्य पतिना वयम्" इति द्वाभ्यामृग्भ्यामुपतिष्ठते ॥१६॥

▼

⑤

>

उत्तराभ्यामुपतिष्ठते ।

# २० १७ स्थालीपाकम् ब्राह्मणान्②

स्थालीपाकं ब्राह्मणान् भोजयेत् १७

▼

⑤

>
▼ Oldenberg

17. The Sthālīpāka (belonging to Īśāna) he gives to the Brāhmaṇas to eat;

▼ हरदत्त-प्रस्तावः

"ओदनपिण्डं संवृत्य" इत्यादिना होमबलिशेषाणां प्रतिपत्तिरुक्ता । इदानीमीशानस्थालीपाकशेषस्य प्रतिपत्तिमाह—

▼ हरदत्तः

"तेन सर्पिष्मता" इति पार्वणातिदेशेनैव सिद्धे बहुत्वविधानार्थं वचनम् ॥१७॥

▼ सुदर्शनः

अयं च प्राकृतप्रतिपत्त्यनुवादो ब्राह्मणबहुत्वं विधातुम्, सर्पिष्मत्त्वं निवर्तयितुं वा ॥१७॥
▼

⑤

>

स्थालीपाकं ब्राह्मणान् भोजयेत् ।

# २० १८ क्षैत्रपत्यम् प्राश्नन्ति②

क्षैत्रपत्यं प्राश्नन्ति ये*(←दौहित्रादीनामपि सम्बन्धिनां प्रतिग्रहार्थम् प्रयोगः)* सनाभयो*(→पुत्राः भ्रातरश्च)* भवन्ति १८

▼

⑤

>
▼ Oldenberg

18. That belonging to Kṣetrapati his uterine relations eat,

▼ हरदत्त-प्रस्तावः

क्षैत्रपत्यस्य प्रतिपत्तिमाह—

▼ हरदत्तः

**सनाभयस्**समानयोनयः पुत्राः भ्रातरश्च । सनाभय इत्येव सिद्धे **ये भवन्ति** इति वचनं दौहित्रादीनामपि सम्बन्धिनां प्रतिग्रहार्थम् ॥१८॥

▼ सुदर्शनः

**सनाभयस् सपिण्डाः** ॥१८॥

▼

⑤

>

क्षैत्रपत्यं प्राश्नन्ति ये सनाभयो भवन्ति ।

# २० १९ यथा वैषाम्②

यथा वैषां कुल-धर्मस् स्यात् १९

▼

⑤

>

▼ Oldenberg

19. Or as is the custom in their family.

▼ हरदत्तः

**एषां** यजमानकुलजातानां यथा **कुलधर्मः** तथा वा प्राशनम्–यदि पुत्राणामेव, तथा प्राशनम् । अथ सर्वेषां स्वकुलजातानां, तथा प्राशनम् । अथ स्वस्रीयादीनामपि, तथा प्राशनमिति ॥१९॥

इत्यनाकुलायां हरदत्तमिश्रविरचितायां गृह्यवृत्तौ विंशः खण्डः सप्तमश्च पटलः ॥

▼ सुदर्शनः

**यद्येषाम्** अनुष्ठातॄणां असपिण्डकर्तृकप्राशनमपि **कुलधर्मस्** तर्हि तथा वा स्यात् ॥१९॥ सप्तमे पटलेऽप्येवं कृतं भाष्यानुसारतः । श्रीमत्सुदर्शनार्येण गृह्यतात्पर्यदर्शनम् ॥१॥ अत्रानुक्तं दुरुक्तं वा यत्प्रमादादिहेतुकम् । वेदमार्गानुवर्तित्वात् तत्क्षन्तव्यं मनीषिभिः ॥३॥ इति श्रीसुदर्शनाचार्यविरचिते गृह्यतात्पर्यदर्शने विंशः खण्डः ॥ समाप्तस्सप्तमश्च पटलः ॥

▼

⑤

>

यथा वैषां कुलधर्मस्स्यात् ।

---

1. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

2. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

3. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

4. 12 seq. Description of the regular form of a Pākayajña.↩

# २४ मासिश्राद्धप्रकरणम्①

# २१ ०१ मासिश्राद्धस्यापरपक्षे②

मासि श्राद्धस्यापरपक्षे यथोपदेशं कालाः १

▼

**⑤**

>

▼ Oldenberg

1. 1 The times for the monthly Śrāddha are in the second fortnight (of the month), as they are stated.

▼ हरदत्त-प्रस्तावः

पुनरपि पाकयज्ञान्तरं पुरुषत्रयसम्प्रदानकं तादृशानामष्टकादीनां प्रकृतिभूतं मासिश्राद्धसंज्ञिकं पित्र्यं कर्मोपदिश्यते—

▼ हरदत्तः

**मासिश्राद्धं**नाम पित्र्यं कर्म मासि मासि कर्तव्यम् । तत्र येऽपरपक्षे कालविशेषाः सामयाचारिकेषूपदिष्टाः "प्रथमेऽहनि क्रियमाणे (आप.ध.२-१६-७.) इत्यादयः अपरपक्षस्यापराह्णः श्रेयान्" (आप.श्रौ.२-१६-४.) इति च ते सर्वे **यथोपदेशं** यथा तत्रोपदिष्टाः तथैव मासि मासि प्रत्येतव्याः । यद्यपि ते विशेषाः तस्मादेव वचनात् सिद्धाः तथापि तस्य कर्मणः प्रयोगविधानमित उत्तरं क्रियत इति ज्ञापनार्थमिदं वचनम् । अन्यथा ज्ञापयेत शुचीन् मन्त्रवतः इत्यादि कस्मिन् कर्मणि विधीयत इति । एवं तर्हि मासिश्राद्धस्यैतदेवाधिकारार्थमस्तु । तस्मादिदमस्य प्रयोजनम्– मासपरिमाणमनपेक्ष्यापरपक्षवशेन पर्वकाला यथोपदेशं यथा स्युरिति । तेन पूर्वस्मिन् पक्षे पञ्चदश्यामकृतश्राद्धस्यापरस्मिन् पक्षे प्रथमादिषु सर्वासु तिथिषु क्रिया भवति तत्तत्कामस्य ॥१॥

▼ सुदर्शनः

**मासिश्राद्धस्य** मासे मासे श्रद्धया कर्तव्यस्य । **अपरपक्षे** कृष्णपक्षे । **यथोपदेशं** "सर्वेष्वेवापरपक्षस्याहस्सु क्रियमाणे पितॄन् प्रीणाति । कर्तुस्तु कालाभिनियमात् फलविशेषः" (आप.ध.२-१६-७.) इत्यादिधर्णशास्त्रसिद्धोपदेशानुसारेण काला भवन्ति । "अपरपक्षे यथोपदेशं कालाः, इति पुनर्वचनस्य प्रयोजनं "अपरपक्षे पित्र्याणि" (आप.गृ.१-७.) इत्यत्रोक्तम् । केचित्— यस्यां तिथौ प्रथममुपक्रमस्तस्यामेवोत्तरे प्रयोग इति नियमो नास्ति; किन्तु पूर्णेऽपि मासे अपरपक्ष एव यथोपदेशं तिथ्यन्तरेऽपि नित्यः काम्यश्च प्रयोग इति ॥१॥

▼

**⑤**

>

मासिश्राद्धस्यापरपक्षे यथोपदेशं कालाः ।

# २१ ०२ शुचीन् मन्त्रवतो②

शुचीन् मन्त्रवतो योनि-गोत्र-मन्त्रासम्बन्धान् अयुग्माँस् त्र्यवरान् अनर्थावेक्षो भोजयेत् २

▼

**⑤**

>

▼ Oldenberg

2. Let him feed, without regard of (worldly) purposes, pure Brāhmaṇas, versed in the Mantras, who are not connected with himself by consanguinity or by their Gotra or by the Mantras (such as his teacher or his pupils), an odd number, at least three.

▼ हरदत्तः

**शुचीन्** शुद्धान् **मन्त्रवतः** श्रुताध्ययनसम्पन्नान् "शुचीन् मन्त्रवतस्सर्वकृत्येषु भोजयेत्" (आप. ध.२-१५-९) इत्येव सिद्धे पुनर्वचनमादरार्थम् । ब्राह्मणान् **योनिसम्बन्धाः** श्वशुरमातुलादयः, **गोत्रसम्बन्धाः** समानगोत्राः **मन्त्रसम्बन्धाः** ऋत्विगाचार्यान्तेवासिनश्च । गुणहान्यां तु परेषामिति वक्ष्यति । **अयुग्मानिति** युग्मप्रतिषेधार्थम् । **त्र्यवरानिति** एकप्रतिषेधार्थम् । "नत्वेवैकं सर्वेषाम् । काममनाद्ये"(आश्व.गृ. ४-७-३.) इत्याश्वलायनः । अनाद्ये आमश्राद्धे दुर्भिक्षे वा कुले एकमपि भोजयेदित्यर्थः । यद्यपि स्त्रीभ्योऽपि पिण्डदानं दृश्यते तथापि ब्राह्मणभोजनमिह तभ्यो न भवति । होमाभिमर्शनयोरदर्शनात् । विप्रतिषेधाच्च युग्मवचनस्य । तस्मात् पितृपितामहप्रपितामहेभ्य एव त्रिभ्यो ब्राह्मणभोजनम् । एकैकस्मै त्रयः पञ्च वा, कल्पान्तरे धर्मशास्त्रेषु च दर्शनात् । विश्वेभ्यो देवेभ्यो ब्राह्मणभोजनं युग्मसंख्यया । "मातामहानामप्येवं तन्त्रं वा वैश्वदैविकम्" (या.स्मृ.१-२२८.) इति याज्ञवल्क्यः ॥२॥

▼ सुदर्शनः

शुचित्वादिगुणयुक्तान् ब्राह्मणान्, **अनर्थावेक्षः** प्रत्युपकारादिदृष्टप्रयोजनानवेक्षो, भोजयेदिति वाक्यार्थः । पदार्थस्तु— **शुचयो** वाङ्मनः कायशुद्धाः । न च वाच्यं धर्मशास्त्रे "शुचीन्मन्त्रवतस्सर्वकृत्येषु भोजयेत्" (आप.ध.२-१५-९.) इति सर्वार्थमुक्तत्वादिह पुनश्शुचित्ववचनमनर्थकमिति ; यतोऽल्पविद्यानपि शुचीनेव भोजयेत्, तदभावे वरं क्रियालोपो, न त्वशुचीनित्येवं शुचीत्वादरार्थम् । **मन्त्रवतो** मन्त्रब्राह्मणवतः **योनिगोत्रमन्त्रासम्बन्धान्** इत्यत्र "द्वन्द्वात्परं श्रूयमाणः प्रत्येकमभिसम्बध्यते" इति न्यायेन, योन्या असम्बन्धाः, गोत्रेणासम्बन्धाः, मन्त्रेणासम्बन्धाः, इत्यर्थो भवति । तत्र योनिसम्बन्धाः श्वशुरमातुलमातुलेयादयः । गोत्रसम्बन्धा एकगोत्रास्सपिण्डादयः । मन्त्रसम्बन्धाः याज्ययाजकाध्येत्रध्यापयितारः । यत्तु धर्मशास्त्रे "मन्त्रान्तेवास्यसम्बन्धान्" (आप.ध.२-१६-४.) इति मन्त्रसम्बन्धव्यतिरेकेणान्तेवास्यसम्बन्धानित्युक्तं तदङ्गाध्येतृश्रोतृलक्षणमन्त्रसम्बन्धनिषेधाभिप्रायम् । ननु—सामयाचारिकेष्वेव ब्रह्मणानां मन्त्रवत्त्वं योनिगोत्रमन्त्रासम्बन्धत्वं च सिद्धम् ; तदिहं किमर्थं पुनरुक्तम् ? उच्यते—नित्ये मासिश्राद्धे गृह्योक्तगुणानपि भोजयेत् नावश्यं धर्मोक्तान् ब्रह्मविदोऽन्तेवास्यसम्बन्धानित्येवमर्थम् । **अयुग्मा** विषमसङ्ख्याकाः । **त्र्यवराः** त्रित्वमवरं सङ्ख्या येषां ते **त्र्यवराः** । एतच्च पितृपितामहप्रपितामहविषयम् । ततश्च पित्रादीनां त्रयाणां प्रत्यकं त्रीन् पञ्च वा, न पुनस्सप्तादीन्, द्वौ दैवे पितृकार्ये त्रीनेकैकमुभयत्र वा । भोजयेत्सुसमृद्धोऽपि न प्रसज्येत विस्तरे ॥ (म.स्मृ.३-१२५.) इति मनुवचनात् । नन्वस्मिन् मनुवचने "पितृकार्ये त्रीन्" इत्युक्त्वा "न प्रसज्येत विस्तरे" इत्युक्तं, तत्किमिति "पञ्च वा" इत्युक्तम्? उच्यते— अयुग्मांस्त्र्यवरानिति सूत्रकारवचनात् ।

एवं तर्हि "एकैकमुभयत्र वा" इति विरुद्धः ?
न ; तस्यानुकल्पत्वात् ।

अत्र यद्यपि मात्रादिभ्यः पृथगेव पिण्डदानदर्शनं, तथापि तासां पृथग्ब्राह्मणभोजनं न भवति, हेमाभिमर्शनयोः पृथक्त्वादर्शनात्, पितृमात्रर्थब्राह्मणसङ्ख्यासङ्कलने सत्ययुग्मत्वविरोधात्, आचाराभावाच्च । अपि च— अष्टकासु च वृद्धौ च गयायां च मृतेऽहनि । मातुश्श्राद्धं पृथक्कुर्यादन्यत्र पतिना सह ॥ इति मनुवचनादष्टकादिभ्योऽन्यत्र मासिश्राद्धादौ पृथक्त्वाभावस्स्पष्ट एवावगम्यते । इह च सूत्रकारभाष्यकाराभ्यामनुक्तमपि विश्वेदेवार्थं युग्मानां भोजनं कर्तव्यम् "द्वौ दैवे" इति मनुयाज्ञवल्क्याभ्यामुक्तत्वात्, पिशाचा राक्षसा यक्षा भूता नानाविधास्तथा । विप्रलुम्पन्ति सहसा श्राद्धमारक्षवर्जितम् । तत्पालनाय विहिता विश्वेदेवास्स्वयम्भुवा ॥ इत्यादि झागलेयवचनात्, अविगीतशिष्टाचाराच्च । यदा त्वेक एव ब्राह्मणो लभ्यते, तदा तं पित्राद्यर्थमेव भोजयेत्, प्रधानत्वात् । अङ्गभूतस्य तु वैश्वदेवस्य— यद्येकं भोजयेच्छ्राद्धे दैवं तत्र कथं भवेत् । अन्नं पात्रे समुद्धृत्य सर्वस्य प्रकृतस्य च ॥ देवतायतने कृत्वा तत्र श्राद्धं प्रकल्पयेत् । प्रास्येदग्नौ तदन्नं तु दद्याद्वा ब्रह्मचारिणे ॥ (व.११-३०,३१.) इति वसिष्ठोक्तविधिनानुष्ठानम् । ननु च— मातामहानामप्येवं तन्त्रं वा वैश्वदैविकम् । (या.स्मृ.१-२२८), तथा— मातामहनामप्येवं श्राद्धं कुर्याद्विचक्षणः । मन्त्रोहेन यथान्यायं शेषं मन्त्रविवर्जितम् ॥ (वि.स्मृ.७५.) तथैव— पृथङ्मातामहानां च वैश्वदेवसमन्वितम् । कुर्वीत भक्तिसम्पन्नं तन्त्रं वा वैश्वदैविकम् ॥ (वि.पु.३-१५-१६.) इति याज्ञवल्क्यविष्णुस्मृत्योः विष्णुपुराणे च विधिदर्शनात् मातामहश्राद्धमपि नित्यमेवावगम्यते । तत्किमिति सूत्रकारभाष्यकारौ न ब्रूतः? उच्यते—नैव तत्रापि स्मृत्यन्तरेषु पित्र्यवत्सर्वस्यैव जीवतो द्विजस्यावश्यं मातामहश्राद्धमपि नियमेन कर्तव्यमिति विधित्सितम् । कृते अभ्युदयः, अकरणे न प्रत्यवाय इति । कस्य तर्हि नियमेन कर्तव्यमिति विधिरिति चेत् ; यः पुत्रिकाकृताया आसुरादिविवाहोढाया वा पुत्रो मातामहेन सह मातुस्सापिण्ड्यं करोति, तस्य मातामहश्राद्धं नियतमेव, अकरणे च प्रत्यवायः । मासिश्राद्धे तु मातुः पृथक् श्राद्धाभावान्मातामहश्राद्धांशभागित्वोपपत्तेः । अथ वा यो दौहित्रोऽपुत्रस्य मातामहस्याखिलार्थहारी तस्यैतच्छ्राद्धं नियतम् । यथाह लौगाक्षिः— श्राद्धं मातामहानां च अवश्यं धनहारिणा । दौहित्रेण विधिज्ञेन कर्तव्यं विधिवत्सदा ॥ इति । इममेवार्थं भारुचिरप्याह— "यस्मिन् पक्षे अपुत्रो मातामहः, पुत्रिकासुतश्चाखिलद्रव्यहारी, तस्मिन् पक्षे तस्य पिण्डदाननियमः" इत्यादिना ग्रन्थेन । मातामहश्राद्धप्रयोगश्च स्मृत्यन्तरेभ्यो न्यायतश्च प्रत्येतव्यः । तस्मात् सर्वस्य दौहित्रस्य पित्र्यवत् कर्तव्यमेवेति नियमाभावत् सूत्रकारभाष्यकारौ न ब्रूतः ॥२॥

▼

⑤

>

शुचीन् मन्त्रवतो योनिगोत्रमन्त्रासम्बन्धानयुग्माँस्त्र्यवराननर्थावेक्षो भोजयेत्।

# २१ ०३ अन्नस्योत्तराभिर्जुहोति②

अन्नस्योत्तराभिर् जुहोति ३

यन् मे॑ मा॒ता प्रलु॑लोभ॒ चर॒त्य् अन॑नुव्रता,
तन् मे॒ रेतः॑ पि॒ता वृ॑ङ्क्ताम्*(=आच्छिद्य स्वीकरोतु)*।
आ॒भुर्*(←आभवतीति)* अ॒न्यो *(बलेर् दूरम्)* ऽव॑पद्यताम्।*(र५)*
अ॒मुष्मै॒*(←नामनिर्देशः)* स्वाहा॑।

यास् तिष्ठ॑न्ति॒, या धाव॑न्ति॒,
या आ॑र्द्रो॒घ्नीः*(=कूलादिघ्नीः)* परि॑त॒स्थुषीः॑ ।
अ॒द्भिर् विश्व॑स्य भ॒र्त्रीभि॑र्
अ॒न्तर् अ॒न्यं पि॒तुर् द॑धे॒, *(र५)*
ऽमुष्मै॒*(←नामनिर्देशः)* स्वाहा॑ ।

### पितामहाय⑥

यन् मे॑ पिताम॒ही प्रलु॑लोभ॒ चर॒त्य् अन॑नुव्रता,
तन् मे॒ रेतः॑ पिताम॒हो वृ॑ङ्क्ताम्*(=आच्छिद्य स्वीकरोतु)*।
आ॒भुर्*(←आभवतीति)* अ॒न्यो *(बलेर् दूरम्)* ऽव॑पद्यताम्।
अ॒मुष्मै॒*(←नामनिर्देशः)* स्वाहा॑।

अ॒न्तर् द॑धे॒ पर्व॑तैर्
अ॒न्तर् म॒ह्या॑ पृथि॒व्या ।
आ॒भिर् दि॒ग्भिर् अ॑न॒न्ताभि॑र्
अ॒न्तर् अ॒न्यं पि॑ताम॒हाद् द॑धे॒
ऽमुष्मै॒ स्वाहा॑ ।

### प्रपितामहाय⑥

यन् मे॑ प्रपिताम॒ही प्रलु॑लोभ॒ चर॒त्य् अन॑नुव्रता,
तन् मे॒ रेतः॑ प्रपिताम॒हो वृ॑ङ्क्ताम्*(=आच्छिद्य स्वीकरोतु)*।
आ॒भुर्*(←आभवतीति)* अ॒न्यो *(बलेर् दूरम्)* ऽव॑पद्यताम्।
अ॒मुष्मै॒*(←नामनिर्देशः)* स्वाहा॑।

अ॒न्तर्द॑ध ऋ॒तुभि॑र्
अहोरा॒त्रैश् च॑ *(काल)*स॒न्धिभिः॑ ।
अ॒र्ध॒मा॒सैश् च॒ मासै॑श् च+
अ॒न्तर् अ॒न्यं प्र॑पिताम॒हाद् द॑धे॒
अ॒मुष्मै॒*(←नामनिर्देशः)* स्वाहा॑।

### अन्येभ्यः⑥

ये चे॒ह पि॒तरो॒ ये च॒ नेह॒
याँश्॑ च॑ वि॒द्म याँ उ॑ च॒ न प्र॑ वि॒द्म ।
अग्ने॒ तान् वेत्थ॒ यदि॒
ते जा॑तवेद॒स् तया॑ प्र॒त्तँ*(→प्रत्तया = प्रदत्तया)* स्व॒धया॑ मदन्तु॒
स्वाहा॑ ।

▼

⑤

>

▼ Oldenberg

3. He makes oblations of the food (prepared for the Brāhmaṇas) with the next (verses, II, 19,1-7);

▼ हरदत्तः

**उत्तराभिः** "यन्मे माते"त्यादिभिः स्त्रीलिङ्गनिर्देशादृग्भिस्सप्तभिः अन्नस्यैकदेशं जुहोति । ब्राह्मणभोजनार्थं कल्पितादन्नादुद्धृत्य जुहोतीत्यर्थः । तत्र "अमुष्मा" इत्यस्य स्थाने आदितो द्वयोः पितुर्नामनिर्देशः । मध्यमयोः पितामहस्य । अन्त्ययोः प्रपितामहस्य । "यदि द्विपिता स्यादेकैकस्मिन् पिण्डे द्वौ द्वावुपलक्षये"(आप.श्रौ.१-२७)दिति न्यायेन द्विपितुर्द्वयोरुपलक्षणममुष्मा अमुष्मा इति । अन्ते स्वाहाकारः । केचित् "पितरौ वृञ्जेताम्" इत्यूहं कुर्वन्ति । (ऋग्विकल्पं कुर्वन्ति वा )एतेन पितामहप्रपितामहौ व्याख्यातौ । तथा "स्वाहा पित्र" इत्यत्रापि केचिदूहं कुर्वन्ति । अपरे न-पितृत्वमत्र विवक्षितं एकत्वमविवक्षितमिति । केचित् मातामहानामप्यूहेन होमं कुर्वन्ति– "यन्मे मातामही, यन्मे मातुः पितामही, यन्मे मातुः प्रपितामही, तन्मे रेतो मातामहो वृङ्क्तां इत्यादि ॥३॥

▼ सुदर्शनः

अत्रान्नशब्देन ब्रह्मणभोजनार्थमन्नं विवक्षितम्, षष्ठ्या चापादानापादेयभावः । तेनायमर्थः–
ब्राह्मणभोजनार्थात्सर्वस्माद्धविष्यजातादोदनापूपादेर्होमार्थमेकस्मिन्पात्रे सहोद्धृत्य, तस्मात् पार्वणवदवदानधर्मेणावदायोत्तराभिः "यन्मे माता" इत्यादिभिस्सप्तभिः प्रत्यृचं प्रधानीहुतीर्जुहोति । न तु बहुमन्त्रक एको होमः, "एतद्वा विपरीतम्" (आप.गृ.२१-५.) इति बहुत्वलिङ्गात् । लिङ्गं च "एतद्वे"ति सूत्रव्याख्याने व्यक्तं भविष्यति । अत्र प्रथमद्वितीययोर्मन्त्रयोरमुष्मा इत्यस्य स्थाने विष्णुशर्मण इति चतुर्थ्या पितुर्नामग्रहणम् । एवं तृतीयचतुर्थयोः पितामहस्य पञ्चमषष्ठयोः प्रपितामहस्य । सप्तमे त्वदश्शब्दाभावान्नास्ति नामग्रहणम् । अनूहश्चात्र द्विपित्रादिकस्यापि, "तस्मादृचं नोहेत्" (आश्व.श्रौ.) इति ऋगूहप्रतिषेधश्रुतेः, "न प्रकृतावूहो विद्यते"(आप.प. ३.५०.) इति प्रकृतावूहनिषेधाच्च । तस्मात् "पिता वृङ्क्ताम्" इत्याद्येकवचनं पित्रादिसामान्यपरम् । अत एव प्रकृतौ दर्शपूर्णमासयोरनेकपत्नीकस्यापि "पत्नीं सन्नह्य" इत्येकवचनेनैव सम्प्रैषः । ऊह इत्युपदेशः । प्रकृतावेव द्वादशाहे "अद्य सुत्यामित्यालेखनः" इत्यूहदर्शनात् । "एष ते तत मधुमान्" इत्यादिष्वेष न्यायः । जीवपित्रादिकस्तु पित्रादेः पित्रादीनां त्रयाणां मृतानां नामानि गृह्णाति । यस्तु प्रमीतपितृकोऽयं ध्रियमाणपितामहस्स्यात्, स स्वपितुश्च तत्पितामहप्रपितामहयोश्च नामानि गृह्णीयात् । तथा मन्त्रेषु प्रतियोगिभेदेऽपि पितृपितामहप्रपितामहशब्दानामेव प्रयोगः । ऊहपक्षे तु, तत्तत्प्रतियोगिनिर्देशपूर्वकः "पितुः पिता वृङ्क्ताम्" "पितुः पितामहो वृङ्क्ताम्" इत्यादिकः प्रयोगः । न च जीवपित्रादिकस्य मासिश्राद्धं नास्तीत्याशङ्कनीयम्, ध्रियमाणे तु पितरि पूर्वेषामेव निर्वपेत् । पूर्वेषु त्रिषु दातव्यं जीवेच्चेत्त्रितयं यदि ॥ (म.स्मृ.३-२२०.) इत्यादिवचनजातात् । नन्वेमपि व्युत्क्रमप्रमीतपित्रादिकस्य नैव घटते, "व्युत्क्रमाच्च प्रमीतानां नैव कार्या सपिण्डता ।" इति व्युत्क्रममृतानां सपिण्डीकरणनिषेधेन सपिण्डीकृतपितृसम्प्रदानके श्राद्धे तत्पुत्रादीनामधिकाराभावात् । मैवम् ;
पिता यस्य तु वृत्तस्स्याज्जीवेच्चापि पितामहः । पितुस्स नाम सङ्कीर्त्य कीर्तयेत्प्रपितामहम् ॥ पितामहो वा तच्छ्राद्धं भुञ्जीतेत्यब्रवीन्मनुः ॥ (म.स्मृ.३-२२१,२२२) इति मनुवचनेन व्युत्क्रमप्रमीतपित्रादिकस्यापि श्राद्धविधानात् । ततश्च व्युत्क्रमाच्चेति निषेधः पाक्षिक इति निश्चयादधिकारोऽपि पाक्षिकोऽवगम्यते ॥३॥

▼

⑤

>

अन्नस्योत्तराभिर्जुहोति ।

# २१ ०४ आज्याहुतीरुत्तराः②

आज्याहुतीरुत्तराः ४

- स्वाहा॑ पि॒त्रे
- पि॒त्रे स्वाहा॒
- स्वाहा॑ पि॒त्रे
- पि॒त्रे स्वाहा॑ ।
- स्व॒धा स्वाहा॒
- अ॒ग्नये॑ कव्य॒वाह॑नाय स्व॒धा स्वाहा॑ ।

▼

⑤

>

▼ Oldenberg

4. Then the Ājya oblations (indicated by the) next (Mantras, II, 19, 8-13).

▼ हरदत्तः

षडाज्याहुतीर्जुहोति–स्वाहा पित्र इत्याद्याः । तत्र "स्वाहा पित्र" इति पुरस्तात् स्वाहाकारत्वान्नान्ते स्वाहाकारः । अत्राहुः— मासिश्राद्धे ब्राह्मणभोजनं प्रधानकर्मतदङ्गमग्नौ करणं पिण्डश्च । तेन जीवपितृश्राद्धक्रिया न भवति । "यदि जीवपिता न दद्यात्" इति निषेधात् । "आहोमात् कृत्वा विरमेत्" इत्ययमपि विधिर्न भवति । होमस्य भोजनाङ्गत्वात् पिण्डपितृयज्ञे तु होमस्य प्रधानत्वादिति । अन्ये तु येभ्य एव पिता दद्यात् तेभ्य एव पुत्रोऽपीत्याहुः । अपर आह— त्रीणि श्राद्धे प्रधानानि–अग्नौ करणं भोजनं पिण्डदानमिति तेना"होमात् कृत्वा विरमेद्" इत्यस्यापि विधेरयं विषय इति ॥४॥

▼ सुदर्शनः

एवमन्नहोमान् हुत्वा, अनन्तरम् **उत्तराः** "स्वाहा पित्रे" इत्याद्याष् **षडाज्याहुतीर्** जुहोति ॥४॥

▼

⑤

>

आज्याहुतीरुत्तराः।

# २१ ०५ एतद्वा विपरीतम्②

एतद्वा विपरीतम् ५

▼

⑤

>

▼ Oldenberg

5. Or invertedly (i.e. he offers Ājya with the verses referred to in Sūtra 3, and food with those referred to in Sūtra 4).

▼ हरदत्तः

पूर्वास् सप्ताज्याहुतयः उत्तराष् षडन्नाहुतय इत्यर्थः । मन्त्रास्तु यथाम्नातमेव ।

प्रयोगः–

पूर्वद्युर् निवेदनं सायं भोजनानन्तरं
"श्वः श्राद्धं भविष्यती"ति ।

तत आरभ्य व्रतचर्या सर्वेषाम् । (वयं तु ब्रूमः पूर्वेद्युः सायं भोजनं न भवति । "यद् अनाश्वान् उपवसेत् पितृ-देवत्यस् स्याद्" इति लिङ्गाद् इति । )

अथापरेद्युः प्रातः द्वितीयं निवेदनम्– "अद्य क्रियत" इति । अथाभ्यङ्गस् ततो ऽपराह्ने
स्नातान् कृत-पच्-छौचान् तान् आमन्त्रयते ।

पूर्वं विश्वेभ्यो देवेभ्यो यज्ञोपवीती
युग्मान् द्वौ चतुरो वा
"मासि श्राद्धे विश्वेभ्यो देवेभ्यः क्षणः कर्तव्य" इति ।
"ओं तथे"ति प्रतिवचनम् ।
"प्राप्नोतु भवान्"इति यथासनं प्रापणम् ।
"प्राप्नवानी"ति प्रतिवचनम् ।

देवेभ्यः प्राङ्मुखाः ब्राह्मणाः
प्राङ्-मूलेषु दर्भेषु, पितृभ्य उदङ्मुखाः द्वि-गुण-भुग्नेषु दक्षिणाग्रेषु
युवानः पित्रे, वृद्धाः पितामहाय, वृद्धतमाः प्रपितामहाय,
एकैकस्य त्रयस् त्रयो वा ।

शुचौ देशे दक्षिणाप्रवणे श्राद्धागारं
सर्वतः परिश्रितम्,
उदग् वा द्वारं
तस्य पूर्वोत्तरे देशे अग्निर् औपासनः ।

तस्या दक्षिणतः पिण्ड-दानार्थं स्थण्डिलम् । तस्य दक्षिणतः उदङ्मुखाः पित्रार्थाः
पश्चात् प्राङ्मुखाः देवार्थाः ।

तस्मिन्न् एव स्थण्डिले यथावकाशं
त्रिषु पात्रेषु पितृभ्य
उदकान्य् अर्घ्याणि दक्षिणापवर्गाणि तिलवन्ति । देवेभ्य एकस्मिन् यवमति ।

तानि पुष्पैर् अवकीर्य
दर्भेषु सादयित्वा
दर्भैः प्रच्छाद्य
आसनगतानां ब्राह्मणानां हस्तेषु
स्वस्मात् स्वस्मात् उदपात्रात् पात्रान्तरेणाप आदाय
"विश्वे देवा इदं वोऽर्घ्यं",
"पितः इदं तेऽर्घ्यं, पितामह इदं तेऽर्घ्यं, प्रपितामह इदं तेऽर्घ्यं",
इत्य् अर्घ्याणि ददाति, तूष्णीं वा ।
पुरस्ताद् उपरिष्टाच् च शुद्धोदकम् ।*(5)*

ततो गन्धादिभिः वासोभिश् च द्विजान् अभ्यर्च्य,
"उद्ध्रियतामग्नौ च क्रियताम्" इत्यामन्त्रयते । "कामम् उद्ध्रियतां, कामम् अग्नौ च क्रियतां" इति प्रतिवचनम् ।

ततो ब्राह्मणार्थं संस्कृताद् अन्नाद् उद्धृत्यापरेणाग्निं बहिर्षि प्रतिष्ठाप्याभिघार्याग्नेर् उपसमाधानाद्य्-आज्यभागान्ते त्रयोदश प्रधानाहुतीर् जुहोति ॥५॥

▼ सुदर्शनः

यद्वा **विपरीतमेद्भवति** ,"यन्मे माता" इत्याद्याः पूर्वास्सप्ताज्याहुतयः, "स्वाहा पित्रे" इत्याद्या उत्तराष्षडन्नाहुतय इति ॥५॥
▼

⑤

>

एतद्वा विपरीतम् ।

# २१ ०६ सर्वमुत्तरैरभिमृशेत्②

सर्वमुत्तरैरभिमृशेत् ६

ए॒ष ते॑ तत॒ *(स्वधासमुद्रः)* मधु॑माँ ऊ॒र्मिस् सर॑स्वा॒न्।
यावा॑न् अ॒ग्निश् च॑ पृथि॒वी च॒ ताव॑त्य् अस्य मा॒त्रा।
ताव॑तीन् त ए॒तां मात्रा॑न् ददामि।
यथा॒ ऽग्निर् अक्षि॒तो ऽनु॑पदस्त*(=उपक्षयरहितः)*, ए॒वं मह्यं॑*(→मम)* पि॒त्रे ऽक्षि॒तो ऽनु॑पदस्तः स्व॒धा भ॑व॒ तां त्वँ स्व॒धां तैस् स॒होप॑जीव॒, +र्चस् ते॑ महिमा।

ए॒ष ते॑ प्रपितामह॒ *(स्वधासमुद्रः)* मधु॑माँ ऊ॒र्मिस् सर॑स्वा॒न्।
यावा॑न् वा॒युश् चा॒न्तरि॑क्षञ् च॒ ताव॑त्य् अस्य मा॒त्रा।
ताव॑तीन् त ए॒तां मात्रा॑न् ददामि।
यथा॑ वा॒युर् अक्षि॒तो ऽनु॑पदस्त*(=उपक्षयरहितः)*, ए॒वं मह्यं॑*(→मम)* पिताम॒हायाक्षि॒तोऽनु॑पदस्तः स्व॒धा भ॑व।
तां त्वँ स्व॒धां तैस् स॒होप॑जीव॒, सामा॑नि ते महिमा।

ए॒ष ते॑ प्रपितामह॒ *(स्वधासमुद्रः)* मधु॑माँ ऊ॒र्मिस् सर॑स्वा॒न्।
यावा॑न् आदि॒त्यश्च॒ द्यौश्च॒ ताव॑त्यस्य मा॒त्रा।
ताव॑तीन् त ए॒तां मात्रा॑न् ददामि।
यथा॑ ऽऽदि॒त्यो ऽक्षि॒तो ऽनु॑पदस्त*(=उपक्षयरहितः)*, ए॒वं मह्यं॑ प्रपिताम॒हायाऽक्षि॒तोऽनु॑पदस्तः स्व॒धा भ॑व।
तां त्वँ स्व॒धां तैस् स॒होप॑जीव॒, यजूँ॑षि ते महि॒मा ॥ (19)

▼

⑤

>
▼ Oldenberg

6. Let him touch the whole (food) with the next (formulas, II, 19, 14-16).

▼ हरदत्तः

एवं प्रधानाहुतीर्हुत्वा सौविष्टकृतं हुत्वा जयादि प्रतिपद्यते । साङ्गे प्रधाने सर्वत्र प्राचीनावीतम् । न जयादय इत्यन्ये । परिषेचनान्तं कृत्वा प्रणीताश्च विमुच्य ततस्सर्वमन्नं होष्यं च समुपनिधाय हुतशेषं च तस्मिन् उत्सृज्य तम् **उत्तरैस्**त्रिभिः अभिमृशेत् "एष ते तत मधुमान्"इत्येतैः । अत्राप्यूहः "एष ते मातामह मधुमा"नित्यादि ॥६॥

▼ सुदर्शनः

अथ ब्राह्मणभोजनार्थं हविष्यमहविषयं च सर्वमन्नं **उत्तरैः** "एष ते तत मधुमान्" इत्येतैस्त्रिभिर्मन्त्रैः अभिमृशेत् । एकयत्नेन सर्वस्याभिमर्शनासम्भवे मन्त्रावृत्तिः ; शेषिपरतन्त्रत्वाच्छेषाणाम् ॥६॥

▼

⑤

>

सर्वमुत्तरैरभिमृशेत् ।

# २१ ०७ क्लृप्तान्वा प्रतिपूरुषम्②

क्लृप्तान्वा प्रतिपूरुषम् ७

▼

⑤

>

▼ Oldenberg

> 7. Or the (single) prepared (portions of food destined) for the single Brāhmaṇas.

▼ हरदत्तः

अथ वा भोजनपात्रेषु **क्लृप्तान्** ओदनविशेषान् **प्रतिपुरुषं** पृथगभिमृशेत् यथालिङ्गम् । तत्र यावन्तः पित्रर्थे भोज्यन्ते तावत्सु प्रथमस्य मन्त्रस्यावृत्तिः "एवमुत्तरयोः । ततः पात्रेषु कल्पितानन्नशेषान् ॥७॥

▼ सुदर्शनः

अथवा–पित्राद्यर्थेभ्यो ब्राह्मणेभ्यः प्रतिपूरुषं भोजनपात्रेषु **क्लृप्तान्** प्रकसल्पितान् भोज्यपदार्थान् एकैकेन मन्त्रेण यथालिङ्गमभिमृशेत् । अत्रापि पित्रादेरेकैकस्य ब्राह्मणबहुत्वे युगपदभिमर्शनासम्भवे च तत्तन्मन्त्रावृत्तिः ॥७॥

▼

⑤

>

क्लृप्तान्वा प्रतिपूरुषम् ।

# २१ ०८ उत्तरेण यजुषोपस्पर्शयित्वा②

उत्तरेण यजुषोपस्पर्शयित्वा ८

*(हे अन्न -)* पृ॒थि॒वी ते॒ पात्रं॒,
द्यौर् अ॑पि॒धान॑म्।
ब्रह्म॑णस् त्वा॒ मुखे॑ जुहोमि।
ब्राह्म॒णाना॑न् त्वा प्राणापा॒नयो॑र् जुहोमि।

भुक्तवतो ऽनुव्रज्य प्रदक्षिणीकृत्य
द्वैधं दक्षिणाग्रान् दर्भान् संस्तीर्य
*(भुञ्जानानामपि तृप्तिरस्त्वित्याह -)* अक्षि॑तम् असि॒।
मैषां॑ क्षेष्ठा*(←क्षी क्षये)* अ॒मुत्रा॒*(→परलोके)*ऽमुष्मिं॑ल्ँ लो॒के *(च ब्राह्मणानाम्)* ।

▼

⑤

>

▼ Oldenberg

8. Having caused them with the next (formula, II, 20, 1) to touch (the food, he gives it to them to eat).

▼ हरदत्तः

**उत्तरेण यजुषा** "पृथिवी ते पात्रम्" इत्यनेन ब्राह्मणैः स्पर्शयित्वा भोजयेदिति शेषः । तत्र च "ब्राह्मणानां त्वा,"मैषां क्षेष्ठाः" इति बहुत्वं दृश्यते तथापि प्रतिपुरुषं मन्त्रावृत्तिः उपरवमन्त्रवत्, वत्सापाकरणमन्त्रवच्च । तत्र पूर्वं देवानामुपस्पर्शनं "विश्वे देवास" इत्यनयर्चा, स्मृत्यन्तरे दर्शनात् । वैष्णव्येत्यपरे । इदं विष्णुरित्यन्ते विष्णो हव्यं रक्षस्वेति । तथा पित्र्येष्वप्यन्ते विष्णो कव्यं रक्षस्वेति । भुञ्जानेषु पराङावर्तते । रक्षोघ्नान् पित्र्यान् वैष्णव्यानन्यांश्च पवित्रान् धर्म्यान् मन्त्रान् धर्मशास्त्रमितिहासपुराणांश्चाभिश्रावयति । ततस्तृप्तान् ज्ञात्वा मधुमतीः श्रावयेत् अक्षन्नमीमदन्तेति च । अथ भूमावन्नं विकिरति– "ये अग्निदग्धा येऽनग्निदग्धा ये वा जाताः कुले मम । भूमौ दत्तेन पिण्डेन तृप्ता यान्तु परां गति"मिति । अथाचान्तेषु पुनरपो दत्वा "स्वदितम्" इति पित्रर्थान् वाचयति "रोचत" इति वैश्वदेवार्थान् । ततो यथाश्राद्धं दक्षिणां दत्वा सर्वेभ्योऽन्नशेषेभ्यः पिण्डार्थं प्राशनार्थञ्चोद्धृत्य शेषं निवेदयेत्– अन्नशेषैः किं क्रियतां इति । इष्टैस्सहोपभुज्यतामिति प्रतिवचनम् । "दातारो नोऽभिवर्धन्तां वेदास्सन्ततिरेव नः । श्रद्धा च नो मा व्यपगात् बहुदेयं च नोऽस्तु" ॥ इति प्रार्थयते । "दातारो वोऽभिवर्धन्ताम्" इत्यूहेन प्रतिवचनम् । **भुक्तवतः** प्रदक्षिणीकृत्य, नमस्कारः । ओं स्वधेति पितृभ्यः । विश्वेदेवाः प्रीयन्तामिति विश्वेषां देवानाम् । तत्र सर्वकर्मणां वैश्वदेवेषु पूर्वं प्रवृत्तिः पश्चात् पित्र्येषु । विसर्जने विपर्ययः । अभिश्रवणादि यज्ञोपवीती प्राक्पिण्डेभ्यः कल्पान्तरदर्शनात् ॥८॥

▼ सुदर्शनः

**उत्तरेण** "पृथिवी ते पात्रम्" इत्यनेन **यजुषा**, क्लृप्तानन्नविशेषान् ब्राह्मणान्, हस्ते गृहीत्वो**पस्पर्शयित्वा**, तं भोजयेदिति शेषः । अत्र च मन्त्रे यद्यपि ब्राह्मणानामिति बहुवचनं तथापि युगपत् स्पर्शयितुमशक्यत्वात् प्रतिपूरुषं मन्त्रावृत्तिः, यथा— "वायवस्थ" (तै. सं.१-१-१.) इति मन्त्रः प्रतिवत्सम् । एवंविधेषु बहुवचनं प्रयोगसाधुत्वार्थं, एकप्रयोगवचनप्रयोज्यानेकव्यक्त्यभिप्रायं वा ॥८॥
▼

### ⑤

>

उत्तरेण यजुषोपस्पर्शयित्वा।

# २१ ०९ भुक्तवतोऽनुव्रज्य②

तेषूत्तरैरपो दत्त्वा

*(दर्भेष्व् अपो ददाति)*

मा॒र्जय॑न्तां॒ मम॑ पि॒तरो॑, मा॒र्जय॑न्तां॒ मम॑ पितामहा मा॒र्जय॑न्तां॒ मम॑ प्रपिताम॒हाः ।

मा॒र्जय॑न्तां॒ मम॑ मा॒तरो॑, मा॒र्जय॑न्तां॒ मम॑ पिताम॒ह्यो॑, मा॒र्जय॑न्तां॒ मम॑ प्रपिताम॒ह्यः॑ ।

### उत्तरैर्दक्षिणापवर्गान् पिण्डान्दत्वा⑥

उत्तरैर् दक्षिणापवर्गान् पिण्डान्दत्त्वा

ए॒तत्ते॑ तताऽसौ॒*(←नामनिर्देशः)*, ये च॒ त्वाम् अनु॑ *(जीवन्ति)*।
ए॒तत्ते॑ पितामहाऽसौ॒*(←नामनिर्देशः)*, ये च॒ त्वाम् अनु॑ *(जीवन्ति)*।
ए॒तत्ते॑ प्रपितामहाऽसौ॒*(←नामनिर्देशः)*, ये च॒ त्वाम् अनु॑ *(जीवन्ति)*।
ए॒तत्ते॑ मातर् असौ॒*(←नामनिर्देशः)*, याश् च॒ त्वाम् अनु॑ *(जीवन्ति)*।
ए॒तत्ते॑ पितामह्य् असौ॒*(←नामनिर्देशः)*, याश् च॒ त्वाम् अनु॑ *(जीवन्ति)*।
ए॒तत्ते॑ प्रपितामह्य् असौ॒*(←नामनिर्देशः)*, याश् च॒ त्वाम् अनु॑ *(जीवन्ति)*।

### उत्तरैरुपस्थानम्⑥

पूर्ववदुत्तरैरपो दत्त्वा
उत्तरैरुपस्थाय

ये च॒ वो *(पितरः)* ऽत्र॒, ये चा॒स्मास्व् आशँ॑सन्ते॒*(→प्रार्थयन्ते स्वधाम्)*
याश् च॒ वो ऽत्र॒ याश् चा॒स्मास्व् आशँ॑सन्ते॒,
ते च॑ *(स्वधां)* वहन्तां॒,
ताश्च॑ *(स्वधां)* वहन्ताम्।
तृप्य॑न्तु भवन्तः॒,
तृप्य॑न्तु भवत्यः॒।
तृप्य॑त॒ तृप्य॑त॒ तृप्य॑त ।

### उभयान् पिण्डान् परिषिञ्चति⑥

उत्तरयोदपात्रेण त्रिः प्रसव्यं परिषिच्य

पु॒त्रान् पौत्रा॑न् अ॒भि त॒र्पय॑न्ती॒र् आपो॒ मधु॑मतीर् इ॒माः
स्व॒धां *(मातृसहित)*पि॒तृभ्यो॑ अ॒मृतं॒ दुहा॑ना॒ आपो॑ दे॒वीर् उ॒भयाँ॑स् तर्पयन्तु ।
तृप्य॑त॒ तृप्य॑त॒ तृप्य॑त ।

### शेष-प्राशनम्⑤

न्युब्ज्य पात्राण्य्
उत्तरं यजुरनवानं त्र्यवरार्ध्यमावर्तयित्वा
प्रोक्ष्यपात्राणि
द्वन्द्वमभ्युदाहृत्य
सर्वतस् समवदायोत्तरेण यजुषाशेषस्य ग्रासवरार्ध्यं प्राश्नीयात् ।

प्रा॒णे निवि॑ष्टो॒ ऽमृतं॑*(→अमरणहेतुमन्नं)* जुहोमि॒, ब्रह्म॑णि म आ॒त्माऽमृ॑त॒त्वाय॑ ।

▼

### ⑤

>
▼ Oldenberg

9. When they have eaten (and gone away), he goes after them, circumambulates them, turning his right side towards them, spreads out southward-pointed Darbha grass in two different layers, pours water on it with the next (formulas, II, 20, 2-7), distributes the Piṇḍas, ending in the south, with the next (formulas, II, 20, 8-13), pours out water as before with the next (formulas, 14-19), worships (the ancestors) with the next (formulas, II, 20, 20-23), sprinkles with the next (verse, 24) water three times from right to left round (the Piṇḍas) with a water-pot, besprinkles the vessels, which are turned upside down, repeating the next Yajus (25) at least three times without taking breath, sets up the vessels two by two, cuts off (Avadānas) from all (portions of food), and eats of the remains at least one morsel with the next Yajus (26).

▼ हरदत्तः

ततस्तान् **भुक्तवतोऽनुव्रज्य प्रदक्षिणीकृत्य** प्रत्यावृत्य प्राचीनावीती पिण्डप्रदानदेशे **दक्षिणाग्रान् दर्भान्** संस्तृणाति **द्वैधं** द्वेधा द्वयोः स्थानयोरसंभिन्नानित्यर्थः । तत्र पितृभ्यः पुरस्तात् स्तृणाति, मातृभ्यः पश्चात् । तथा चाश्वलायनः–कर्षूष्वेके द्वयोष्षट्सु वा, पूर्वासु पितृभ्यो दद्यात्, अपरासु स्त्रीभ्यः (आश्व.गृ.१-५-६,७,८) इति । "दक्षिणाग्रैः पित्र्येषु" (आप.गृ.१.७.) इत्यस्य परिस्तरणीवेषयत्वादिह दक्षिणानीत्युक्तम् । **संस्तीर्य** तेषु **उत्तरैर्**मन्त्रैः "मार्जयन्तां मम पितर" इत्यादिभिर् **अपो ददाति** । पूर्ववदिति वक्ष्यमाणमन्त्रा अप्यपकृष्यन्ते । पिण्डं पूर्ववत् ददाति पिण्डपितृयज्ञे यत् पिण्डदानं तदित्यर्थः । तेन त्रीनुदकाञ्जलीनित्येवमादयो विशेषा इहापि भवन्ति । तत्र पितृलिङ्गैः पितृभ्यस्तीर्णेषु, मातृलिङ्गैर्मातृभ्यस्तीर्णेषु । एवमपो दत्वा तत **उत्तरैर्** मन्त्रैः "एतत्ते ततासा"वित्यादिभिस्तेषु दर्भेषूभयेषु **दक्षिणापवर्गान्** पिण्डान् ददाति यथालिङ्गं पितृभ्यश्च मातृभ्यश्च । असावित्यत्र सर्वत्र नामग्रहणं यथालिङ्गम् । अत्रापि पूर्ववदित्यस्य सबन्धात् सव्यं जान्वाच्यावाचीनपाणिरित्यादि विधानमिहापि भवति । अनेकपितृकस्योह इति पैङ्गिसूत्रम् । "एतद्वां ततौ यज्ञशर्मविष्णुशर्माणौ ये च युवामनु, "एतद्वां पितामहा" वित्यादि । एतद्वां मातरावसौ याश्च युवामनु, "इत्यादिदक्षिणापवर्गानित्युच्यते–उभयेषां पिण्डानां पृथक् दक्षिणापवर्गता यथा स्यादिति । तेन पितृपिण्डानां दक्षिणतो मातृपिण्डा न भवन्ति । किं तर्हि ? पश्चात् । एवं पिण्डान् दत्वा पूर्ववदुत्तरैरपो ददाति पितृभ्यश्च मातृभ्यश्च । मन्त्रसमाम्नाये"मार्जयन्तां मम पितर इत्येते" इति मन्त्राणां पुनरादिष्टत्वात् । "उत्तरैरपो दत्वा" इत्येव सिद्धे पूर्ववदित्यतिदेशः पिण्डपितृयज्ञप्रत्यवमर्शनार्थः—पिण्डेषु चोदकाञ्जलिषु च । तत उत्तरैर्मन्त्रैः तानुपतिष्ठते यथालिङ्गं "ये च वोऽत्रेति पितृन्, याश्च वोऽत्रेति मातृः; ते च वहन्तामिति पितृन्, ताश्च वहन्तामिति मातृः, तृप्यंतु भवन्तः इति पितॄन्, तृप्यंतु भवत्यः इति मातॄः, तृप्यत तृप्यत तृप्यत इत्युभयान् । तत **उत्तरयर्चा** "पुत्रान् पौत्रानित्येतया त्रिः **प्रसव्यम्** उदपात्रेण पिण्डान् परिषिञ्चति । उभयांस्तपर्यन्त्विति लिङ्गात् पिण्डानां सहपरिषेचनम् । उदपात्रवचनं हस्तेन मा भूदिति । प्रसव्यवचनमनुवादः **प्रसव्यं** त्रिगुणीभूतमेकमेव परिषेचनं सन्ततं यथा स्यात्, न पिण्डपितृयज्ञवत् त्रीणि परिषेचनानि पृथगिति । एवं परिषिच्य ततः पात्राणि यान्यत्र प्रकृतानि त्रीण्यर्घ्यपात्राणि परिषेचनपात्रमुदकुम्भः यस्मिन् पिण्डार्थमन्नमुद्धृतं तच्चेति तानि **न्युब्ज्य** न्यञ्चि कृत्वा तत **उत्तरं यजुः** "तृप्यत तृप्यत तृप्यते"त्येतत् **अनवानमनु**छवसन् **त्र्यवरार्ध्य**मावर्तयति त्रिरभ्यावृत्तिः अवरा मात्रा यस्यावर्तनस्य तत् **त्र्यवरार्ध्यम् ।** यजुर्ग्रहणं "तृप्यते"त्यस्य त्रिरावृत्तस्य पठितस्यैकयजुष्ट्वज्ञापनार्थम् । तस्य त्रिरावृत्तौ नवकृत्वोऽभ्यावृत्तिर्भवति । एवमावृत्य न्यक्कृतानि पात्राणि प्रोक्ष्य **द्वद्वमभ्युदाहरति** उदानयति । अभीति वचनात् उत्तरं कर्म प्रत्युदाहरतीत्यर्थः । तेनोत्तरस्मिन्नपि श्राद्धकर्मणि तान्येव पात्राणीत्येके । नेत्यन्ये । एवमभ्युदाहृत्य शेषस्यान्नस्य **ग्रासवरार्ध्यं** ग्रासोऽवरार्ध्यो अवमा मात्रा यस्य तत् **ग्रासवरार्ध्यम्** छान्दसो ह्रस्वः । **तत्प्राश्नीयात् उत्तरेण यजुषा** "प्राणे निविष्टोऽमृतं जुहोमि" इत्यनेन **सर्वतस्** सर्वेभ्यः श्राद्धशेषेभ्य अन्नशेषेभ्य इत्यर्थः । श्राद्धाङ्गमिदं प्राशनं, न नित्यस्याशनस्य नियमविधिः । तस्मात् तत्रापि प्राचीनावीतमेव । आचमने तु यज्ञोपवीतमनङ्गत्वात् । ततः पञ्चमहायज्ञानां प्रवृत्तिः ।

▼ सुदर्शनः

अथ **भुक्तवतो** व्रजतो ब्राह्मणानागृहसीमान्तम्**अनुव्रज्य** प्रदक्षिणीकरोति । एतयोश्च यज्ञोपवीतम् । कथम्? प्रदक्षिणे तावत् "यज्ञोपवीतिना प्रदक्षिणम्" इति साहचर्यात् । अनुव्रजनेऽ**प्यनुव्रज्य प्रदक्षिणीकृत्येति** प्रदक्षिणसाहचर्यात् । तन्त्रेण चैतदुभयं, सम्भवात् । यदि तु कारणवशात्तन्त्राभावः, तदा पृथक्पृथक् । अथ प्रत्येत्य प्राचीनावीती पिण्डदानदेशे **दक्षिणाग्रान् दर्भान्, द्वैधं** द्वेधा संस्तृणाति । तत्र पुरस्तात्पित्राद्यर्थं, पश्चान्मात्राद्यर्थम् ; आश्वलायने दर्शनात्, आचाराच्च । ततस्तेषु दर्भेषू**त्तरैः** "मार्जयन्तां मम पितरः" इत्यादिभिस्त्रिभिः, "मार्जयन्तां मम पितरः" इत्यादिभिश्च यथार्हं दक्षिणापवर्ग**मपो दत्वा** अनन्तरम् **उत्तरैः** "एतत्ते ततासौ" इत्यादिभिः "एतत्ते मातरसौ" इत्यादिभिश्च यथालिङ्गं त्रींस्त्रीन् **दक्षिणापवर्गान् पिण्डान् ददाति** । पिण्डाश्च हुतशेषात् भुक्तशेषाच्च समवदाय कर्तव्याः । अत्र पूर्वेषु त्रिषु मन्त्रेष्वसावित्यस्य स्थाने पितृपितामहप्रपितामहानां नामानि सम्बुद्ध्या यथाक्रमं गृह्णाति । उत्तरेषु तु त्रिषु मातृपितामहीप्रपितामहीनाम् । "दक्षिणतोऽपवर्गः" (आप.गृ.१-१०) इति सामान्यविधिसिद्धस्येह पुनर्वचनं, पिण्डदान एव दक्षिणापवर्गः" द्वैधं दर्भास्तरणेषु तु पश्चिमापवर्ग इति ज्ञापनार्थम्, तथोभयेषां पिण्डानां प्रत्येकं दक्षिणापवर्गसिद्ध्यर्थं च । अथ पूर्ववत् "मार्जयन्ताम्" इत्यादिभिरेवापो ददाति । केचित्—"तेषूत्तरैरपो दत्वा उत्तरैर्दक्षिणापवर्गान् पिण्डान् दत्वा" इत्येतयोरपि "पूर्ववत्" इति पदमपकृष्य त्रिष्वपि सूत्रेषु चोद्यमानं पूर्ववत् पिण्डपितृयज्ञवत् कर्तव्यमिति व्याचक्षते । प्रयोजनं तु "त्रीनुदकाञ्जलीन्निनयति" (आप.श्रौ.१-८-१०) "सव्यं जान्वाच्यावाचीनपाणिः" (आप.श्रौ.१-९-१.) इत्यादिविधानमिहापि भवतीति । तन्न ; अपकर्षस्यैवायुक्तत्वात्, पूर्ववदित्यस्य पिण्डपितृयज्ञवदित्येवंबुद्ध्यनुदयाच्च । यदि त्वाचारबलात् "सव्यं जान्वाच्य" इत्यादीहापि कर्तव्यमेवेत्युच्येत, तदा न कश्चिद्दोषः । अथोत्तरैः "ये च वोऽत्र" इत्यादिभिष्षड्भिर्मन्त्रैर्यथा क्रमं यथालिङ्गं पितॄन् त्रिस्त्रिरुपतिष्ठते । तृप्यतेत्यनेन त्रिरावृत्तेन उभयांस्तन्त्रेण ॥ केचित्–चत्वारो मन्त्राः न षट् । तत्र प्रथमो मन्त्रो "ये च वोऽत्र" इत्यादिः "ताश्च वहन्ताम्" इत्यन्तः उभयेषामुपस्थानार्थः । "तृप्यन्तु भवन्तः" इति पितृणाम् । "तृप्यन्तु भवत्यः" इति मातृणाम् । "तृप्यत तृप्यत तृप्यत" इत्युभयेषामिति ॥ तत **उत्तरया** "पुत्रान्पौत्रान्" इत्येतया उभयेषां पिण्डान्युगपद् **उदपात्रेण त्रिः प्रसव्यम्** अविच्छिन्नं **परिषिञ्चति** । सामान्यविधिसिद्धस्य प्रसव्यस्येह पुनर्वचनं पूर्वत्र "प्रदक्षिणीकृत्य" इति वचनादिहापि प्रादक्षिण्यं स्यादिति शङ्कानिरासार्थम् । अनन्तरं पात्राणि होमार्थानि पिण्डदानार्थानि च । केचित्—भोजनार्थानि वोददानार्थानि च, न तु होमार्थानीति । **न्युब्ज्य** अधोबिलानि कृत्वा । तत **उत्तरं यजुः** "तृप्यत तृप्यत तृप्यत" इत्याम्नानत एवं त्रिरभ्यस्तम् । **अनवानं**अनुच्छवसन् । **त्र्यवरार्ध्य** त्रिरभ्यावृत्तिरवरा मात्रा यस्यावर्तनस्य तत्त्र्यवरार्ध्यं यथा भवति तथा**वर्तयति** । ततश्चावमायामपि मात्रायां तृप्यतेति नवकृत्वोऽभ्यासितव्यं भवति । एवमनवानं यावच्छत्त्यावर्त्य, ततः **पात्राणि** न्यग्भूतानि **प्रोक्ष्य, द्वन्द्वमभ्युदाहरति** । अत्राभ्युपसर्गादुत्तरं कर्म प्रत्युदाहरति । तेषां पात्राणां निरिष्टिकदोषो नास्तीति भावः । अथ **शेषस्या**न्नस्य ग्रासवरार्ध्यं ग्रासावरार्ध्यम् । छान्दसत्वाद्ध्रस्वः । **उत्तरेण यजुषा** "प्राणे निविष्टः" इत्यनेन प्राश्नीयात् । एतच्च सर्वतस्सर्वेभ्योऽन्नशेषेभ्यस्समवदाय कार्यम् । इदं च प्राशनं भोजनेच्छायामसत्यामपि ग्रासवरार्ध्यमवश्यं प्राश्यं; कर्माङ्गत्वात् । एवं प्राश्य, ततश्शुद्ध्यर्थं यज्ञोपवीत्याचामेत् ॥

अथात्र सूत्राणाम् अपूर्णत्वाद्
अन्यतस् सिद्धान् अपि पदार्थान् उपसंहृत्य
यथा-प्रतिभासं प्रयोग उच्यते॥

--

## पूर्वेद्युः⑥

पूर्वेद्युस् सायम् औपासन-होमं हुत्वा
प्राचीनावीती कृतप्राणायामः
"श्वो मासिश्राद्धं कर्तास्मी"ति सङ्कल्प्य
शुचित्वादि-गुण-सम्पन्नेभ्यः श्वित्रादि-दोष-वर्जितेभ्यः कृत-सायम्-आह्निकेभ्यो ब्राह्मणेभ्यो निवेदयेत् ।

## निवेदनम्⑥

तत्र प्रथमं यज्ञोपवीती भूत्वा

> "श्वो मासिश्राद्धं भविता,
> तत्र भवद्भिर् विश्वेदेवार्थे क्षणः कर्तव्यः"

इति विश्वदेवार्थेभ्यो ब्राह्मणेभ्यो निवेदयेत् ।
ततः प्राचीनावीती "पित्रर्थे क्षणः कर्तव्यः" इति पित्रर्थेभ्यः ।
"पितामहार्थे क्षणः कर्तव्यः" इति पितामहार्थेभ्यः ।
प्रपितामहार्थे क्षणः कर्तव्यः" इति प्रपितामहार्थेभ्यः ।
एकब्राह्मणपक्षे तु "पितृपितामहप्रपितामहार्थे क्षणः कर्तव्यः" इति
मातामहश्राद्धकारी चेत्, ऊहेन "मातामहार्थे क्षणः" इत्यादिना निवेदयेत् ।

## उपवीत-नियमः⑥

तत्र चाघारयोस्, तद्-अर्थ-समिधोर्, आज्य-भागयोर्, अग्निमुखाहुतौ, स्वविष्टकृति, प्रायश्चित्ताहुतौ च
तथा विश्वेदेवार्थेषु सर्वेषु पदार्थेषु च
प्रदक्षिणानुव्रजनयोश् च
यज्ञोपवीतमेव । एभ्योऽन्यत्रासमाप्तेस् सर्वत्र प्राचीनावीतम् एव ।
एतच्च प्राग् एवोपपादितम् ।

कर्तुश् चात्र सङ्कल्पाद् आरभ्य +आसमाप्तेर्
ब्रह्मचर्यादि-व्रतचर्या +अनशनं च भवति ।
भोक्तॄणाम् अपि मनूक्तो ऽक्रोधत्वादिः ।

## होमात् पूर्वम्⑥

अथापरेद्युः प्रातस्
तान् ब्राह्मणान् गृहम् आनीय
आचान्तान् आसनेषूपवेश्य
पूर्ववद् द्वितीयम् आमन्त्रणम् ।
अत्र त्व् "अद्य श्राद्धं भविष्यती"ति भेदः ।

> "पूर्वेद्युर् निवेदनं
> अपरेद्युर्द्वितीयं, तृतीयं चामन्त्रणम्"

इतिवचनात् ।

अथ तेषां पादान् कुण्डेषु सकूर्च-तिलेष्व् अवनिज्याचमय्य,
कृसर-ताम्बूलादीनि दत्वा

अभ्यज्य, स्नानार्थं प्रस्थापयेत् ।
ते च स्नायुः ।

ततस् स्वयं च स्नातो
ब्राह्मण-भोजनार्थाद् अन्नाद् अन्येनान्नेन वैश्वदेवं पञ्चमहायज्ञांश् च कुर्यात् ।
केचित्— समाप्ते श्राद्धे इति ।

## आसनादि⑥

ततोऽपराह्णे प्राचीनावीती
ब्राह्मणान् प्रक्षालित-पाणिपादान् आचान्तान् आसनेषूपवेशयति -
तत्र विश्वेदेवार्थान् प्राङ्मुखान् प्राक्-कूलेषु दर्भेषु
पित्राद्य्-अर्थान् उदङ्-मुखान् द्विगुण-भुग्नेषु दक्षिणाग्रेषु दर्भेषु ।

श्राद्धागारं च शुचौ देशे दक्षिणाप्रवणे
सर्वतः परिश्रितम् उदग्-द्वारं च भवति ।
तस्योत्तर-पूर्व-देशे ऽग्निरौपासनः ।
अग्नेर् दक्षिणतः पिण्डप्रदानार्थं स्थण्डिलम् । तस्य दक्षिणतः पत्राद्यर्थानाम् आसनम् । पश्चात् तु विश्वेदेवार्थानाम् आसनम् ।

## अर्घ्यादि⑥

स्थण्डिलेषु यथावकाशं पित्रादिभ्यस् त्रिषु पात्रेषु एकस्मिन् वा
शास्त्रान्तरोक्त-विधिनार्घ्यार्थम् उदकग्रहणम् ।
विश्वेभ्यो देवेभ्यश्च यथाविधि पात्रान्तरे ।
तानि गन्धादिभिर् अभ्यर्च्य,
दर्भेषु सादयित्वा
दर्भैः प्रच्छाद्यासनगतानां ब्राह्मणानां हस्तेषु स्वस्मात् स्वस्माद् उदपात्रात् पात्रान्तरेणाप आदाय

> "विश्वे देवाः इदं वो अर्घ्यं"
> "पितरिदं ते अर्घ्यं"
> "पितामहेदं ते अर्घ्यं"
> "प्रपितामहेदं ते अर्घ्यं"
> "पितृपितामहप्रपितामहा इदं वो अर्घ्यं"

इति वार्घ्याणि ददाति ।

इदम् एवार्घ्यदानं श्राद्धे स्वधा-निनयनम् उदपात्रानयनम् इति चोच्यते ।
पुरस्ताद् उपरिष्टाच् चार्घ्य-दानाद्+धस्तेषु शुद्धोदकदानम् ।

ततो गन्धादिभिर् वासोभिर् अङ्गुलीयकादिभिश् च
यथाविभवं ब्राह्मणानाम् अभ्यर्चनम् ।

## अनुज्ञा⑥

ततस् तान्
"उद्ध्रियताम् अग्नौ च क्रियताम्" इत्यामन्त्रयते ।
ते च प्रतिब्रूयुः ।

उदीच्य-वृत्तिस् त्वासन-गतानां हस्तेषूद-पात्रानयनम् ।

> "उद्ध्रियताम् अग्नौ च क्रियताम्" इत्य् आमन्त्रयते ।
> "कामम् उद्ध्रियतामग्नौ च क्रियताम्" इत्यतिसृष्ट उद्धरेज्जुहुयाच्च
> (आप.ध.२-१७-१७,१८,१९.)

इति धर्मशास्त्रवचनात् ।

एतच् चोदपात्रानयनं उद्ध्रियताम् इत्य् आमन्त्रणं च पाक्षिकम्,
भाष्यकारेणानुक्तत्वात्,
उदीच्य-वृत्तिर् इत्यस्य समासस्य उदीच्यानां वृत्तिर् उदीच्येषु वृत्तिरित्युभयथापि विग्रहाभ्युपगमाच्च ।

## होमः⑥

अथ ब्राह्मणभोजनार्थाद् अन्नात् हविष्यम् ओदनापूपादिकम्
एकस्मिन् पात्रे समुद्धृत्य
अहविष्यं क्षारादि-संसृष्टम् अन्यस्मिन् पात्रे उद्धृत्य
अथ हविष्यं प्रतिष्ठितम् अभिघार्य
अग्नेर् उपसमाधानाद्य्-अग्निमुखान्तं कृत्वा
"यन्मे माता" इत्यादिभिस् त्रयोदश प्रधानाहुतीर् हुत्वा
स्विष्टकृतं च

तत उदीचीनम् उष्णं भस्मापोह्य
अहविष्यं स्वाहाकारेण हुत्वा

ऽथ "लेपयोः" इत्यादि तन्त्रशेषं समाप्य

## भोजनम्⑥

## अभिमर्शादि⑥

ततः "एष ते तत" इत्यादिभिस् सर्वम् अन्नम् अभिमृश्य

अथ पृथक् पृथक् तृतीयम् आमन्त्रणं पूर्ववद् एव कृत्वा
त्रिष्वपि चामन्त्रणेषु "ओं तथा" इति प्रतिवचनं ब्राह्मणानाम् ।

ततः कर्तुः प्रार्थनम् "प्राप्नोतु भवान्" इति ।
ततः "प्राप्नवानि" इत्य् अङ्गीकारो भोक्तॄणाम् ।

▼ क्रमान्तरम् (द्रष्टुं नोद्यम्)

अपरे क्रमान्तरम् आहुः —
वैश्वदेव-पञ्च-महायज्ञानन्तरं
अपराह्णे प्राचीनावीती अग्नेर् उपसमाधानादि करोति ।
तत्र स्वधा-निनयन-पक्षे पात्र-संसादन-काले स्वधा-पात्राणाम् अपि सादनम् ।
प्रणीताः प्रणीय,
विधिवत् स्वधा-ग्रहणम् ।
ततो "ब्राह्मणं दक्षिणतो निषाद्य"
इत्य्-आद्य् अग्निमुखान्ते कृते
पाद-प्रक्षालनादि । उद्ध्रियताम् इत्यामन्त्र्य,
अन्नम् उद्धृत्य प्रधान-होमादय इति ।
इहापि पक्षे स्वधा-निनयनं पाक्षिकम् एव ।

अन्ये तु—
मासिश्राद्धे शास्त्रान्तरानुसारान् +मन्त्रवन् +नियमवद् भोजन-देश-संस्कारं,
विश्वेषां देवानां चावाहनं,
भोजयित्वोद्वासनं चेच्छन्ति ।
अत्र च पदार्थेषु क्रमे च शिष्टाचाराद् एव निर्णयः,
सूत्रकार-भाष्यकाराभ्याम् अनुक्तत्वात् ॥

## स्पर्शनम्⑥

अथ प्रकृतम् उच्यते—

भोजन-पात्र-क्लृप्तान् अन्नविशेषान् यथास्वं ब्राह्मणान् उपस्पर्शयति
"पृथिवी ते पात्रं", इत्येतया
"इदं विष्णुर् विचक्रमे" इत्येतया च ।
तस्याश्चान्ते "विष्णो हव्यं रक्षस्व" इति विश्वेषां देवानां,
"विष्णो कव्यं रक्षस्व" इति पित्रादीनाम् ।

एवं स्पर्शयित्वाथ भोजयेत् ।

## श्रावणादि⑥

विभवे सति सर्पिर्मांसादीनि विशिष्टानि दद्यात् ;
अभावे तैलं शाकम् इति ।

भुञ्जानान् ब्राह्मणान् आहवनीयार्थेन ध्यायेत्,
पित्रादीन् देवतात्वेन,
अन्नं चामृतत्वेन,
आत्मानं ब्रह्मत्वेन ।*(5)*

भुञ्जानेषु च पराङ् आवृत्त्य
राक्षोघ्नान्, पित्र्यान्, वैष्णवान् अन्यांश् च, पावमानमन्त्रान्,
धर्मशास्त्रम् इतिहासपुराणानि चाभिश्रावयति ।

तृप्तांश्च ज्ञात्वा मधुमतीश् श्रावयति,
"अक्षन्नमीमदन्त" इति च ।

## परिकिरणम्⑥

अथ भूमाव् अन्नं परिकिरति—

> ये अग्निदग्धा येऽनग्निदग्धा
> ये वा जाताः कुले मम । भूमौ दत्तेन पिण्डेन
> तृप्ता यान्तु परां गतिम् ॥

इति ।

## तृप्तिवचनादि⑥

अथाचान्तेषु पुनर् अपो दत्वा
"स्व्-अदितम्" इति पित्राद्यर्थान् वाचयति,
"रोचयते" इति विश्वेदेवार्थान् ।

ततो यथाशक्ति दक्षिणां दत्वा
ऽथ सर्वेभ्यो ऽन्नशेषेभ्यः पिण्डार्थं प्राशनार्थं चोद्धृत्य
"अन्नशेषः किं क्रियताम्"? इति शेषं निवेदयेत् ।
ते च "इष्टैस् सह भुज्यतां" इति प्रतिब्रूयुः ।

## आशीर्वचनम्⑥

अथ कर्ता—

> दातारो नोऽभिवर्धन्तां
> वेदास्सन्ततिरेव नः । श्रद्धा च नो मा व्यपगाद्
> बहु देयं च नोऽस्तु ॥

इति प्रर्थयते ।

> दातारो वोऽभिवर्धन्तां
> वेदास्सन्ततिरेव वः । श्रद्धा च वो मा व्यगमद्
> बहु देयं च वोऽस्तु ॥

इति तेषां प्रतिवचनम् ।

अथ,

> अन्नं च नो बहु भवेद्
> अतिथींश्च लभेमहि । याचितारश् च नस्सन्तु
> मा च याचिष्म कञ्चन ॥

इति च प्रार्थयते ।

"अन्नं च वो बहु भवेत्" इत्यूहेनैव प्रतिवचनम् ।

## प्रेषणम्⑥

अनन्तरं "ओं स्वाधा" इत्याह ।
"अस्तु स्वधा" इति प्रतिवचनम् ।

अथ ब्राह्मणानां पित्राद्य्-अर्थानां पूर्वं विसर्जनम् ।
विश्वेषां देवानां पश्चाद् विसर्जनम् ।

पूर्वोक्तेषु निवेदनादिषु सर्वेषु पदार्थेषु
दैवपूर्वत्वम् एव ।*(5)*

## अनुव्रजनम्⑥

अथ यज्ञोपवीती
भुक्तवतोऽनुव्रज्य, प्रदक्षिणीकृत्य,

प्राचीनावीती
"द्वैधं दक्षिणाग्रान्" इत्यादि,
"शेषस्य ग्रासवरार्ध्यं प्राश्नीयात्" इत्य्-एवम्-अन्तं यथासूत्रं करोति ॥

## प्राधान्यम्⑥

अत्र चेदं वक्तव्यं–
ब्राह्मण-भोजनं होमः पिण्ड-दानं च
त्रीण्य् अपि मासिश्राद्धे प्रधानानि -
अग्न्याधेये धूर्तस्वामिनोक्तत्वात्,
वैश्वदेवे विश्वेदेवा इत्यत्र
कपर्दिस्वामिनिनोक्तत्वाच्च ।

केचित्—
इह ब्राह्मणभोजनम् एव प्रधानम्,
होमः पिण्डदानं च तदङ्गम्,
अनर्थाविक्षो भोजयेद् इति प्रकृत्य
तयोर् विधानात् इति ।

## आमश्राद्धम्⑥

अथास्य मुख्यकल्पासम्भवे
आमश्राद्ध-विधिर् अनुकल्पतयोच्यते—

> आपद्य् अनग्नौ तीर्थे च
> चन्द्र-सूर्य-ग्रहे तथा ।
> आम-श्राद्धं द्विजैः कार्यं
> शूद्रः कुर्यात्सदैव हि ॥

इति बृहत्प्रचेतोवचनात् । अत्र व्यासः—

> आवाहनं च कर्तव्यम्
> अर्घ्यदानं तथैव च ।
> एष एव विधिर् यत्र
> यत्र श्राद्धं विधीयते ॥
>
> यद् यद् ददाति विप्रेभ्यः
> शृतं वा यदि वाशृतम् । तेनाग्नौ करणं कुर्यात्
> पिण्डांस् तेनैव निर्वपेत् ॥

इति । अत्र षट्त्रिंशन्मतम्—

> आमश्राद्धं यदा कूर्यात्
> पिण्डदानं कथं भवेत् । गृहाद् आहृत्य पक्वान्नं
> पिण्डान् दद्यात् तिलैस्सह ॥

इति ।

## प्रयोगः⑥

प्रयोगसंक्षेपस्तु—

पूर्वेद्युर् अपरेद्युर् वा
ब्राह्मणान् निमन्त्र्य,
पूर्वाह्णे स्नात्वा ब्राह्मणान् आहूय,
पादप्रक्षालनाद्य्-अर्घ्यदानान्तं कृत्वा,
यथाविभवं गन्ध-वस्त्रादिभिश् च यथार्हम् अभ्यर्च्य,
"अग्नौ करिष्यामी"त्य् आमन्त्र्य
आथाग्नि-मुखान्ते तण्डुलाद्य्-अमद्रव्येण होमकरणम् ।

ततस् तन्त्र-शेषं समाप्य,
तण्डुलाद्य्-आम-द्रव्यं श्राद्धार्थं ददाति ।
चरोर् अभावात् तद्-धर्माणाम् अभावः ।
भोजनाभावाच् च तत्-सम्बन्धिनाम् अप्य् अभावः ।

ततः पिण्ड-दानम् आमेन,
गृहाद् आहृतेन पक्वेन वेति ।

## हिरण्यदानम्⑥

अत्यन्तापदि तु
"अपि ह वा हिरण्येन प्रदान-मात्रं",
अपि वा मूलफलैः प्रदान-मात्रम्,
इत्य्-आदि-बोधायनादि-वचनाद्-धिरण्यादेर् वा प्रदान-मात्रं
समस्त-धर्म-रहितं कुर्यात् ।

एवं सर्वथापि श्राद्धम् अवश्यं कर्तव्यम् ।
न तु कस्यांचिद् अप्य् अवस्थायां लोपः ।*(5)*

## उपसंहारः⑥

अत्र च श्राद्ध-विषये यद्य् अपि,

> वसवः पितरो ज्ञेयाः
> रुद्राश्चैव पितामहाः । प्रपितामहास् तथादित्याश्
> श्रुतिर् एषा समातनी ॥

इत्यादि-शास्त्रान्तर-सिद्धं बहु वक्तव्यम् अस्ति ;
तथापि विस्तर-भयाद् उपरम्यते ॥९॥
▼

## ⑤

>

भुक्तवतोऽनुव्रज्य प्रदक्षिणीकृत्य द्वैधं दक्षिणाग्रान् दर्भान् सँस्तीर्य तेषूत्तरैरपो दत्त्वोत्तरैर्दक्षिणापवर्गान् पिण्डान्दत्त्वा पूर्ववदुत्तरैरपो दत्त्वोत्तरैरुपस्थायोत्तरयोदपात्रेण त्रिः प्रसव्यं परिषिच्य न्युब्ज्य पात्राण्युत्तरं यजुरनवानं त्र्यवरार्ध्यमावर्तयित्वा प्रोक्ष्यपात्राणि द्वन्द्वमभ्युदाहृत्य सर्वतस्समवदायोत्तरेण यजुषा शेषस्य ग्रासवरार्ध्यं प्राश्नीयात् ।

---

1. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

# २५ अष्टकाश्राद्धम्①

# २१ १० या माध्याः②

या माध्याः पौर्णमास्या उपरिष्टाद्*(=कृष्णपक्षे)* व्यष्टका
तस्यामष्टमी ज्येष्ठया सम्पद्यते तामेकाष्टकेत्याचक्षते १०

▼

### ⑤

>

▼ Oldenberg

10. Of the dark fortnight that follows after the full moon of Māgha, the eighth day falls under (the constellation of) Jyeṣṭhā: this day is called Ekāṣṭakā.

▼ हरदत्त-प्रस्तावः

एवं प्रकृतिभूतं मासिश्राद्धं व्याख्यायेदानीं तद्विकृतिभूतं प्रतिसंवत्सरमनुष्ठेयं अष्टकाख्यं पाकयज्ञान्तरं व्याख्यास्यन्, तस्य कालविधिमाह—

▼ हरदत्तः

व्याख्यातः श्राद्धविधिः । अथाष्टका नाम पाकयज्ञः पित्र्यः संवत्सरे संवत्सरे कर्तव्यः स उपदिश्यते । तस्य कालविधिरयं या माघी तस्या **उपरिष्टाद्व्याष्टका** कृष्णपक्षः । तस्यां या अष्टमी **तामेकाष्टका इत्याचक्षते** सा यदि **ज्येष्ठया सम्पद्यते** सङ्गच्छते तामप्येकाष्टकेत्याचक्षते इति द्वाविमौ योगौ । अन्यथा पौर्णमास्या उपरिष्टादष्टमी ज्येष्ठया सम्पद्यते तामेकाष्टकेत्याचक्षत इत्येतावता सिद्धम् । किं व्यष्टका तस्यामिति । तस्मादसत्यपि ज्येष्ठासंयोगे भवत्यष्टम्या एकाष्टकत्वम् । **द्व्यष्टका**ग्रहणस्य प्रयोजनं मृग्यम् । किमर्थं ज्येष्ठया सम्पद्यत इति? यदा द्वयोरह्नोरष्टमी तदा ज्येष्ठासंयुक्तायां क्रिया यथा स्यादिदि ॥१०॥

▼ सुदर्शनः

**माघ्याः** माघमासस्य सम्बन्धिन्याः **पौर्णमास्याः उपरिष्टादूर्ध्वं या व्यष्टका** कृष्णपक्ष इत्यर्थः । **तस्यां** व्यष्टकायां या **अष्टमी** तिथिः **ज्येष्ठया** ज्येष्ठानक्षत्रेण **सम्पद्यते** सङ्गच्छते **ताम्** अष्टमीम् **एकाष्टकेत्याचक्षते** कथयन्ति ब्रह्मवादिनः । तस्यामष्टका कर्तव्येति शेषः । एकाष्टकायां वपाहोमादि प्रधानं कर्तव्यमित्यर्थः । तामेकाष्टकेत्याचक्षत इति वचनं यान्यन्यान्यप्येकाष्टकायां विहितानि, यथा गवामयनदीक्षा यथा च दीर्घसत्रेषु विज्ञानार्थमपूपेन कक्षस्योपोषणं, यथैव चोखासम्भरणं, तानि च सर्वाणि यथोक्तलक्षणायामेवाष्टम्यां कार्याणीत्येवमर्थम् । अत्रायमभिप्रायः– यद्यपि माघमासस्य सर्वा कृष्णपक्षाष्टमी ज्येष्ठया न सम्पद्यते ; तथापि तस्यामेकाष्टका कर्तव्यैव ; पाकयज्ञत्वेन नित्यत्वात्, "व्यष्टका तस्यां" इत्यधिकग्रहणाच्चेति । ज्येष्ठया **सम्पद्यत** इति तु प्रायिकाभिप्रायम् । तेनायुक्तायामपि गवामयनदीक्षादीनि लभ्यन्ते ॥ केचित्—यदा द्वयोरह्नोरष्टमी, यस्मिन्वा संवत्सरे द्वौ माघमासौ, तत्र या अष्टमी ज्येष्ठया सम्पद्यते तस्यामेव नासम्पन्नायामित्येवमभिप्राय इति ॥१०॥

▼

### ⑤

>

या माध्याः पौर्णमास्या उपरिष्टाद्व्यष्टका तस्यामष्टमी ज्येष्ठया सम्पद्यते तामेकाष्टकेत्याचक्षते ।

# २१ ११ तस्यास्सायमौपकार्यम्②

तस्यास्सायमौपकार्यम् ११

▼

⑤

>
▼ Oldenberg

11. In the evening before that day (he performs) the preparatory ceremony.

▼ हरदत्तः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम् । )*

▼ सुदर्शनः

*(सम्पादकटिप्पनी - इदं सूत्रम् अग्रिमे व्याख्यातम् । )*
▼

⑤

>

तस्यास्सायमौपकार्यम्।

# २१ १२ अपूपञ् चतुश्शरावम्②

अपूपं चतुश्शरावं श्रपयति १२

▼

⑤

>
▼ Oldenberg

12. 1 He bakes a cake of four cups (of rice).

▼ हरदत्तः

उप समीपे क्रियत इत्युपकारः । तत्र भवम् **औपकार्यम्** । तस्या औपकार्यमित्यन्वयः । **तस्याः** एकाष्टकायाः समीपे यत्कर्म क्रियते पूर्वेद्युस्सप्तम्याम्, तत्र **चतुश्शरावमपूपं** श्रपयति । सायं सप्तम्यामस्तमिते आदित्ये अपूपहविष्कं कर्म कर्तव्यमित्यर्थः । तदेवमौपकार्यशब्दः कालविधानार्थः । तस्यास्सायमित्यन्वये अष्टम्यामस्तमितेऽपूपं प्राप्नोति, नवम्यां पशुः, "दशम्यामन्वष्टका", तच्छास्त्रेष्वप्रसिद्धम् । औपकार्यशब्दश्चानर्थकः ॥१२॥

▼ सुदर्शनः

त्रिपदमिदं सूत्रम् । **तस्या** अष्टकाया **औपकार्यम्** उपकारकम् । उपकारं करोतीति कर्तरि यत्प्रत्ययः छान्दसः । अष्टकाया अङ्गभूतं कर्मेत्यर्थः । **सायं** पूर्वेद्युस्सप्तम्याः । सोमयागस्याग्नीषोमीयपशुयागवत्तस्या अष्टकाया अङ्गभूतं कर्म पूर्वेद्युस्सप्तम्यास्सायङ्काले कर्तव्यमिति सूत्रार्थः । न त्विह तस्या अष्टकाया इति सम्बन्धः ; नवम्यां वपाहोमादिप्रधानप्रसङ्गात् । न चैतद्युक्तम् ; **या माघ्या** इति कालविधानस्यौपकार्यार्थत्वोपपत्तौ "प्रकरणात्प्रधानस्य" इति न्यायविरोधात्, शास्त्रान्तरेष्वप्रसिद्धत्वाच्च ॥११॥

अथास्यौपकार्यस्य विधिमाह— व्रीहीणां **चतुश्शरावं** तूष्णीं निरुप्य पार्वणावत् पत्न्यवहन्तीत्यादिविधिनाऽपूपं **श्रपयति** । अपूपः प्रथितावयवः प्रसिद्धः । प्रतिष्ठिताभिघारणान्तं च करोति ॥१२॥

▼

⑤

>

अपूपं चतुश्शरावं श्रपयति।

# २१ १३ अष्टाकपाल इत्येके②

अष्टाकपाल इत्येके १३

▼

⑤

>

▼ Oldenberg

13. (The cake is prepared) in eight dishes (like a Puroḍāśa), according to some (teachers).

▼ हरदत्तः

**सायम्**अपूपाष्टाकपालो हविः **इत्येके** मन्यन्ते । अष्टसु कपालेषु संस्कृतोऽष्टाकपालः । अस्मिन् पक्षे पुरोडाशस्यावृता श्रपणम् । पूर्वस्य तु लौकिक्यापूपस्यावृता । द्वयोरपि पक्षयोः औपासने श्रपणम् । एतच्च पित्र्यस्याङ्गमपि कर्म स्वयं पित्र्यं न भवति, "तेन" प्राचीनावीतादि न भवति ॥ १२॥ इति श्रीहरदत्तमिश्रविरचितायां गृह्यसूत्रवृत्तावनाकुलायामेकविंशःखण्डः ॥

▼ सुदर्शनः

अष्टसु कपालेषु संस्कृतः पुरोडाशो**ऽष्टकपालः** । सः श्रपयितव्य इत्य् **एके** । पुरोडाश इति च प्रसिद्ध आकृतिविशेषः तेन लौकिकेन प्रकारेण पाक औपासने एव ॥१३॥

इति श्रीसुदर्शनाचार्यविरचिते गृह्यतात्पर्यदर्शने एकविंशः खण्डः ॥

▼

⑤

>

अष्टाकपाल इत्येके ॥

# २२ ०१ पार्वणवदाज्यभागान्तेऽञ्जलिनोत्तरयाऽपूपाज्जुहोति②

पार्वणवदाज्यभागान्ते ऽञ्जलिनोत्तरया ऽपूपाज्जुहोति १

यां जना᳚ः प्रति॒-नन्द॑न्ति॒
रात्रिं॑ धे॒नुम् इ॑वाय॒तीम् ।
सं॒व॒त्स॒रस्य॒ या पत्नी॒ *(एकाष्टका)*
सा नो॑ अस्तु सुमङ्ग॒ली
स्वाहा॑ ।

▼

⑤

>

▼ Oldenberg

1. 2 After the ceremonies down to the Ājyabhāga oblations have been performed in the same way as at the fortnightly sacrifices, he makes with his joined hands oblations of the cake with the next (verse, II, 20, 27).

▼ हरदत्तः

प्रतिष्ठिताभिधारणान्ते कृते अग्नेरुपसमाधानाद्याज्यभागान्तं कृत्वा पार्वणवदवदानकल्पेनापूपादुत्तरयर्चा अञ्जलिना **जुहोति** "यां जनाः प्रतिनन्दन्ती"त्येतया । सामर्थ्यादुपस्तरणाभिघारणयोरवदानस्य चान्यः कर्ता । आज्यभागान्तवचनं तन्त्रविधानार्थम् । एतदेव ज्ञापकं न पित्र्यमेतत्कर्मेति । अन्यथा यथा मासिश्राद्धेऽष्टकायां च यत्नाभावेऽपि तन्त्रं प्रवर्तते, पित्र्येषु यत्नाभावेऽपि तन्त्रं प्रवर्तते इत्युक्तत्वात्, तथात्रापि सिद्धं स्यात् । पार्वणवद्वचनं अञ्जलिहोमानामधर्मग्राहकत्वात् अवदानकल्पप्राप्त्यर्थं अञ्जलिनापि जुह्वत् पार्वणवदवदानकल्पेन जुहोतीति । सादनप्रोक्षणसंमार्जनान्यञ्जलेर्न भवन्ति ॥१॥

▼ सुदर्शनः

ततः **पार्वणवदग्नेर्** उपसमाधानाद्यग्निमुखान्ते, स्वकीयेनावदानधर्मेणापूपात्पुरोडाशाद्वावदाय उत्तरयर्चा "यां जनाः प्रतिनन्दन्ति" इत्येतया अञ्जलिना जुहोति । अञ्जलेस्तु "येन जुहोति" इत्यादिसंस्कारलेपाञ्जनमुपस्तरणाभिगारणहविरवदानानि च विप्रतिषेधादन्यः कुर्यात् । स्विष्टकृतं तु दर्व्यैव जुहोति, नाञ्जलिना ; विकृतौ चोद्यमानो धर्मः प्रधानार्थो भवतीति न्यायात् । न च वाच्यमौपकार्यस्याङ्गत्वात् प्राधान्यमेव नास्तीति ; यतोऽस्यापि स्वाङ्गापेक्षया प्राधान्यमस्त्येव । अत एव "मन्द्रं दीक्षणीयायामनुब्रूयात्" (आप.श्रौ. १०-४-११.) इति वाङ्नियमस्सोमाङ्गभूतदीक्षणीयाप्रधानमात्रार्थः न तदङ्गप्रयाजाद्यर्थोऽपि । तथा "ततस्तूष्णीमाग्निहोत्रं जुहोति" (आप.श्रौ.५-१७-६.) इति तूष्णीकत्वमाधानाङ्गभूतस्य नैयमिकाग्निहोत्रविकृतेः प्रधानस्यैव धर्मः न तदङ्गानामपीति । औपकार्यस्य चौषधिहविष्कत्वादेव सिद्धस्य तन्त्रस्य पुनर्वचनं एतत्स्थानापन्नदधिहोमेऽपि प्राप्त्यर्थमित्युक्तमेव ॥१॥

▼

⑤

>

पार्वणवदाज्यभागान्तेऽञ्जलिनोत्तरयाऽपूपाज्जुहोति।

# २२ ०२ सिद्धश्शेषस्तमष्टधा कृत्वा②

सिद्धश् शेषस् तमष्टधा कृत्वा ब्राह्मणेभ्य उपहरति २

▼

⑤

>

▼ Oldenberg

2. 3 The rest (of the cake) he makes ready, divides (it) into eight parts and offers it to the Brāhmaṇas.

▼ हरदत्तः

तन्त्रस्य शेषस्**सिद्धो** भवति अविकृत इत्यर्थः । अञ्जलिना जुहोतीत्युभयं विशेषः स्विष्टकृति न भवतीतियर्थः । तेन स्विष्टकृतमवदानकल्पेन दर्व्या हुत्वा समिधमेकविंशतिमाधाय जयादि प्रतिपद्यते ॥२॥ "तेन सर्पिष्मता ब्राह्मणम्" इत्येकस्य भक्षणे प्राप्तेऽष्टाभ्य उपहारो विधायते । तत्र ये ब्राह्मणाः श्वोभूते भोक्तारः तेभ्यो निवेद्योपवसति ॥३॥

▼ सुदर्शनः

अपूपस्य **शेषस्सिद्धः उपहरति** प्राशनार्थमिति चानुवादः, **तं** शेषं सर्पिष्मन्तमष्टधा कृत्वा अष्टभ्यो **ब्रह्मणेभ्य** इति विधातुम् । तेनेह ब्राह्मणैकत्वबाधः । केचित्—सिद्धः शेषः इति सूत्रच्छेदः । सिद्धोऽविकृतस्तन्त्रस्य शेषः । तेन दर्व्या होमस्स्विष्टकृतः, जयादि प्रतिपद्यत इति च सिद्धमिति-तेषां तमष्टधेत्यत्र तमपूपमिति व्यवहितस्य परामर्शो भवेत् । एवमौपकार्यं कृत्वा मासिश्राद्धवद्धोक्तृभ्यो ब्राह्मणेभ्यो निवेदयेत् । श्वोऽष्टकाश्राद्धं भविष्यतीति भेदः ॥२॥

▼

**⑤**

>

सिद्धश्शेषस्तमष्टधा कृत्वा ब्राह्मणेभ्य उपहरति ।

# २२ ०३ श्वोभूते दर्भेण②

श्वोभूते दर्भेण गामुपाकरोति पितृभ्यस्त्वा जुष्टामुपाकरोमीति ३

▼

**⑤**

>

▼ Oldenberg

3. On the following day he touches a cow with a Darbha blade, with the words, 'I touch thee agreeable to the Fathers.'

▼ हरदत्तः

दर्भेणेत्येकत्वमविवक्षितम् । **गां** स्त्रियं, **जुष्टाम्** इतिलिङ्गात् । पुरस्तात्प्रतीचीं तिष्ठन्तीं, श्रौते तथा दर्शनात् । पित्र्यं चाष्टकाकर्म, **पितृभ्यस्त्वा जुष्टाम्** इतिदर्शनात् । पित्र्येषु यत्नमन्तरेणापि तन्त्रं प्रवर्तते इति पुरस्तादुक्तम् । तत आज्यभागान्ते तन्त्रे कृते उपाकरणादेः प्रवृत्तिः । अत्र प्रमाणं वक्ष्यामः । "अपरपक्षस्यापराह्णः श्रेयानि"त्येष च कालः । सर्वत्र प्राचीनावीतम् ॥३॥

▼ सुदर्शनः

अथ **श्वोभूते** अष्टम्याम् । ब्राह्मणान् गृहमानीयेत्याद्यग्निमुखान्तं सर्व मासिश्राद्धवत् कृत्वा, अथ **दर्भेणै**केन **गां** स्त्रियं "पितृभ्यस्त्वा जुष्टाम्" उपाकरोमि, इत्यनेन मन्त्रेणोपाकरोति ॥३॥

▼

**⑤**

>

श्वोभूते दर्भेण गामुपाकरोति पितृभ्यस्त्वा जुष्टामुपाकरोमीति ।

# २२ ०४ तूष्णीम् पञ्चाज्याहुतीर्हुत्वा②

तूष्णीं पञ्चाज्याहुतीर् हुत्वा

## श्वोभूते वपाहोममन्त्रः⑤

तस्यै वपां श्रपयित्वोपस्तीर्णाभिघारितां मध्यमेनान्तमेन वा पलाशपर्णेनोत्तरया जुहोति ४

वह॑ व॒पां जा॑तवेदः पि॒तृभ्यो॒
यत्रै॒नान् वे॑त्थ॒ निहि॑तान् परा॒के*(=दूरे)* ।
मेद॑स॒ः कूल्या॒*(=नद्या)* उप॒ तान् क्ष॑रन्तु
स॒त्या ए॑षाम् आ॒शिष॑स् सन्तु॒ कामै॒स्
स्वाहा॑ ।

▼

⑤

>

▼ Oldenberg

4. 4 Having silently offered five Ājya oblations, and having cooked, the omentum of the (cow), and performed the 'spreading under' and the sprinkling over (of Ājya), he sacrifices (the omentum) with the next (verse, II, 20, 28) with a Palāśa leaf from the middle or the end (of the stalk).

▼ हरदत्तः

तूष्णीमित्यनुच्यमाने सम्प्रदानाभावे होमानिवृत्तेः देवताकल्पनायां प्राप्तायां या एताः पाशुबन्धिक्यः पश्वाहुयः "उपाकृत्य पञ्च जुहोती"ति विहिताः ता एता इति विज्ञायेत । ततश्च मन्त्रेष्वपि प्राप्तेषु तूष्णीं इत्युक्तम् । एवं ब्रूवन् एतद्दर्शयति श्रौतस्य पशेरावृताऽस्यापि पशोस्संस्कार इति । तेन "पुरस्तात् प्रत्यञ्चं तिष्ठन्तम्" इत्येवमादयो विशेषा इहापि भवन्ति । **तस्या** इति वचनं तस्या वपाया एवात्र चोदितो विशेषो यथा स्यात् श्रपणादि, नावदानमित्येवमर्थम्, तेन मांसौदनादेर्मासिश्राद्धवदन्यस्मिन्नग्नौ संस्कारः । आज्यग्रहणमनर्थकम् । अपिवोत्तरया जुहोतीतिवत् सिद्धम्, तत् क्रियते ज्ञापकार्थम्, एतत् ज्ञापयति– आज्यभागान्ते तन्त्रे कृते पशोरुपाकरणादीति । कथं कृत्वा ज्ञापकम्? सर्वत्र प्रधानाहुतिषु तान्त्रिकस्य हविषस्सधर्मकस्यानेकत्वे सति विशेषणं दृश्यते—स्थालीपाकादन्नादाज्याहुतिरिति, तदिहापि दृष्टम् । तत् ज्ञापयति— तान्त्रिकेणैवाज्येनाहुतयो हूयन्त इति । उपाकरणस्य चैतासां चानन्तर्यं दृश्यते "उपाकृत्य पञ्च जुहोती"(तै.सं.३-१-५.)ति । तस्मादाज्यभागान्ते पशोरुपाकरणमिति सिद्धं भवति । एवं पञ्चाज्याहुतीर्हुत्वा तूष्णीं संज्ञप्य वपाञ्च वपाश्रपणीभ्यां तूष्णीमुद्धृत्य औपासने श्रपयित्वाभिघार्य बर्हिषि प्रतिष्ठाप्य पुनरभिघार्य ततस्तामुपस्तीर्णाभिघारितां मध्यमेनान्तमेन वा पलाशपर्णेन जुहोति **उत्तरयर्चा** "वह वपाम्" इत्येतया । पर्णस्य वपाश्रपण्योश्च पात्रैस्सह सादनादि भवति ॥४॥

▼ सुदर्शनः

**तूष्णीं** स्वाहाकारेणापि विना **पञ्चाज्याहुतीर्जुहोति**, मन्त्रप्राप्त्यभावात् । देवता चासां प्रजापतिरेव । **तस्यै** वपामित्यादि व्याख्यातम् । **उत्तरया** "वह वपाम्" इत्येतया ॥४॥

▼

⑤

>

तूष्णीं पञ्चाज्याहुतीर्हुत्वा तस्यै वपां श्रपयित्वोपस्तीर्णाभिघारितां मध्यमेनान्तमेन वा पलाशपर्णेनोत्तरया जुहोति ।

# २२ ०५ माँसौदनमुत्तराभिः②

माँसोदनमुत्तराभिः ५

यां जना॑ः प्रति॒-नन्द॑न्ति॒
रात्रिं॑ धे॒नुम् इ॑वाय॒तीम् ।
सं॑व॒त्स॒रस्य॒ या पत्नी॒ *(एकाष्टका)*
सा नो॑ अस्तु सुमङ्ग॒ली॥

इ॒यम् *(उषाः)* ए॒व सा या प्र॑थ॒मा व्यौच्छ॑द्*(←उछीँ विवासे)*
अ॒न्तर् अ॒स्याञ् *(पृथिव्यां)* च॑रति॒ *(आदित्यम्)* प्रवि॑ष्टा ।
व॒धूर् ज॑जान नव॒-गज्*(गा)* जनि॑त्री॒
त्रय॑*(←अग्निरे् एकः अश्विनौ द्वौ वपादेवाः)* एनाम् महि॒मान॑स् सचन्ते*(=भजन्ते)* ॥

*(मध्यमस्थाना द्युस्थाना चेति द्वे उषसौ)*

छन्द॑स्वती उ॒षसा॒*(सौ)* पेपि॑शाने*(=दीप्यमाने)*
समा॒नयँ योनि॒म् *(आदित्यं)* अनु॑ स॒ञ्चर॑न्ती ।
सूर्य॑पत्नी॒ वि च॑रतꣳ प्र-जान॒ती
के॒तुङ् कृ॑ण्वा॒ने अ॒जरे॒ भूरि॑रेतसा*(सौ)* ॥

ऋ॒तस्य॒ पन्था॒म् अनु॑ *(कार्यभेदात्)* ति॒स्र आगु॒स्
त्रयो॑ घ॒र्मासो॒ अनु॒ ज्योति॒षा ऽगुः॑ ।
प्र॒जाम् एका॒ रक्ष॒त्य्, ऊर्ज॒म् एका॑
व्र॒तम् एका॑ रक्षति देवयू॒*(=याजका)*नाम् ॥

ए॒का॒ष्ट॒का॑ प॑श्यत॒ दोह॑माना॒म्
अन्नं॑ मा॒ँसव॑द् घृ॒तव॑त् स्व॒धाव॑त् ।
तद् ब्रा॑ह्म॒णैर् अ॑तिपूतम् अ॑न॒न्तम् अ॑क्ष॒य्यम्
अ॒मुष्मि॑ल्ँ लो॒के स्फीतिं॑ गच्छतु मे पि॒तृभ्यः॒
स्वाहा॑ ।

औ॒लू॒ख॒ला*(=उलूखलाः)* ग्रावा॑णो॒ घोष॑म् अक्रत
ह॒विः कृ॒ण्वन्तः॑ परिवत्स॒रीण॑म् ।
ए॒का॒ष्ट॒के सु॑प्र॒जा वी॒रव॑न्तो
व॒यँ स्या॑म॒ पत॑यो रयी॒णाम्॥

ए॒का॒ष्ट॒का तप॑सा॒ तप्य॑माना
संवत्स॒रस्य॒ पत्नीं॑ दुदु॒हे प्रपी॑ना ।*(४)*
तं दोह॒म् उप॑जीवाथ*(=उपजीवत)* पि॒तर॑स्
स॒हस्र॑-धारम् अ॒मुष्मि॑ल्ँ लो॒के
स्वाहा॑ ॥ (20)

▼

### ⑤

>
▼ Oldenberg

5. (He sacrifices) boiled rice together with the meat (of the cow) with the next (verses, II, 20, 29-35),

▼ हरदत्तः

(हुतायां वपायां पशोर्विशसनं कारयित्वा अन्वष्टकार्थं........गृहेषु श्रपयित्वा अन्यानि च हविष्यौदनादीनि तान्यभिघार्य बर्हिषि प्रतिष्ठाप्य पुनरभिघार्य दर्व्या जुहोत्यवदानकल्पेन । नात्र सकृदुपघातकल्पः । स्विष्टकृति विप्रतिषेधात् । आज्येऽभावात् मांसपिष्टौदनयोश्च भावात् । तत्र) मांसौदनम् **उत्तराभिः** यां जनाः प्रतिनन्दन्ति" इत्येताभिः सप्तभिः । मांसमिश्र ओदनो **मांसौदनः** । होमकाले च मिश्रणम् । न श्रपणकाले । पक्तिवैषम्यात् । अस्मिन् कर्मणि अष्टादशहोममन्त्राः समाम्नाताः । ऋचो दश यजूंष्यष्टौ । तत्राद्या ऋगपूपार्था । वपार्थोत्तरा । उत्तरादिभिरिति स्त्रीलिङ्गनिर्देशः । पिष्टान्नमुत्तरयेति वक्ष्यति । तेन सप्तभिर्ऋग्भिर्मांसौदनस्य होमः ॥५॥

▼ सुदर्शनः

मांसमिश्र ओदनो **मांसौदनः**। तं **उत्तराभिः** "यां जनाः प्रतिनन्दन्ति" इत्यादिभिस्सप्तभिर्जुहोति । इदं चेह वक्तव्यम्– वपाहोमान्ते गोर्विशसनं कारयित्वाऽन्वष्टकाब्राह्मणभोजनव्यञ्जनार्थं मांसमवशिष्य, इतरत् कृत्स्नं लौकिकप्रकारेण श्रपयित्वा, तदेकदेशं मासिश्राद्धवत्

ब्राह्मणभोजनार्थादन्नाद्धोमार्थमुद्धृतेऽन्ने संसृज्य, तेनैव मांसमिश्रेणौदनेन जुहोतीति । न च मांसौदनयोस्सहपाकश्शङ्कनीयः, गोरालम्भात् प्रागेव होमार्थान्नस्योद्धृतत्वात्, मांसौदनयोः पक्तिवैषम्याच्च ॥५॥

▼

⑤

>

माँसौदनमुत्तराभिः ।

# २२ ०६ पिष्टान्नमुत्तरया पिष्टेन②

पिष्टान्नमुत्तरया ६

*(एकाष्टके!)* उ॒क्थ्यं॑श् चास्य् अतिरा॒त्रश् च॑
साद्य॒स्क्रीश॒*(=सद्यस्क्र-क्रतुः)* छन्दं॑सा स॒ह ।
अ॒पू॒प॒-घृ॒ताहु॑ते॒ नम॑स् ते
अस्तु माँस-पि॒प्प॒ले॒*(=फले)*
*(तयोरन्यः पिप्पलं स्वाद्वत्ति इति दर्शनात्)*
स्वाहा॑ ।

▼

⑤

>
▼ Oldenberg

6. Food prepared of meal with the next (verse, II, 21, 1),

▼ हरदत्तः

पिष्टेन कृतमन्नं तस्य पयसि श्रपणम् **उत्तरयर्चा** "उक्थ्यश्चे"त्येतया जुहोति ॥६॥

▼ सुदर्शनः

पिष्टेन कृतमन्नं **पिष्टान्नं** पयसि शृतं प्रसिद्धम् । तद् **उत्तरया** "उक्थ्यश्च" इत्यनया जुहोति । इह च ब्राह्मणभोजनाद्यर्थमवश्यं पिष्टान्नं श्रपयितव्यम् । शृताच्च होमार्थं भेदेन पूर्वमेवोद्धरणम् । मांसौदनस्य पिष्टान्नस्य च पार्वणवत्स्वकीयोऽवदानधर्मः । पलाशपर्णं चेह वपाहोममात्रे । अन्यद्दर्व्यैव ॥६॥

▼

⑤

>

पिष्टान्नमुत्तरया।

# २२ ०७ आज्याहुतीरुत्तराः②

आज्याहुतीरुत्तराः ७

भूः- पृ॒थि॒व्य्(व्या) अ॑ग्निना॑+ऋ॒चा ऽमुं मयि॒ काम॒ं नियु॑नज्मि॒ स्वाहा॑ ।
भुवो॑- वा॒युना॒ ऽन्तरि॑क्षेण॒ साम्ना॒ ऽमुं मयि॒ काम॒ं नियु॑नज्मि॒ स्वाहा॑ ।
स्वर्- दिवा॑ ऽऽदि॒त्येन॒ यजु॑षा॒ ऽमुं मयि॒ काम॒ं नियु॑नज्मि॒ स्वाहा॑ ।(५)

ज॒नद्(=व्याहृतिविशेषो यस् सामस्वपि श्रूयते। नारायणानुवाके तु जनः इति विसर्जनीयान्तं पठ्यते ॥)
अ॒द्भिर् अथ॑र्वाङ्गि॒रोभि॑र् अ॒मुं मयि॒ काम॒ं नियु॑नज्मि॒ स्वाहा॑ ।

रो॒च॒नाय॑ +अ॒जि॒राय(←अज गतिक्षेपणयोः) +अ॒ग्नये॑ दे॒व-जा॑तवे॒(=ज्ञात्रे) स्वाहा॑ ।
के॒तवे॒(=ज्ञात्रे) मन॑वे॒ ब्रह्म॑णे दे॒व-जा॑तवे॒(=ज्ञात्रे) स्वाहा॑ ।

स्व॒धा स्वाहा॑ ।
अ॒ग्नये॑ कव्य॒वाह॑नाय स्व॒धा स्वाहा॑ ।

▼

⑤

>
▼ Oldenberg

7. Then the Ājya oblations (indicated by the) next (Mantras, II, 21, 2-9).

▼ हरदत्तः

उत्तरैर्मन्त्रैः "भूः पृथिव्यग्निनर्चे"त्यादिभिः अष्टाभिराज्यस्य जुहोतीत्यर्थः ॥७॥

▼ सुदर्शनः

उत्तरमन्त्रकरणिका **आज्याहुतीर्** अष्टौ जुहोतीत्यर्थः । ते च "भूः पृथिव्यग्निना" इत्यादयः यजूरूपाः ॥७॥

▼

⑤

>

आज्याहुतीरुत्तराः।

# २२ ०८ स्विष्टकृत्प्रभृति②

स्विष्टकृत्प्रभृति समानमापिण्डनिधानात् ८

▼

⑤

>
▼ Oldenberg

8. (The rites) from the Sviṣṭakṛt down to the offering of the Piṇḍas are the same (as at the Śrāddha).

▼ हरदत्तः

**स्विष्टकृत्प्रभृति पिण्डनिधानान्तं** कर्म कृत्स्नं मासिश्राद्धवदिहापि कर्तव्यमित्यर्थः । अत्र मांसौदनात् पिष्टाच्च स्विष्टकृत्, ततो जयादि । अथ ब्राह्मणानामुपवेशनं हस्तेषूदपात्रानयनमलङ्कारः । ततस्"सर्वमुत्तरैरभिमृशेद्" इत्यादि "ग्रासवरार्ध्यं प्राश्नीयात्" इत्येवमन्तम् । एतदेवास्मिन्नहनि भोजनं, नान्यत् । आरब्धे चाभोजनमासमापनादिति । पञ्चयज्ञाश्च लुप्यन्ते ॥८॥
▼ सुदर्शनः

**स्विष्टकृदादि** तन्त्रशेषं सर्वाभिमर्शनादि च प्रदक्षिणीकृत्येत्येवमन्तं ब्राह्मणभोजनं, पिण्डनिधानं, ग्रासवरार्ध्यं प्राश्नीयादित्येवमन्तं, सर्वं पदार्थजातं मासिश्राद्धवदिहापि कर्तव्यमेवेत्यर्थः । तत्र च मांसौदनात् पिष्टान्नाच्च स्विष्टकृते सहावदानमिति भेदः ॥८॥
▼

**⑤**

>

स्विष्टकृत्प्रभृति समानमापिण्डनिधानात् ।

# २२ ०९ अन्वष्टकायामेवैके②

अन्वष्टकायामेवैके पिण्डनिधानमुपदिशन्ति ९

▼

**⑤**

>
▼ Oldenberg

> 9. Some (teachers) prescribe the Piṇḍa offering for the day after the Aṣṭakā.

▼ हरदत्तः

न पिण्डनिधानमित्युच्यमानेऽन्वष्टकायामपि पिण्डनिधानं न स्यात् । अष्टका प्रकृता । तत्र कः प्रसङ्गो यदन्वष्टकायां न स्यात् । एवं तर्हि एतत् ज्ञापयति—विकल्पोऽत्र विधिरयम् । अतः कृत्स्नस्य कर्मणो विषयो भवति सापूपस्य सान्वष्टकस्येति । तेन दध्यञ्जलिः कृत्स्नैकाष्टकाकरणात् विकल्प्यते सापूपेन सान्वष्टकेनेति केचित् । वयं तु ब्रूमः— अष्टकायामकृतायां भोजनमस्य न भवतीत्येतदर्थमेव वचनमन्वष्टकायां यत् पिण्डदानं तदिह......नास्मिन् कर्मणि पृथक्कर्तव्यमिति ॥९॥

▼ सुदर्शनः

या श्वोभूतोऽन्वष्टकेति विधास्यते तस्याम् **अन्वष्टकायामेव पिण्डनिधानं** पिण्डप्रदानं नाष्टकायाम् **इत्येके** आचार्या **उपदिशन्ति** । केचित्—न पिण्डनिधानमेके इति वक्तव्ये अन्वष्टकायामेवैक इत्येवं वचनमेतज्ज्ञापयति–विकल्पोऽत्र विधीयमानः कृत्स्नस्य कर्मणः सापूपहोमस्य सान्वष्टकस्य विषये भवतीति । तेन दधिहोमः कृत्स्नेनान्वष्टकान्तेनाष्टकाकर्मणा विकल्प्यत इति । केचित्तु— अन्वष्टकायां यत्पिण्डनिधानं, तदेवास्य, न पुनस्तदस्मिन् प्रदेशे पृथक्कर्तव्यमिति वचनव्यक्त्या कर्मणोऽसमाप्तत्वसूचनम् । तेनान्वष्टकायामकृतायां न कर्तुर्भोजनं, नापि पञ्चमहायज्ञा इति । वस्तुतस्तु भाष्यकारेणात्रार्थविशेषस्यानुक्तत्वात्, "अन्वष्टकोभयोरपि पक्षयोर्" इति वक्ष्यमाणत्वात्, अवान्तरप्रयोगस्य समाप्तेस्स्पष्टत्वाच्च, "अन्वष्टकायामेवैक" इत्येषोऽन्वष्टकायामेव पिण्डनिधानं नाष्टकायामिति फलाभिप्रायो व्यपदेश इति मन्तव्यम् ॥ अथ यज्ञोपवीतप्राचीनावीतयोर्विवेकः– औपकार्ये च मांसौदनहोमेषु चादितश्चतुर्षु, षष्ठे च पिष्टान्नहोमे च, आज्यहोमेषु चादितष्षट्सु, दधिहोमं चाघारादिषु च यज्ञोपवीतं, मन्त्राणां देवलिङ्गत्वात् । अन्यत्र प्रकृतिवत् प्राचीनावीतमेव । ननु चात्र कलियुगे धर्मज्ञसमयाद्गोरालम्भो निषिद्धः । तेन यद्यपि "मांसौदनमुत्तराभिः" इत्यत्र हविरुपसर्जनीभूतमांसाभावेऽपि केवलौदनहविष्कहोमैः प्रधानान्तरसहितैः अष्टकाधिकारसिद्धेरुपपत्तिः ; तथापि वपाहोमे स्वरूपस्यैवाभावान्न युज्यते । मैवम्, प्रमाणबलेन कस्मिंश्चित् प्रधाने निषिद्धेऽपि प्रधानान्तरैरेव विषयप्रत्यभिज्ञानादधिकारसिद्धेरुपपन्नत्वात् । अत एव दर्शपूर्णमासयोः "नासोमयाजी सन्नयेत्" (तै.सं. २-५-५.), "नासोमयाजिनो ब्राह्मणस्याग्नीषोमीयः पुरोडाशो विद्यते" (आप.श्रौ.) इति निषिद्धयोरपि सान्नाय्याग्नीषोमयोस्तद्व्यतिरिक्तैरेव प्रधानैरधिकारसिद्धिः । इयांस्तु भेदः— क्वचिच्छ्रुतिर्निषेधिका, क्वचिद्धर्मज्ञसमय इति । धर्मज्ञसमयोऽपि वेदवत् प्रमाणम् । अथवा–आज्यमेव वपामांसयोस्स्थाने प्रयोक्तव्यम् । "आज्येन शेषं संस्थापयेत्" इति पात्नीवते दर्शनात्, "आज्यस्य प्रत्याख्यायमवद्येत्" (तै.सं.३-१-३.) इति दर्शनाच्च । प्राप्तिस्तु नित्यत्वादेवाष्टकायाः कृत्स्नायाः । यद्वा—गोस्स्थाने छाग एवालब्धव्यः, प्रस्तुतसमानयोगक्षेमे "ऐन्द्राग्नं पुनरुत्सृष्टमालभेत" (तै.सं.२-१-१०.) इत्यत्र गोः पुनरुत्सृष्टस्य स्थाने "पुनरुत्सृष्टश्छागः" इति भरद्वाजसूत्रदर्शनात् । अपि वात्यन्तलघुरपि दधिहोमपक्षः कलियुगे व्यवस्थितो द्रष्टव्यः । प्रमाणं तु त्रैविद्यवृद्धाश्शिष्टा एव ॥९॥

▼

⑤

>

अन्वष्टकायामेवैके पिण्डनिधानमुपदिशन्ति ।

# २२ १० अथैतदपरन् दध्न②

अथैतदपरं दध्न एवाञ्जलिना जुहोति यया *(ऋचा)* ऽपूपम् १०

▼

⑤

>

▼ Oldenberg

10. Here (follows) another (way for celebrating the Aṣṭakā sacrifice). He sacrifices curds with his joined hands in the same way as the cake.

▼ हरदत्त-प्रस्तावः

एवं मुख्यकल्पमुपदिश्य, अथानुकल्पमुपदिशन्ति—

▼ हरदत्तः

एवमष्टकायां मुख्यः कल्पो दर्शितः । अथानुकल्पः **यया** ऋचा जुहोति "यां जना" इत्येतया तया दध्नः पूर्णना**ञ्जलिना** जुहोति । तन्त्रस्य विधानात् अञ्जलिना होमत्वाच्चापूर्वो दध्यञ्जलिः । **अञ्जलिनेति** वचनात् दर्व्या निवृत्तिः । तन्त्रद्वयञ्च न भवति । कः पुनरस्य कालः ? अष्टमी । पूर्वाह्णे च क्रिया, दैवत्वात् । प्रातर्होमानन्तरं औपासनमुपसमाधाय सम्परिस्तीर्य तूष्णीं समन्तं परिषिच्य दध्नाञ्जलिं पूरयित्वा "यां जना" इति जुहोति । न स्विष्टकृत् । पुनरपि तूष्णीं परिषेचनम् । अन्ये तु पुरस्तात्तन्त्रं स्विष्टकृत् चेच्छन्ति, न जयादीन् । अत्र मूलं मृग्यम् । एष कालः, आचार्यप्रवृत्तित्वात् । एषा ह्येवानुकल्पेष्वाचार्यस्य प्रवृत्तिः । तद्यथा– समावर्तन्ते तूष्णीमेव तीर्थे स्नात्वेति । दध्यञ्जलिश्चायमष्टकायां ये होमास्तेषां निवर्तकः, तदनन्तरमभिधानात्, नापूपहोमस्य । नान्वष्टकायाः । ब्राह्मणभोजनपिण्डनिर्वापणे च भवतः । होममात्रस्यैवायं दध्यञ्जलिर्निवर्तकः । एवं तर्ह्यत्र वचनं व्यज्यते यज्जुहोति तद्दध्न एवाञ्जलिनेति । (अपर आह—अपूपाष्टकयोर्द्वयोरपि निवर्तकम् । नान्वष्टकायाः । यदि तस्या अपि प्रत्याम्नायः स्यात् तामभिधायायमनुकल्पो वक्तव्यस्स्यादिति । ) अन्ये तु सापूपस्य सान्वष्टकस्य कृत्स्नस्याष्टकाकर्मणो निवर्तको दध्यञ्जलिरिति ॥१०॥

▼ सुदर्शनः

**यया** "यां जनाः" इत्येतया **अपूपं** जुहोति, तया ऋचा **दध्नस्**स्वावदानधर्मेणावदाया**ञ्जलिना जुहोति** । पार्वणवच्चाग्निमुखान्ते दधिहोमः, अपूपहोमवच्चावदानम् । "येन जुहोति तदग्नौ प्रतितप्य" इत्यादिकं लेपाञ्जनं चान्येन कारयितव्यम् । अयं च दधिहोमोऽष्टम्यां पूर्वाह्णे । केचित्— अञ्जलिहोमास्सर्वे अपूर्वाः, नैव तत्र पुरस्तादुपरिष्टात्तन्त्रमिति । अयं चानुकल्पोऽपूपहोमाद्याज्याहुतीरुत्तरा इत्येवमन्तानामेव स्थाने वेदितव्यः, नान्वष्टकाया अपि; आज्याहुत्यन्तं कर्म विधायान्वष्टकायाः प्रागेवानुकल्पस्य विधानात् । तेनोभयोरपि पक्षयोर्नवम्यामन्वष्टका नित्यैव । तेन दधिहोमपक्षेऽन्वष्टका नास्तीति निर्मूलम् । अयं च दधिहोमाविधिर्होमानामेव स्थाने; "दध्न एवाञ्जलिना जुहोती"ति जुहोतिशब्दस्य स्वारस्यात् । तेनास्मिन्नपि पक्षे ब्राह्मणभोजनपिण्डप्रदानयोरावृत्तिः । तस्मात् सप्तम्यां रात्रौ ब्राह्मणान्निमन्त्र्याष्टम्यां होमस्थाने दधिहोमः, ततोऽपराह्णे भोजनादि सर्वमविकृतं, नवम्यामन्वष्टकापीति सिद्धम् ॥१०॥

▼

⑤

>

अथैतदपरं दध्न एवाञ्जलिना जुहोति ययाऽपूपम् ।

# २२ ११ अत एव②

अत *(=अष्टकागाव)* एव यथार्थं मासं शिष्ट्वा श्वोभूतेऽन्वष्टकाम् ११

▼

⑤

>

▼ Oldenberg

11. Having left over from the meat of the (cow, see above, 3. 4) as much as is required, on the day after (the Aṣṭakā) (he performs) the rite of the Anvaṣṭakā.

▼ हरदत्तः

**अत एवा**स्या एव गोरेकाष्टकायामालब्धायां मांसं यस्य यथार्थं यावत्प्रयोजनं शिष्ट्वा श्वोभूते नवम्यामन्वष्टकानाम कर्म कर्तव्यम् । भूयांसमतो माहिषेणेत्यादीनां निवृत्त्यर्थ एवकारः ॥११॥

▼ सुदर्शनः

**श्वोभूते** नवम्याम् **अन्वष्टकाख्यं** कर्म कर्तव्यम् । **अत एव** गोरष्टकायामालब्धायाः **मांसं यथार्थं** यथाप्रयोजनं **शिष्ट्वा** इत्येतत्प्रथमपक्षविषयम् ॥ ११॥

▼

⑤

>

अत एव यथार्थं माँसँ शिष्ट्वा श्वोभूतेऽन्वष्टकाम् ।

# २२ १२ तस्या मासिश्राद्धेन②

तस्या मासिश्राद्धेन कल्पो व्याख्यातः १२

▼

⑤

>

▼ Oldenberg

12. This rite has been explained in the description of the monthly Śrāddha.

▼ हरदत्तः

मासिश्राद्धवदन्वष्टका कर्तव्येत्यर्थः । कल्पातिदेशात् द्रव्यदेवतादि सर्वमिह प्राप्यते । "तत्रान्नस्योत्तराभिर्जुहोती"त्यत्र मांससंसृष्टस्यान्नस्य होममिच्छन्ति । अष्टकायां दर्शनात् । इह च यथार्थं मांसमिति वचनात् । अन्ये मासिश्राद्धातिदेशादन्नस्यैव होममिच्छन्ति । यत्रैव तु कार्ये मासि श्राद्धे मांसं इहापि तत्रैवेति । अत्र केचित्— दध्यञ्जलिपक्षेऽप्यन्वष्टकामिच्छन्ति । मध्ये तस्य विधानात् । यदि ह्यसावन्वष्टकाया अपि प्रत्याम्नायः स्यात् तामप्यभिधाय वक्तव्यं स्यादिति । अत एव यथार्थं मांसं शिष्ट्वा श्वोभूतेऽन्वष्टका तस्या मासि श्राद्धेन कल्पो व्याख्यातः इति पूर्वत्र सम्बन्धः ॥

अथैकोद्दिष्टविधिः शास्त्रान्तरात् । प्रेतमेकमुद्दिश्य यच्छ्राद्धं क्रियते तदेकोद्दिष्टम् । अयुग्मा ब्राह्मणाः एकः त्रयः पञ्चेति । वृध्या फलभूयस्त्वम् । तत्र नाग्नौ करणं, नाभिश्रावणं, न पूर्वं निमन्त्रणं, न दैवं, न धूपो, न दीपो, न स्वधा, न नमस्कारः, उदङ्मुखाः ब्राह्मणाः । सर्वस्मादन्नात्सकृत्सकृदवदाय दक्षिणतो भस्ममिश्रानङ्गारान्निरूह्य तेष्वेव जुहुयात् प्रेतायामुष्मै यमाय च स्वाहेति । प्रेतायेति वचनं प्रेतस्य नामनिर्देशार्थम्—यज्ञशर्मणे यमाय च स्वाहेति प्रयोगमिच्छन्ति । यज्ञशर्मणे प्रेताय यमाय चेत्यन्ये । अमुष्मै तृप्तिरस्त्विति अपां प्रतिग्रहणं विसर्जनं च । अस्ति तृप्तिरिति प्रतिवचनम् । अमुष्मा उपतिष्ठत्वित्यनुदेशनं, आशयेषु च पिंडदानं भोजनस्थान इत्यर्थः । तृप्यस्वेति संक्षालनम् । एतदेकोद्दिष्टं सर्ववर्णानां स्वाशौचान्ते प्रसिद्धम् ॥ अथान्यानि नवश्राद्धमासिकानि त्रैपक्षिकं षाण्मासिकं साम्वत्सरिकमिति । यत्प्रथमं क्रियते तन्नवश्राद्धम् । नवं च तच्छ्राद्धञ्चेति कृत्वा । तस्य वर्णानुपूर्वेण कालः— चतुर्थे पञ्चमे चैव नवमैकादशे तथा । यदत्र दीयते जन्तोः तन्नवश्राद्धमुच्यते ॥ इति ॥ सर्वेषामपि वर्णानां चत्वार्यपि नवश्राद्धानीत्यन्ये । तेषां द्वितीयादिषु नवशब्दो घटते । मासिकानि द्वादश प्रतिमासं मृताहे कर्तव्यानि । आद्यं तु स्वाशौचन्ते । अन्त्यं च सपिण्डीकरणेन सह मृताह एव त्रापक्षिकं षाण्मासिकं द्वितीयादिषु सम्वत्सरेषु प्रतिसम्वत्सरं मृताह एव साम्वत्सरिकमिति षोडशैतान्येकोद्दिष्टानि । साम्वत्सरिके च क्षेत्रजजारजयोः एकोद्दिष्टकल्पस्य च विकल्पः । इतरेषामेकोद्दिष्टमेव । ये नवश्राद्धानां समुच्चयमिच्छन्ति तेषां षोडशैकोद्दिष्टानीत्येषापि प्रसिद्धिर्दुरुपपादा । अत्र पठन्ति— नित्यश्राद्धं मासि मासि अपर्याप्तावृतुं प्रति । द्वादशाहेन वा भोज्या एकाहे द्वादशापि वा ॥ अथ सपिण्डीकरणं सम्वत्सर एकादशे चतुर्थे तृतीये वा मासि त्रिपक्षे अर्धमासे द्वादशे वाऽहनि उपनयनाभ्युदयप्राप्तौ वा । तत्र एकोद्दिष्टस्य मासिश्राद्धस्य च समुच्चयः । प्रेतस्यैकोद्दिष्टं तस्य ये पित्रादयः तेभ्यो मासिश्राद्धं मन्त्रेषु च न कश्चिद्विकारः । यन्मे मातेत्यादिषु यथैव ते पित्रा प्रेतेन पूर्वं प्रयुक्तास्तथैव पुत्रेणापि प्रयोक्तव्याः । पुत्रादन्यस्य च सपिण्डीकरणे नाधिकारः, मासिश्राद्धाभावात् । सपिण्डीकरणस्य च मासिश्राद्धप्रयोगविकारत्वात् । तस्मादपुत्रस्य प्रेतस्य भार्या यावज्जीवमेकोद्दिष्टकल्पेनैव पत्ये मासिश्राद्धं ददाति । पुत्रोऽप्यकृतविवाह एवमेव । विवाहादूर्ध्वं यदा मासिश्राद्धमारभते तदा पितुः सपिण्डीकरणेन सहारभते । अन्ये त्वेतदनुष्ठानं अन्यथापि भवति । तत्र पित्रे प्रेताय पूर्ववद्भस्मनि होमः इतरेभ्योऽन्नादाज्याच्च मासिश्राद्धवत् । पिण्डदाने—मासिश्राद्धवत्पिण्डान् दत्वा तत्समीपे पृथक् स्तीर्णेषु दर्भेषु प्रेताय पिण्डः । पूर्ववदपो दत्वा तस्यान्ते अर्घ्यार्धं पितृपात्रेषु प्रेतपात्रं प्रसेचयेत् "ये समामा" इति द्वाभ्यां पिण्डं पिण्डेषु संसृजेत् । एतत्सपिण्डीकरणम् । एतस्मिन्कृते प्रेतः पितृत्वमापद्यते । चतुर्थश्चानुज्ञापित उत्सृष्टो भवति । अत्र विप्रतिपत्तिः– केचित् प्रपितामहस्य पात्रं पिण्डं चेतरेषु संसृजन्ति । प्रेतशब्देन स एवोच्यते प्रकर्षेण इतः प्रेत इति । स ह्यत्रानुज्ञातो भवति । प्रसिद्धस्त्वाचारः यस्य सपिण्डीकरणं स प्रेतः, तस्यैव च पात्रपिण्डयोरितरेषु संसर्गः । एवमपि प्रपितामहस्यैवानुज्ञेति । मातृसपिण्डीकरणे सा यदि पुत्रिका, आसुरादिविवाहोढा वा ततो मातामहादीनां पिण्डेषु संसर्गः । तत्पिण्डस्येतरत्र श्वश्र्वादि पिण्डेन एकचित्यारूढायास्तु भर्तृपिण्डेनेति केचिद् व्यवस्थापयन्ति । प्रयोगस्तु प्रसिद्धाचारानुरोधेन कर्तव्यः । अत्र केचित्पठन्ति— भ्राता वा भ्रातृपुत्रो वा सपिण्डः शिष्य एव वा । सहपिण्डक्रियाः कृत्वा कुर्यादभ्युदयं ततः ॥ इति ॥ तथा— अपुत्रायां मृतायां तु पतिः कुर्यात्सपिण्डतामिति ॥ अथ नान्दीश्राद्धम्— तत्र बोधायनः अथाभ्युदयिकेषु प्रदक्षिणमुपचारो यज्ञोपवीतं प्रागग्रान् दर्भान्, युग्मान् ब्राह्मणान्, यवैस्तिलार्थः, पृषदाज्यं हविः । सोपयामेन पात्रेण नान्दीमुखाः पितरः प्रीयन्तामित्यपां प्रतिग्रहणं, संसर्जनं च । नान्दीमुखेभ्यः पितृभ्यः स्वाहेत्यग्नौकरणमनुदेशनं च । आशयेषु परिसमूढेषु दर्भेषु पृषदाज्येनानुप्रदानं नान्दीमुखेभ्यः पितृभ्यः स्वधा नमः इति सर्वं द्विर्द्विरिति (बौ.गृ.३-१२-२....५) तत्रैव प्रदेशान्तरे "तेषु भुक्तवत्सु स्वधायै स्थाने "मधु मनिष्ये मधु जनिष्य" इत्येतद्यजुर्जपित्वा नान्दीमुखाः पितरः प्रीयन्तामित्यपो निनयति स्वधैवैषोक्ता भवति । नैकेनाह्ना दैवं पित्र्यं च कुर्वन्ति यस्यैकाह्ना पित्र्यं दैवं च कुर्वन्ति प्रजा हास्य प्रमायुका भवति, तस्मात् पितृभ्यः पूर्वेद्युः क्रियते, परेद्युर्देवानामिति । (बौ.गृ.प.१-३-१०,११.) तथा पुष्पफलाक्षतमिश्रैर्यवैः तिलार्थ उपलिप्य दध्योदनं समप्रकीर्येति । तत्र मासिश्राद्धं सर्वेषां पित्र्याणां प्रकृतिः । अस्माकं विशेषास्तु शास्त्रान्तरादागमयितव्याः । तेन "पूर्वेद्युर्निवेदनम्" इत्यादि सर्वमिहापि भवति । युग्मा ब्राह्मणाः अष्टौ षोडश वा । यद्युष्टौ द्वौ देवेभ्यः पितृभ्यो द्वौ द्वौ । यदि षोडश देवेभ्यश्चत्वारो द्वादश पितृभ्य इत्यादि । यवैस्तिलार्थः मासिश्राद्धे यत् तिलकृत्यमर्घ्यादिषु तदत्र यवैः कर्तव्यः । पुष्पादिभिश्च मिश्रणम्, प्रदेशान्तरे वचनात् । पृषदाज्यं हविः । मांसौदनवत्पृषदाज्यमिश्रमित्येके, केवलमेवेत्यन्ये । सोपयामेनेति येनार्घ्यं प्रदीयते तत्पात्रमन्येन पात्रेणोपयम्येत्यर्थः । नान्दीमुखाः प्रीयन्तामिति । देवेभ्यस्तु विश्वेदेवाः प्रीयन्तामिति । तत्र पितॄणामेकपात्रं, न त्रीणि ; पितृपितामहप्रपितामहविशेषस्यानुपदेशात्, सर्वेषु मन्त्रेषु नान्दीमुखाः पितर इत्युपदेशात् । तस्मादेकमेव पात्रं पितॄणां, देवानां चैकम् । तत्र ब्राह्मणानुपवेश्याग्नेः प्रतिष्ठापनं अर्घ्यपात्रयोश्च । अग्निश्चौपासन एव । विवाहेष्वसंभवात् । अर्घ्यं प्रदाय गन्धादिभिश्चालङ्कृत्यानुज्ञातो हविरुद्धृत्य पृषदाज्येन संसृज्याभिघार्याज्यभागान्ते नान्दीमुखेभ्यः पितृभ्यः स्वाहेत्येकां प्रधानाहुतीं जुहोति केवलेन पृषदाज्येन सौविष्टकृतं द्वितीयं जुहुयादिति । तन्त्रशेषं समाप्य क्लृप्तान्वा प्रतिपूरुषमिति न्यायेनानेन नान्दीमुखेभ्यः पितृभ्यः स्वाहेत्यनेन मन्त्रेण पितृभ्योऽनुदिशति, देवेभ्यस्तु विश्वेभ्यो देवेभ्यः स्वाहेति । मासिश्राद्धे ये होममन्त्राः अनुदेशनमन्त्राश्च तेषां निवृत्तिः । उपस्पर्शनं तु भवत्येव प्रत्याम्नायाभावात् । पृथिवी ते पात्रमित्याशयेषु च परिसमूढेष्विति आशयेषु भोजनस्थानेषु परिसमूढेषु परिसमूहनेन शोधितेषु पृषदाज्यमिश्रेण हविषा पृषदाज्येनैव तावत्पिण्डस्यानुप्रदानं नान्दीमुखेभ्यः स्वधा नम इत्यनेन । एवं सर्वं द्विर्द्विरिति । आसनप्रदानादिषु द्विर्द्विः प्रयत्नः कर्त्तव्य इत्यर्थः । उपलिप्य दध्योदनं सम्प्रकीर्य तत् "ये अग्निदग्धा" इत्यस्मिन् स्थाने भवति । अथ दक्षिणां दत्वा विसर्जनं नान्दीमुखाः पितरः प्रीयन्तामिति । तत उदपात्रसमीपे मधु मनिष्य इति यजुर्जपित्वा विसर्जनमन्त्राभ्यां बर्हिषि पात्रे निनीय्य न्युब्जमिति । एवमेतन्नान्दीश्राद्धं तत्र कर्तव्यं यत्रापरेद्युर्देवयज्यानुष्ठानम् । केचित्वन्यथा पठन्ति च— मातुश्श्राद्धं तु पूर्वं स्यात्पितॄणां तदनन्तरम् । ततो मातामहानां तु वृद्धौ श्राद्धत्रयं विदुः ॥ इति ॥ अस्मिन् पक्षे मात्रादीनां द्वौ द्वौ । एवं पित्रादीनां, एवं मातामहादीनां, देवार्थेद्वावेति विंशतिर्द्विजाः । तथा च मनुनाप्यपरे वाक्ये दर्शितम्— प्रतिवेश्यानुवेश्यौ च कल्याणे विंशतिद्विजे इति । (म.स्मृ.८-३९२.) यात्राभ्युदयश्राद्धं भवति तद्विंशतिद्विजं कल्याणं भवति । पुनश्च पठन्ति— पुंसि जातान्नचौलोपस्नानपाणिग्रहेषु च । अग्न्याधाने तथा सोमे दशस्वभ्युदयस्स्मृतः ॥ इति ॥ प्रयोगश्च–पार्वणश्राद्धवदेव । एतावदत्र नाना युग्मा ब्राह्मणाः प्रदक्षिणमुपचारो यज्ञोपवीतं यवैस्तिलार्थ इति ॥१२॥

▼ सुदर्शनः

तस्या अन्वष्टकायाः कल्पो मासिश्राद्धवत्कर्तव्य इत्यर्थः । कल्पातिदेशात् सर्वमिह द्रव्यदेवतादिकं प्राप्यते । तस्मान्निमन्त्रणादि ग्रासप्राशनान्तं सर्वं मासिश्राद्धवदविकृतं कर्तव्यम् ॥१२॥

▼

⑤

>

तस्या मासिश्राद्धेन कल्पो व्याख्यातः ।

---

1. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

2. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩

3. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

4. 12 seq. Description of the regular form of a Pākayajña.↩

# २६ प्रकीर्णकर्माणि①

# २२ १३ सनिमित्वोत्तरान् जपित्वाऽर्थम्②

सनिम्*(=भिक्षणम्)* इत्वोत्तरान् *("अन्नमिव ते दृशे भूयास"मित्यादीन् सप्त)* जपित्वा ऽर्थं *(=अपेक्षाम्)* ब्रूयात् १३

▼

### ⑤

>

▼ Oldenberg

13. If he goes out in order to beg for something, let him murmur the next (Mantras, II, 21, 10-16) and then state his desire.

▼ हरदत्त-प्रस्तावः

अथावशिष्टानां मन्त्राणां येषु विनियोगस्तानि कर्माणि व्याचष्टे—

▼ हरदत्तः

सन्यर्थं दातारं गत्वा । भिक्षणलभ्यं धनं सनिरित्युच्यते । सनिमित्वा **उत्तरान्**मन्त्रान् "अन्नमिव ते दृशे भूयासम्" इत्यादीन् सप्त जपित्वा । तमर्थं प्रब्रूयात् यदर्थमागतः । सप्तमे मन्त्रे असावित्यत्र प्रदातुर्नामग्रहणं, सम्बुध्या ॥१३॥

▼ सुदर्शनः

**सनिर्**याञ्चा भिक्षणम् । केचित्—भिक्षणलब्धं धनमिति । या सनिः "भिक्षणे निमित्तमाचार्यो विवाहो यज्ञे मातापित्रोर्बुभूर्षार्हतश्च नियमविलोपः" "तत्र गुणान् समीक्ष्य यथाशक्ति देयम्" (आप.ध.२-१०-१,२) इति धर्मशास्त्रेऽवगता, तामुद्दिश्य **इत्वा** गत्वा । **उत्तरान्** मन्त्रान् "अन्नमिव ते दृशे भूयासं" इत्यादीन् सप्त **जपित्वा तमर्थं** प्रयोजनं ब्रूयात्, यं भिक्षेत तं बोधयति "आचार्यार्थं भिक्षामि भवन्तम्" इति । एवमुत्तरेष्वपि भिक्षणनिमित्तेषु विशेषः विवाहार्थमित्यादिः । सप्तमे च मन्त्रे "असा"वित्यत्र समबुद्ध्या दातुर्नामग्रहणम् ॥१३॥

▼

### ⑤

>

सनिमित्वोत्तरान् जपित्वाऽर्थं ब्रूयात्।

# २२ १४ रथं लब्ध्वा②

रथं लब्ध्वा योजयित्वा प्राञ्चमवस्थाप्योत्तरया *(ऽअङ्कौ न्यङ्कौऽइत्येतया)* रथचक्रे अभिमृशति पक्षसी वा १४

▼

### ⑤

>

▼ Oldenberg

14. If he has obtained a chariot, he has the horses put to it, lets it face the east, and touches with the next (verse, II, 21, 17) the two wheels of the chariot or the two side-pieces.

▼ हरदत्त-प्रस्तावः

इदानीं यदि याच्ञया रथादीनि लब्धानि, तदा केन विधिना स्वीकारः? इत्युत्तरे विधये आरभ्यन्ते—

▼ हरदत्तः

यदि रथो लभ्यते ततस्तं लब्ध्वा योजयति कर्मकरैर्युगधुरोः करोति । तं प्राङ्मुखमवस्थाप्य **उत्तरयर्चा** "अङ्कौ न्यङ्कावभित" इत्येतया । रथचक्रे उभे सहाभिमृशति पाणिभ्यामुभाभ्याम् । अथवा **पक्षसी** अभिमृशति । पक्षसी रथस्येति शेषः पार्श्वे फलके इत्यन्ये । नेमी इत्यपरे । सकृदेव मन्त्रः । पाणिभ्यामुभाभ्यामभिमर्शनम् । तथा चाश्वलायनः—"रथमारोक्ष्यन्नाना पाणिभ्यां चक्रे अभिमृशेत् ( आश्व.गृ.२-६-१) इति ॥१४॥

▼ सुदर्शनः

रथश्चेल्लब्धः तं कर्मकरैर्वाहाभ्यां **योजयित्वा**थ तं **प्राञ्चं** प्राङमुखम् **अवस्थाप्य उत्तरया** "अङ्कौ न्यङ्कौ" इत्येतया **रथचक्रे** उभे पाणिभ्यां युगपद् **अभिमृशति** । अपि **वा पक्षसी** ईषे । अन्यथापि पदार्थमाहुः ॥१४॥

▼

⑤

>

रथं लब्ध्वा योजयित्वा प्राञ्चमवस्थाप्योत्तरया रथचक्रे अभिमृशति पक्षसी वा।

# २२ १५ उत्तरेण यजुषाऽधिरुह्योत्तरया②

उत्तरेण यजुषा *(ऽअध्वनामध्वयत्ऽइत्येन)* ऽधिरुह्योत्तरया *(ऽअयं वामश्विमा रथऽइत्येतया )* प्राचीमुदीचीं वा दिशमभिप्रयाय यथार्थं यायात् १५

▼

⑤

>

▼ Oldenberg

15. With the next Yajus (II, 21, 18) he should mount, and drive with the next (verse, II, 21, 19) towards the east or north, and should then drive off on his business.

▼ हरदत्तः

ततः **उत्तरेण यजुषा** "अध्वनामध्वपत्" इत्यनेन । रथं स्वमधिरोहति । ततः **उत्तरयर्चा** "अयं वामश्विना रथ" इत्येतया । प्रचीमुदीचीं वा दिशमभिप्रपाद्य **यथार्थं यायात्** यत्र प्रयोजनं तत्र गच्छेत् । अधिरुह्येति दीर्घपाठश्छान्दसः । एतद्विधानं क्रयादिलब्धस्यापि रथस्य प्रथमारोहणे भवति । द्वितीयादिषु तु न भवति । लब्ध्वेति वचनात् ॥१५॥

▼ सुदर्शनः

तेन **उत्तरेण** "अध्वनामध्वपते" इत्यनेन **यजुषा** रथं स्वयम् **अधिरुह्य** । दीर्घश्छान्दसः । **उत्तरया** "अयं वामश्विना" इत्येतया । **प्राचीमुदीचीं वा दिशमभिप्रयाय** प्रस्थायादृष्टार्थं, ततो **यथार्थं** प्रयोजनानुसारेण **यायान्** गच्छेत् ॥१५॥ केचित्— लब्ध्वेति वचनात् क्रयादिलब्धस्यापि रथादेः प्रथमारोहणे विधिरयं भवतीति । नैतत्; प्रकृतयाच्ञादिना लब्धरथादिविषयत्वेनैवास्य वाक्यस्यार्थवत्त्वोपपत्तेः, "याच्ञया रथादीनि लब्ध्वा" इति भाष्यविरोधाच्च ॥१५॥

▼

⑤

>

उत्तरेण यजुषाऽधिरुह्योत्तरया प्राचीमुदीचीं वा दिशमभिप्रयाय यथार्थं यायात् ।

# २२ १६ अश्वमुत्तरैरारोहेत्②

अश्वमुत्तरैर् *(ऽअश्वोऽसि हयोऽसिऽइत्यादिभिः)* आरोहेत् १६

▼

⑤

>

▼ Oldenberg

16. Let him mount a horse with the next (formulas, II, 21, 20-30),

▼ हरदत्तः

लब्ध्वेत्यनुवर्तते । **उत्तरैर्** एकादशभिः "अश्वोऽसि हयोऽसि" इत्यादिभिः । रथलाभवदश्वलाभो व्याख्यातः ॥१६॥

▼ सुदर्शनः

**अश्वश्**चेद्याच्ञया लब्धः **तमुत्तरैर्** मन्त्रैः "अश्वोऽसि" इत्यादिभिर् **आरोहेत्** ॥१६॥

▼

⑤

>

अश्वमुत्तरैरारोहेत् ।

# २२ १७ हस्तिनमुत्तरया②

हस्तिनमुत्तरया *(ऽहस्तियशसमसीऽत्येतया)* १७

▼

⑤

>

▼ Oldenberg

17. An elephant with the next (formula, II, 21, 31).

▼ हरदत्तः

लब्ध्वाऽऽरोहेदिति वर्तते । **उत्तरया** "हस्तियशसमसी"त्येतया । तत्रासाविति हस्तिनो नामग्रहणम् । अभिनिदधामि नागेन्द्रेति । आरुह्य तूष्णीमङ्कुशाभिधानम् । मन्त्रे चाभिनिदधामीति द्रष्टव्यः । तेन मन्त्रे लिङ्गस्याविरोधः ॥१७॥

▼ सुदर्शनः

पूर्ववद्व्याख्यानम् । **उत्तरया** "हस्तियशसं" इत्येतया । असावित्यत्र च सम्बुद्ध्या ऐरावतेति गजनामग्रहणम् । अत्र यद्यपि "वज्रेणाभिनिदधाम्यसौ" इतिलिङ्गादङ्कुशाभिधानार्थता मन्त्रस्य; तथापि "हस्तिनमुत्तरयाऽऽरोहेत्" इति वाचनिकविनियोगस्य बलवत्त्वात्तदनुसार्येव मन्त्रो व्याख्यातव्यः ॥ १७॥

▼

⑤

>

हस्तिनमुत्तरया ।

# २२ १८ ताभ्याँ रेषणे②

ताभ्याँ *(भूमौ पतितस्य)* रेषणे *(=शरीरोपमर्दे)* पूर्ववत् *(ऽस्योना पृथिवीऽइत्येताभ्यां)* पृथिवीम् अभिमृशेत् १८

## ०८ स्योना पृथिवि⑥

स्योना॑ *(=सुखरूपा)* पृथिवि भव+
अनृक्षरा॑ *(=कण्टकादिरहिता)* निवे॑शनी ।
य॑च्छा नश् श॑र्म सप्र॑थाः *(=सकीर्तिः)* ।

बड् इ॒त्था *(त्थं)* पर्व॑तानाङ् *(→मेघानाम्)*
खि॒द्रम् *(=छिद्रं →छेदनम्)* बि॑भर्षि पृथिवि ।
प्र या भू॑मि प्रवत्वति *(=प्रवणवति)*
म॒ह्ना *(=महिम्ना) (देवादीन्)* जि॒नोषि॑ *(=तर्पयसि)* म॒हि॒नि॒ *(=महति)* ।*(२४)*
*(अत्र देवप्रीत्या वृष्टिरिति चक्रम् उच्यते।)*

▼

⑤

>

▼ Oldenberg

18. 1 If any harm is done him by these two (beasts), let him touch the earth as indicated above.

▼ हरदत्तः

ताभ्यां अश्वहस्तिभ्यां, **रेषणे** शरीरोपमर्दे जाते **पूर्ववत्** हेमन्तप्रत्यवरोहणवत् **पृथिवीमभिमृशेत्** । "स्योना पृथिवि" "बडित्थे"त्येताभ्याम् । पूर्ववदिति न जातकर्म गृह्यते, व्यवधानात् ॥१८॥

▼ सुदर्शनः

**ताभ्यां** तयोरश्वहस्तिनोः । **रेषणे** मरणे सति । **पूर्ववत्** हेमन्तप्रत्यवरोहणवत् "स्योना पृथिवी" इत्येताभ्यां **पृथिवीमभिमृशेत्** । केचित्—ताभ्यां अश्वहस्तिभ्याम् । प्रमादाद्भूमौ पतितस्य रेषणे शरीरोपमर्दे जाते इति ॥१८॥

▼

⑤

>

ताभ्याँ रेषणे पूर्ववत् पृथिवीमभिमृशेत्।

# २२ १९ संवादमेष्यन् सव्येन②

संवादम्*(=ऋणादानादिव्यवहारः)* एष्यन्सव्येन पाणिना छत्रं दण्डञ् चादत्ते १९

▼

**⑤**

>

▼ Oldenberg

19. If he is going to a dispute, he takes the parasol and the staff in his left hand.

▼ हरदत्तः

यत्र स्थानेऽर्थादिनिमित्ते प्रत्यर्थिभिः सम्वदते स **सम्वादः । तमेष्यन्** तत्रापराजयाय **सव्येन पाणिना छत्रं दण्डञ्चादत्ते** । पाणिग्रहणमुत्तरार्थम् । इह तु आदानपरत्वादेव सिद्धम् । तेन फलीकरणहोमः पाणिनैव कर्तव्यः, न पात्रेण अन्यथा मुष्टिशब्दस्य परिमाणवाचित्वस्यापि दर्शनादस्याप्रसङ्गः ॥१९॥

इति श्रीहरदत्तमिश्रविरचितायां गृह्यवृत्तावनाकुलायां द्वाविंशः खण्डः ॥

▼ सुदर्शनः

**सम्वादः** ऋणादानादिव्यवहारः । केचित्—यत्र स्थाने प्रत्यर्थिभिस्संवदत इति । ऋणादानादिव्यवहारं कर्तुमेष्यन् व्यवहारे जयमिच्छन्नित्यर्थः । शेषं व्यक्तम् ॥१९॥ इति श्रीसुदर्शनाचार्यविरचिते गृह्यतात्पर्यदर्शने द्वाविंशः खण्डस्समाप्तः ॥

▼

**⑤**

>

संवादमेष्यन् सव्येन पाणिना छत्रं दण्डं चादत्ते ॥

# २३ ०१ दक्षिणेन फलीकरणमुष्टिमुत्तरया②

दक्षिणेन फलीकरणमुष्टिमुत्तरया *(ऽअव जिह्वकेऽत्येतया )* हुत्वा
गत्वोत्तरां *(ऽआ ते वाचमास्यांऽइत्येताम्)* जपेत् १

▼

**⑤**

>

▼ Oldenberg

1. Having sacrificed, with his right hand, a fist full of chaff with the next (verse, II, 21, 32), he should go away and murmur the next (verse, 33).

▼ हरदत्तः

छत्रदण्डौ सव्येन पाणिना धारयन्नेव **दक्षिणेन** पाणिना फलीकरणानां मुष्टिं जुहोति । **उत्तरयर्च्चा** "अव जिह्वके"त्येतया । तत्रासाविति प्रत्यर्थिनो नामनिर्देशः प्रथमया । होमश्चायमपूर्वः । उपसमाधानं परिस्तरणं तूष्णीमुभयतः पर्युक्षणम् इत्येतावत् । ततस्संवादं गत्वा प्रत्यर्थिनं दृष्ट्वा **जपेत्** । **उत्तराम्**ऋचं "आ ते वाचमास्यां" इत्येताम् । अत्राप्यसाविति प्रत्यर्थिनो नामनिर्देशः सम्बुध्या । अवाचीनेन मुष्टिना होमः । "अवयज इति" लिङ्गात् । दक्षिणेनेति वचनं होमकाले छत्रदण्डयोः सव्येन धारणार्थम् सव्यस्य व्यापृतत्वात् दक्षिणेनैव होमः इति ॥१॥

▼ सुदर्शनः

सव्यपाणिधृतच्छत्रदण्ड एव **दक्षिणेन** पाणिना **फलीकरणमुष्टिमुत्तरया** "अव जिह्वक" इत्येतया स्वाग्नौ जुहोति । "असा"वित्यत्र सोमशर्मेति प्रथमया प्रत्यर्थिनो नामग्रहणम् । यावदुक्तधर्मश्चायं होम इति पूर्वमेवोक्तम् । केचित्—परिस्तरणमुभयतस्तूष्णीं पर्युक्षणं च कर्तव्यम्, मुष्टिना चावाचीनेन होम इति । ततस्संवाददेशं **गत्वा** प्रत्यर्थिनं पश्यन्नुत्तरां "आ ते वाचं" इत्येतां जपेत् । इह च सम्बुध्या नामनिर्देशः प्रत्यर्थिन एव ॥१॥

▼

⑤

>

दक्षिणेन फलीकरणमुष्टिमुत्तरया हुत्वा गत्वोत्तरां जपेत् ।

# २३ ०२ क्रुद्धमुत्तराभ्यामभिमन्त्रयेत②

क्रुद्धमुत्तराभ्याम् *(ऽया त एषा रराट्याऽइत्येताभ्याम्)* अभिमन्त्रयेत विक्रोधो भवति २

▼

⑤

>

▼ Oldenberg

2. Over an angry person let him recite the two next (formulas, II, 22, 1. 2); then his anger will be appeased.

▼ हरदत्तः

**उत्तराभ्यां** "या त एषा रराट्या" इत्येताभ्याम् । तत्र मन्त्रयोर्लिङ्गे विशेषाभावात् क्रुद्धमिति लिङ्गमविवक्षितम् । तेन स्त्रियामपि भवति । शूद्रादिष्वपि भवति । नेत्यन्ये । क्रुद्धस्य दर्शने नैमित्तिकमिदं नियमेन कर्तव्यमिति प्राप्त आह—विक्रोधो भवतीति । यस्य क्रोधविगमं चिकीर्षति तत्र कर्तव्यमित्यर्थः । क्रोधश्चात्मविषयः । परविषयो वा ॥२॥

▼ सुदर्शनः

यदि क्रुद्धः प्रत्यर्थी वा व्यवहारद्रष्टा वा, तत्क्रोधशान्तिं चासाविच्छति, तदा **उत्तराभ्यां** "या त एषा" इत्येताभ्यां **क्रुद्धम्** इतरं **वाभिमन्त्रयेत** । अनेन चाभिमन्त्रणेन क्रुद्धो **विक्रोधो** विगतक्रोधो भवति । फलविधिश्चायम् । नार्थवादमात्रं, सूत्रकारेण बद्धत्वात् ॥२॥

▼

⑤

>

क्रुद्धमुत्तराभ्यामभिमन्त्रयेत विक्रोधो भवति ।

# २३ ०३ असम्भवेप्सुः परेषाँ②

असंभवेप्सुः*(=मैथुनं विवारयिषुः)* परेषां*(=परनराणाम्)* स्थूलाऽऽढारिका*(=गौलिका सरीसृपविशेषः, या शतचरणा नाम)*जीवचूर्णानि कारयित्वोत्तरया *(ऽअव ज्यामिव धन्वनऽइत्येतया)* सुप्तायास् सम्बाध*(=योनौ)* उपवपेत् ३

▼

⑤

>

▼ Oldenberg

3. 2 One who wishes that his wife should not be touched by other men, should have big living centipedes ground to powder, and should insert (that powder) with the next (formula, II, 22, 3), while she is sleeping, into her secret parts.

▼ हरदत्तः

( **असंभवेप्सुः**, अमैथुनेप्सुः) । सम्भवो मैथुनम् । श्रूयते च—"काममाविजनितोः सम्भवामेति (तै.सं.२-५-५) । तदभावोऽसम्भवः । परेषां पुरुषाणां असम्भवमिच्छन् **आढारिका** सरीसृपविशेषः । शतचरणा वा । सा च द्विविधा स्थूला तन्वी च । अरण्येषु स्थूला, अन्यत्र तन्वी । तत्र स्थूलायां जीवन्त्यां चूर्णानि कारयति कर्मकर्तैव । कारयित्वा तानि यदा भार्या स्वपिति तदा तस्यास्**सम्बाधे** उपस्थे उपवपेत् । **उत्तरया** "अव ज्यामिव धन्वन" इत्येतया । एवं कृते संबाध उपभोगयोग्यो न भवति व्यभिचारशङ्कायामिदम् । वेश्याविषयं वा ॥३॥

▼ सुदर्शनः

यः प्रवत्स्यन् गृहे वा प्रजातन्तुं रक्षितुं स्वभार्यायां परपुरुषशुक्लस्यासम्भवमिच्छति स **परेषामसम्भवेप्सुः** । तस्योपायोपदेशः— स्थूलाढारिकाया जीवन्त्याश्चूर्णान्यन्येन कारयति । आढारिका गौलिका सरीसृपविशेषः, या शतचरणा नाम । सा च द्विविधा, ग्राम्या आरण्या च । तयोरारण्या स्थूला ग्राम्या तन्वी । **जीवचूर्णानि** चाश्मादिना महता प्रहारेण मार्यमाणायां भवन्ति । ततस्तानि चूर्णान्य् **उत्तरया** "अव ज्यामिव धन्वनः" इत्येतया **सुप्तायाः सम्बाधे** योनावुपवपेत् । एवं कृते सम्बाध उपभोगयोग्यो न भवति ॥३॥

▼

⑤

>

असम्भवेप्सुः परेषाँ स्थूलाढारिकाजीवचूर्णानि कारयित्वोत्तरया सुप्तायास्सम्बाध उपवपेत्।

# २३ ०४ सिद्ध्यर्थे बभ्रुमूत्रेण②

*(सम्भोगयोग्यता)*सिद्ध्यर्थे बभ्रु*(गो)*मूत्रेण *(योनिं)* प्रक्षालयीत ४

▼

⑤

>

▼ Oldenberg

4. For success (in the generation of children) let him wash (his wife) with the urine of a red-brown cow.

▼ हरदत्त-प्रस्तावः

अथ यदा परपुरुषशङ्काऽपैति तदा स्वशुक्लसम्भवसिध्यर्थे भैषज्यमुच्यते—

▼ हरदत्तः

**सिध्यर्थे** कार्यसिद्धेः प्रार्थनायां उपभोगयोग्यत्वे चिकीर्षित इत्यर्थः । तदा **बभ्रुमूत्रेण** सम्बाधस्य **प्रक्षालनं** कर्तव्यम् । इदमत्र भैषज्यमित्यर्थः । बभ्रूः कपिलवर्णा गौः ॥४॥

▼ सुदर्शनः

कपिलायाः गोमूत्रेण प्रक्षालयीत सम्बाधम् ॥४॥
▼

⑤

>

सिद्ध्यर्थे बभ्रुमूत्रेण प्रक्षालयीत ।

# २३ ०५ सिद्ध्यर्थे यदस्य②

सिद्ध्यर्थे यदस्य गृहे पण्यं स्यात् तत उत्तरया *(ऽयदहं धनेनेऽत्येतया)* जुहुयात् ५

▼

⑤

>
▼ Oldenberg

5. For success (in trade) let him sacrifice with the next (verse - II, 22, 4 - some portion) from the articles of trade which he has in his house.

▼ हरदत्तः

**अस्य** कुटुम्बिनो गृहे **यत्** द्रव्यं **पण्यं** क्रय्यं तस्य सिध्यर्थे अर्धापकर्षादिना सिद्धिस्स्यादित्येवमर्थम् । तस्मात् द्रव्यात् किञ्चिदादाय **उत्तरयर्चा** "यदहं धनेने"त्येतया जुहुयात् । सिद्धिर्भवति । अत्र क्षारलवणादीनामपि होमो भवति । उक्तानि यथोपदेशं काम्यानि । तत्र द्रवद्रव्येषु दर्वी । इतरेषु हस्तः । फलीकरणहोमवच्चापूर्वार्थम् । अस्येति वचनं अस्य गृहे यत्पण्यं तस्यान्येनापि तद्धितैषिणा होमो यथा स्यादिति । न च मन्त्रेऽहमित्यस्य विरोधः ; स एव भूत्वा स करोतीति । गृहे पण्यमिति वचनात् क्षेत्रादिविषये न भवति । पुनः सिध्यर्थवचनं अस्य कर्मान्तरत्वज्ञापनार्थम् । अन्यथा पूर्वस्यैव विकल्पविधिस्सम्भाव्येत ॥५॥

▼ सुदर्शनः

क्रय्यद्रव्यानुसारेणाज्यभागान्तमग्निमुखान्तं वा कृत्वा, तस्मात्पण्यादादायो**त्तरया** "यदहं धनेन" इत्येतया **जुहुयात्** । अत्र तत इति वचनान्न प्राणिद्रव्याद्धोमः, ततोऽवदानेऽङ्गवैकल्यापत्तेः । केचित्—अस्येति वचनादन्येन तद्धितैषिणा होतव्यम् । मन्त्रे चाहमित्यस्य न विरोधः, स एव भूत्वा स जुहोतीति ॥५॥

▼

⑤

>

सिद्ध्यर्थे यदस्य गृहे पण्यँ स्यात्तत उत्तरया जुहुयात् ।

# २३ ०६ यङ् कामयेत②

यं कामयेत नायम् अविच्छिद्येतेति जीव*(गो)*विषाणे *(पूरयितुम्)* स्वं मूत्रमानीय सुप्तमुत्तराभ्यां *(ऽपरि त्वा गिरेरऽमित्येताभ्यां)* त्रिः प्रसव्यं परिषिञ्चेत् ६

▼

⑤

>

▼ Oldenberg

6. 3 If he wishes that somebody be not estranged from him, let him pour his own urine into the horn of a living animal, and sprinkle (it) with the next two (verses, II, 22, 5. 6) three times from right to left around (the person) while he is sleeping.

▼ हरदत्तः

**यं** भृत्यं मत्तोऽयं न छिद्येतोति **कामयेत** नापगच्छेदिति यावज्जीवं मदधीन एव स्यादिति तत्र तत्कामे जीवतो गोर्विषाणं स्वयं पतितमादाय स्वं मूत्रमानीय तेन तं भृत्यं सुप्तं **उत्तराभ्यां** "परि त्वा गिरेरम्" इत्येताभ्यां त्रिः प्रसव्यं परिषिञ्चेत् । जीववचनं मृतस्य निवृत्यर्थम् । गौरित्युपदेशः । आनीयेति वचनात् पूर्वमन्यस्मिन् पात्रे मूत्रयित्वा शौचञ्च कृत्वा ततो विषाणोपनयनम् । परिषीतोऽसि इति मन्त्रलिङ्गात् स्त्रीष्विदं न भवति ॥६॥

▼ सुदर्शनः

**यं** भर्तारं सपत्न्यामन्यस्यां वा इन्द्रियदौर्बल्यादनुरक्तं या स्त्री **कामयेत** अयं भर्ता **मत्** मत्तो **न च्छिद्येत** अस्य मय्यविच्छेदेन स्नेहस्स्यादिति सा स्त्री **जीवविषाणे** जीवन्त्या गोर्विषाणे बलात्पातिते स्वं **मूत्रमानीय** तेन भर्तारं **सुप्तं उत्तराभ्यां** "परि त्वा गिरेरमहं" इत्येताभ्यां **त्रिः प्रसव्यं परिषिञ्चेत्** । अत्र चानीयेति वचनात्पूर्वमन्यस्मिन्पात्रे मूत्रयित्वा शौचं च कृत्वा ततो विषाणेऽवनयनम् ॥६॥ केचित्—भृत्यविषयमेतत् स्वामिनः कर्मेति ।

▼

⑤

>

यं कामयेत नायं मच्छिद्येतेति जीवविषाणे स्वं मूत्रमानीय सुप्तमुत्तराभ्याँस्त्रिः प्रसव्यं परिषिञ्चेत् ।

# २३ ०७ येन पथा②

येन पथा दासकर्मकराः पलायेरन् तस्मिन्न् इण्वान्य् *(दारुमयानि निगलानि)* उपसमाधायोत्तरा *(ऽआवर्तन वर्तयेऽत्येताः)* आहुतीर् जुहुयात् ।

▼

⑤

>

▼ Oldenberg

7. In a path which servants or labourers use to run away, he should put plates (used for protecting the hands when holding a hot sacrificial pan) on (a fire), and should offer the oblations (indicated by the) next (Mantras, II, 22, 7-10).

▼ हरदत्त-प्रस्तावः

अथ भृत्यादीनां पलायितानां पुनरागमनकामस्य कर्माह—

▼ हरदत्तः

अथ भृत्यानां पलायितानां निवृत्तिमिच्छतः कर्म ये कुर्वन्ति दासा अन्ये वा ते दासकर्मकराः **येन यथा पलायेरन्** तस्मिन् पथि **इण्वानि** दारुमयानि निगलानि **उपसमाधाय** प्रज्वाल्य तस्मिन्नग्नावुत्तराश्चतस्र आहुतीर्जुहुयात् "आवर्तन वर्तये"त्येताः । तत्र चतुर्णामिण्वानां मार्गे, क्रमेण भेदेनोपसमाधानं मन्त्राश्च क्रमेणेति केचित् । अन्ये सकृदेव बहूनामिण्वानामुपसमाधानं होमश्च तत्रैवेति । एकस्य द्वयोश्च पलायनेऽपि भवत्येवायं होमो न बहूनामेव । एकशोषनिर्देशात् दासकर्मकरश्च दासकर्मकरौ च दासकर्मराश्च दासकर्मकरा इति । अनिश्चिते चार्थे बहुवचनं प्रयुज्यते, यथा—कति भवतः पुत्रा । इति । मन्त्रेषु च "परिक्रोशो व" इत्यादिबहुवचनमविवक्षितम्, देवताभिधानपरत्वात् । अयमप्यपूर्वो होमः । सर्वेष्व् एतेषु यथा सम्भवम् अग्निर् औपासन एव ॥७॥

▼ सुदर्शनः

दासाश्च भृतिकर्मकराश्च **दासकर्मकराः** । ते **येन पथा पलयेरन्** तस्मिन्पथि भूमावेव **इण्वानि** लोकप्रसिद्धानि दारुमयान्य् **उपसमाधाय** निधाय तेष्वेवानग्नौ "पदे जुहोति" इतिवत् उत्तराः "आवर्तन वर्तन"इत्याद्युत्तरमन्त्रकरणिकाश्चतस्र आज्याहुतीर्जुहुयात् अपूर्व चेदं कर्म । अत्र यद्यपि दासकर्मकरा इति बहुवचनं, तथाप्येकस्य द्वयोर्वा पलायनेऽपि भवत्येवेदं कर्म । केचित्—पथीण्वान्यग्नौ प्रज्वाल्य, तत्राग्नावेव होम इति ॥७॥
▼

⑤

>

येन पथा दासकर्मकराः पलायेरन् तस्मिन्निण्वान्युपसमाधायोत्तरा आहुतीर्जुहुयात् ।

# २३ ०८ यद्येनं②

यद्येनं वृक्षात् फलमभिनिपतेद् वयो *(=पक्षी)* वा ऽभिविक्षिपेद् अवर्षतर्क्ये वा बिन्दुर् अभिनिपतेत् तदुत्तरैर् *(ऽयदि वृक्षादिऽत्यादिभिः)* यथालिङ्गं प्रक्षालयीत ८

▼

⑤

>
▼ Oldenberg

8. If a fruit falls on him from a tree, or a bird befouls him, or a drop of water falls on him when no rain is expected, he should wipe that off with the next (Mantras, II, 22, 11-13), according to the characteristics (contained in these Mantras).

▼ हरदत्तः

**एनं** स्नातकं **वृक्षात्** प्रच्युतफलं **यद्यभिनिपतेत्** शिरसि प्रदेशान्तरे वा । **वयः** पक्षी काकादिः एनमभिविक्षिपेत् शिरसि प्रदेशान्तरे वा । यदि वा अवर्षतर्क्ये वर्षं यत्र न तर्क्येत तस्मिन् काले देशे वा **बिन्दुः** अपां स्तोकः अभिनिपतेत् तदङ्गं **उत्तरैः** "यदि वृक्षादि"त्यादिभिः यथालिङ्गं अद्भिः **प्रक्षालयेत्** । "यदि वृक्षा"दिति फलस्य । "ये पक्षिण" इति वयसः । "दिवो नु मा बृहत" इति बिन्दोः । यथालिङ्गवचनं त्रयेऽपि मन्त्राः एकस्मिन्निमित्ते मा भूवन्निति । तीर्थाद्यतिक्रमवत् स्यात् प्रसङ्गः, विधेर्वलीयस्त्वात् ॥८॥

▼ सुदर्शनः

**यद्येनं** द्विजं **वृक्षात्फलं अभि** उपरि नीचैरकस्मात् **पतेत्,** यदि **वा वयः** पक्षी पक्षाभ्यामेनम् **अभिविक्षिपेत्** उपरि पक्षवातेन धुनुयात्, यदि **वा अवर्षतर्क्ये** अभ्रशून्ये नभसि तस्माद् **बिन्दुर्**अपां स्तोकः अभिनिपतेत्, व्याख्यातम् । तत्फलनिपातादिभिरुपहतं शरीराङ्गम् **उत्तरैर्**मन्त्रैर्यथालिङ्गं **प्रक्षालयीत** । तत्र "यदि वृक्षात्" इति फलाभिपाते, "ये पक्षिणः" इति वयोऽभिविक्षेपे, "दिवो नु मा बृहतः" इति बिन्द्वभिनिपाते । यथालिङ्गमिति तु वचनमेकैकस्मिन्निमित्ते त्रिभिस्त्रिभिः प्रक्षालनं मा भूदिति ॥९॥

▼

⑤

>

यद्येनं वृक्षात्फलमभिनिपतेद्वयो वाऽभिविक्षिपेदवर्षतर्क्ये वा बिन्दुरभिनिपतेत्तदुत्तरैर्यथालिङ्गं प्रक्षालयीत ।

# २३ ०९ आगारस्थूणाविरोहणे मधुन②

आगारस्थूणाविरोहणे*(=अङ्कुरजनने)*, *(अगारे)* मधुन उपवेशने, कुप्त्वां*(चुल्ल्यां, अम्बरीषे)* कपोतपददर्शने, ऽमात्यानां *(अमा सह वसन्तीति पुत्रभ्रात्रादयः, तेषाम् बहूनाम्)* शरीर-रेषणे*(=व्याधौ मरणे वा)*, ऽन्येषु चाद्भुतोत्पातेष्व्
अमावास्यायां निशायां *(= चतुर्धाविभक्तायां रात्रेः द्वतीये भागे)* यत्रापां न शृणुयात्
तदग्नेरुपसमाधानाद्याज्यभागान्त उत्तरा *(ऽइमं मे वरुण, तत्वायामिऽइत्येकादश)* आहुतीर् हुत्वा जयादि प्रतिपद्यते ९

▼

⑤

>

▼ Oldenberg

9. If a post of his house puts forth shoots, or if honey is made in his house (by bees), or if the footprint of a dove is seen on the hearth, or if diseases arise in his household, or in the case of other miracles or prodigies, let him perform in the new-moon night, at dead of night, at a place where he does not hear the noise of water, the rites from the putting (of wood) on the fire down to the Ājyabhāga oblations, and let him offer the oblations (indicated in the) next (Mantras, II, 22, 14-23), and enter upon the performance of the Jaya and following oblations.

▼ हरदत्त-प्रस्तावः

अथाद्भुतप्रायश्चित्तम्—

▼ हरदत्तः

अथाद्भुतोत्पातप्रायश्चित्तम् । **अद्भुतमपूर्वम्** अदृष्टचरम् । तस्य (अद्भुतस्यादृष्टचरस्य) **उत्पात** उपजनः यद्वा ऊर्ध्वभवा अद्भुतविशेषा एवोत्पाताः दिव्या आन्तरिक्ष्याश्च । रात्राविन्द्रधनुर्लोहिनी द्यौरादित्ये कीलदर्शनमित्यादयः । तस्मिन् पक्षेऽद्भुतशब्देन भौमान्युच्यन्ते गोबलीवर्दन्यायेन । द्वन्द्वश्च समासः । तत्रोदाहरणरूपेण कानिचिदद्भुतानि दर्शयति— **अगारस्थूणेति । विरोहणं** अङ्कुरोपजननम् । अगारग्रहणात् आत्मीयेष्वपि शूद्रगृहादिषु न भवति । **मधुन उपवेशने** अगार इत्येव । **कुप्तुः** चुल्लीभ्राष्टमित्यनर्थान्तरम् । **कपोतस्य** पक्षिण आरण्यस्य **पद**दर्शने पचनागारे तस्मिन् प्रविष्ट इत्यर्थः । अमात्याः पुत्रादयः । तेषां बहूनां युगपत् शरीर**रेषणे** । व्याधौ मरणे च । अन्येषु चैवंप्रकारेषु वल्मीकादिषु इन्द्रधनुरादिषु च । अन्येष्विवितिवचनात् अमात्यानां शरीरेषणमप्यद्भुतरूपमेव गृह्यते । नैकस्य द्वयोर्वा रेषणे कालभेदे च न भवति । अत्र प्रायश्चित्तम्— **अमावास्यायां निशायां** चतुर्धाविभक्तायां रात्रेः द्वतीयो भागो निशा । यत्र प्रदेशे अपां कुम्भैरुदधानेष्वानीयमानानां शब्दं न शृणुयात् तत्र प्रदेशेऽग्नेरुपसमाधानाद्युत्तरा आहुतय एकादश इमं मे वरुण इत्यादयः । **प्रजापत** इति "प्रजापते न त्वदेतानी"त्येषा गृह्यते । प्रसिद्धेः, न "प्रजापते त्वं निधिपा" इत्येषा । प्रजापते न त्वदिति च हुत्वा प्रधानाहुतर्जुहुयात् इति तन्त्रशेषं प्रतिपद्यते । आज्यभागान्त इत्येवं तन्त्रसमाप्तौ सिद्धायां अग्नेरुपसमाधानादिवचनं अग्निमात्रस्योपसमाधानार्थम् । तेन औपासनाभावे लौकिकेऽपि भवति । एवंप्रकाराणामेतेषां नैमित्तिकानां दृष्टफलानां च पण्यहोमादीनां अन्यस्मिन्नप्यग्नौ प्रवृत्तिप्रदर्शनार्थं सर्वान्ते अग्निविधानार्थो यत्नः कृतः । जयादि वचनमानन्तर्यार्थम् । प्रधानाहुत्यनन्तरं जयाद्येव प्रतिपद्यते, न सूत्रान्तरदृष्टा आहुतयोऽस्मिन् तन्त्रे होतव्याः इति । काः पुनस्ताः? कपोतश्चेदगारमुपहन्यादनुपतेद्वा देवाः कपोतः इति प्रत्यृचं जुहुयात् जपेद्वा । (आश्व. ३-७-७.) इत्याश्वलायनः । जयादिवचनेनैव तन्त्रसमुच्चयप्रतिषेधः । ............तदपि प्रायश्चित्तं विकल्पेन भवति पृथक्तन्त्र इति । तत्रापि शम्याः परिध्यर्थे । अस्यापि प्रायश्चित्तस्यास्मिन्नेव शास्त्र उपदिष्टत्वात् ॥९॥

▼ सुदर्शनः

तत्राद्भुताः स्वभावतः पूर्वमभूतास्सन्तो भवन्तीति । **उत्पाता** इति तु ऊर्ध्वं भवन्ति अव्यक्तावस्थायां प्राप्नुनुवन्ति । अद्भुताश्चोत्पाताश्चेति द्वन्द्वसमासः । शब्दभेदस्तु भौमदिव्यभेदाभिप्रायः । तत्र दिव्या उत्पाता रात्राविन्द्रधनुरादित्यकील इत्यादयः । भौमांस्त्वद्भुतानगारस्थूणेत्यादिना स्वयमेवोदाहरति । अगारस्य स्थूणाः **अगारस्थूणाः, तासां विरोहणे** अङ्कुरोपजनने । स्थूणाग्रहणं चान्यस्यापि गृहसम्बन्धिनो वंशादेरनिखातस्यापि प्रदर्शनार्थम्, निमित्तगतविशेषणत्वात् । **मधुन उपवेशन** इत्यगार एव । उपसर्जनस्याप्यगारशब्दस्य योग्यत्वेन बुद्ध्या विभज्य सम्बन्धः ; आरामादिष्वनद्भुतत्वात् । **कुप्तुः** चुल्ली भ्राष्ट्रमम्बरीषमित्यनर्थान्तरम् । तस्यां कुप्त्वां पचनागार इत्यर्थः । **कपोतस्या**प्यारण्यस्य पक्षिविशेषस्य **पददर्शने** । कुप्त्वामित्यपि प्रदर्शनार्थम् ; अन्तर्गृहेऽप्यस्याद्भुतत्वात् । अमा सह वसन्ती**त्यमात्याः** एकपात्रभोजनाः पुत्रभ्रात्रादयः तेषां बहूनां सन्ततं **शरीर**रेषणे शरीरनाशने मरण इत्यर्थः । केचित्—अमात्यानां युगपद्व्याधावपीति । **अन्येषु चाद्भुतोत्पातेषु** उक्तेभ्योऽन्येषु गृहमध्ये वल्मीकजननादिष्वद्भुतेषु च दृष्टेषु सत्सु तत्सूचितदुरितशान्त्यादिकामोऽमावास्यायां **निशायां रात्र्यां** मुहूर्तद्वयादूर्ध्वम् । केचित्–द्वितीये याम इति । **यत्रापां** वहन्तीनां **शब्दं न शृणुयात्** केचिद्—कुम्भैरुदधानेष्वानीयमानास्विति । तथाभूते देशे **अग्नेरुपसमाधानादि** तन्त्रं प्रतिपद्यते । तन्त्रविधानं चास्य आज्यहविष्ट्वात् । आज्यभागान्ते इति त्वर्थकृत्यप्रतिषेधार्थम् । उत्तरा आहुतीः "इमं मे वरुण, तत्त्वा यामि" इत्येकादशाहुतीर्हुत्वा वचनबला**ज्जयादि प्रतिपद्यते ।** अत्र प्रजापतय इति प्रतीकेन "प्राजापत्या व्याहृतीः" इतिवत् "प्रजापते न त्वदेतानि" इत्येषैव गृह्यते ॥९॥

▼

⑤

>

आगारस्थूणाविरोहणे मधुन उपवेशने कुप्त्वां कपोतपददर्शनेऽमात्यानां शरीररेषणेऽन्येषु चाद्भुतोत्पातेष्वमावास्यायां निशायां यत्रापां न शृणुयात्तदग्नेरुपसमाधानाद्याज्यभागान्त उत्तरा आहुतीर्हुत्वा जयादि प्रतिपद्यते ।

# २३ १० परिषेचनान्तङ् कृत्वाऽभिमृतेभ्य②

परिषेचनान्तं कृत्वा
ऽभिमृतेभ्य उत्तरया *(ऽइमं जीवेभ्यऽ इत्येतया)* दक्षिणतो ऽश्मानम् *(मृत्युवारणार्थम्)* परिधिं दधाति १०

▼

⑤

>

▼ Oldenberg

10. Having performed (the ceremonies) down to the sprinkling (of water) round (the fire), he puts up towards the south with the next (verse, II, 22, 24) a stone as a barrier for those among whom a death has occurred.

End of the Āpastambīya-Gṛhya-sūtra.

▼ हरदत्तः

अथ अमात्यानां शरीररेषणे इत्यस्मिन्नद्भुते कश्चिद्विशेषः येषां पूर्वापरा अन्वञ्चः प्रमीयन्ते ते **अभिमृतास्**तेभ्यस्तदर्थं तेषां मृत्युशमनार्थं उत्तरं कर्म होममिमं कृत्वा परिषेचनान्तेऽश्मानं **परिधिं** अन्तर्धानं मृत्त्युनिवारणार्थं प्रतिष्ठापयति **उत्तरयर्चा** "इमं जीवेभ्य" इत्येतया । अभ्यासः प्रश्नसमाप्तिद्योतकः । परिधिमिति वचनात् तस्याश्मनः प्रच्यावनं न कार्यम्, तत्रैव प्रतिष्ठितो भवति ॥१०॥ इति श्रीहरदत्तमिश्रविरचितायां गृह्यवृत्तावनाकुलायां त्रयोविंशः खण्डः ॥ समाप्तश्चोत्तमोऽष्टमः पटलः ॥

॥ संपूर्णाऽनाकुला वृत्तिः ॥

▼ सुदर्शनः

ततः **परिषेचनान्तं** तन्त्रशेषं करोति । शम्याः परिध्यर्थे इति पूर्वमेवोक्तम् । केचित्– आज्यभागान्त इत्यनेन तन्त्रप्राप्तौ सिद्धायामग्नेरुपसमाधानादिवचनमग्निमात्रस्योपसमाधानार्थम् । तेनौपासनशून्यस्येदं कर्म लौकिकेऽपि भवति । अन्यानि चैवंप्रकाराणि दृष्टफलानि नैमित्तिकानि पण्यहोमादीनि, अस्य सर्वान्तेऽग्निविधानस्य सर्वार्थत्वावगमादिति । **अभिमृतेभ्य** इत्यादिना "अमात्यानां शरीररेषणे" इत्यस्मिन्नद्भुते कश्चिद्विशेषोऽभिधीयते । **अभिमृता** अभिमुख्येन मृता योग्यतया जीवन्त एव अमात्यानां सन्ततमरणदर्शनेन स्वयमपि मरणाद्भीता इत्यर्थः । तेभ्यस्तदर्थं सन्ततमरणभयनिवृत्त्यर्थं **उत्तरया** "इमं जीवेभ्यः" इत्यनया **परिधिं** मृत्योरन्तर्धानभूतं **अश्मानं दक्षिणतो** निदधाति । एतच्च

तन्त्रशेषान्ते, कृत्वेति क्त्वाप्रत्ययबलात् । केचित्—निदधाति प्रतिष्ठापयति । परिधिवचनाच्च तस्याश्मनः प्रच्यावनं न कर्तव्यमिति । **दधाति ददातीति**द्विरुक्तिः प्रश्नसमाप्तिसूचनार्था ॥१०॥ इत्थं सुदर्शनार्येण गृह्यतात्पर्यदर्शनम् । कृतं भाष्यानुसारेण यथामति यथाश्रुतम् ॥ अत्रानुक्तं दुरुक्तं वा मतेर्मान्द्याच्छ्रुतस्य वा । सन्मार्गप्रवणानां नः क्षन्तुमर्हन्ति पण्डिताः ॥ इति श्रीसुदर्शनाचार्यविरचिते गृह्यतात्पर्यदर्शने त्रयोविंशः खण्डः ॥ अष्टमश्च पटलस्समाप्तः ॥

॥ समाप्तेयं गृह्यसूत्रव्याख्या ॥

▼

⑤

>

परिषेचनान्तं कृत्वाऽभिमृतेभ्य उत्तरया दक्षिणतोऽश्मानं परिधिं दधाति ।

---

1. Comp. Śrauta-sūtra I, 11, 6 seqq.↩
2. 1, 1-11. The Paribhāṣās for the Pākayajñas.↩
3. 7-10. Comp. 7 with 2, 8 with 3, 9 with 4, 10 with 6.↩

# Appendix - +Dyugangā द्युगङ्गा①

## Goals ध्येयानि②

Dyugangā (https://rebrand.ly/dyuganga) is a work group dedicated to the promotion of ever-victorious Hindu ideals and arts. It's current focus is in presenting important texts for easy study.

The texts may be presented as

- audio files (eg: MahAbhArata audio book project),
- as web pages (eg: Apastamba-gRhya-sUtra, Apastamba-dharma-sUtra, EkAgnikANDa commentary, manu-smRti, raghuvaMsha, more kalpa-texts, tattva-texts, universal subhAShita DB),
- as dictionaries (eg: stardict)
- ebooks distributed on various platforms (eg: book-pub, amazon, google play).

You may subscribe to mail-streams for past and future announcements (dg, hv, san).

The choice of material heavily depends on the special interests of its current lead (vedas, kalpa, purANa-s).

### संस्कृतानुवादः③

द्युगङ्गा नाम कार्यसंस्था ऽजेयानां भारतीयपुरुषार्थपरिकल्पनानाञ्च हिन्दुककलानाञ्च प्रसारणाय वर्तते। तदीयस् स्थूलोद्देशोऽधुना प्रमुखग्रन्थानाम् अध्ययनसौकर्याय प्रस्तुतिः। ततो ग्रन्थसङ्कलनकेन्द्रम् इति वक्तुमलम्।

ग्रन्थानाम् प्रस्तुतिर् ध्वनिसञ्चिकाभिस् स्यात् (यथा महाभारतपारायणप्रसारणे), जालक्षेत्रपृष्ठैर् वा (यथा विश्वासस्य मन्त्रटिप्पनीषु, एकाग्निकाण्डटीका), शब्दकोशैर् वाऽपि (stardict)।

सद्यश्च ग्रन्थाः संस्थाग्रण्या रुचिविशेषम् अनुसृत्य चिताः - वेदाः, इतिहासपुराणानि, कल्पवेदाङ्गग्रन्थाश् चेति।

## Contribution दानम्③

Donations and sponsorship are welcome (use contact page) - they help offset operating costs (worker payments mainly ~1L/mo) and plan further projects. Project-specific sponsorship opportunities are occasionally advertised on our social media accounts and on certain mailing lists.

# Table of Contents


गृह्यसूत्राणि 13

०१ सामान्यपरिभाषाः 14

०१ ०१ अथ कर्माण्य् 14

०१ ०२ उदगयन-पूर्वपक्षाहः-पुण्याहेषु 15

०१ ०३ यज्ञोपवीतिना कार्याणि 16

०१ ०४ प्रदक्षिणम् प्रदक्षिणम् 16

०१ ०५ पुरस्तादुदग्वोपक्रमः अनियमे 17

०१ ०६ तथाऽपवर्गः तेषामपवर्गोऽपि 18

०१ ०७ अपरपक्षे पित्र्याणि 18

०१ ०८ प्राचीनावीतिना 19

०१ ०९ प्रसव्यम् 19

०१ १० दक्षिणतोऽपवर्गः 20

०१ ११ निमित्तावेक्षाणि नैमित्तिकानि 21

०२ अग्निमुखनिरूपणम् 23

०१ १२ अग्निमिध्वा 23

०१ १३ प्रागुदगग्रैर्वा उक्ताः 23

०१ १४ दक्षिणाग्रैः पित्र्येषु 24

०१ १५ दक्षिणाप्रागग्रैर्वा तत्र 25

०१ १६ उत्तरेणाग्निन् 25

०१ १७ सकृदेव मनुष्यसंयुक्तानि 26

०१ १८ एकैकशः पितृसंयुक्तानि 27

०१ १९ पवित्रयोस्सँस्कार आयामतः 27

०१ २० अपरेणाग्निम् पवित्रान्तर्हिते 29

०१ २१ ब्राह्मणन् दक्षिणतो 29

०१ २२ आज्यं विलाप्यापरेणाग्निम् 30

०२ ०१ येन जुहोति 31

०२ ०२ शम्याः परिध्यर्थे 32

०२ ०३ अग्निम् 33

०२ ०४ पैतृकेषु समन्तमेव 34

०२ ०५ इध्ममाधायाघारावाघारयति 34

०२ ०६ अथाज्यभागौ जुहोत्यग्नये 35

०२ ०७ यथोपदेशम् प्रधानाहुतीर्हुत्वा 36

०२ ०८ पूर्ववत् परिषेचनमन्वमँस्थाः 38

०२ ०९ लौकिकानाम् पाकयज्ञशब्दः 39

०२ १० तत्र ब्राह्मणावेक्षो 39

०२ ११ द्विर्जुहोति द्विर्निमार्ष्टि 40

०३ वैवाहिकविषयाः 43

०२ १२ सर्व-ऋतवो विवाहस्य 43

०२ १३ सर्वाणि पुण्योक्तानि 43

०२ १४ तथा मङ्गलानि 44

०२ १५ आवृतश्चास्त्रीभ्यः प्रतीयेरन् 45

०२ १६ इन्वकाभिः प्रसृज्यन्ते 45

०३ ०१ मघाभिर्गावो गृह्यन्ते 46
०३ ०२ फल्गुनीभ्यां व्यूह्यते 46
०३ ०३ याङ् कामयेत 47
०३ ०४ इन्वकाशब्दो मृगशिरसि 48
०३ ०५ निष्ट्याशब्दस्स्वातौ छन्दसि 48
०३ ०६ विवाहे गौः 49
०३ ०७ गृहेषु गौः 49
०३ ०८ तया वरमतिथिवदर्हयेत् 50
०३ ०९ योऽस्यापचितस्तमितरया 50
०३ १० एतावद्गोरालम्भस्थानमतिथिः 51
०३ ११ सुप्तां रुन्दन्तीम् 52
०३ १२ दत्ताङ् गुप्ताम् 52
०३ १३ नक्षत्रनामा नदीनामा 53
०३ १४ सर्वाश्च रेफलकारोपान्ता 54
०३ १५ शक्तिविषये द्रव्याणि 55
०३ १६ नाना बीजानि 55
०३ १७ पूर्वेषामुपस्पर्शने 56
०३ १८ उत्तमम् परिचक्षते 56
०३ १९ बन्धुशीललक्षणसम्पन्नामरोगामुपयच्छेत 57
०३ २० बन्धुशीललक्षणसम्पन्नश्श्रुतवानरोग 58
०३ २१ यस्याम् 58
०४ विवाहप्रकरणम् 61
०४ ०१ सुहृदस्समवेतान् मन्त्रवतो 61
०४ ०२ तानादितो द्वाभ्यामभिमन्त्रयेत 61
०४ ०३ स्वयन् दृष्ट्वा 62
०४ ०४ चतुर्थ्या समीक्षेत 63
०४ ०५ अङ्गुष्ठेनोपमध्यमया चाङ्गुल्या 64
०४ ०६ प्राप्ते निमित्त 64
०४ ०७ युग्मान् समवेतान् 65
०४ ०८ उत्तरेण यजुषा 66
स्नानम् 66
अहतस्य वाससः परिधानम् 67
योक्त्रबन्धनम् 67
०४ ०९ अथैनामुत्तरया दक्षिणे 68
०४ १० अग्नेर् 69
०४ ११ अथास्यै दक्षिणेन 70
०४ १२ यदि कामयेत 71
०४ १३ यदि कामयेत 71
०४ १४ गृभ्णामि त 72
०४ १५ अथैनामुत्तेरणाग्निन् दक्षिणेन 73
०४ १६ सखेति सप्तमे 74
०५ ०१ प्राग्घोमात् प्रदक्षिणमग्निम् 75
षोडश प्रधानाहुतिमन्त्राः 75
मन्त्रः 75
१४ त्वन्नो अग्ने 76

०५ ०२ अथैनामुत्तरेणाग्निन् दक्षिणेन 77
०५ ०३ अथास्या अञ्जलावुपस्तीर्य 78
०५ ०४ तस्यास्सोदर्यो 78
०५ ०५ जुहोतीयन् नारीति 79
०५ ०६ उत्तराभिस्तिसृभिः 80
०५ ०७ होमश्चोत्तरया यथा 81
०५ ०८ पुनः परिक्रमणम् 81
०५ ०९ आस्थापनम् पुनरपि 82
०५ १० होमश्चोत्तरया उत्तरया 83
०५ ११ पुनः परिक्रमणम् 83
०५ १२ जयादि प्रतिपद्यते 84
०५ १३ परिषेचनान्तङ् 84
०५ १४ समोप्यैतमग्निमनुहरन्ति एतम् 85
०५ १५ नित्यः 86
०५ १६ धार्यः एष 87
०५ १७ अनुगतो मन्थ्यः 88
०५ १८ श्रोत्रियागाराद्वाहार्यः 88
०५ १९ उपवासश्चान्यतरस्य भार्यायाः 89
०५ २० अनुगतेऽपि वोत्तरया 90
०५ २१ उत्तरा रथस्योत्तम्भनी 91
०५ २२ वाहावुत्तराभ्यां युनक्ति 91
०५ २३ आरोहतीमुत्तराभिरभिमन्त्रयते अथ 92
०५ २४ सूत्रे 93
०५ २५ ते उत्तराभिरभियाति 94
०५ २६ तीर्थस्थाणुचतुष्पथव्यतिक्रमे 95
तीर्थादिव्यतिक्रमे जपः 95
०६ ०१ नावमुत्तरयाऽनुमन्त्रयते अथ 95
०६ ०२ न च 96
०६ ०३ तीर्त्वोत्तराञ् जपेत् 97
०६ ०४ श्मशानादिव्यतिक्रमे भाण्डे 97
०६ ०५ क्षीरिणामन्येषां वा 98
नद्याद्यतिक्रमे जपः 99
०६ ०६ गृहानुत्तरया सङ्काशयति 99
०६ ०७ वाहावुत्तराभ्यां विमुञ्चति 100
०६ ०८ लोहितञ् चर्मानडुहम् 101
०६ ०९ न च 102
०६ १० उत्तरपूर्वे 102
मन्त्रः 103
उपवेषनम् 103
०६ ११ अथास्याः पुँस्वोर्जीवपुत्रायाः 104
मन्त्रः 105
०६ १२ उदितेषु नक्षत्रेषु 106
०७ ०१ अथैनाम् आग्नेयेन 107
०७ ०२ पत्न्यवहन्ति 108
०७ ०३ श्रपयित्वाभिघार्य 108
०७ ०४ सकृदुपस्तरणाभिघारणे 109

०७ ०५ अग्निर्देवता स्वाहाकारप्रदानः 110
०७ ०६ अपि वा 110
०७ ०७ अग्निस्स्विष्टकृद् द्वितीयः 111
०७ ०८ सकृदुपस्तरणावदाने 112
०७ ०९ मध्यात् पूर्वस्यावदानम् 112
०७ १० मध्ये होमः 113
०७ ११ उत्तरार्धादुत्तरस्य 113
०७ १२ उत्तरार्धपूर्वार्धे होमः 114
०७ १३ लेपयोः प्रस्तरवत् 115
०७ १४ सिद्धमुत्तरम् परिषेचनम् 115
०७ १५ तेन सर्पिष्मता 116
०७ १६ योऽस्यापचितस्तस्मा ऋषभम् 117
०७ १७ एवमत ऊर्ध्वम् 117
०७ १८ पूर्णपात्रस्तु दक्षिणेत्येके 118
०७ १९ सायम् प्रातरत 119
०७ २० स्थालीपाकवद्दैवतम् देवतैव 120
०७ २१ सौरी पूर्वाहुतिः 120
०७ २२ उभयतः परिषेचनम् 121
०७ २३ पार्वणेनातो ऽन्यानि 121
०७ २४ यथोपदेशन् देवताः 124
०७ २५ अग्निं स्विष्टकृतम् 124
०७ २६ अविकृतमातिथ्यम् 125
०७ २७ वैश्वदेवे विश्वे 126
वैश्वदेवम् 127
देवयज्ञः 128
पितृयज्ञः 128
भूत-यज्ञः 128
मनुष्य-यज्ञः 129
ब्रह्मयज्ञः 129
रौद्रम् 129
०७ २८ पौर्णमास्याम् पौर्णमासी 130
०८ ०१ उपाकरणे समापने 130
०८ ०२ सदसस्पतिर्द्वितीयः 131
उपाकर्मोत्सर्जनयोर् द्वैविध्यम् 131
काण्डानि 132
उपाकरणसमापने 132
अध्यायोपाकरणसमापने 132
आर्षेय-पाठ-पक्षः 132
सारस्वत-पाठ-पक्षः 133
आर्षेय-पाठिष्व् आचारभेदाः 133
शुक्रियाणाम् 133
अध्यायानाम् 133
काण्डानाम् 134
वेदव्रतानि 134
प्रयोगः 134
अध्यायोपाकरणस्य 134

उत्सर्गः 135
सौम्ये विशेषः 135
प्राजापत्य-व्रतम् 135
आरम्भः 135
समाप्तिः 136
आग्नेयम् 136
वैश्वदेवम् 136
सौम्यम् - शुक्रियम् 136
उपाकर्म 136
समाप्तिः 137
सूत्रपरीक्षा 137
सूत्राव्यर्थता 137
सदसस्पतेर् द्वितीयता 137
होम-स्थान-निर्देशः 137
आक्षेपान्तरम् 138
०८ ०३ स्त्रियाऽनुपेतेन 138
०८ ०४ यथोपदेशङ् काम्यानि 140
०८ ०५ सर्वत्र स्वयम् 141
०८ ०६ आपन्माश्रीः श्रीर्मागादिति 142
०८ ०७ एतदहर्विजानीयाद्यदहर्भार्यामावहते 142
०८ ०८ त्रिरात्रमुभयोरधश्शय्या 143
०८ ०९ तयोश्शय्यामन्तरेण दण्डो 144
०८ १० तञ् चतुर्थ्याऽपररात्र 144
शेष-होम-मन्त्राः 145
वध्वाश् शिरस्य् आज्यशेषानयनम् 145
परस्परवीक्षणम् 146
अथ जपः 146
०८ ११ अन्यो वैनामभिमन्त्रयेत 148
०८ १२ यदा मलवद्वासाः 149
०५ ऋतुसमवेशनम् 151
०८ १३ रजसः प्रादुर्भावात् 151
०९ ०१ चतुर्थीप्रभृत्याषोडशीमुत्तरामुत्तरां 151
०६ कर्मान्तराणि 153
०९ ०२ अर्थप्राध्वस्य परिक्षवे 153
०९ ०३ एवमुत्तरैर्यथालिङ्गञ् 154
०९ ०४ उभयोर्हृदयसंसर्गेऽप्सुस्त्रिरात्रावरम् 154
०९ ०५ श्वस्तिष्येणेति 155
०९ ०६ श्वोभूते 156
०९ ०७ वश्यो भवति 157
०९ ०८ सपत्नीबाधनञ्च 157
०९ ०९ एतेनैव कामेनोत्तरेणानुवाकेन 158
०९ १० यक्ष्मगृहीतामन्यां वा 159
०९ ११ वधूवास उत्तराभिरेतद्विदे 159
०७ उपनयनप्रकरणम् 161
१० ०१ उपनयनं व्याख्यास्यामः 161

१० ०२ गर्भाष्टमेषु ब्राह्मणमुपनयीत 161
१० ०३ गर्भैकादशेषु राजन्यम् 162
१० ०४ वसन्तो ग्रीष्मश् 163
१० ०५ ब्राह्मणान् भोजयित्वाशिषो 163
१० ०६ त्रींस्त्रीन् 165
१० ०७ वपन्तमुत्तरयानुमन्त्रयते 166
१० ०८ आनडुहे शकृत्पिण्डे 166
१० ०९ स्नातम् अग्नेर् 167
१० १० वासः 168
वासः-परिधापनम् 168
१० ११ मौञ्जीम् मेखलाम् 170
मौञ्जी 170
अजिनमन्त्रः 170
११ मित्रस्य चक्षुर्धरुणम् 170
१० १२ उत्तरेणाग्निन् दर्भान् 171
हस्तग्रहणम् 171
परिदानम् 172
उपनयनम् 172
११ ०१ ब्रह्मचर्यमागामिति कुमार 173
११ ०२ प्रष्टम् परस्य 174
११ ०३ शेषम् परो 175
११ ०४ प्रत्यगाशिषञ् चैनम् 175
११ ०५ उक्तमाज्यभागान्तम् 176
११ ०६ अत्रैनमुत्तरा आहुतीर्हावयित्वा 177
१६ त्वमग्ने अयाऽस्यया 178
११ ०७ परिषेचनान्तङ् 179
११ ०८ पुरस्तात्प्रत्यङ्ङासीनः कुमारो 180
११ ०९ तस्मा अन्वाह 180
११ १० पच्छोऽर्धर्चशस्ततस्सर्वाम् 181
११ ११ व्याहृतीर्विहृताः 182
पादशः 182
अर्धशः पूर्णश्श्च 182
पुनः पूर्णोच्यते कैश्चित् 182
११ १२ कुमार उत्तरेण 183
११ १३ कर्णावुत्तरेण 184
११ १४ दण्डमुत्तरेणाऽऽदत्ते 185
११ १५ पालाशो दण्डो 185
११ १६ वार्क्षो दण्ड 186
११ १७ स्मृतञ् च 187
वरदानम् 187
उत्थापनमन्त्रः 187
आदित्योपस्थानम् 187
११ १८ यङ् कामयेत 188
११ १९ त्र्यहमेतमग्निन् धारयन्ति 189
११ २० क्षारलवणवर्जनञ् च 190
११ २१ 'परित्वे' ति 190

समिदाधानम् 190
११ २२ एवमन्यस्मिन्नपि 192
११ २३ उत्तरया सँशास्ति 193
११ २४ वासश्चतुर्थीमुत्तरयादत्तेऽन्यत्परिधाप्य 194
०८ उपाकर्मोत्सर्जनप्रकरणम् 196
११उ ०१ 196
११उ ०२ 196
११उ ०३ 197
११उ ०४ 197
११उ ०५ 198
११उ ०६ 198
११उ ०७ 199
११उ ०८ 199
११उ ०९ 200
मन्त्राः 200
११उ १० 204
११उ ११ 204
११उ १२ 205
११उ १३ 206
११उ १४ 206
११उ १५ 207
११उ १६ 207
११उ १७ 208
११उ १८ 209
११उ १९ 209
११उ २० 210
११उ २१ 211
११उ २२ 211
११उ २३ 212
११उ २४ 212
११उ २५ 213
११उ २६ 214
०९ समावर्तनम् 215
१२ ०१ वेदमधीत्य स्नास्यन् 215
१२ ०२ नैनमेतदहरादित्योऽभितपेत् 215
१२ ०३ मध्यन्दिनेऽग्नेरुपसमाधानाद्याज्यभागान्ते 216
१२ ०४ जघनार्धे व्रजस्योपविश्य 217
१२ ०५ तां स 217
१२ ०६ एवं 218
१२ ०७ स्नानीयोच्छादितस्स्नातः 219
१२ ०८ उत्तरेन यजुषाऽहतमन्तरम् 219
१२ ०९ तस्य दशायाम् 221
१२ १० परिषेचनान्तङ् कृत्वताभिरेव 221
१२ ११ एवमुत्तरैर्यथालिङ्गं 222
१२ १२ वाचं यच्छत्यानक्षत्रेभ्यः 223

१२ १३ उदितेषु नक्षत्रेषु 224
१२ १४ रातिना सम्भाष्य 224
१० मधुपर्कः 226
१३ ०१ अथैतदपरन् तूष्णीमेव 226
१३ ०२ यत्रास्मा अपचितिम् 226
१३ ०३ एवमुत्तराभ्यां यथालिङ्गम् 227
१३ ०४ आपः पाद्या 228
१३ ०५ उत्तरयाऽभिमन्त्र्य दक्षिणम् 228
१३ ०६ प्रक्षालयितारमुपस्पृश्योत्तरेण 229
१३ ०७ कूर्चाभ्याम् परिगृह्य 230
१३ ०८ उत्तरयाऽभिमन्त्र्याञ्जलावेकदेश 230
१३ ०९ शेषम् 231
१३ १० दधि मध्विति 231
१३ ११ त्रिवृतमेके घृतम् 232
१३ १२ पाङ्क्तमेके धानास्सक्तूंश्च 232
१३ १३ उत्तराभ्यामभिमन्त्र्य 233
१३ १४ प्रतिगृह्यैव राजा 234
१३ १५ गौरिति गाम् 234
१३ १६ उत्तरयाभिमन्त्र्य तस्यै 235
१३ १७ यद्युत्सृजेदुपांशूत्तराञ् 236
१३ १८ अन्नम् 236
१३ १९ आचार्यायर्त्विजे श्वशुराय 237
१३ २० सकृत्प्रवक्त्रे चित्राय 238
११ सीमन्तोन्नयनम् 240
१४ ०१ सीमन्तोन्नयनम् प्रथमे 240
१४ ०२ ब्राह्मणान् भोजयित्वाऽऽशिषो 240
१४ ०३ परिषेचनान्तङ् कृत्वा 242
१४ ०४ 'गायतम्' इति 243
१४ ०५ उत्तरयोः पूर्वा 243
१४ ०६ नदीनिर्देशश्च यस्याम् 244
१४ ०७ यवान् विरूढानाबध्य 245
१४ ०८ उदितेषु नक्षत्रेषु 245
१२ पुंसुवनम् 247
१४ ०९ पुँसवनं व्यक्ते 247
१४ १० न्यग्रोधस्य या 247
१४ ११ अनवस्नातया कुमार्या 248
१४ १२ पुमाँसञ् जनयति 249
१४ १३ क्षिप्रँ सुवनम् 250
१४ १४ अनाप्रीतेन 250
मन्त्रः 251
१४ १५ यदि जरायु 252
१३ जातकर्म 253
१५ ०१ जातं वात्सप्रेणाभिमृश्योत्तरेण 253
उपस्थ आधानम् 254
अभिमन्त्रणम् 254

मूर्धन्यवघ्राणम् 254
दक्षिणकर्णे-जपः 254
१५ ०२ नक्षत्रनाम च 255
१५ ०३ तद्रहस्यम् भवति 256
१५ ०४ मधु घृतमिति 257
स्नापनम् 257
प्रतिज्ञा 257
शान्तिवचनम् 257
अवर्तिनिवारणम् 257
सूर्यग्रहणमोक्षनिदर्शनम् 258
दधि-घृत-प्राशनम् 258
१५ ०५ उत्तरया मातुरुपस्थ 259
दक्षिणे स्तने प्रतिधाप्य 259
पृथिव्या अभिमर्शः 259
संविष्टस्याभिमर्शनम् 259
१५ ०६ उत्तरेण यजुषा 260
सूतकहोमः 260
१५ ०७ एवमहरहरानिर्दशतायाः 262
१४ नामकरणम् 263
१५ ०८ दशम्यामुत्थितायां स्नातायाम् 263
१५ ०९ द्व्यक्षरञ् चतुरक्षरम् 263
१५ १० अपि वा 264
१५ ११ अयुजाक्षरङ् कुमार्याः 265
१५ १२ प्रवासादेत्य 266
कर्णे जपः 266
१५ १३ कुमारीमुत्तरेण 267
१५ अन्नप्राशनम् 269
१६ ०१ जन्मनोऽधि षष्ठे 269
१६ ०२ तैत्तिरेण माँसेनेत्येके 270
१६ चौलम् 271
१६ ०३ जन्मनोऽधि तृतीये 271
१६ ०४ ब्राह्मणानाम् भोजनम् 271
१६ ०५ सीमन्तवद् अग्नेर् 272
१६ ०६ अपरेणाग्निम् प्राञ्चमुपवेश्य 272
१६ ०७ यथा वैषाम् 273
१६ ०८ अपाँ 274
१६ ०९ क्षुरँ प्रक्षाल्य 274
१६ १० तेन त्र्यहम् 275
१६ ११ वरन् ददाति 275
१६ १२ एवङ् गोदानम् 276
१६ १३ अग्निगोदानो वा 276
१६ १४ संवत्सरङ् गोदानव्रत(२)मेक 277
१६ १५ एतावन्नाना सर्वान् 278
१६ १६ उदकोपस्पर्शनमिति छन्दोगाः 279
१७ गृह्यनिर्मणम् 280

१७ ०१ दक्षिणाप्रत्यक्प्रवणमगारावकाशमुद्धृत्य 280
१७ ०२ एवन् त्रिः 280
१७ ०३ क्लृप्तमुत्तरयाभिमृश्य 281
०२ स्योना पृथिवि 281
मन्त्रः - द्वारस्थूणामन्त्रणम् 281
१७ ०४ एवमितराम् एताभ्यामेव 282
१७ ०५ यथाखातमितरा अन्ववधाय 283
१७ ०६ सम्मितमुत्तरैर्यथालिङ्गम् 284
१८ गृहप्रवेशविधिः 285
१७ ०७ पालाशं शमीमयम् 285
अगारप्रतिपादनम् 285
प्रतिष्ठापनम् 285
इध्मादीपनम् 286
अग्नि-स्थापनम् 286
अग्निविवेकः 286
औपासनादि-प्रवेशः 286
प्रतिष्ठापनम् 286
अग्निविवेकः 287
१७ ०८ तस्माद्दक्षिणमुदधानायतनम् भवति 287
१७ ०९ तस्मिन्विषूचीनाग्रान् दर्भान् 288
१७ १० तस्मिन्नुत्तरेण यजुषा 288
१७ ११ दीर्घमुत्तरयाऽनुमन्त्रयते अथ 289
१७ १२ अग्नेरुपसमाधानाद्याज्यभागान्ते 290
२१ अमीवहा वास्तोष्पते 290
१७ १३ परिषेचनान्तङ् कृत्वोत्तरेण 291
अग्न्यन्तरानयनम् 291
ब्राह्मणभोजनम् 291
१९ बालग्रहगृहीतस्य कुमारस्य तन्निवर्तकं कर्म 293
१८ ०१ श्वग्रहगृहीतङ् कुमारम् 293
१८ ०२ अगदो भवति 294
१८ ०३ शङ्खिनङ् कुमारम् 294
१८ ०४ अगदो भवति 295
२० सर्पबलिः 297
१८ ०५ श्रावण्याम् 297
१८ ०६ पार्वणवदाज्यभागान्ते 298
१८ ०७ उत्तराभिस्तिसृभिरारग्वधमय्यस्समिधः 299
१८ ०८ आज्याहुतीरुत्तराः 299
१८ ०९ जयादि प्रतिपद्यते 300
१८ १० परिषेचनान्तङ् कृत्वा 301
बलिनिर्वापः 301
बलिहरण-सङ्कल्पः 301
१८ ११ तूष्णीं सम्पुष्का 302
१८ १२ उत्तरैरुपस्थायापः 303
प्रत्येत्य गृहपरिषेचनमन्त्रौ 303
उपस्थानमन्त्राः 303

मन्त्रः 303
१९ ०१ धानाः कुमारान् 307
१९ ०२ एवम् अत 307
१९ ०३ मार्गशीर्ष्याम् 308
१९ ०४ अहार्षमिति बलिमन्त्रस्य 309
१९ ०५ अत्रैनमुत्सृजति 310
२१ आग्रयणस्थालीपाकः 311
१९ ०६ अनाहिताग्नेराग्रयणम् 311
१९ ०७ नवानाँ स्थालीपाकँ 312
२२ हेमन्तप्रत्यवरोहणम् 314
१९ ०८ हेमन्तप्रत्यवरोहणम् 314
१९ ०९ उत्तरेण यजुषा 314
संवेशनमन्त्राः 314
१९ १० दक्षिणतः पितोत्तरा 315
१९ ११ सँहायोत्तराभ्याम् 316
०८ स्योना पृथिवि 316
१९ १२ एवं संवेशनादि 317
२३ ईशानबलिः 318
१९ १३ ईशानाय स्थालीपाकम् 318
१९ १४ अपरेणाग्निन् द्वे 318
२० ०१ उत्तरया 319
२० ०२ लौकिक्या वाचोत्तरस्याम् 320
२० ०३ मध्ये जयन्तम् 320
२० ०४ यथोढमुदकानि प्रदाय 321
हवनम् 321
२० ०५ उत्तरेण 322
२० ०६ पूर्ववदुत्तरैः 323
२० ०७ ओदनपिण्डं संवृत्य 324
२० ०८ अत्र रुद्रान् 325
२० ०९ प्रथमोत्तमौ वा 326
२० १० अभित एतमग्निम् 326
२० ११ ता 327
२० १२ गवाम् मर्गेऽनग्नौ 327
२० १३ ईशानवदावाहनम् 328
२० १४ चतुर्षु सप्तसु 329
२० १५ क्षिप्रं यजेत 329
२० १६ उत्तराभ्यामुपतिष्ठते 330
२० १७ स्थालीपाकम् ब्राह्मणान् 330
२० १८ क्षैत्रपत्यम् प्राश्नन्ति 331
२० १९ यथा वैषाम् 332
२४ मासिश्राद्धप्रकरणम् 333
२१ ०१ मासिश्राद्धस्यापरपक्षे 333
२१ ०२ शुचीन् मन्त्रवतो 333
२१ ०३ अन्नस्योत्तराभिर्जुहोति 335
पितामहाय 335

प्रपितामहाय 335
अन्येभ्यः 335
२१ ०४ आज्याहुतीरुत्तराः 336
२१ ०५ एतद्वा विपरीतम् 337
२१ ०६ सर्वमुत्तरैरभिमृशेत् 339
२१ ०७ क्लृप्तान्वा प्रतिपूरुषम् 340
२१ ०८ उत्तरेण यजुषोपस्पर्शयित्वा 340
२१ ०९ भुक्तवतोऽनुव्रज्य 341
उत्तरैर्दक्षिणापवर्गान् पिण्डान्दत्वा 341
उत्तरैरुपस्थानम् 342
उभयान् पिण्डान् परिषिञ्चति 342
शेष-प्राशनम् 342
पूर्वेद्युः 344
निवेदनम् 344
उपवीत-नियमः 344
होमात् पूर्वम् 344
आसनादि 345
अर्घ्यादि 345
अनुज्ञा 345
होमः 346
भोजनम् 346
अभिमर्शादि 346
स्पर्शनम् 347
श्रावणादि 347
परिकिरणम् 347
तृप्तिवचनादि 347
आशीर्वचनम् 348
प्रेषणम् 348
अनुव्रजनम् 348
प्राधान्यम् 349
आमश्राद्धम् 349
प्रयोगः 349
हिरण्यदानम् 350
उपसंहारः 350
२५ अष्टकाश्राद्धम् 351
२१ १० या माध्याः 351
२१ ११ तस्यास्सायमौपकार्यम् 351
२१ १२ अपूपञ् चतुश्शरावम् 352
२१ १३ अष्टाकपाल इत्येके 353
२२ ०१ पार्वणवदाज्यभागान्तेऽञ्जलिनोत्तरयाऽपूपाज्जुहोति 353
२२ ०२ सिद्धश्शेषस्तमष्टधा कृत्वा 354
२२ ०३ श्वोभूते दर्भेण 355
२२ ०४ तूष्णीम् पञ्चाज्याहुतीर्हुत्वा 355
श्वोभूते वपाहोममन्त्रः 355
२२ ०५ माँसौदनमुत्तराभिः 356

२२ ०६ पिष्टान्नमुत्तरया पिष्टेन 358
२२ ०७ आज्याहुतीरुत्तराः 358
२२ ०८ स्विष्टकृत्प्रभृति 359
२२ ०९ अन्वष्टकायामेवैके 360
२२ १० अथैतदपरन् दध्न 361
२२ ११ अत एव 362
२२ १२ तस्या मासिश्राद्धेन 362
२६ प्रकीर्णकर्माणि 365
२२ १३ सनिमित्वोत्तरान् जपित्वाऽर्थम् 365
२२ १४ रथं लब्ध्वा 365
२२ १५ उत्तरेण यजुषाऽधिरुह्योत्तरया 366
२२ १६ अश्वमुत्तरैरारोहेत् 367
२२ १७ हस्तिनमुत्तरया 367
२२ १८ ताभ्याँ रेषणे 368
०८ स्योना पृथिवि 368
२२ १९ संवादमेष्यन् सव्येन 369
२३ ०१ दक्षिणेन फलीकरणमुष्टिमुत्तरया 369
२३ ०२ क्रुद्धमुत्तराभ्यामभिमन्त्रयेत 370
२३ ०३ असम्भवेप्सुः परेषाँ 371
२३ ०४ सिद्ध्यर्थे बभ्रुमूत्रेण 371
२३ ०५ सिद्ध्यर्थे यदस्य 372
२३ ०६ यङ् कामयेत 373
२३ ०७ येन पथा 373
२३ ०८ यद्येनं 374
२३ ०९ आगारस्थूणाविरोहणे मधुन 375
२३ १० परिषेचनान्तङ् कृत्वाऽभिमृतेभ्य 376
Appendix - +Dyugangā द्युगङ्गा 378
Goals ध्येयानि 378
संस्कृतानुवादः 378
Contribution दानम् 378